4. L^1 हाम for हाउ; L^1My^2 °यशस्य for °यशे; L^1 My^2 उपद्रवे यो दात्व for उपद्रवभक्तौ योदाऽ६ । हाउवा
5. L^1My^2 after अत्र दी ins. वाश्वे जीती … श्वाची ॥ ८ ॥; L^1 आयासे for आयास्ये
7. L^1 सखा for साखा°
9. L^1 My^2 योदाउवा for योदा ओऽ२३४वा
11. L^1 My^2 om. अनुसरामः; S^4 om. पुऽरो३१ इति
14. L^1 My^2 om. प्रथमायां

कावे धिर तात्तीं अधि तृतीयायाम् ॥ १० ॥

दी. **अभ्योवा** (ऊ. द. १३) इति कावे **बृहन्नाधीऽ२३** । अत्र धीकारः प्रकृतिः । द्वितीयायां **नामाऽ३तात्तीं** । अत्र तीकारः प्रकृतिः । तृतीयायाम् **आधीऽ३ श्राइपा** । अत्र धीकारः प्रकृतिः ॥ १० ॥

ज्ञीये पप्रीं सर्वत्र सिषं दाशे जेषु ॥ ११ ॥

दी. **यज्ञाऽ५य** (ऊ. द. १४) इति यज्ञायज्ञीये **पप्रीऽ२म्वयममृतम्** । अत्र प्रीकारः प्रकृतिः । सर्वसामसु पप्रींशब्दः प्रकृतिः । उदाहरणम् – **यज्ञायज्ञाहिंवोऽ३ अग्रयाइ** (ऊ. ए. ४७९) इति विशोविशीये **पप्रीऽ२म्वयममृतम्** । अत्र प्रीकारः प्रकृतिः । एवं दैर्घश्रवादिषु । अत्र यज्ञायज्ञीये (ऊ. द. १४) द्वितीयायां **सूऽ३२शाःसीऽ ३षाम्** । अत्र सीकारः प्रकृतिः । तृतीयायां **दाशे** । अत्र शेकारः प्रकृतिः । **भुवद्वाजेऽ२-ष्ववि** । अत्र जेकारः प्रकृतिः ॥ ११ ॥

नार्मे मई दभि व्यभिस्तिशूह्माणि ॥ १२ ॥

दी. **अधाहीन्द्रगिर्वणाऽ३ए** (ऊ. द. १७) इति नार्मेधे **मईऽ२माऽ३४हइ** । अत्र ईकारः प्रकृतिः । **दाऽ२३४भीः** । **ए** । अत्र भीकारः प्रकृतिः । द्वितीयायां **वार्णात्वायव्याभीऽ३रे** । अत्र भीकारः प्रकृतिः । **वद्धान्तीऽ३शू** । अत्र तीकारः प्रकृतिः । **रन्नाऽ२ह्माऽ२३४णी** । अत्र णीकारः प्रकृतिः ॥ १२ ॥

---

6. L[1] My[2] after यज्ञायज्ञीये ins. न्धीगवेघजिनस्तावे अभी कावेधिरा तार्त्तीं अधितृतीयायां ज्ञीये पप्रीं सर्वत्र सिषं दाशेषु
7. L[1] after प्रीकारः om. प्रकृतिः; L[1]My[2] हम्मा for हिंवो
8. L[1]My[2] पप्रींशब्दः for प्रीकारः
9. L[1]My[2] before दैर्घ० ins. यज्ञा; L[1] om. यज्ञायज्ञीये
10. L[1] om. भुवद्वाजे .... भीकारः प्रकृतिः (L. 15)
15. L[1]My[2] after तीकारः om. प्रकृतिः

काण्वे तवेद् यन्ति यन्ति ॥ प्रथमः ॥ १३ ॥

दी. वयमूऽ३त्वातदिदर्थाः (ऊ. द. २०) इति काण्वे द्वितीयायां ताऽ२३४- वेत् । अत्र वेकारः प्रकृतिः । तृतीयायां नस्वमायस्पृहयाऽ२३न्ती । अत्र तीकारः प्रकृतिः । याऽ२३४न्ती । अत्र तीकारः प्रकृतिः ॥ १३ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य प्रथमः खण्डः ॥ १ ॥

इति फुल्लदीपे तृतीयाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

तृतीयः खण्डः — ऊहे दशरात्रे द्वितीयः

कक्षे सुते ॥ १ ॥

दी. इन्द्राय मद्वने सुतम् (ऊ. द. २१) इति श्रौतकक्षे द्वितीयायाम् आइन्द्र ५ सुतेऽ३ । अत्र तेकारः प्रकृतिः ॥ १ ॥

रात्रिदासे षि ॥ २ ॥

दी. अयन्तइन्द्रसोऽ४माः (ऊ. द. २२) इति रात्रिदैवोदासे निपूतो अधिबर्हा ऽ२३षी । अत्र षीकारः प्रकृतिः ॥ २ ॥

रात्रिपारे क्रूर्मिम् ॥ ३ ॥

---

1. P om. one यन्ति; $A^1A^2M^1M^2$ after एवमादीनि (P. 10. L. 14. Vide fn. 1) resume from काण्वे; $A^1A^2M^1M^2$ om. प्रथमः
3. My^2L^1 इति for अत्र; My^2 om. नस्वप्रा ···· न्ती । अत्र तीकारः प्रकृतिः (L. 4)
5. S^4 om. इति ऊहे दशरात्रे ···· प्रथमःखण्डः; My^3 after खण्डः ॥ writes the sutras 12 & 13
11. $AA^{1-2}M^{1-2}$ om. रात्रिपारे ... सफेषि ॥ ८ ॥ (P. 16. L. 18)
12. L^1My^2 om. अयन्त ... दैवोदासे; L^1 बर्णाष्टी for बर्हाऽ२३षी; S^5 after दैवोदासे adds: अत्र पूतो अधिबर्हिषी । षीकारः
13. L^1 ष्टी० for षी०;

दी. **आतून इ** (ऊ. द. २४) इति राज्याकूपारे द्वितीयायां **कूऽ३र्मीम्** । अत्र मीकारः प्रकृतिः ॥ ३ ॥

आर्षभे माकीम् ॥ ४ ॥

दी. **अभित्वावृषभासुते** (ऊ. द. २५) इत्यार्षभे द्वितीयायां **माऽ२ ३कीऽ३म्** । अत्र कीकारः प्रकृतिः ॥ ४ ॥

गारे भयिन् । ननि । गोभिः । त्वास्मिन् ॥ ५ ॥

दी. **इदंवसोसुतमन्धाऽ३ए** (ऊ. द. २६) इति गारे **आनाभाऽ३यीन्** । अत्र यीकारः प्रकृतिः । द्वितीयायाम् **आश्वोनाऽ३नी** । अत्र नीकारः प्रकृतिः । तृतीयायां **तन्तेयवऽयथागोभीऽ३रे** । अत्र भीकारः प्रकृतिः । **आइन्द्रात्वाऽ३स्मीन्** । अत्र स्मीकारः प्रकृतिः ॥ ५ ॥

सौमेधे तये । हुवे निधनयोः ॥ ६ ॥

दी. **योगेयोगेतवाहाउस्तारम्** (ऊ. द. २९) इति सौमेधे प्रथमायां निधने **द्रमूऽ३तयेऽ२३४५** । अत्र येकारः प्रकृतिः । द्वितीयायां निधने **पिताऽ३हूवेऽ२३४५** । अत्र वेकारः प्रकृतिः ॥ ६ ॥

कौत्से मेषु । मानि ॥ ७ ॥

दी. **इन्द्रसुतेषुसोमेषू** (ऊ. द. ३०) इति कौत्से प्रस्तावे । अत्र मेकारः प्रकृतिः । द्वितीयायां प्रस्तावे **सप्रथमेवियोमानी** । अत्र नीकारः प्रकृतिः ॥ ७ ॥

यौधाजय ॥ ८ ॥

---

6. S[4] भइन् for भयिन्
7. My[2] इति for अत्र
13. L[1] om. द्रमूऽ३तयेऽ२३४५ । अत्र येकारः प्रकृतिः । द्वितीयायां निधने
16. My[2] after कौ writes the sutras 5-10.

दी. **प्रसोऽ३१** (ऊ. द. ३३) इति यौधाजये **माऽ३दे**। अत्र देकारः प्रकृतिः ॥

सफे षि ॥ ९ ॥

दी. **अयापाऽ२३वस्व** (ऊ. द. ३५) इति सफे **परियाइषीऽ३वाऽ३इ**। अत्र षीकारः प्रकृतिः ॥ ९ ॥

ऐडयास्ये षसि। दसि। नोद्गीथादौ देवो द्वितीयः ॥ १० ॥

दी. **आइपुना** (ऊ. द. ४०) इत्यैडामायास्ये **नोअर्षसी**। अत्र सीकारः प्रकृतिः। **स्यसीदसी**। अत्र सीकारः प्रकृतिः। **उत्सोदेवाऽ१ः**। अत्र देकारः प्रकृतिः। द्वितीयायाम् **आउत्साः**। **दाइवो**। अत्र **उद्गीथादौ देवशब्दो न** प्रकृतिः। उद्गीथमध्ये तु **उत्सोदेवाऽ३१ः**। अत्र देशब्दः प्रकृतिः। ॥ १० ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य द्वितीयः खण्डः ॥ २ ॥

इति फुल्लदीपे तृतीयाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

चतुर्थः खण्डः – दशरात्रे तृतीयः

सिष्ठे षिपृ। थिवीम्। षिम। एषि ॥ १ ॥

दी. **औहोवाहाऽ३होइ**। **इहा**। **वृषाशोणो**। (ऊ. द. ४२) इति वासिष्ठे **पीऽ३पृथि**। अत्र षीकारः प्रकृतिः। **वीमुतद्याम्**। अत्र वीकारः प्रकृतिः। द्वितीयायां **पीऽ३मधु**। अत्र पीकारः प्रकृतिः। **एषिकृण्वान्**। अत्र एकारः प्रकृतिः ॥ १ ॥

श्यैते त्राणि ॥ २ ॥

---

7. L[1]My[2] om. प्रकृतिः; S[4] औत्सो for उत्सो
8. L[1]My[2] om. उद्गीथमध्ये तु
10. S[4] om. इति दशरात्रे …… द्वितीयः खण्डः
17. A[1-2]M[1-2] mo. श्यैते … रवे सति (३. ४. १३)

दी. **अभिप्रवःसुरा** (ऊ. द. ४३) इति **श्यैते** द्वितीयायां **हन्तिवृत्राणीऽ३दा** । अत्र णीकारः प्रकृतिः । ॥ २ ॥

छन्दसे गहि । नान्त्ये । तिवे ॥ ३ ॥

दी. **त्वामिदा** (ऊ. द. ४४) माधुच्छन्दसे द्वितीयायां **रमागहीऽ३ए** । अत्र हीकारः प्रकृतिः । अत्र प्रथमायामन्ते **रमागाऽ२३हाऽ३४३इ** । अत्र स्तोत्रीयान्ते वृद्धे गहि-शब्दे न प्रकृतिभावः ॥

अथ प्रकृतम् । तृतीयायां **तीवेधाऽ२३४सा:** । अत्र तीकारवेकारौ प्रकृती ॥ ३ ॥

ष्मते वे पूर्वम् । स्थाभिः । नधे ॥ ४ ॥

दी. **हाउयस्तेमदोवरेणियोहाउ** (ऊ. द. ४५) इति हाविष्मते द्वितीयायां **दाइवेदाऽ२३४इवाइ** । अत्र पूर्वस्य वेकारः प्रकृतिः । तृतीयायां **सूपस्थामीऽ३:** । अत्र भीकारः प्रकृतिः । **नाधेनूऽ२३४भाइ:** । अत्र धेकारः प्रकृतिः ॥ ४ ॥

शङ्कुनि माहि ॥ ५ ॥

दी. **पवस्वमा । एऽ२** (ऊ. द. ४६) इति **शङ्कुनि माहीऽ२यूक्षाऽ२३** । अत्र हीकारः प्रकृतिः ॥ ५ ॥

क्रौञ्चे भि ॥ ६ ॥

---

3. B¹B³S³ ती वे for तिवे
5. L¹My² after प्रकृतिः adds: रामागहि अत्र हीकारः प्रकृतिः; My² om. अत्र प्रथमायामन्ते; S⁴ अत्रान्त्ये हीकारः न प्रकृति; for अत्र स्तोत्रीयान्ते ...... न प्रकृतिभावः
7. L¹My² तिवेधसाः अत्र तिकारो वेकारश्च प्रकृतिः for तीवेधा ...... प्रकृती
8. S⁵ हाविष्मते for ष्मते
10. S⁵ पूर्व° for पूर्वस्य

दी. अयम्पूषा । हो । (ऊ. द. ४९) इति तृतीये क्रौञ्चे पाऽ२३४ती । अत्र निधने हीषीत्थं सर्वत्र (पु. ३. १. १२) इति तीकारः प्रकृतिः । तृतीयायां यः पञ्चचर्षणीरभीऽ१ । अत्र भीकारः प्रकृतिः ॥ ६ ॥

यामे पूर्वी ॥ ७ ॥

दी. आऽ२इ । इया । वृषामताइ (ऊ. द. ५०) इति यामे द्वितीयायां वींऽ३यः कविः । अत्र वीकारः प्रकृतिः ॥ ७ ॥

दꣳष्ट्रे पतिं द्वितीयम् । अभि ॥ ८ ॥

दी. इन्द्रंविश्वा अवीवृधन् (ऊ. द. २५) इत्याष्ट्रादꣳष्ट्राद्ये पताइम्पाऽ३तीऽ२३म् । अत्र द्वितीयस्य पतिशब्दस्य प्रकृतिः । द्वितीयायां तुवामाऽ१भीऽ२ । अत्र भीकारः प्रकृतिः ॥

ष्टम्भे ददे । वोवित्सर्वत्र । नामरूपामित्रविलम्बेषु ॥ ९ ॥

दी. उच्चाऽ५ते (ऊ. द. ५३) इति क्षुल्लकवैष्टम्भे मियादाऽ१देऽ२३ । अत्र देकारः प्रकृतिः । द्वितीयायां वराइवोऽ१वीऽ२३त् । अत्र वीकारः प्रकृतिः । सर्वसामसु वोविच्छब्दः प्रकृतिः । उदाहरणम् – उच्च । ए ऊच्चा (ऊ. स. ७६६) इत्यैटते द्वितीयायां वराइवोऽ२३४वीत् । अत्र वीकारः प्रकृतिः । एवमादीनि ॥

अथ निषेधमाह – उच्चाताऽ३इ (ऊ. द. १) इत्यामहीयत्रे द्वितीयायां वरिवोवाइत् । अत्र वीकारः न प्रकृतिः । ऊच्चातेऽ२३४जा (ऊ. सं. २५४) इति वैरूपे द्वितीयायां वोवाऽ३४औहोव । अत्र वीकारः न प्रकृतिः । उच्चातेजातमन्धसाऽ३ए (ऊ. स. ७३५) । इति सौमित्रे द्वितीयायां वोवाऽ२ओऽ२३ । अत्र वीकारो न प्रकृतिः । उच्चातेजातमन्धसः ।

---

1. L¹ तृतीय° for तृतीये
13. L¹My² ऐडते for ऐटते
14. My² om. एवमादीनि
15. L¹My² om. उच्चाताऽ३ .... वोवाऽ२ ओऽ२३ । अत्र वीकारो न प्रकृतिः (L. 18)

ईय (ऊ. स. ७६८) इति विलम्बसौपर्णे द्वितीयायां वोऽ२वाऽ२३४औहोवा । अत्र वीकारो न प्रकृतिः ॥ ९ ॥

मद्रे मनी ॥ १० ॥

दी॰ अभिसोमास आयवः । औहोवा (ऊ. द. ५४) इति पौरुमद्रे मानीपाऽ२३४इणाः । अत्र नीकारः प्रकृतिः ॥ १० ॥

संक्रोशे च ई । वह्निः । तिंब्र । मनी । धेन । वास्ति । मदे ॥ ११ ॥

दी. होइ । हो । हाऽ३होइ तिस्रो वाचाः (ऊ. द. ५७) इति संक्रोशे ईऽ३रय । अत्र ईकारः प्रकृतिः । तिप्रवह्नीः । अत्र ह्नीकारः प्रकृतिः । तीऽ३म्ब्रह्म । अत्र तीकारः प्रकृतिः । णोमनीषाम् । अत्र नीकारः प्रकृतिः । द्वितीयायां धेऽ३नवः । अत्र धेकारः प्रकृतिः । तृतीयायां नःसुवस्ती । अत्र स्तीकारः प्रकृतिः । तामदेना । अत्र देकारः प्रकृतिः ॥ ११ ॥

ष्टम्भे स्वब्दी ॥ १२ ॥

दी. वयंघत्वोहाइ (ऊ. द. ५८) इति महावैष्टम्भे द्वितीयायाम् इन्द्रास्वाऽ१-ब्दीऽ२३ । अत्र ब्दीकारः प्रकृतिः ॥ १२ ॥

रवे सति ॥ १३ ॥

दी. तरणिरित्साऽ३इषासाऽ२३४ती (ऊ. द. ५९) इति रौरवे प्रस्तावे षासाऽ-

---

1. L[1] om ईय
6. L[1]My[1]S[2] तींब्र for तिंब्र
9. S[4] om. द्वितीयायां
11. L[1] after प्रकृतिः adds: सू यामे पूर्वी-दंष्ट्रंपतिं द्वितीयं अगि.ष्टं देवोविरसर्वत्र न तीम्ब्ररूपमित्रविलम्बेषु मद्रेमनि
13. L[1] My[2] वैम्ष्टभे for महावैष्टम्भे

४२३ती। अत्र तीकारः प्रकृतिः ॥ १३ ॥

श्रौहे तिक ॥ १४ ॥

दी. **तिस्रोवाचाऽ२उदीरताइ** (ऊ. द. ६०) इति पाश्रौहे **हरिराऽ२३इती**। अत्र तीकारः प्रकृतिः ॥ १४ ॥

यन्तीस्तृतीयः ॥ १५ ॥

दी. अत्रैव द्वितीयायां **मर्जयाऽ२३न्तीः**। अत्र तीकारः प्रकृतिः ॥ १५ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य तृतीयः खण्डः ॥ ३ ॥

इति फुल्लदीपे तृतीयाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

पञ्चमः खण्डः — दशरात्रे चतुर्थः खण्डः

शौक्ते श्रिये ॥ १ ॥

दी. **सखा**। **यआओऽ२३४वा** (ऊ. द. ६२) इति **शौक्ते** **श्रियेऽ१**। अत्र येकारः प्रकृतिः ॥ १ ॥

त्वाष्ट्री सखे ॥ २ ॥

दी. **सुतासोमा** (ऊ. द. ६४) इति त्र्यन्ते त्वाष्ट्रीसाम्नि तृतीयायां **सखेन्द्रसाऽ३**

---

1. S^{4} om. षासाती
2. $A^{1}A^{2}M^{1}M^{2}$ after the break from एषि (३. ४. १) resume from श्रौहे तिक
6. $L^{1}My^{2}$ om. अत्रैव; S^{4} om. द्वितीयायां
7. S^{4} om. इति ऊहे .... खण्डः ॥ ३ ॥
13. $A^{1}A^{2}M^{1}M^{2}$ om. त्वाष्ट्री सखे ... एति राणि (३. ५. १४)
14. My^{2} त्र्यन्त for त्र्यन्ते

दिवा ऽ३इ । अत्र खेकारः प्रकृतिः ॥ २ ॥

प्रम ताग्ने द्युम्नी । भवी । भिः ॥ ३ ॥

दी. प्रमंहाऽ३इष्ठायगायता (ऊ. द. ६५) इति प्रमंहिष्ठीये ऋताग्नेऽ२ । अत्र ग्नेकारः प्रकृतिः । द्वितीयायां श्चोद्युम्नीऽ३याऽ३ । अत्र म्नीकारः प्रकृतिः । तृतीयायां अस्यसुमताइभाऽ३वीऽ३ । अत्र वीकारः प्रकृतिः । वाजाइभीऽ३राऽ३ । अत्र भीकारः प्रकृतिः ॥ ३ ॥

हारिवर्णे सहिम् । दिथ । पत्नीः ॥ ४ ॥

दी. तन्तेमदाऽ२ंगृणीमसाइ (ऊ. द. ६६) इति हारिवर्णे क्षुसासाऽ३हीऽ३म् । अत्र हीकारः प्रकृतिः । द्वितीयायां विवाइदीऽ३थाऽ३ । अत्र दीकारः प्रकृतिः । तृतीयायां वृषापाऽ३त्नीऽ३ः । अत्र त्नीकारः प्रकृतिः ॥ ४ ॥

रश्वे पूर्धि । असि । प्युषीम् ॥ ५ ॥

दी. श्रुधीहाऽ३वन्तिरश्विया: (ऊ. द. ६७) इति तैरश्वे रायास्पूर्द्धीऽ३ । अत्र धीकारः प्रकृतिः । महांऽ५ असी । अत्र सीकारः प्रकृतिः । द्वितीयायां स्यपाऽ५-इप्युषीम् । अत्र षीकारः प्रकृतिः ॥ ५ ॥

दंष्ट्रे वे । धनि ॥ ६ ॥

दी. तवाहंसोमरारणऐयादौ (ऊ. द. ६९) इत्याद्यादंष्ट्रोत्तरे दाइवेऽ२३ । अत्र वेकारः प्रकृतिः । द्वितीयायां धानीऽ२३ । अत्र नीकारः प्रकृतिः । एवमेव तृतीयायामपि ॥

शवे वेपूर्वम् । परि । तेदि ॥ ७ ॥

---

5. S[4] र्भाऽ नवीऽ३ for र्भाऽ३वीऽ३

13. S[6] असि for असी; S[6] सिकारः for सीकारः

17. My[2] धानी । अत्र नीकारः प्रकृतिः for अपि; My[2] om. एवमे॰

दी. **तवाह॰सोमरारणए** (ऊ. द. ७०) इत्याभीशवोत्तरे सख्य **इन्द्रोऽ३ दाइवेऽ१ दिवाइ** अत्र पूर्वेवेकारः प्रकृतिः । **पाऽ२३४री** । अत्र रीकारः प्रकृतिः । द्वितीयायाम् **अहन्नक्तमुतसोमातेऽ१ दिवाइ** । अत्र तेकारः दिकारश्च प्रकृती ॥ ७ ॥

साहीये विप्रम् । ध्रुवे ॥ ८ ॥

दी. **पुनाऽ३४** (ऊ. द. ७२) इति सत्रा साहीये **ताऽ२३इवी** । अत्र वीकारः प्रकृतिः । द्वितीयायां **ध्रूऽ२वे** । अत्र वेकारः प्रकृतिः ॥ ८ ॥

शोके मुरीम् । ओजि । कर्णे । स्विनः । यदी ॥ ९ ॥

दी. **विश्वोहाइ** (ऊ. द. ७३) इति त्रैशोके **स्थेमन्याऽ२मूऽ२३४रीम्** । अत्र रीकारः प्रकृतिः । **उग्रमोऽ२३४जी** । अत्र जीकारः प्रकृतिः । द्वितीयायां **अपाइकाऽ-२३४र्णे** । अत्र णेकारः प्रकृतिः । **तारस्वीऽ२३४नाः** । अत्र स्वीकारः प्रकृतिः । तृतीयायां **पताऽ२इर्याऽ२३४दी** । अत्र दीकारः प्रकृतिः ॥ ९ ॥

पृश्निनि स्य द्विस्तावे ॥ १० ॥

दी. **योराजाऽ२ चर्षणीना॰हाउ** (ऊ. द. ७४) इति **पृश्निनि** तृतीयायां प्रस्तावे यस्यद्वीऽ२३तावि । अत्र द्वीकारः प्रकृतिः ॥ १० ॥

और्णायवे याति महीं ॥ ११ ॥

दी. **परिप्रियाऽ२दिवः कवाइः** (ऊ. द. ७५) इति **और्णायवोत्तरे स्वानैर्याऽ-२३ती** । अत्र तीकारः प्रकृतिः । द्वितीयायां **महान्माऽ२३ही** । अत्र हीकारः प्रकृतिः ॥

हत्के वंहि । नावि स्तावे ॥ १२ ॥

---

2. L[1]My[2] रीकारस्य प्रकृतित्वं for रीकारः प्रकृतिः
3. L[1] om. दिकारश्च; L[1] प्रकृतिः for प्रकृती

दी॰ तुवः२ही (ऊ. द. ७६) इति बृहत्के । अत्र हीकारः प्रकृतिः । तृतीयायां प्रस्तावे येनवी अत्र वीकारः प्रकृतिः ॥ १२ ॥

षादीये वाति । अग्रे । अभि ॥ १३ ॥

दी. सोमःपुना (ऊ. द. ७७) इति आतीषादीये अव्यंबारंविधा ऽ१वाऽ३ती । अत्र तीकारः प्रकृतिः । अग्रेवाऽ२३४५ । अत्र ग्रेकारः प्रकृतिः । तृतीयायां लशा२-अभीऽ६ए । अत्र भीकारः प्रकृतिः ॥ १३ ॥

वात्सप्रे वते दवीः । एतिं । राणि ॥ १४ ॥

दी. हाउहाउहाउ । ओ । होहोवा । ओ । होहोवा । ओ । होहोवा । सोमःपवा (ऊ. द. ७९) इति वात्सप्रे तेजनि । अत्र तेकारः प्रकृतिः । द्वितीयायां वीःकवीनाम् अत्र वीकारः प्रकृतिः । एतिरेभन् । अत्र एकारः प्रकृतिः । तृतीयायां माऽवराणीसु । अत्र णीकारः प्रकृतिः ॥ १४ ॥

सैन्धुक्षिते नप्त्रे चतुर्थः ॥ १५ ॥

दी. अग्निर्वोवृधान्ताम् (ऊ. द. ८०) इति स्वारसैन्धुक्षिते अच्छाऽ२नाप्त्रेऽ२३ । अत्र त्रेकारः प्रकृतिः ॥ १५ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य चतुर्थः खण्डः ॥ ४ ॥

इति फुल्लदीपे तृतीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

षष्ठः खण्डः — दशरात्रे पञ्चमः

प्रिय इन्द्रा । ज्येष्ठम् । हरी । ब्रवी । त्सुरिन्द ॥ १ ॥

---

12. A[1]A[2]M[1]M[2] after the break at शौक्ते श्रिये (३. ५. १) resume सैन्धु क्षिते
13. L[1] om. स्वार
15. S[5] om. इति ऊहे दशरात्रे ... खण्डः ॥ ४ ॥

दी. **इममीऽ२३** (ऊ. द. ८१) इति **वसिष्ठप्रिये** । अत्र मीकारः प्रकृतिः । **ज्येष्ठाम्** । अत्र ज्येकारः प्रकृतिः । द्वितीयायां **हारी** । अत्र रीकारः प्रकृतिः । **यदीऽ३न्द्रायच्छासाऽ२इ** । अत्र दीकारः प्रकृतिः । अत्र प्रणते स्वरे स्वरमात्रायां विशेषः । विनतप्रणतयोरन्ते अर्धमात्रा नीचेन स्वरेण भवति । उच्चेऽध्यर्धा दीर्घे । ह्रस्वेऽर्धम् । विनतं प्रथमादि द्वितीयान्तम् । प्रणतं द्वितीयादि तृतीयान्तम् । अत्र शिक्षायां विशेषः —

अदीर्घं दीर्घवत् कुर्यात् द्विस्वरं यत्प्रयुज्यते ।
कम्पोत्स्वरिताभिगीतेषु ह्रस्वकर्षणमेव च ॥ (ना. शि.)

इति तृतीयायां **निच** । **ऽ३ग्रावीऽ१तानाऽ२** । अत्र वीकारः प्रकृतिः । **त्सुरीऽ२न्दाऽ२३४वाः** । अत्र रीकारः प्रकृतिः ॥ १ ॥

विते हेश ॥ २ ॥

दी. इन्द्र । जुषाऽ३ (ऊ. द. ८२) इति **गौरीविते** तृतीयायां **हेशत्रून्माऽ३१-२३** । अत्र हेकारः प्रकृतिः ॥ २ ॥

घ्रयश्वे तृभिः । येव । पेगो ॥ ३ ॥

दी. **सोमाःसोमाः** (ऊ. द. ८६) इति आनूपवाघ्रयश्वे **उष्वाणऽ३ःसोतृऽ१-भीऽ२ः** । अत्र भीकारः प्रकृतिः । **आश्वाऽ२येवाऽ२** । अत्र येकारः प्रकृतिः । द्वितीयाम् **आनूऽ२पेगोऽ२** । अत्र पेकारः प्रकृतिः ॥ ३ ॥

वाभ्रे मन्दी ॥ ४ ॥

दी. **सोमउष्वाणःसो** (ऊ. द. ८७) इति वाभ्रे तृतीयायां **मान्दीऽ२मादाऽ२** ।

---

1. L¹My² om. इति वसिष्ठप्रिये
7. L¹My² om. कम्पोत्स्वरित .... एव च
10. A¹A²M¹M² om. विते हेश ... हरी (३. ६. १३)
14. L¹My² वाघ्रयश्वे for आनुपवाघ्रयश्वे

अत्र दीकारः प्रकृतिः ॥ ४ ॥

यानि प्रग्रश्वे तान्यग्नेस्त्रिणिधने। मन्दी च ॥ ५॥

दी. **यानि** उदाहरणानि आनूपवाप्रग्रश्वे **तानि अग्नेस्त्रिणिधने** भवन्ति। **सोमउष्वा** (ऊ. द. ८८) इति **अग्नेस्त्रिणिधने णःसोतृऽ२३४भीः** । अत्र भीकारः प्रकृतिः । **आश्वायेऽ२३४वा** । अत्र येकारः प्रकृतिः । द्वितीयायाम् **आनूपेऽ२३४गो** । अत्र पेकारः प्रकृतिः ॥ ५ ॥

शैशवे यूꣳषि। पती पूर्वम्। नापि ॥ ६॥

दी. **यत्सोमचित्रमुक्थ्याम्** (ऊ. द. ८९) इति **शैशवे** द्वीतीयायां **वृषापुनानआयूꣳषी** । अत्र षीकारः प्रकृतिः । तृतीयायां **युवꣳहिस्थःसुवःपाती**। अत्र पूर्वस्य पतिशब्दस्य प्रकृतित्वम् । नाग्निमस्य । **ईशानाऽ२३४पी** । अत्र पीकारः प्रकृतिः ॥ ६ ॥

वने इपातिः ॥ ७॥

दी. **अभाऽ२३४इ** (ऊ. द. ९१) इति **च्यावने** तृतीयायां **नवाऽ२३४ इश्पतीद्दः** । अत्र तीकारः प्रकृतिः ॥ ७ ॥

क्रोशे प्रिया। त्रीणि। ते सर्वत्र विकृतमकारप्रत्ययम् ॥ ८॥

दी. **प्राणा** (ऊ. द. ९२) इति **क्रोशे प्रीऽ३या भूऽ३वात्** । अत्र प्रीकारः प्रकृतिः । तृतीयायां **त्रीणी** । अत्र णीकारः प्रकृतिः । **मिमाइतेऽ१आऽ२३** । अत्र तेकारः प्रकृतिः । सर्वसामसु वृद्धस्य तेशब्दस्य प्रकृतिभावः । **विकृते तेशब्देन सह संधौ** न प्राप्ते एतादृशे अकारे प्रत्यये सति । उदाहरणम् – **प्राणाशिशुः** (ऊ. सं. २८२) इति

---

2. S[4] °त्रीणिधने for °स्त्रिणिधने

3. L[1] om. यानि ... अत्र पेकारः प्रकृतिः (L. 5); My[a] om. आनूप°

9. S[4] पूर्वपतिशब्दः प्रकृतिः for पूर्वस्य पतिशब्दस्य प्रकृतित्वम्

14. B[1-3]S[3]P विवृत्तम् for विकृतम्; PS[3] अङ्कार° for अकार°

17. S[4] प्रकृतिः for प्रकृतिभावः; L[1] न संधिप्राप्ते for संधौ न प्राप्ते

सुज्ञाने मिमीते आऽ२ तृतीयायाम् । अत्र तेकारः प्रकृतिः ॥ ८ ॥

न मर्मज्यन्ते हिते । पवते दाशस्पत्ये ॥ ९ ॥

अथ निषेधमाह – **अचिक्रदृवृ** (ऊ. प्रा. ८४१) इति **संहिते** द्वितीयायां **मर्म्मृऽ३ ज्याऽ२३न्ताइ** । अत्र तेकारस्य न प्रकृतित्वम् । **इन्दुरौहोवाहाईया** (ऊ. द. ९५) इति **दाशस्पत्ये** द्वितीयायां **पवाताआउ** । अत्र तेकारस्य न प्रकृतित्वम् ॥ ९ ॥

पार्थे जभ्रि सर्वत्र ॥ १० ॥

दी. **ओऽ३होऽ२होइ । पव । स्ववाऽ२** (ऊ. द. ९४) इति **पार्थे** तृतीयायां **तिजभ्रीऽ२३४षाइ** । अत्र भ्रीकारः प्रकृतिः । सर्वसामसु जभ्रीशब्दः प्रकृतिः । उदाहरणम् – **पवस्ववा** (ऊ. अ. ६२३) इत्यातेये द्वितीयायां **तिजभ्रीऽ२३षाइ** । अत्र भ्रीकारः प्रकृतिः । एवमादीनि ॥ १० ॥

दाशस्पत्ये रातिम् । सखि ॥ ११ ॥

दी. **इन्दुरौहोवाहाईया** (ऊ. द. ९५) इति **दाशस्पत्ये तीऽ२३४५म्** । अत्र तीकारः प्रकृतिः । द्वितीयायां **स्यसाखीयाउ** । अत्र खीकारः प्रकृतिः ॥ ११ ॥

संजये द्यवि ॥ १२ ॥

दी. **आते अग्नइधी** (ऊ. गा. ९६) इति **संजये द्याऽ२३४वी** । अत्र वीकारः प्रकृतिः ॥ १२ ॥

मित्रे कृते । चिते । स्यवे । असि पूर्वम् ॥ १३ ॥

दी. **औहोहोइ । औऽ३होऽ३इ । ओऽ३२३४५वाऽ६५६ । इन्द्राऽ२य साम**

---

3. S[5] निषिद्धम् for निषेधम्
4. My[2]S[4] तेकारः न प्रकृतिः for तेकारस्य न प्रकृतित्वम्
5. My[2]S[4] तेकारः न प्रकृतिः for तेकारस्य न प्रकृतित्वम्

(ऊ. द. ९७) इति **सौमित्रे ब्रह्मकृतेऽ२ विपश्चितेऽ२३४५** । अत्र प्रथमो द्वितीयश्च तेकारौ प्रकृती । **पनस्यवेऽ२३४५** । अत्र वेकारः प्रकृतिः । द्वितीयायां **त्वमिन्द्राभि-भूरसीऽ२३४५** । अत्र पूर्वस्य सीकारस्य प्रकृतिः । नाग्निमस्य ॥ १३ ॥

महामित्रे गाहि । हरी ॥ १४ ॥

दी. **हयाइ** इत्यादि **असाविसो** (ऊ. द. ९८) इति **महावैश्वामित्रे** **प्वावागाहीऽ२** । अत्र हीकारः प्रकृतिः । द्वितीयायां **ह्मणाहारीऽ२** । अत्र रीकारः प्रकृतिः ॥ १४ ॥

क्रौञ्चे चो वित्सर्वत्र ॥ पञ्चमः ॥ १५ ॥

दी. **इन्द्रायेन्दाऽ१औहो** (ऊ. द. १००) इति **गायत्रीक्रौञ्चे** द्वितीयायां **वाऽ-३चोवीऽ२३४दाः** । अत्र वीकारः प्रकृतिः । सर्वसामसु चोविशब्दः प्रकृतिः । उदाहरणम् — **इन्द्रायेन्द्राउ** (ऊ. द. १०१) इति वाजदावर्ये द्वितीयायां **वचोऽ२वीऽ२३३दाः** । अत्र वीकारः प्रकृतिः ॥ १५ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य पञ्चमः खण्डः ॥ ५ ॥

इति फुल्लदीपे तृतीयाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

सप्तमः खण्डः — दशरात्रे षष्ठः

रयिं रन्धे ॥ १ ॥

---

1. L[1]My[2] प्रथमो द्वितीयश्च तेकारः; S[5] प्रथमद्वितीयतेकारे for प्रथमो द्वितीयाश्च तेकारौ
2. L[1]My[2] om. द्वितीयायां
5. L[1] हया ओहाओह for इत्यादि
7. A[1]A[2]M[1]M[2] om. विते हेश (३. ६. २) हरी and then resume from क्रौञ्च
10. L[1]My[2] वाजि° for वाज°
12. S[4] om. इति दशरात्रे ... पञ्चमः खण्डः

दी. मृज्यमानाः (ऊ. गा. १०२) इति औक्ष्णोरन्ध्रे रयीऽ३म्पाइशा । अत्र यीकारः प्रकृतिः ॥ १ ॥

न्वासि। रयिम्। रुणसाम्नि ॥ २ ॥

दी. मृज्यमानःसुहस्त्योवा (ऊ. गा. १०५) इति वरुणसाम्नि चमाइन्वाऽ१-सीऽ२ । अत्र सीकारः प्रकृतिः । राऽ२३यीम् । अत्र यीकारः प्रकृतिः ॥ २ ॥

भिर्वन्तीये ॥ ३ ॥

दी. रेवतीर्नां ओहोहाइ (ऊ. गा. १०८) इति वारवन्तीयोत्तरे तृतीयायाम् औहोऽ३१२३४ । भीः । अत्र भीकारः प्रकृतिः ॥ ३ ॥

विश्वे। असि निधने। दन्वते प्रथमे ॥ ४ ॥

दी. पाऽ५रि (ऊ. गा. १०९) इति प्रथमे वैदन्वते तृतीयायां विश्वेऽ३साऽ३-जोषसाः । अत्र श्वेकारः प्रकृतिः । षुसर्वधा असीऽ२३४५ । इति निधने सीकारः प्रकृतिः ॥ ५ ॥

परि। त्रेसो सर्वत्र। तुवे। सः पी। द्वितीये ॥ ५ ॥

दी. पारी (ऊ. गा. ११०) इति द्वितीये वैदन्वते रीकारः प्रकृतिः । पवाऽ२-इत्रेऽ२३४सो । अत्र त्रेकारः प्रकृतिः । सर्वसामसु त्रेसोशब्दः प्रकृतिः । उदाहरणम् – परिसुवानः (ऊ. सं. ३४८) इति संहिते त्रेऽ२३सो । अत्र त्रेशब्दः प्रकृतिः । तृतीयायां तूवे । अत्र वेकारः प्रकृतिः । देवाऽ२साऽ२३४५पी । अत्र पीकारः प्रकृतिः ॥ ५ ॥

---

1. S[4] स्वारमौक्ष्णोरन्ध्रे for औक्ष्णोरन्ध्रे
3. A[1]A[2]M[1]M[2] om. न्वासि … जूनि सूनि (३. ७. ११)
7. S[4] वारवन्तीये for वारवन्तीयोत्तरे
11. S[4] अत्र for इति
14. S[4] adds: अत्र before रीकारः
16. L[1] त्रेकारः for त्रेशब्दः

कविः। तुवे। श्वेस। सः पी। असि। तृतीये ॥ ६ ॥

दी. औऽ३होइ। इहहाइहहाइ। औऽ२होऽ२३४वा। पराइस्वाऽ२३४नो (ऊ. द. १११) इति तृतीये वैदन्वते द्वितीयायां तुवंकाऽ२३४वीः। अत्र वीकारः प्रकृतिः। तृतीयायां तुवेवाऽ२३४इश्वे। अत्र वेकारः श्वेकारश्च प्रकृती। देवासाऽ२३४ः पी। अत्र पीकारः प्रकृतिः। वेधा आऽ२३४सी। अत्र सीकारः प्रकृतिः ॥ ६ ॥

दीर्घ इन्द्रः। आये। नामि ॥ ७ ॥

दी. साम्र (ऊ. द. ११२) इति दीर्घे द्वितीयायां यास्याऽ२ ताईऽ२। अत्र ईकारः प्रकृतिः। तृतीयायां आयेऽ२नामीऽ२। अत्र येकारः मीकारश्च प्रकृती। अभ्यासेऽपि तथैव ॥ ७ ॥

कार्णश्रवस इव ॥ ८ ॥

दी. ताऽ२३४५०वः (ऊ. द. ११३) इति कार्णश्रवसे द्वितीयायां त्साऽ३४ई। अत्र ईकारः प्रकृतिः ॥ ८ ॥

वितेरे सर्वत्र ॥ ९ ॥

दी. सोमाः। पवाऽइ (ऊ. द. ११४) इति गौरीविते अरेऽ५पसाः। अत्र रेकारः प्रकृतिः। सर्वसामसु अरेशब्दस्य प्रकृतिभावः। उदाहरणम् — सोमाऽ३१ः (ऊ. अ. ६०८) इति श्यावाश्वे मित्रास्वाना आऽ३रेऽ३। अत्र रेकारः प्रकृतिः ॥ ९ ॥

क्रौञ्चे धियाः ॥ १० ॥

दी. सोमाः पावाऽ२३४ (ऊ. द. ११६) इति वाङ्निधने क्रौञ्चे सुवाधिया-ऽ३१२३ः। अत्र धीकारः प्रकृतिः ॥ १० ॥

---

4. S[4] om. तृतीयायां

8. L[1]My[2] एकारमीकारौ for येकारः मीकारश्च

9. L[1]My[2] विकल्पे for अभ्यासे

15 L[1]My[2] अरेशब्दः प्रकृतिः for अरेशब्दस्य प्रकृतिभावः

श्रौष्टे सूनि। जूतिम्। सूनि॥ ११ ॥

दी॰ औहोहाइ। अयोहाइ। (ऊ. गा. ११८) इति श्रौष्टे पवापवस्वैनावसू-ऽ२३नी। अत्र नीकारः प्रकृतिः। ब्रभ्राश्चियस्यवातोनजूऽ२३तीम्। अत्र तीकारः प्रकृतिः। द्वितीयायां षष्टिं॰सहस्रा नैगुतोवसूऽ२३नी। अत्र नीकारः प्रकृतिः ॥ ११ ॥

गूर्दे छदी षष्ठः ॥ १२ ॥

दी. ओग्नाइ (ऊ. द. ११९) इति गूर्दे तृतीयायां चाइष्टाऽ२३दी। अत्र दीकारः प्रकृतिः ॥ १२ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य षष्ठः खण्डः ॥ ६ ॥

इति फुल्लदीपे तृतीयाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

अष्टमः खण्डः — दशरात्रे सप्तमः

तानिपर्णकूलीयेषु न्वे वा ॥ १ ॥

दी. वृषाहाउ (ऊ. गा. १२१) इति सन्तनिनि द्वितीयायां हिन्वेहाउ। अत्र न्वेकारः प्रकृतिः। वृषापवोवा (ऊ. गा. १२२) इति ऐडं॰सौपर्णे द्वीतीयायां हाऽ२इन्वै। अत्र न्वेकारः प्रकृतिः। वृषापवस्वधा (ऊ. गा १२३) इति रोहितकूलीयोत्तरे द्वितीयायां हाइन्वेऽ२वाजाऽ२३इ। अत्र न्वेकारः प्रकृतिः ॥ १ ॥

ण्वतरे षासि पूर्वम् ॥ २ ॥

दी. पुनानःसोमधायार (ऊ. गा. ११४) इति कण्वरथन्तरे नोऽ३आर्षाऽ३सी। अत्र पूर्वस्य सीकारस्य प्रकृतिभावः। नाग्रिमस्य ॥ २ ॥

---

2. My² om. श्रौष्टे

16. A¹⁻²M¹⁻² om. ण्वतरे .... वीङ्के स्ति वी (३ ८. १२)

17. My² om. नो अर्षसी

18. S⁴ पूर्वसीकारः प्रकृतिः for पूर्वस्य सीकारस्य प्रकृतिभावः; My² र्षसिशब्दस्य प्रकृतिः for सीकारस्य प्रकृतिभावः

यास्ये षसि। दसि। प्रियम्। षसि ॥ ३ ॥

दी. पुनानःसोमधारया। एऽ३ (ऊ. गा. १२६) इति **साप्तमिके द्विनिधने आयास्ये षाऽ३सीऽ२३४५**। अत्र सीकारः प्रकृतिः। **दाऽ२३४सी**। अत्र सीकारः प्रकृतिः। द्वितीयायां **प्रीऽ२३४याम्**। अत्र प्रीकारः प्रकृतिः। तृतीयायां **षाऽ२३४सी**। अत्र सीकारः प्रकृतिः ॥ ३ ॥

अभ्यन्ते वणे। सुते रेके। स्वब्दी। कण्वे। दर्षि। ॥ ४ ॥

दी. औहोहोहाइ। आइही। वायाम् (ऊ. गा. १२८) इति **अभिनिधने काण्वे प्रास्नावाऽ२३४णे**। प्रास्नावाऽ२३४णे। अत्र णेकारः प्रकृतिः ॥ द्वितीयायां **सुतेनाऽ२३४राः**। अत्र तेकारः प्रकृतिः। **वासोनाऽ२३४इरे**। अत्र रेकारः प्रकृतिः। **आइन्द्रास्वाऽ२३४ब्दी**। अत्र ब्दीकारः प्रकृतिः। तृतीयायाम् **आइही**। **काण्वे**। अत्र ण्वेकारः प्रकृतिः। **वाजन्दाऽ२३४र्षी**। अत्र षीकारः प्रकृतिः ॥ ४ ॥

खानसे सहिमभ्यासे। माने ॥ ५ ॥

दी. नकिष्टाऽ३ङ्कर्मणानशत् (ऊ. द. १२९) इति **वैखानसे** द्वितीयायां **सुसासहीम्**। इत्यभ्यासे सहिशब्दे हीकारः प्रकृतिः। तृतीयायां **जायमाने**। अत्र नेकारः प्रकृतिः ॥ ५ ॥

मौक्षे स्थाभिः ॥ ६ ॥

दी. यस्तेमदोवरेणियः। औहोवा (ऊ. द. १३०) इति **दक्षणिधनमौक्षे**

---

2. L¹My² om. साप्तमिके; S⁴ साप्तमिकमायास्ये for साप्तमिके द्विनिधने आयास्ये
4. S⁴ om. द्वितीयायां
7. My² om. अभिनिधने
9. My² om. सूतेना ... प्रकृतिः
14. S⁴ अत्र for इतिः My² om. सहिशब्दे
17. My² om. दक्षणिधन०

तृतीयायां सूपस्थाऽ२३मीः । अत्र मीकारः प्रकृतिः ॥ ६ ॥

शार्कर इवोद्गीथे। वर्मी ॥ ७ ॥

दी. एषाऽ३स्य धारयासुताः (ऊ. द. १३१) इति शार्करे द्वितीयायां क्रीड-न्नूर्मिरपाऽ१मीऽ३वा इति उद्गीथे मीकारः प्रकृतिः । तृतीयायां वर्मीवाऽ२ । अत्र मीकारः प्रकृतिः ॥ ७ ॥

प्लवे नी। षी। समी। अभि। यवी ॥ ८ ॥

दी. हावोऽ३हा । वोऽ३हाऽ३ । हावोऽ२३४वा हाइ सखायाऽ२३४आ इति प्लवे (ऊ. द. १३२) नीषीदाऽ२३४ता । अत्र नीकारः षीकारश्च प्रकृती । द्वितीयायां सामीवाऽ२३४त्साम् । अत्र मीकारः प्रकृतिः । मादामाऽ२३४भी । अत्र भीकारः प्रकृतिः । तृतीयायां याऽ२३४वी । अत्र वीकारः प्रकृतिः ॥ ८ ॥

कार्तयशे। तीवो। यिलवे ॥ ९ ॥

दी. पुरोहाहाउ ((ऊ. गा. १३४) इति कार्तयशे नाऽ२३४इती । अत्र तीकारः प्रकृतिः । दइलवेऽ२ । अत्र वेकारः प्रकृतिः । द्वितीयायां योऽ२३४दी । अत्र यो वृद्धादी सर्वत्र (३. २. ८) इत्यनेन दीकारस्य प्रकृतिभावः ॥ ९ ॥

हविषे याहि ॥ १० ॥

दी. प्रवाजियक्षाः (ऊ. गा. १३५) इति सौहविषे तृतीयायां प्रसोमयाही । अत्र हीकारः प्रकृतिः ॥ १० ॥

वात्से त्राहि ॥ ११ ॥

---

1. S[4] om. तृतीयायां
4. S[4] om. तृतीयायां
13. S[4] अत्र यो वृद्धादीसर्वत्रेत्यनेन । योऽ२३४ दी । अत्र दीकारः प्रकृतिः for योऽ२३दी ··· प्रकृतिभावः
14. My[2] वृद्धादिः for वृद्धादी; My[2] प्रकृतिः for प्रकृतिभावः
18. L[1]My[2] om. वात्से ... प्रकृतिः (p. ३४. l. 2)

दी. **आतेवत्सा:** (ऊ. गा. १३७) इति **वात्से** द्वितीयायां **पुरुत्राही** । अत्र हीकार: प्रकृति: ॥ ११ ॥

वीङ्के । स्ति । वीवी ॥ १२ ॥

दी. **यदिन्द्रचित्रमइ** (ऊ. गा. १३९) इति **वीङ्के** **आस्ती** । अत्र स्तीकार: प्रकृति: । **वीवीऽ२** । अत्र वीकारद्वयं प्रकृति: ॥ १२ ॥

रूपे पावि । तवे । इन्दो । पीयू सर्वत्र ॥ १३ ॥ सप्तमः ॥

दी. **अध्वर्योऽ२३४आ** (ऊ. गा. १४०) इति **वैरूपे** **सोमाऽ२म्पाऽ२३४वी** । अत्र वीकार: प्रकृति: । यपातवेऽ२३४५ । अत्र वेकार: प्रकृति: । द्वितीयायां **तवत्याऽ२-३४ई** । अत्र ईकार: प्रकृति: । तृतीयायां **दिव:** **पीऽ२३४यू** । अत्र पीकार: प्रकृति: । सर्वसामसु पीयूशब्दस्य प्रकृतिभाव: । उदाहरणम् – **अध्वौहोवा** (ऊ. गा. १४२) इति **मार्गीयवे** **पीयूऽ२** । अत्र पीकार: प्रकृति: ॥ १३ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य सप्तम: खण्ड: ॥ ७ ॥

इति फुल्लदीपे तृतीयाध्यायस्य अष्टम: खण्ड: ॥ ८ ॥

नवम: खण्ड: — दशरात्रे अष्टम:

हीन्द्रा । तवे । यवे ॥ १ ॥

रा. **अध्वौहोवा** ((ऊ. गा. १४२) इति मार्गीयवे **हीऽ२३४न्द्रा** । अत्र हीकार: प्रकृति: । **एऽ३ – तवेऽ२३४५** । अत्र वेकार: प्रकृति: ॥ १ ॥

---

3. A¹A²M¹M² om. ण्वतरे (३. ८. २) वीङ्के स्ति वी
5. L¹my² वीकारो वीकारश्च for वीकारद्वयम्
6. S⁴ वैरूपे for रूपे
10. S⁴ ०शाब्द: प्रकृति: for ०शब्दस्य प्रकृतिभाव:; My² प्रकृति: for प्रकृतिभाव:
12. S⁴ om. इति ऊहे दशरात्रे ... खण्ड: ॥ ७ ॥
15. A¹⁻²M¹⁻² add आशुभार्गवे before हीन्द्रा

पवि टते ॥ २ ॥

र. अध्व । ए अध्वा (ऊ. गा. १४४) इति ऐटतो सोमाऽ२प्याऽ२३४वी । अत्र वीकारः प्रकृतिः ॥ २ ॥

तवे पर्णे ॥ ३ ॥

रा. अध्वर्यो अद्रिभिःसुतम् (ऊ. गा. १४६) इति विलम्बसौपर्णे यपातवेऽ२-३४५ । अत्र वेकारः प्रकृतिः ॥ ३ ॥

पार्श्वेऽभि ॥ ४ ॥

रा. आभी (ऊ. गा. १४८) इति गायत्रपार्श्वे प्रस्तावे भीकारः प्रकृतिः ॥ ४ ॥

हन्मगतयोर्मनी ॥ ५ ॥

रा. अभिसोऽ३ मास आयवाः (ऊ. गा. १४९) इति पौरुहन्मने मानीषाऽ२-३४इणाः । अत्र नीकारः प्रकृतिः । अभिसोऽ३मासआयवाः (ऊ. गा. १५०) इति द्वैगते द्रस्याधिविष्टपेमानीऽ१षिणाऽ२ः । अत्र नीकारः प्रकृतिः ॥ ५ ॥

हदुक्थे भिर्ये ॥ ६ ॥

र. प्रहिन्वानऋ (ऊ. गा. १५३) इति बार्हदुक्थे नृभिर्येमाऽ२ । अत्र येकारः प्रकृतिः ॥ ६ ॥

उद्वद्भार्गवे भ्रे ॥ ७ ॥

दी. धातोदाइवाऽ२३ः (ऊ. गा. १५४) इत्युद्वद्भार्गवे तृतीयायां विद्युदाभ्रेऽ२३ । अत्र भ्रेकारः प्रकृतिः ॥ ७ ॥

नैप नृभिः । नव । वैशे । न स्तावे ॥ ८ ॥ अष्टमः ॥

---

1. A[1-2]M[1-2] om. पवि टते .... नैपे नृभिः (३. ९. ८)

19. P. वैहे for नृपे

दी. यदिन्द्रप्रगापागुदाऽ३गे (ऊ. गा. १५५) इति नैपातिथे यसाइनृभीः३ः । अत्र भीकारः प्रकृतिः । सियानवेऽ२३ । अत्र वेकारः प्रकृतिः । द्वितीयायां धतूर्वशेऽ३ । अत्र शेकारः प्रकृतिः । असिप्रशर्धतुर्वशाऽ३ए इति प्रस्तावे शेकारस्य न प्रकृतिः । अत्र प्रथमायां निधने ह्रीषीस्वरे वाऽ२३४शे । अत्र शेकारः प्रकृतिः ॥ ८ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य अष्टमः खण्डः ॥ ८ ॥

इति फुल्लदीपे तृतीयाध्यायस्य नवमः खण्डः ॥ ९ ॥

दशमः खण्डः — दशरात्रे नवमः

ऐषिरे दी द्वितीयम्। देवपूर्वम्। श्पतिः। स्वरी ॥ १ ॥

दी' अभित्युम्नं बृहद्याऽ३शाः (ऊ. गा. १६१) इत्यैषिरे दाइदीऽ१ हाइदेऽ२। अत्र द्वितीयस्य दीकारः प्रकृतिः । हाइदेऽ२ । [—वादाऽ१इवायूऽ२म्] । अत्र पूर्वस्य देकारस्य प्रकृतिभावः । नाग्निमस्य । तृतीयायां विशांवह्निर्न्नविश्पाऽ३तीः । अत्र तीकारः प्रकृतिः । पावस्वारीऽ२ । अत्र रीकारः प्रकृतिः ॥ १ ॥

धर्मणि तादे। धर्त्तासि ॥ २ ॥

दी औहोऽ३वा इत्यादि पवस्वसोममहान्त्समुद्राऽ१ः (ऊ. गा. १६९) इति धर्मणि पितादेऽ२वानाऽ२७१म् विश्वाभिधामाऽऽ२३४५ । अत्र देकारः प्रकृतिः । इति द्विपदाकारे। अथ चतुष्पदाकारे पितादेऽ२ वानाऽ२३४५म् । अत्र देकारः प्रकृतिः ।

---

4. L[1] om. अत्र प्रथमायां … । शेकारः प्रकृतिः

10. S[4] देकारः प्रकृतिः । नग्निमस्य । अत्र द्वितीयस्य दीकारः प्रकृतिः । अत्रैव देकारश्च प्रकृतिः for दीकारः प्रकृतिः । …। नाग्निमस्य ।

11. My[2] प्रकृतिः for प्रकृतिभावः

14. L[1] om. इत्यादि पवस्व … मुद्रा

15. S[4] om. विश्वाभिधामाऽ२३४५

16. My[2]L[1] om. अत्र देकारः प्रकृतिः

तृतीयायां दिवोधर्त्तासीऽ२३४५ । अत्र चतुष्पदाकारे सीकारः प्रकृतिः ॥ २ ॥

विशोवीन्दुम् । मही । निया । ष्टुतिम् ॥ ३ ॥

दी. हिन्वाहिंताऽ३ इम्र् (ऊ. द. १७०) इति विशोविशीये । ईऽ२३४-न्दुम् । अत्र ईकारः प्रकृतिः । माऽ३हीऽ३ । अत्र हीकारः प्रकृतिः । द्वितीयायां नीऽ३याऽ३ । अत्र नीकारः प्रकृतिः । तृतीयायां नाऽ३ ष्टूऽ३तीम् । अत्र तीकारः प्रकृतिः ॥ ३ ॥

शने थिम् । तिंये ॥ ४ ॥

दी. प्रेष्ठंवाः (ऊ. द. १७१) इति गायत्र्यौशने अंताऽ२३ इथीम् । अत्र थीकारः प्रकृतिः । द्वितीयायां निमार्तीऽ३येऽ३ । अत्र तींकारो येकारश्च प्रकृती ॥ ४ ॥

मारुते कविः । यसीः ॥ ५ ॥

दी. पुरांभिन्दुर्युवाकवीः (ऊ. द. १७३) इति मारुते कवीः । अत्र वीकारः प्रकृतिः । तृतीयायां तिभूऽ५यसीः । अत्र सीकारः प्रकृतिः ॥ ५ ॥

भ्रवे स्तोत्रे ॥ ६ ॥

दी. पवमाना (ऊ. द. १७८) इति बाभ्रवे तृतीयायां स्तोत्रऽ३हाइ । अत्र त्रेकारः प्रकृतिः ॥ ६ ॥

संक्षारे नवि ॥ ७ ॥ नवमः ॥ ९ ॥

दी. औहोइ हुवाऽ३होइ पवमानऽ३स्याऽ३ जिघ्नतः (ऊ. द. १७९) इति

---

1. L[1] om. चतुष्पदाकारे
9. My[2] प्रकृतिः for प्रकृती
14. SS om. पवमाना ... स्तोत्रे; SS पहाइ for हाइ

इडानांसंक्षारे तृतीयायां पवमानाऽ३वीऽ३ यश्नुहि । अत्र षीकारः प्रकृतिः ॥ ७ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य नवमः खण्डः ॥ ९ ॥

इति फुल्लदीपे तृतीयाध्यायस्य दशमः खण्डः ॥ १० ॥

एकादशः खण्डः — दशरात्रे दशमः

आंशिवे सुते ॥ १ ॥

दी. परीतोषिञ्चतासुतम् । ए । (ऊ. द. १८६) इत्याभीशवाद्ये तृतीयायां सुऽ२३४ते । अत्र तेकारः प्रकृतिः ॥ १ ॥

सामराजे षि । षिमा । यासि ॥ २ ॥

दी. हाउहोवाऽ३हाइ । असाविसोमोऽ३आ (ऊ. द. १८८) इति सामराजे तियाऽ३इषीऽ३ । अत्र षीकारः प्रकृतिः । श्येनोनयोनिऽ३ङ्घा । अत्र निकारः प्रकृतिः । अत्र अदीर्घं दीर्घवित् कुर्यात् द्विस्वरं यः प्रयुज्यते । (ना. शि.) इत्यनेन अदीर्घत्वम् । द्वितीयायां तेव्राऽ३इतेऽ३ । अत्र तेकारः प्रकृतिः । सर्वत्र विवृतमकार-प्रत्ययम् (पु. सू. ३. ६. ८) इत्यनेन तेकारस्य प्रकृतिभावः । तृतीयायां रियाऽ३इषीऽ३ । अत्र षीकारः प्रकृतिः । रियाऽ६सीऽ३ । अत्र सीकारः प्रकृतिः ॥ २ ॥

श्रायन्तीये नदी परिकृष्टम् । प्रति प्रथमायाम् ॥ ३ ॥

दी. श्रायन्तइवसूऽ१ रायाम् (ऊ. द. १८९) इति श्रायन्तीये प्रथमायाम् उपरिकृष्टस्य कर्षणस्य नदीशब्दस्य प्रकृतिः । प्रतिभागनदीऽ२धिमः । अत्र दीकारः

---

1. My[2] वीकारस्य for वीकारः
10. L[1] नीकारः for निकारः
11. ss om. द्विस्वरं यः प्रयुज्यते
12. L[1] दीर्घत्वम् for अदीर्घत्वम्
17. S[5] दीशब्दस्य for नदीशब्दस्य

प्रकृतिः । प्रथमायां प्राऽ२३ती । अत्र तीकारः प्रकृतिः ॥ ३ ॥

मन्ते षोवि। नोद्गीथे। स्यासि ॥ ४ ॥

दी. यतइन्द्रभयामहाइ (ऊ. द. १९०) इति समन्ते वि – द्वाइषोऽ२३वीऽ३ । अत्र वीकारः प्रकृतिः । द्वीतीयायां विद्विषोवाइमृधोजहाइ । अत्र उद्गीथे विकारः न प्रकृतिः । यास्याऽ२३सीऽ३ । अत्र सीकारः प्रकृतिः ॥ ४ ॥

काशीते त्राजित् ॥ ५ ॥

दी. त्वᳲसोमासि – धाऽ२रयूः (ऊ. द. १९४) इति प्रतीचीनेडंकाशीते द्वितीयायां इन्दुस्सत्राजीऽ३दा। अत्र जीकारः प्रकृतिः ॥ ५ ॥

निह्वे रेण सर्वत्र ॥ ६ ॥ दशमः ॥ १० ॥

दी. आइहीऽ३ – आइही – एहिया – ओऽ२३४वाहाइ – परित्यᳲहर्यताऽ३ᳲ हाराऽ३इम् (ऊ. द. १९९) इति निहवे रेण सर्वत्र । सर्वेषु रेणशब्देषु प्रकृतिः । बभ्रुं पुनन्तिवांऽ३ रे णाऽ३ – रेणा – रेणा । अत्र सर्वेषां रेकाराणां प्रकृतिभावः ॥ ६ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य दशमः खण्डः ॥ १० ॥

इति फुल्लदीपे तृतीयाध्यायस्य एकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः — दशरात्रे एकादशः

सिते योदे सर्वत्र। मदे। नरे सर्वत्र ॥ १ ॥

दी. परित्यᳲहर्यताम् । हराइम् (ऊ. द. २०१) इति आसिताये योदेऽ२-

---

4. My[2] after उद्गीथे om. वीकारः
11. L[1] om. रेण सर्वत्र
17. L[1] om. परित्य हर्यताम् .... उदाहरणम् (p. 40, l. 1)

बान्वाऽ२इ । अत्र देकारः प्रकृतिः । सर्वसामसु यो-दे-शब्दस्य प्रकृतिः । उदाहरणम् — परित्याऽ२३९हर्यत९हरि९हाउ । इत्यासितोत्तरे यो देवाऽ३न्वाऽ३इ । अत्र देकारः प्रकृतिः । मादेऽ२नासाऽ२इ । अत्र देकारः प्रकृतिः । तृतीयायां नारेऽ२ चादाऽ२ । अत्र रेकारः प्रकृतिः । सर्वसामसु नरे-शब्दस्य प्रकृति [भाव]: । उदाहरणम् — इन्द्राऽ५य (ऊ. अ. ५७३) इति आहीनिके यज्ञायज्ञीये नरेऽ२च । अत्र रेकारः प्रकृतिः । पराऽ५इत्यम् (ऊ. अ. ६६१) इत्याहीनिके यज्ञायज्ञीये तृतीयायां नरेऽ२च । अत्र रेकारः प्रकृतिः ॥ १ ॥

त्रिधर्माणि जान्ति ॥ २ ॥

टी. ओहोऽ३वा ओहोऽ२वाऽ२३४ ओहोऽ६ वा । पवस्वसोममहेदक्षाया-ऽ२३४५ (ऊ. द. २०४) इति त्रिधर्मिणि शिशुंजज्ञान९हरिंमृजन्तीऽ२३४५ । अत्र तीकारः प्रकृतिः । चतुष्पदाकारेऽप्येवम् ॥ २ ॥

त्रैककुभे विवा । पमि ॥ ३ ॥

टी. य एक इद्विदायाऽ३ताइ (ऊ. द. २०७) इति त्रैककुभे द्वितीयायां सुवा-वा९आवीऽ३वा । अत्र वीकारः प्रकृतिः । तृतीयायां पदाक्षुंपामीऽ३वा । अत्र मीकारः प्रकृतिः ॥ ३ ॥

वङ्शीये मि रे । शामि ॥ ४ ॥

टी. गायन्ति त्वा गायत्रिण आ (ऊ. द. २०८) इत्युद्व९शीये उद्व९शमिव-याऽ१इमीऽ३रे । अत्र मीकारः रेकारश्च प्रकृती । उद्व९शाऽ२३४मी । अत्र मीकारः प्रकृतिः ॥ ४ ॥

---

1. My² om. सर्वसामसु ... प्रकृतिः (L. 3)
2. Y¹ परित्वं हर्यतं हरिम् for परित्या .... हाउ
5. L¹ My² om आहीनिके; L¹ My² om. पराइत्यं ... रेकार प्रकृतिः ।
10. My² L¹ चतुष्पदोपि ती प्र for चतुष्पदाकारेऽप्येवम्
12. L⁶ तृतीयायां for द्वितीयायां
13. S⁴ om. तृतीयायां

जिगे तेजा ॥ ५ ॥

दी. उच्चातेजा (ऊ. द. २०९) इति आजिगे तेकारः प्रकृतिः ॥ ५ ॥

आभीके ददे ॥ ६ ॥

दी. ऊ२३४ च्चातेजाऽ५ (ऊ. द. २१०) इति आभीके दिविसद्भूमियाऽ१दाऽ३दे । अत्र देकारः प्रकृतिः । द्वितीयायां वरिवोऽ२३४वीत् । अत्र वोवित्सर्वत्र (पु. सू. ३. ४. ९) इति प्रकृतिः ॥ ६ ॥

ज्ञीये षसि पूर्वम् ॥ ७ ॥

दी. पुनाऽ५नः (ऊ. द. २१२) इति यज्ञायज्ञीये नोऽ३आर्षाऽ३सी । अत्र पूर्वस्य षसिशब्दस्य प्रकृतिभावः । नाग्रिमस्य ॥ ७ ॥

वर्त्ते त्येम । धीतम् ॥ ८ ॥

दी. उदूऽ३त्येऽ३माधुमत्तमोवा (ऊ. द. २१६) इति अभीवर्ते त्येकारः प्रकृतिः । द्वितीयायां विश्वामाऽ१ इद्धीऽ२ । अत्र धीकारः प्रकृतिः ॥ ८ ॥

रोहितपूर्वे सइ । स्यचे ॥ ९ ॥

दी. इन्द्रमच्छा (ऊ. द. २१७) इति पूर्वरोहितकूलीये साऽ२३ई । अत्र ईकारः प्रकृतिः । द्वितीयायां स्याऽ२३चे । अत्र चेकारः प्रकृतिः ॥ ९ ॥

वाश्वे नई । गोजी । जिये ॥ अभि ॥ १० ॥

दी. पराऽ३१इ । ऊऽ३षु (ऊ. द. २१८) इति श्यावाश्वे धियाऋणयानाऽ३ईऽ३ । अत्र ईकारः प्रकृतिः । द्वितीयायां कमनापयोगोऽ३जीऽ३ । अत्र जीकारः

---

2. S[4] before तेकारः adds: अत्र
8. S[1] My[2] इति for अत्र;
9. S[4] पूर्वसीकारः for पूर्वस्य षसिशब्दस्य
11. S[4] before त्येकारः adds: अत्र
18. My[2] om. प्रकृतिः

प्रकृतिः । तृतीयायाम् यैराजियेवाऽ३जा॰ऽ३। अत्र येकारः प्रकृतिः । आऽ२३४मी । अत्र भीकारः प्रकृतिः ॥ १० ॥

धीगवे परि । नई । महे । अभि ॥ ११ ॥

दी. **पर्यूषुप्रधाऽ१न्वावा** (ऊ. द. २१९) इति **आन्धीगवे येपाऽ२३री** । अत्र रीकारः प्रकृतिः । **नाऽ२३ई** । अत्र ईकारः प्रकृतिः । तृतीयायां **सिमाऽ२३हे** । अत्र हेकारः प्रकृतिः । **समर्यराज्येवाजा॰अभीऽ२३४५** । अत्र भीकारः प्रकृतिः ॥ ११ ॥

सौह पर्यभ्यासे ॥ १२ ॥

दी. **प** । **यैंपारी** (ऊ. द. २२०) इति **वाङ्निधनसौहविषे यैंपारी** इत्यभ्यासे रीकारः प्रकृतिः ॥ १२ ॥

दव्ये प्रेद्धो ॥ १३ ॥ दशरात्रः ॥

दी. **ओऽ५ग्निम्** (ऊ. द. २२२) इति **वामदव्ये** तृतीयायां **प्रेऽ५द्धः** । अत्र प्रेकारः प्रकृतिः ॥ १३ ॥

इति ऊहे दशरात्रे प्रकृतिभावस्य एकादशः खण्डः ॥ १० ॥

॥ दशरात्रः समाप्तः ॥

इति फुल्लदीपे तृतीयाध्यायस्य द्वादशः खण्डः ॥ ११ ॥

अथ संवत्सरः

त्रयोदशः खण्डः — संवत्सरे प्रथमः

पार्थे वक्ति । ति । तिसा । जूतिम् । मते ॥ १ ॥

दी. **ओऽ३होऽ३होइ** । **प्रकावियाम्** (ऊ. सं. २२७) इति **पार्थे मावि-**

---

8. S[4] अत्र for इति

18. My[2] begins: श्रीगणेशाय नमः ।; L[1]My[2] trans. पार्थे वक्ति ... भीकारः प्रकृतिः [p. 43, l. 15] after एकारः प्रकृतिः (p. 44, l. 17)

वंक्ती । अत्र क्तीकारः प्रकृतिः । **तीऽ३राऽ५इ** । अत्र तीकारः प्रकृतिः । द्वितीयायां **तीऽ३ साऽ५** । अत्र **तीकारः** प्रकृतिः । तृतीयायम् **यस्यजूतीम्** । अत्र तीकारः प्रकृतिः । **तेनगावाः** । अत्र **तेकारः** प्रकृतिः ॥ १ ॥

बोधीये स्थाभिः ॥ २ ॥

दी. यस्तेमदोवा (ऊ. सं. २२९) इति **जराबोधीये** तृतीयायां **सूपास्थाऽ२-३भीः** । अत्र **भीकारः** प्रकृतिः ॥ २ ॥

कावे भिधे ॥ ३ ॥

दी' प्रोवा (ऊ. सं. २३२) इति **कावे** द्वितीयायाम् **आमीऽ३धेना** । अत्र **भी-कारः धे-कारश्च** प्रकृती ॥ ३ ॥

साहीये नप्त्रे ॥ ४ ॥

दी. अग्नाऽ३४इम् (ऊ. सं. २३३) इति **सत्रासाहीये नाऽ२३प्त्रे** । अत्र **त्रेकारः** प्रकृतिः ॥ ४ ॥

श्वे माहि ॥ ५ ॥

दी. प्रसोमासोऽ२ विपश्चिताः (ऊ. सं. २३४) इति **आश्वे वनानिमाऽ२३ही** । अत्र **ही-कारः** प्रकृतिः ॥ ५ ॥

वर्त्ते भिर्न्न ॥ ६ ॥

दी. तंवोऽइदाऽ३स्माग्र (ऊ. सं. २३६) इति **अभीवर्ते इन्द्रांगाऽ१इर्भीऽ२ः** । अत्र **भी-कारः** प्रकृतिः ॥ ६ ॥

दले त्रे सर्वत्र । विवृत्तमकारप्रत्ययम् ॥ ७ ॥ प्रथमः ॥ १ ॥

दी. सवीरोदा (ऊ. सं. २४१) इति **औदले त्रे आऽ२न्यता** । अत्र **त्रे-कारः**

प्रकृतिः । सर्वसामसु वृद्धस्य तेकारस्य प्रकृतिः । विवृत्ते त्रेकारेण सह न संधिप्राप्ते । एतादृशे अकारप्रत्यये । उदाहरणम् । प्रसुन्वानायाऽ३अन्धसाः (ऊ. स. २०) इति स्वारकौत्से तृतीयायां त्रेऽ३ आन्याऽ३ता । अत्र त्रेकारः प्रकृतिः ॥ ७ ॥

इति ऊहे संवत्सरे प्रकृतिभावस्य प्रथमः खण्डः ॥ १ ॥

इति फुल्लदीपे तृतीयाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

चतुर्दशः खण्डः — संवत्सरे द्वितीयः

हिन्वे ष्मते ॥ १ ॥

रा. हाउवृषापवस्वधारयाहाउ (ऊ. सं. २४३) इति हाविष्मते द्वितीयायां हिन्वेवाऽ३जाइ । अत्र न्वे-कारः प्रकृतिः ॥ १ ॥

हविर्दसे ॥ २ ॥

राः परीतोषा । होइ । (ऊ. सं. २४५) इति माधुच्छन्दसे तामःहाऽ२३४वीः । अत्र वी-कारः प्रकृतिः ॥ २ ॥

यानि सिष्ठे तानि पार्थे ॥ ३ ॥

री. औहोत्राहाऽ३होइ इत्यादि वृषाशोणो (ऊ. द. ४२) इति वासिष्ठे यानि उदाहरणानि तानि वृषाशोणो (ऊ. सं. २४८) इति पार्थे भवन्ति । औऽ३होऽ३होइ-वृषाशोणो इति पार्थे पीऽ३पृथि । अत्र पी-कारः प्रकृतिः । वीमुतद्याम् । अत्र वीकारः प्रकृतिः । द्वितीयायां पीऽ३मधु । अत्र पी-कारः प्रकृतिः । एषिकृण्वान् । अत्र ए-कारः प्रकृतिः ॥ ३ ॥

वर्त्ते हस्ते । स्तावेणे ॥ ४ ॥

---

1. L[1] संवान्धि° for संन्धि°
2. L[1] ककारे for अकार°

दी. अभाऽ३ इम्राऽ३वस्सु (ऊ. सं. २४९) इति अभीवर्ते सहास्रेऽ१णाऽ२इ । अत्र स्रे-कारः प्रकृतिः । द्वितीयायां सहाऽ३स्रेऽ३णेव । अत्र प्रस्तावे स्रे-कारो णेकारश्च प्रकृती ॥ ४ ॥

शङ्कुनि महि ॥ ५ ॥

दी. पवस्वमा (ऊ. सं. २५०) इति शङ्कुनि माहीऽ२द्युक्षाऽ२३ । अत्र ही-कारः प्रकृतिः ॥ ५ ॥

दंष्ट्रे पतिम् ॥ ६ ॥

दी. इन्द्रं विश्वा अवीवृधन्नेयादौ । होऽ३वा (ऊ. सं. २५३) इति आष्टादंष्ट्रोत्तरे पातीऽ२३म् । अत्र ती-कारः प्रकृतिः ॥ ६ ॥

रूपे तेजा ॥ ७ ॥

दी. उच्चातेऽ२३४जा (ऊ. सं. २५४) इति वैरूपे तेऽ२३४जा । अत्र ते-कारः प्रकृतिः ॥ ७ ॥

अग्नेस्त्रिणिधने भिर्ये ॥ ८ ॥

दी. प्रहिन्वानाः (ऊ. सं. २५६) इति अग्नेस्त्रिणिधने नृभिर्येऽ२३४मा । अत्र र्ये-कारः प्रकृतिः ॥ ८ ॥

ये ष्ठौहे ते ष्टम्भे ॥ ९ ॥

दी. तिस्रोवाचाउदीरताइ (ऊ. द. ६०) इति पाष्ठौहे ये द्वे उदाहरणे ते वैष्टम्भे भवतः । तिस्रोऽ५वा (ऊ. सं. २५८) इति क्षुल्लकवैष्टम्भे हाराइराऽ१ इतीऽ२३ । अत्र ती-कारः प्रकृतिः । द्वीतीयायां मर्जायाऽ१न्तीऽ२३ः । अत्र न्ती-कारः प्रकृतिः ॥

---

5. s[4] om. पवस्वमा इति शङ्कुनि
11. s[4] om. तेऽ२३४जा
19. L[1] om. अत्र तीकारः प्रकृतिः

दासे समी ॥ १० ॥

दी. **सखाऽ३१** (ऊ. सं. २६१) इति **दैवोदासे** द्वितीयायां **समीऽ३१** । अत्र **मी**-कारः प्रकृतिः ॥ १० ॥

धीगवे वे पूर्वम् ॥ ११ ॥ द्वितीयः ॥ २ ॥

दी. **सुतासोमधुमाऽ१त्तमाः** (ऊ. सं. २६२) इति **आन्धीगवे** तृतीयायां **दाऽ२३इवे** । अत्र पूर्वस्य वे-कारस्य प्रकृतिः । नाग्रिमस्य ॥ ११ ॥

इति ऊहे संवत्सरे प्रकृतिभावस्य द्वितीयः खण्डः ॥ २ ॥

इति फुल्लदीपे तृतीयाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

पञ्चदशः खण्डः — संवत्सरे तृतीयः

सामराजे सइत् वन्ति । पवि । धिरो । नमिरे ॥ १ ॥

दी. **पवौहोवा** (ऊ. सं. २६३) इति **सामराजे शात्तोऽ३साईत्** । अत्र **ई**-कारः प्रकृतिः । द्वितीयायाम् **आवाऽ३न्तीया** । अत्र **ती**-कारः प्रकृतिः । **स्यापात्वीऽ२३४ता** । अत्र **वी**-कारः प्रकृतिः । **आधीरोऽ२३४हा** । अत्र **धी**-कारः प्रकृतिः । तृतीयायां **मामीरेऽ२३४आ** । अत्र **मी**-कारो **रे**-कारश्च प्रकृती ॥ १ ॥

भीशवे सुते ॥ २ ॥

दी. **परीतोषिञ्चतासुतम्** । ए । ए । ((ऊ. सं. २६६) इत्याभीशवोत्तरे तृतीयायां **सूऽ२३४ते** । अत्र **ते**-कारः प्रकृतिः ॥ २ ॥

उहुवाइसिष्ठे । हेम । भिःसमम् । पर्ये-
तिरे । मन्ति । क्षैतः ॥ ३ ॥

---

5. before अत्र S[4] adds: इति

दी. उहुवाइ। अस्याऽ३४औहोवा (ऊ. सं. २६८) इति वासिष्ठे हेऽ३मना। अत्र हे-कारः प्रकृतिः। भीऽ३स्सम। अत्र भी-कारः प्रकृतिः। एतिरेमान्। अत्र ए-कारो रेफश्च प्रकृती। तीऽ३होऽ५। अत्र ती-कारः प्रकृतिः। तृतीयायां क्षैतोअस्माइ। अत्र क्षै-कारः प्रकृतिः ॥ ३ ॥

पूर्वे और्णायवे कविः। शुचिः। ये चोत्तरे ॥ ४ ॥

दी. परिप्रियादिवःकावीः (ऊ. सं. २७०) इति पूर्वे और्णायवे कावीः। अत्र वी-कारः प्रकृतिः। द्वितीयायां सद्मनुम्मातराशूचीः। अत्र ची-कारः प्रकृतिः। परिप्रियाऽ२दिवःकवाइः (ऊ. द. ७५) इति और्णायवोत्तरे ये च द्वे उदाहरणे ते अत्र भवतः। प्रथमायां स्वानैर्याऽ२३ती। अत्र ती-कारः प्रकृतिः। द्वितीयायां महान्माऽ२३ही। अत्र ही-कारः प्रकृतिः ॥ ४ ॥

लौशे नाति ॥ ५ ॥

दी. प्रोअयासीत् (ऊ. सं. २७६) इति लौशाद्ये तीऽ३संगिरम्। अत्र ती-कारः प्रकृतिः ॥ ५ ॥

शुद्धीये द्धेन। शीवान्। गहि। रयिम्। मद्धि। रयिम् ॥ ६ ॥

दी. एतोन्विन्द्रꣳस्तवाऽ३मा (ऊ. सं. २७४) इतिशुद्धाशुद्धोये शुद्धꣳशुद्धे। अत्र द्धे-कारः प्रकृतिः। शुद्धैराऽ२३शी। अत्र शी-कारः प्रकृतिः। द्वितीयायाम् इन्द्रशुद्धोनआगाऽ३ही। अत्र ही-कारः प्रकृतिः। शुद्धोराऽ३यी३म्। अत्र यी-कारः प्रकृतिः। धीसोमिय। अत्र धी-कारः प्रकृतिः। तृतीयायाम् इन्द्रशुद्धोहिनोराऽ३यीम्। अत्र यी-कारः प्रकृतिः ॥ ६ ॥

भ्रयश्चेऽभि ॥ ७ ॥

दी. अभीअभी (ऊ. सं. २७८) इति आनूपंवाभ्रयश्चे। अत्र भीकारद्वयं प्रकृतिः ॥

---

3. S[4] रेकारः for रेफः

21. L[1] भीकारो भीकारश्च for भीकारद्वयं

म्रे ष्टपे ॥ ८ ॥

दी. **अभिसोमासआ** (ऊ. सं. २७८) इति **वाम्रे**। **धिवाइष्टापे**। अत्र **पे**-कारः प्रकृतिः ॥ ८ ॥

सम्पायां वाणीः। वारि। नानि। व्यूतिः।
चीने। रन्धी ॥ ९ ॥ तृतीयः ॥ ३ ॥

दी. **ओऽ३हाइ। ओऽ३हा। ओहा। इयाऽ२। ओऽ३हाऽ३ए। अभित्रिपा** (ऊ. सं. ७९) इति **सम्पावैयश्वे शन्तवाणीः**। अत्र **णी**-कारः प्रकृतिः। **रीऽ३याऽ५-णाऽ६५६इ**। अत्र **री**-कारः प्रकृतिः। द्वितीयायां **ताधनानी**। अत्र **नी**-कारः प्रकृतिः। तृतीयायां **तीऽ३रभ**। अत्र **ती**-कारः प्रकृतिः। **समीचीने**। अत्र **ने**-कारः प्रकृतिः। **स्वापुरन्धी**। अत्र **धी**-कारः प्रकृतिः ॥ ९ ॥

इति ऊहे संवत्सरे प्रकृतिभावस्य तृतीयः खण्डः ॥ ३ ॥

इति फुल्लदीपे तृतीयाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

षोडशः खण्डः — संवत्सरे तृतीयः

दासे त्रीणि ॥ १ ॥

दी. **प्राणाऽ३१** (ऊ. सं. २८३) इति **दैवोदासे** तृतीयायां **त्रीणीऽ३१**। अत्र **णी**-कारः प्रकृतिः ॥ १ ॥

रयिष्ठे र्मणि। पूर्वम् ॥ २ ॥

दी. **पवस्वत्रा** (ऊ. सं. २८४) इति **रयिष्ठे** द्वितीयायां **पवमानविधर्मणीऽ२३-४५**। अत्र पूर्वस्य **णी**-कारस्य प्रकृतिभावः। नाग्रिमस्य ॥ २ ॥

---

19. S[4] पूर्वणीकारः प्रकृतिः, My[2] पूर्वस्य णीकारः प्रकृतिः for पूर्वस्य णीकारस्य प्रकृतिभावः

हृद्यभ्यालौशे राजे ॥ ३ ॥

दी. असाविसोमो अरुषो वृषा (ऊ. सं. २८५) इति द्विरभ्यासं लौशे राजेऽ ३१२३४ । अत्र जे-कारः प्रकृतिः ॥ ३ ॥

साध्ये श्रेष्ठ ॥ ४ ॥

दी. याऽ५जि (ऊ. सं. २८६) इति साध्ये द्वितीयायाम् आग्निमूश्रेऽ२३ । अत्र श्रे-कारः प्रकृतिः ॥ ४ ॥

मन्ते वारे ॥ ५ ॥

दी. मृज्यमानस्सुहस्तिया (ऊ. सं. २८८) इति समन्ते द्वितीयायां रेपवमा । अत्र रे-कारः प्रकृतिः ॥ ५ ॥

सिष्ठे नुत्रीः। नक्षे। धन्वे। स्त्रिया। भिस्स ।
चते। सुमे। णन्ति ॥ ६ ॥

दी. औहोवाहाऽ३होइ । इहा। साकमुक्षो (ऊ. सं. २९०) इति वासिष्ठे योधनुत्रीः । अत्र त्री-कारः प्रकृतिः । क्षेऽ३अति । अत्र क्षे-कारः प्रकृतिः । द्वितीयायां न्वेऽ३पुरु । अत्र न्वे-कारः प्रकृतिः । स्त्रीऽ५या । अत्र स्त्री-कारः प्रकृतिः । तृतीयायां भीऽ३स्सच । अत्र भी-कारः प्रकृतिः । तेसुमेधाः । अत्र ते-कारः मे-कारश्च प्रकृती । तीऽ३वसु । अत्र ती-कारः प्रकृतिः ॥ ६ ॥

वर्त्ते दिये ॥ ७ ॥

दी. पिबाऽ३सूऽ३तस्य (ऊ. सं. २९१) इति अभीवर्ते दियेवाऽ१र्धाऽ२इ । अत्र ये-कारः प्रकृतिः ॥ ७ ॥

---

5. S[4] उग्रऽ३ष्ठाऽ३ for आग्निमूश्रेऽ२३.
8. My[2]. om. द्वितीयायां
9. My[2] om. प्रकृतिः

मरुतांधेनौ मनि। यद्गी। नुषी॥ ८॥

दी. श्राऽ२३४इः। अस्मै (ऊ. सं. २९५) इति **मरुतांधेनौ वियोमानीऽ२**। अत्र **नी**-कारः प्रकृतिः। द्वितीयायां **यादीदाऽ२३४इवा**। अत्र **दी**-कारः प्रकृतिः। तृतीयायां **तेऽ२३४**। **अस्यसन्तुके**। अत्र **ते सर्वत्र** (पु. सू. ३. ६. ८) इत्यनेन **ते**-कारः प्रकृतिः। **अदाभ्यासोजनुषी**। अत्र **षी**-कारः प्रकृतिः॥ ८॥

वर्त्ते देव। गृविस्सर्वत्र॥ ९॥

दी. **प्रसोऽ३माऽ३देववीतयोवा** (ऊ. सं. २९९) इति **अभीवर्ते माऽ३दे**। अत्र **दे**-कारः प्रकृतिः। **नजागृऽ१वीऽ२ः**। अत्र **वी**-कारः प्रकृतिः। सर्वसामसु **वृद्धस्य गृहि**-शब्दस्य प्रकृतिः। उदाहरणम्। **प्रसोमाऽ३देववीतयाइ** (ऊ. स. ६९०) इति **द्वैगते पयसामदिरोनजागृऽ१वीऽ२ः**। अत्र **वी**-कारः प्रकृतिः॥ ९॥

नाजावितज्ञीययोर्जनकावे। प्रसोतरयोश्च॥ १०॥

अथ निषेधमाह—**आजा**। **गृवाऽ३इः** (ऊ. द. २१४) इति **गौरीविते गृवाऽ३इः**। अत्र **वी**-कारः प्रकृतिः। **आजाऽ५**। **गृवाऽ३इर्वाऽ३** (ऊ. स. ७५१) इति **यज्ञायज्ञीये**। अत्र **वी**-कारो न प्रकृतिः। **जनोवा** (ऊ. स. ७३३) इति कावे **ष्टजागृवाऽ२इः**। अत्र वीकारो न प्रकृतिः। **प्रसोमदेववीतयाइ** (ऊ. क्षु. ८७५) इति **कण्वरथन्तरे पयसामदिरोनजागृवाऽ२३४५एही**। अत्र **वी**-कारो न प्रकृतिः। **प्रासोमदेववीतयोवा** (र. क्षु. १८२) इति **रथन्तरे नजाऽ२३गृवाइः**। अत्र **वी**-कारो न प्रकृतिः॥ १०॥

---

3. L[1] om. प्रकृतिः
8. s[4] after अभीवर्ते om. माऽ३दे
12. L[1]My[2] after गृवाऽ३इः adds: विप्रक्षताम्
13. L[1] My[2] om. यज्ञायज्ञीये
14. My[2] om. वीकारो
15. L[1] adds: अंशीम before पयसा
17. L[1] My[2] om. इति रथन्तरे

उत्सर्वर्त्ते देवः ॥ ११ ॥ चतुर्थः ॥ ४ ॥

दी. उत्सोऽ३देऽ३वोहि (ऊ. सं. २९७) इति **अभीवर्ते देऽ३वो**। अत्र **दे**-कारः प्रकृतिः ॥ ११ ॥

इति ऊहे संवत्सरे प्रकृतिभावस्य चतुर्थः खण्डः ॥ ४ ॥

इति फुल्लदीपे तृतीयाध्यायस्य षोडशः खण्डः ॥ १६ ॥

सप्तदशः खण्डः — संवत्सरे पञ्चमः

हाउ निंत्रेवते। तीनाम्। दवीः।

कवी। ति। मनी। राणि ॥ १ ॥

दी. **हाउजनत्**। **सोमऽपत्रा** (ऊ. सं. ३०३) इति **जनित्रे तेऽ३जनि**। अत्र **ते**-कारः प्रकृतिः। **तामतीनाम्**। अत्र **ती**-कारः प्रकृतिः। द्वितीयायां **वीःकवीनाम्**। अत्र **वीः**-कारो **वी**-कारश्च प्रकृती। **तीऽ३राऽ५इभाऽ६५६नू**। अत्र **ती**-कारः प्रकृतिः। तृतीयायां **नोमनीषाः**। अत्र **नी**-कारः प्रकृतिः। **मावराणी**। अत्र **णी**-कारः प्रकृतिः ॥

लौशे यन्ति। यन्ति ॥ २ ॥

दी. **प्रतआश्वी** (ऊ. सं. ३०४) इति **लौशाद्ये** द्वितीयायां **तीऽ३केतवः**। अत्र **ती**-कारः प्रकृतिः। तृतीयायां **तीऽ३केतवः**। अत्र **ती**-कारः प्रकृतिः ॥ २ ॥

सम्पायां वाजी। रातिम्। तानि।

वते। वान्त्वे। रसे। माणि ॥ ३ ॥

दी. ओऽ३हाइ। ओऽ३हा। ओहाइया। इयाऽ२। ओऽ३हाऽ३ए।

---

2. s[4] after अभीवर्ते om. देऽ३वो

9. s[4] om. हाउजनत्

इन्दुर्वाजी (ऊ. सं. २०७) इति सम्पावैरूप्यश्वे इन्दुर्वाजी। अत्र जी-कारः प्रकृतिः। पर्यरातीम्। अत्र ती-कारः प्रकृतिः। तृतीयायां नीऽ३पव। अत्र नी-कारः प्रकृतिः। ते पुननाः। अत्र ते-कारः प्रकृतिः। स्वेऽ३नर। अत्र स्वे-कारः प्रकृतिः। सेनपृश्नान्। अत्र से-कारः प्रकृतिः। इन्दुर्धर्मा-णीऽ३ऋतु। अत्र णी-कारः प्रकृतिः ॥ ३ ॥

सिष्ठे नए। स्रेह। श्यौष्ठे च यानि ॥ ४ ॥

दी. औहोवाहाऽ३होइ। इहा। अयापवा (ऊ. सं. ३१२) इति वासिष्ठे द्वितीयायाम् उतनए। अत्र ए-कारः प्रकृतिः। तृतीयायां स्रेहयच्चा। अत्र स्रे-कारः प्रकृतिः। औहोहाइ। अयोहाइ (उ. द. ११८) इति श्यौष्ठे यानि चोदाहरणानि तानि इह वासिष्ठे भवन्ति। प्रथमायां नावस्नी। अत्र नी-कारः प्रकृतिः। तोनजूतीम्। अत्र तो-कारः प्रकृतिः। द्वितीयायां तोवस्नी। अत्र तो-कारः प्रकृतिः ॥ ४ ॥

मरुतामिन्द्रि ॥ ५ ॥

दी. ज्योऽ२३४। तिर्यञ्चस्य पवते (ऊ. सं. ३१३) इति मरुतांधेनौ द्रीयोऽ३राऽ५साऽ६५६ः। अत्र द्री-कारः प्रकृतिः ॥ ५ ॥

वर्त्ते देवः स्तावे ॥ ६ ॥

दी. पुनाऽ३नाऽ३स्सोमधारयोवा (ऊ. सं. ३१५) इति अभीवर्ते द्वितीयायां प्रस्तावे उत्सोऽ३देऽ३वोहिरण्ययो वा। अत्र दे-कारः प्रकृतिः ॥ ६ ॥

पार्थे युंवी। धीज। रथे। सूनि। षेयम् ॥ ७ ॥

दी. ओऽ३होऽ३होइ। अभिवायुम् (ऊ. सं. ३१६) इति पार्थे वीऽ३तिय।

1. S[4] after वैरूप्यश्वे om. इन्दुर्वाजी
2. L[1] om. पर्यरातीम् ··· नीकारः प्रकृतिः
3. L[1] om. अत्र स्वेकारः प्रकृतिः
4. S[4] om. इन्दुर्धर्मा.

अत्र वी-कारः प्रकृतिः। धीऽ३जव। अत्र धी-कारः प्रकृतिः। न॰रथेष्ठाम्। अत्र थे-कारः प्रकृतिः। तृतीयायां यावघ्नी। अत्र नी-कारः प्रकृतिः। अभियार्षे। अत्र र्षे-कारः प्रकृतिः ॥ ७ ॥

यज्ञीये लवे ॥ ८ ॥ पञ्चमः ॥ ५ ॥

दी. पुरोऽ५जि (ऊ. सं. ३१८) इति यज्ञायज्ञीये दाऽ३याइलाऽ३वे। अत्र वे-कारः प्रकृतिः ॥ ८ ॥

इति ऊहे संवत्सरे प्रकृतिभावस्य पञ्चमः खण्डः ॥ ५ ॥

इति फुल्लदीपे तृतीयाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

अष्टादशः खण्डः — संवत्सरे षष्ठः

ऐडकावे बृहन्नधि ॥ १ ॥

दी. एऽ५। अभिप्रियाऽ२ (ऊ. सं. ३२४) इति ऐडकावे बृहन्नधी। अत्र धी-कारः प्रकृतिः ॥ १ ॥

सिते रयिम् ॥ २ ॥

दी. य ओजिष्ठस्तमा (ऊ. सं. ३२६) इति आसिताद्ये रायीऽ३म् याइनाऽ२। अत्र यी-कारः प्रकृतिः ॥ २ ॥

ऐडयामे मती। सखी ॥ ३ ॥

दी. वृषामातीऽ२३ (ऊ. सं. ३२७) इति ऐडयामे मातीऽ२३। अत्र ती-कारः प्रकृतिः। द्वितीयायां यु॰सखीयाऽ२३। अत्र खी-कारः प्रकृतिः ॥ ३ ॥

वर्त्ते स्वब्दी। कण्वे ॥ ४ ॥

---

18. S[4] om. द्वितीयायां; L[1] My[2] तृतीयायां for द्वितीयायां

दी. वयाऽ३१घाऽ३त्वासु तावन्तोवा (ऊ. सं. ३२८) इति अभीवर्ते द्वितीयायाम् इन्द्राखाऽ२ब्दीऽ२ । अत्र ब्दी-कारः प्रकृतिः । तृतीयायां कण्वेऽ३भाऽ३इधृष्ण्वाधृषोवा । अत्र ण्वे-कारः प्रकृतिः ॥ ४ ॥

सꣳहिते हरिः ॥ ५ ॥

दी. तिस्रोवाचउत् । आऽ२इतरताइ (ऊ. सं. ३२९) इति संहिते हाऽ२३रीः । अत्र री-कारः प्रकृतिः ॥ ५ ॥

पार्थे णेन । ति । दवीः । कवी ॥ ६ ॥

दी. ओऽ३होऽ३होइ । शिशुंजज्ञा (ऊ. सं. ३३४) इति पार्थे तोगणेना । अत्र णे-कारः प्रकृतिः । तीऽ३राऽ५इभाऽ६५६न् । अत्र ती-कारः प्रकृतिः । द्वितीयायां वीःकवीनाम् । अत्र वीः-कारो वी-कारश्च प्रकृती ॥ ६ ॥

सफे दिदी ॥ ७ ॥

दी. अभिद्यूऽ३म्नंबृ (ऊ. सं. ३३५) इति सफे इषस्पताइदीऽ२ । अत्र दी-कारः प्रकृतिः ॥ ७ ॥

कावे दभ्रे । माहि ॥ ८ ॥

दी. धर्त्तोवा (ऊ. सं. ३३८) इति कावे तृतीयायां प्रनꣳपिन्वविद्युदभ्रे । अत्र भ्रे-कारः प्रकृतिः । हीशाऽ३श्वाऽ५ताऽ६५६ः । अत्र ही-कारः प्रकृतिः ॥ ८ ॥

ष्टम्भे मनि सर्वत्र ॥ ९ ॥ न मोढे ॥ १० ॥

दी. इन्द्रक्रतोहाइ (ऊ. सं. ३३९) इति महावैष्टम्भे तयामाऽ१नीऽ२३ । अत्र नी-कारः प्रकृतिः । सर्वसामसु मनि-शब्दस्य प्रकृति[भाव]ः । उदाहरणम् । इन्द्रक्रतुन्नआ (ऊ. सं. ३४१) इति श्यैते तयाऽ२ । माऽ२३४नी । अत्र नी-कारः प्रकृतिः ॥

10. My[2] प्रकृतिः for प्रकृती

अथ निषेधमाह । इन्द्रक्र (ऊ. सं. ३६१) इति पौरुमीढे तयामनाइ । अत्र मनी-शब्दस्य नीकारः न प्रकृतिः ॥ १० ॥

ष्कले निषी । श्रिये । यवी ॥ ११ ॥ षष्ठः ॥ ६ ॥

दी. सखायाऽ३आनी (ऊ. सं. ११५) इति पौष्कले षीदाऽ२३४ता । अत्र षी-कारः प्रकृतिः । षतश्रियेऽ२३४५ । अत्र ये-कारः प्रकृतिः । तृतीयायां यावीता-ऽ२३४याइ । अत्र वी-कारः प्रकृतिः ॥ ११ ॥

इति ऊहे संवत्सरे प्रकृतिभावस्य षष्ठः खण्डः ॥ ६ ॥

इति फुल्लदीपे तृतीयाध्यायस्य अष्टादशः खण्डः ॥ १८ ॥

एकोनविंशः खण्डः — संवत्सरे सप्तमः

धसे त्रे । भि ॥ १ ॥

दी. आऽ२३४इ-न्द्रक्रतुन्नआ (ऊ. सं. ३४३) इति नौधसे पितापुत्रे । अत्र त्रे-कारः प्रकृतिः । भीऽ३योयाऽ३था । अत्र भी-कारः प्रकृतिः ॥ १ ॥

ष्कले वते ॥ २ ॥

दी. पवतेऽ३हर्यं (ऊ. सं. ३४४) इति पौष्कले । अत्र ते-कारः प्रकृतिः ॥

पार्थे पाहि । योजि । रूणि । सूनि थाविट् ॥ ३ ॥

दी. ओऽ३होऽ३होइ । अयꣳसोमाः (ऊ. सं. ३४७) इति पार्थे अस्यप.ही । अत्र ही-कारः प्रकृतिः । द्वितीयायां पाडयोजी । अत्र जी-कारः प्रकृतिः । णीऽ३सात । अत्र णी-कारः प्रकृतिः । याइवसूनी । अत्र नी-कारः प्रकृतिः । तृतीयायां यायथावीट् । अत्र वी-कारः प्रकृतिः ॥ ३ ॥

---

1. L[1] My[2] om. अथ निषेधमाह
2. L[1] My[2] om मनीशब्दस्य
14. S[4] om इति पौष्कले

सꣳहिते सः पी ॥ ४ ॥

दी. **परिसुवानः** (ऊ. सं. ३४८) इति **सꣳहिते तेऽ२३सो**। अत्र **त्रेसो सर्वत्र** (पु. सू. ३. ७. ५) इति **त्रे**-कारः प्रकृतिः। तृतीयायां **साऽ२३ःपी**। अत्र **पी**-कारः प्रकृतिः ॥ ४ ॥

वन्तीय इन्द्रा। महे। स्यपे ॥ ५ ॥

दी. **परिप्रधाओहोहाइ** (ऊ. सं. ३५२) इति **वारवन्तीये न्वाईऽ२३४न्द्रा**। अत्र **ई**-कारः प्रकृतिः। द्वितीयायां **यामाऽ२३४हे**। अत्र **हे**-कारः प्रकृतिः। तृतीयायां **स्यपेयाऽ२३४द्धाइ**। अत्र **पे**-कारः प्रकृतिः ॥ ५ ॥

कावे नेन्द्रात्। नित्तम् ॥ ६ ॥

दी. **सूर्योवा** (ऊ. सं. ३५३) इति **कावे नेन्द्राऽ३दात्ताइ**। अत्र **ने**-कारः प्रकृतिः। तृतीयायाम् **आत्काऽ३न्नानी**। अत्र **नी**-कारः प्रकृतिः ॥ ६ ॥

मीढे ज्योतिः ॥ ७ ॥ सप्तमः ॥ ७ ॥

दी. **इन्द्रक्र** (ऊ. सं. ३६१) इति **पौरुमीढे जीवाज्योऽ२३तीः**। अत्र **ती**-कारः प्रकृतिः ॥ ७ ॥

इति ऊहे संवत्सरे प्रकृतिभावस्य सप्तमः खण्डः ॥ ७ ॥

इति फुल्लदीपे तृतीयाध्यायस्य एकोनविंशः खण्डः ॥ १९ ॥

विंशः खण्डः — संवत्सरे प्रथमः

ष्कले धितिं पत्रि त्रित ॥ १ ॥

दी. **प्राणाशाऽ३इशुः** (ऊ. सं. ३६४) इति **पौष्कले स्वादाइऽधीर२३४तीम्**।

3. L[1] My[2] त्रेकारस्य for त्रेकारः

अत्र धीकारस्तीकारश्च प्रकृती । द्वितीयायाम् उपत्नीऽ३तस्य । अत्र त्नीकारः प्रकृतिः । तृतीयायां त्रीणित्रीऽ३तस्य । अत्र त्रीकारः प्रकृतिः ॥ १ ॥

हृदुक्थे सुते ॥ २ ॥ संवत्सरः ॥ ८ ॥

दी. **परीतोषिञ्च** (ऊ. सं. ३६९) इति **बार्हदुक्थे** तृतीयायां **सुतेऽ१चाइत्वाऽ२** । अत्र ते-कारः प्रकृतिः ॥ २ ॥

इति ऊहे संवत्सरे प्रकृतिभावस्य अष्टमः खण्डः ॥ ८ ॥

॥ संवत्सरः समाप्तः ॥

इति फुल्लदीपे तृतीयाध्यायस्य विंशः खण्डः ॥ २० ॥

अथ एकाहाः

एकविंशः खण्डः — एकाहे प्रथमः

श्यैते सि । ईशा ॥ १ ॥

दी. **आनोविश्वासु** (ऊ. ए. ३७६) इति **श्यैते** द्वितीयायाम् **आऽ२३४सी** । अत्र सी-कारः प्रकृतिः । **असिसत्याईऽ३शा** । अत्र ई-कारः प्रकृतिः ॥ १ ॥

यौधा दसी सर्वत्र ॥ २ ॥

दी. **प्रत्नाऽ३१म् पीऽ३यू** (ऊ. ए. ३८०) इति **यौधाजये, पीयू सर्वत्र** (पु. सू. ३. ८. १३) इति **पी-कारः** प्रकृतिः । तृतीयायां **दसीऽ२** । अत्र **सी-कारः** प्रकृतिः । सर्वसामसु दसी-शब्दस्य प्रकृतित्वम् । उदाहरणम् । **पुनानः सोऽ२ममधारया** (ऊ. ए. ६६८) इति **आपदासे सोमसाम्नि स्वसीदसी** । अत्र **सी-कारः** प्रकृतिः ॥ २ ॥

---

8. S[4] combines Khandas 20 and 21
15. S[4] om. पीऽ३यू
16. S[4] after इति adds: अत्र; S[4] पीकारस्य for पीकारः
18. L[1] My[2] om. आपदासे

पूषायां च ॥ ३ ॥

दी. **अयंपूषायाम्** (सा. वे. ८१८) ऋचि। चकारात् सर्वसामसु **वृद्धस्य दसी**-शब्दस्य प्रकृतित्वम्। उदाहरणम्। **अयाऽ३१म्-पूऽ३षा** (ऊ. ए. ४४४) इति **श्यावाश्वे वियख्यद्रोदाऽ३सीऽ३**। अत्र **सी**-कारः प्रकृतिः ॥ ३ ॥

न स्तोभे प्रत्यये ॥ ४ ॥

दी. **स्तोभे प्रत्यये** दसी-शब्दस्य सी-कारस्य न प्रकृतिभावः। उदाहरणम्। **अयम्पूषाऽ३** (ऊ. सं. २५१) इति **गौरीविते दसोवा**। अत्र **वा-स्तोभे प्रत्यये दसी**-शब्दस्य न प्रकृतिभावः ॥ ४ ॥

यूथे ॥ ५ ॥

दी. प्रकृतम्। **यौधाजये** तृतीयायां **यूथेऽ३४५**। अत्र **थे-कारः प्रकृतिः** ॥ ५ ॥

स्वारपर्णे खीनाम् ॥ ६ ॥

दी. **कयानश्चित्र आंभूऽ३वात्** (ऊ. ए. ३८२) इति **स्वारसौपर्णे** तृतीयायाम् **अमीषुणस्सखीऽ३नाम्**। अत्र **खी**-कारः प्रकृतिः ॥ ६ ॥

सफ इन्द्रा। पूष्णे ॥ ७ ॥

दी. **परिप्राऽ३ध** (ऊ. ए. ३८३) इति **सफे न्वाईऽ२३४न्द्रा**। अत्र **ई**-कारः प्रकृतिः। **यपूष्णोऽ३भाऽ३**। अत्र **ष्णो**-कारः प्रकृतिः ॥ ७ ॥

बोधीये सःपी ॥ ८ ॥ प्रथमः ॥ १ ॥

दी. **परिसुवोवा** (ऊ. ए. ३८२) **इति जराबोधीये** तृतीयायां **देवासाऽ२३xपी**।

---

3. L[1] om. अयाऽ३१म् ... उदाहरणम् (l. 5)

8. My[2] om. न; प्रकृतित्वम् for प्रकृतिभावः

10. S[4] अत्र for प्रकृतम्

अत्र पी-कारः प्रकृतिः ॥ ८ ॥

इति ऊहे एकाहे प्रकृतिभावस्य प्रथमः खण्डः ॥ १ ॥

इति फुल्लदीपे तृतीयाध्यायस्य एकविंशः खण्डः ॥ २१ ॥

द्वाविंशः खण्डः — एकाहे द्वितीयः

पार्श्वे कभिः पूर्वम् । सिये ॥ १ ॥

दी. आया (ऊ. ए. ३९७) इति गायत्रपार्श्वे परियास्यूकमीऽ२६४५: । अत्र पूर्वस्य भी-कारस्य प्रकृतिभावः । नाग्निमस्य । सप्तासीऽ१येऽ२ । अत्र सी-कारो ये-कारश्च प्रकृती ॥ १ ॥

लेये पीत्वा । स्तावे । न ए ॥ २ ॥

दी. पवस्वाऽ३मधुमत्तमाः (ऊ. ए. ३९९) इति कालेये तृतीयायां प्रस्तावे अस्यपीऽ३त्वासुवर्विदाः । अत्र पी-कारः प्रकृतिः । नएऽ५तशाः । अत्र ए-कारः प्रकृतिः ॥ २ ॥

यौधातुवे । महे । तिया ॥ ३ ॥

दी. तुवेऽ३१सोऽ३म (ऊ. ए. ४००) इति यौधाजये । अत्र वे-कारः प्रकृतिः । महेऽ२३४५ । अत्र हे-कारः प्रकृतिः । तृतीयायां तीयाऽ३ । अत्र ती-कारः प्रकृतिः ॥

द्यौताने मई । यवि याभिः । ह्याणि ।
दिवे पूर्वम् । युगे ॥ ४ ॥

दी. हाऽ३ । इत्यादि अधाह्यियाऽ२इ (ऊ. ए. ४०२) इति द्यौताने मईमाऽ-

---

7. L[1] My[2] भीकारः for पूर्वस्य भीकारस्य; L[1] My[2] om. प्रकृतिभावः । नाग्निमस्य ।
8. My[2] प्रकृतिः for प्रकृती
15. L[1] द्वितीयायां for तृतीयायां

२३४हाइ । अत्र ई-कारः प्रकृतिः । द्वितीयायां यवीयाऽ२३४भीः । अत्र वी-कारो भी-कारश्च प्रकृती । रत्नाह्माऽ२३४णी । अत्र णी-कारः प्रकृतिः । दिवेदाऽ२३४इवाइ । अत्र पूर्वो वे-कारः प्रकृतिः । नाग्रिमः । तृतीयायां उरुयुगेऽ२ । अत्र गे-कारः प्रकृतिः ॥

मारुत एन्दुम् । धा॰सि । माहि ।
श्रुधि आश्वि । जज्ञे ॥ ५ ॥

दी. एऽ५न्दुमि (ऊ. ए. ४०३) इति मारुते । अत्र ए-कारः प्रकृतिः । प्रराधाऽ२३॰सी । अत्र सी-कारः प्रकृतिः । चोदयताऽ३इमाऽ३ही । अत्र ही-कारः प्रकृतिः । द्वितीयायां नून॰श्रूऽ२३धी । अत्र धी-कारः प्रकृतिः । स्तुवतो आश्वीऽ३या । अत्र श्वी-कारः प्रकृतिः । तृतीयायां जज्ञेऽ२वीरतरस्त्वत् । अत्र ज्ञे-कारः प्रकृतिः ॥ ५ ॥

बोधीये योनिम् ॥ ६ ॥

दी. स्वादिष्ठयोवा (ऊ. ए. ४०४) इति जराबोधीये द्वितीयायाम् अभाइयोऽ-२३नीम् । अत्र नी-कारः प्रकृतिः ॥ ६ ॥

ज्ञीये सिचम् । प्रचे । वाह्निम् ॥ ७ ॥

दी. देवोऽ५वः (ऊ. ए. ४०६) इति यज्ञायज्ञीये सूऽ३आसीऽ३चाम् । अत्र अत्र सी-कारः प्रकृतिः । द्वितीयायां स्यप्राऽ२३चे । अत्र चे-कारः प्रकृतिः । तृतीयायां वाह्नीम् । अत्र ह्नी-कारः प्रकृतिः ॥ ७ ॥

अदर्शि ज्ञीये । तानि । त्यानि ॥ ८ ॥

दी. अदाऽ५र्शि (ऊ. ए. ४०७) इति यज्ञायज्ञीये नीऽ३आदाऽ३धूः । अत्र

---

1. L[1] तीकारः for ईकारः
3. S[4] वेशब्द for वेकारः; L[1]S[4]My[2] नाग्रिमस्य for नाग्रिमः; My[2] om. तृतीयायां
6. My[2] विकल्पमारुते for मारुते
9. S[4] om. तृतीयायां
11. S[4] अभि for अभाइ

नी-कारः प्रकृतिः । द्वितीयायां **नीऽ३काण्वोऽ३ताः** । अत्र **नी**-कारः प्रकृतिः ॥ ८ ॥

मन्ते द्धि ॥ ९ ॥

दी. **पाहिविश्वस्माद्रक्षसाः** (ऊ. ए. ४१२) इति **समन्ते** **तुवांमाऽ२३इद्धी** । अत्र **द्धी**-कारः प्रकृतिः ॥ ९ ॥

यौधा महे ॥ १० ॥

दी. **पाहाऽ३१इ** (ऊ. ए. ४१३) इति **यौधाजये** तृतीयायां **महेऽ३४५** । अत्र **हे**-कारः प्रकृतिः ॥ १० ॥

शने दर्शि । तिरुश । तीम् । सुभिः ।

ए । वर्णैः ॥ ११ ॥ द्वितीयः ॥ २ ॥

दी. **आइनाः** (ऊ. ए. ४१४) इति **औशने** **माऽ२अदर्शी** । अत्र **शी**-कारः प्रकृतिः । **तीऽ३रुश** । अत्र **ती**-कारः प्रकृतिः । **तीऽ३४३म्** । अत्र **ती**-कारः प्रकृतिः । द्वितीयायां **भीऽ३रर** । अत्र **भी**-कारः प्रकृतिः । तृतीयायाम् **एतिपश्चात्** । अत्र **ए**-कारः प्रकृतिः । **णैऽ३रभि** । अत्र **णै**-कारः प्रकृतिः ॥ ११ ॥

इति ऊहे एकाहे प्रकृतिभावस्य द्वितीयः खण्डः ॥ २ ॥

इति फुल्लदीपे तृतीयाध्यायस्य द्वाविंशः खण्डः ॥ २२ ॥

त्रयोविंशः खण्डः — एकाहे द्वितीयः

देव्ये ग्ने ॥ १ ॥

दी. **काऽ३या** । (ऊ. ए. ४१६) इति वामदेव्ये **तेऽआऽग्नेऽ३अङ्गिराः** । अत्र **ग्ने**-कारः प्रकृतिः ॥ १ ॥

धसे ष्मती । बर्हिः । रान्ति । केशम् । अग्निम् ॥ २ ॥

दी. आऽ२३४ । प्रआयाहिव (ऊ. ए. ४१६) इति नौधसे हाविष्माऽ२-३४ती । अत्र ती-कारः प्रकृतिः । द्वितीयायां हीऽ३रासाऽ३दाइ । अत्र ही-कारः प्रकृतिः । तृतीयायां तीऽ३आध्वाऽ३राइ । अत्र ती-कारः प्रकृतिः । घृत-के । अत्र के-कारः प्रकृतिः । आऽ२३ग्नीम् । अत्र ग्नी-कारः प्रकृतिः ॥ २ ॥

सꣳहिते ग्निः । तूर्णिः । अग्निः ॥ ३ ॥

दी. अदाभ्यःपुरः (ऊ. ए. ४१८) इति सꣳहिते आऽ२३ग्नीः । अत्र ग्नी-कारः प्रकृतिः । तूऽ२३र्णीः । अत्र णी-कारः प्रकृतिः । तृतीयायाम् आऽ२३ग्नीः । अत्र ग्नी-कारः प्रकृतिः ॥ ३ ॥

वाश्वे दुरि ॥ ४ ॥

दी. विशोऽ३१ (ऊ. ए. ४२२) इति श्यावाश्वे अग्निर्वोदूरीऽ३याऽ३म् । अत्र री-कारः प्रकृतिः ॥ ४ ॥

ज्ञीये प्रियम् । दुरि ॥ ५ ॥

दी. विशोऽ५वि । (ऊ. ए. ४२४) इति यज्ञायज्ञीये पूऽ३रूप्रीऽ३याम् । अत्र प्री-कारः प्रकृतिः । दुरीऽ२३याम् । अत्र री-कारः प्रकृतिः । तृतीयायां योदेऽ२व । अत्र योदे सर्वत्र (पु. सू. ३. १२. १) इति दे-कारस्य प्रकृतिभावः ॥ ५ ॥

परे ज्ञीये कविम् । जसी । समी । यत्ते ॥ ६ ॥

दी. परे अग्निमे समाऽ५इद्रम् (ऊ. ए. ४२५) इति यज्ञायज्ञीये हंकाऽ२३वीम् । अत्र वी-कारः प्रकृतिः । तृतीयायां देवानाꣳरजसी । अत्र सी-कारः प्रकृतिः । साऽ३-मीयाऽ३साइ । अत्र मी-कारः प्रकृतिः । यत्तेऽ२धीतिꣳसुमतिमावृणीम । अत्र त्तेकारः प्रकृतिः ॥ ६ ॥

---

2. My² before द्वितीयायां adds: सादे । अत्र देकारः

15. My² प्रकृतित्वम् for प्रकृतीभावः

कावे कविम्। जसी ॥ ७॥

दी. समोवा (ऊ. ए. ४२६) इति कावे कावीऽ३९सूम्राइः। अत्र वी-कारः प्रकृतिः। तृतीयायां दूतोदेवाना९रजसी। अत्र सी-कारः प्रकृतिः॥ ७॥

वन्तीये भिः॥ ८॥

दी. उपत्वाजा औहोहाइ (ऊ. ए. ४२७) इति वारवन्तीये तृतीयायाम् उहुवा-ऽ२३४भीः। अत्र भी-कारः प्रकृतिः॥ ८॥

हारायणे नहि॥ ९॥

दी. शग्ध्यूष्वौहोऽ२इशाचीपताइ (ऊ. ए. ४३२) इति हारायणे भगान्नाऽ३ही। अत्र ही-कारः प्रकृतिः॥ ९॥

कौल्मे स्राणि॥ १०॥ तृतीयः॥ ३॥

दी. तुवाऽ३९होऽ३एहि चेरवाइ (ऊ. ए. ४३३) इति कौल्मलबर्हिषे द्वितीयायां त्वम्पुरूसहस्राणी। अत्र णी-कारः प्रकृतिः॥ १०॥

इति ऊहे एकाहे प्रकृतिभावस्य तृतीयः खण्डः॥ ३॥

इति फुल्लदीपे तृतीयाध्यायस्य त्रयोविंशः खण्डः॥ २३॥

चतुर्विंशः खण्डः — एकाहे चतुर्थः

दले त्के॥ १॥

दी. प्रसुन्वाना (ऊ. ए. ४३७) इति औदले द्वितीयायां त्केआऽ२व्यता। अत्र त्के-कारः प्रकृतिः॥ १॥

ज्ञीये प्रदै। त्यानि। तानि॥ २॥

---

11. s^4 om. द्वितीयायां

दी. प्रदैऽ५षः (ऊ. ए. ४३८) इति यज्ञायज्ञीये । अत्र दै-कारः प्रकृतिः । द्वितीयायां नीऽ२कार्णोऽ२ताः । अत्र नी-कारः प्रकृतिः । तृतीयायां नीऽ३आदाऽ२धूः । अत्र नी-कारः प्रकृतिः ॥ २ ॥

वर्त्ते देवः स्तावे ॥ ३ ॥

दी. शग्धाऽ२ऊऽ२षुशचीपतोवा (ऊ. ए. ४४०) इति अभीवर्ते तृतीयायाम् उत्सोऽ२देऽ२वहि । इति प्रस्तावे दे-कारः प्रकृतिः ॥ ३ ॥

ष्मते दुहे सर्वत्र ॥ ४ ॥

दी. हावस्यप्रतामनुद्युतꣳहाउ (ऊ. ए. ४४२) इति हाविष्मते हेअहाऽ२३-४याः । अत्र हे-कारः प्रकृतिः । सर्वसामसु वृद्धस्य दुहे-शब्दस्य प्रकृतिभावः । उदाहरणम् । अस्यप्रत्नाम् (ऊ. अ. ५५१) इति आशुभार्गवे हेआऽ२हाऽ२३४याः । अत्र हे-कारः प्रकृतिः । एवमादिनि ॥ ४ ॥

सꣳहिते स्थाभिः ॥ ५ ॥

दी. यस्तेमदोवा । (ऊ. ए. ४४३) इति सꣳहिते तृतीयायां स्थाऽ२३भीः । अत्र भी-कारः प्रकृतिः ॥ ५ ॥

वाश्वे प्रियाः । षणीः ॥ ६ ॥

दी. अयाऽ३१म् । पूऽ३षा (ऊ. ए. ४४४) इति श्यावाश्वे वियस्यद्रोदाऽ-३सीऽ३ । अत्र सी-कारस्य दसी सर्वत्र (पु. सू. ३. २१. २) इति प्रकृतिभावः । द्वितीयायां प्रीऽ३याः । अत्र प्री-कारः प्रकृतिः । तृतीयायां यꣳपश्वचार्षाऽ३णीऽ३ः ।

---

2. L[1] om. तृतीयायां
5. My[2] after तृतीयायां adds: प्रस्तावे
6. My[2] अत्र for प्रस्तावे
11. L[1] om. एवमादीनि
17. S[4] om. सीकारस्य; L[1] सीकारः for सीकारस्य

अत्र **णी**-कारः प्रकृतिः ॥ ६ ॥

सुचे न्द्रेह । न्द्रेस्वा ॥ ७ ॥

दी. **इन्द्रमिद्देवता** (ऊ. ए. ४४६) इति **यौक्तस्रुचे** तृतीयायाम् **आइन्द्रेऽ२** । अत्र **न्द्रे**-कारः प्रकृतिः । **आइन्द्रेऽ२** । **स्वाना** । अत्र **न्द्रे**-कारः प्रकृतिः ॥ ७ ॥

जिगे हिन्वे ॥ ८ ॥

दी. **वृषापावा** (ऊ. ए. ४४८) इति **आजिगे** द्वितीयायां **हिन्वेवाजाइ** । अत्र **न्वे**-कारः प्रकृतिः ॥ ८ ॥

सिते रयिम् ॥ ९ ॥ चतुर्थः ॥ ४ ॥

दी. **अयम्पूषारयाइः** (ऊ. ए. ४५४) इति **आसिताद्ये** तृतीयायां **रायीऽ२म्-याइनाऽ२३** अत्र **यी**-कारः प्रकृतिः ॥ ९ ॥

इति ऊहे एकाहे प्रकृतिभावस्य चतुर्थः खण्डः ॥ ४ ॥

इति फुल्लदीपे तृतीयाध्यायस्य चतुर्विंशः खण्डः ॥ २४ ॥

पञ्चविंशः खण्डः — एकाहे पञ्चमः

षभे ददे ॥ १ ॥

दी. **हाहाउच्चातेजा** (ऊ. ए. ४५५) इति **ऋषभे पवमाने** **दिविऽसद्भूमियाऽ१दाऽ३दे** । अत्र **दे**-कारः प्रकृतिः ॥ १ ॥

वन्तीये कविः ॥ २ ॥

दी. **परिसुवाऔहोहाइ** (ऊ. ए. ४५८) इति **वारवन्तीये** **पवाइत्वेऽ२३४हाइ** । अत्र [त्वे-कारस्य] **त्रेसो सर्वत्र** (पु. सू. ३. ७. ५) इति प्रकृतिभावः । द्वितीयायां **तूव-**

---

15. S[4] ऋषभः for ऋषभे

ङ्काऽ२३४वीः । अत्र वी-कारः प्रकृतिः ॥ २ ॥

यानि वारे तानि वरीषु । क्रत्वे च ॥ ३ ॥

दी. परिप्रधाऔहोहाइ (ऊ. सं. ३५२) इति वारवन्तीये यानि उदाहरणानि तानि परिप्रधा (ऊ. ए. ४६१) इति वाजदावरीषु भवन्ति । क्रत्वे चाधिकम् ॥

परिप्रधा (ऊ. ए. ४६१) इति वाजदावरीषु न्वाऽ२ईऽ२३४न्द्रा । अत्र ई-कारः प्रकृतिः । द्वितीयायां याऽ२माऽ२३४हे । अत्र हे-कारः प्रकृतिः । तृतीयायां स्याऽ२पे-ऽ२३४यात् । अत्र हे-कारः प्रकृतिः । क्राऽ२त्वे । अत्र त्वे-कारः प्रकृतिः ॥ ३ ॥

यानि सिष्ठे तानि पार्थे ॥ ४ ॥

दी. औहोवाहाऽ३होइ । इहा । साकमुक्षो (ऊ. सं. २९०) इति वासिष्ठे यानि उदाहरणानि तानि साकमुक्षायां पार्थे च भवन्ति । ओऽ३होऽ३होइसाकमुक्षो (ऊ. ए. ४६३) इति पार्थे योधनुत्रीः । अत्र त्री-कारः प्रकृतिः । क्षेऽ३अति । अत्र क्षे-कारः प्रकृतिः । द्वितीयायां न्वेऽ३पुरु । अत्र न्वे-कारः प्रकृतिः । स्त्रीऽ३याऽ५भाऽ६५६इः । अत्र स्त्री-कारः प्रकृतिः । तृतीयायां भीऽ३रसच । अत्र भी-कारः प्रकृतिः । तेसुमेधाः । अत्र ते-कारो मे-कारश्च प्रकृती । तीऽ३वसु । अत्र ती-कारः प्रकृतिः ॥ ४ ॥

लये यें । तुभ्येत् । ज्यते । अस्मे ॥ ५ ॥

दी. यस्यायाऽ३म्विश्वाआर्याः (ऊ. ए. ४६५) इति कालेये येंऽ२३४ । अत्र

---

2. B[2-3] S[4] वरीयेषु for वरीषु

3. L[1] trans. वारवन्तीये after यानि; L[1] उदाहृतानि for उदाहरणानि.

4. & 5. S[4] °वर्येषु for °वरीषु

9. S[4] त्रपाशोणो for साकमुक्षो

10. L[1] °मुक्षो for °मुक्षायां; L[1] om. च

11. My[2] om. क्षेऽ३ .... क्षेकारः प्रकृतिः

12. S[4] स्त्रीयाभो for स्त्रीयाभाइः

14. L[1] My[2] तेकारः प्रकृतिः for तेकारो मेकारश्च प्रकृती

र्ये-कारः प्रकृतिः । **तुभ्येत्सऔ** । अत्र भ्ये-कारः प्रकृतिः । **ज्यतेऽ५रयाइः** । अत्र **ते**-कारः प्रकृतिः । द्वितीयायां **तुभ्येत्सोआ** । अत्र भ्ये-कारः प्रकृतिः । **ज्यतेर-याऽ२३इः** । अत्र **ते**-कारः प्रकृतिः । तृतीयायाम् **अस्मेस्वानौ** । अत्र **स्मे**-कारः प्रकृतिः ॥

सꣳहिते ज्योतिः । ज्योतिः ॥ ६ ॥

दी. पवमानोअ । (ऊ. ए. ४६६) इति **सꣳहिते ज्योऽ२३तीः** । अत्र **ती**-कारः प्रकृतिः । तृतीयायां **ज्योऽ२३तीः** । अत्र **ती**-कारः प्रकृतिः ॥ ६ ॥

सफे देवा ॥ ७ ॥

दी. आसोताऽ३परि (ऊ. ए. ४६७) इति **सफे** तृतीयायां **प्रियन्देऽ३वाय** । अत्र **न्दे**-कारः प्रकृतिः ॥ ७ ॥

कावे नक्री । ज्योतिः ॥ ८ ॥

दी. अञ्जोवा (ऊ. ए. ४७१) इति **कावे** द्वितीयायाम् **आत्योऽ३नाक्री** । अत्र **क्री**-कारः प्रकृतिः । तृतीयायां **ज्योतीऽ३राथाः** । अत्र **ती**-कारः प्रकृतिः ॥ ८ ॥

ण्वतर इन्द्र नोद्गीथे ॥ ९ ॥ पञ्चमः ॥ ५ ॥

दी. अभित्वाशूरनोनुमाः (उ. ए. ४७३) इति **कण्वरथन्तरे ईशानाऽ२३४मी** । अत्र **मी**-कारः प्रकृतिः । द्वितीयायाम् **ईशानमाइ** । अत्र **उद्गीथे न** प्रकृतिः ॥ ९ ॥

इति ऊहे एकाहे प्रकृतिभावस्य पञ्चमः खण्डः ॥ ५ ॥

इति फुल्लदीपे तृतीयाध्यायस्य पञ्चविंशः खण्डः ॥ २५ ॥

षड्विंशः खण्डः — एकाहे षष्ठः

कावे स इत् ॥ १ ॥

---

1. My² om. ज्यतेऽ५ .... तेकारः प्रकृतिः

दी. **पवोवा** (ऊ. ए. ४७७) इति **कावे शार्ताऽ३साईत्** । अत्र **ई**-कारः प्रकृतिः ॥ १ ॥

मौक्षे योनिम् ॥ २ ॥

दी. **स्वादिष्ठयामदिष्ठया** । **औहोवा** (ऊ. ए. ४७८) इति **दक्षणिधनमौक्षे** द्वितीयायाम् **अभियोऽ२३नीम्** । अत्र **नी**-कारः प्रकृतिः ॥ २ ॥

विशीये वाजे ॥ ३ ॥

दी. **यज्ञायज्ञाहि॰वोऽ३अग्नयाइ** (ऊ. ए. ४७९) इति **विशोविशीये** तृतीयायां **भूऽ३वाद्वाऽ३जे** । अत्र **जे**-कारः प्रकृतिः ॥ ३ ॥

वन्तीये त्वभिरग्ने ॥ ४ ॥

दी **तुवन्नश्चाऔहोहाइ** (ऊ. ए. ४८०) इति **वारवन्तीये** द्वितीयायाम् **औहो-ऽ३१२३४** । **भीः** । अत्र **भी**-कारः प्रकृतिः ॥ ४ ॥

रुणसाम्नि सुते ॥ ५ ॥

दी. **परीतोषिश्चतासुतोवा** (ऊ. ए. ४८२) इति **वरुणसाम्नि** तृतीयायां **सूऽ२-३ते** । अत्र **स्ये**-कारः प्रकृतिः ॥ ५ ॥

दासे स्येत् ॥ ६ ॥

दी. **इन्द्राऽ३१म्** (ऊ. ए. ४८४) इति **दैवोदासे** तृतीयायाम् **अस्येऽ३१त्** । अत्र **ते**-कारः प्रकृतिः ॥ ६ ॥

वन्तीये मोभिः ॥ ७ ॥

दी. **अश्वन्नत्वाऔहोहाइ** (ऊ. ए. ४९१) इति **वारवन्तीये उहुवाऽ२३४भीः** ।

---

10. My² after द्वितीयायां adds:- स्तोत्रीयान्ते ण्वतिशब्दे स्तोत्रीयान्त्ये न्वतिशब्दे प्रकृतिः

19. L¹ My² वारवन्तीयोत्तरे for वारवन्तीये

अत्र भी-कारः प्रकृतिः ॥ ७ ॥

वर्त्ते यदि ॥ ८ ॥ षष्ठः ॥ ६ ॥

दी. तुवाऽ३माऽ३इन्द्रप्र (ऊ. ए. ४९२) इति **अभीवर्ते** तृतीयायां **वृत्राम्याऽ१-दीऽ२** । अत्र **दी**-कारः प्रकृतिः ॥ ८ ॥

इति ऊहे एकाहे प्रकृतिभावस्य षष्ठः खण्डः ॥ ६ ॥

इति फुल्लदीपे तृतीयाध्यायस्य षड्विंशः खण्डः ॥ २६ ॥

सप्तविंशः खण्डः — एकाहे सप्तमः

षेधे रयिम् ॥ १ ॥

दी. अयमूपूषाराऽ३यिभंगाः (ऊ. ए. ४९७) इति **निषेधे दसीऽ३ऊऽ५माऽ६-५६इ** । अत्र **दसी सर्वत्र** (पु. सू. ३. २१. २) इति **दसी**-शब्दस्य प्रकृतिभावः । तृतीयायां **रायीऽ३मूयाइना** । अत्र **यी**-कारः प्रकृतिः ॥ १ ॥

उत्तरे नित्रे भि ॥ २ ॥

दी. पुरोजितीवोअ । (ऊ. ए. ५०१) इति **उत्तरे जनित्रे** तृतीयायां **षामाभीऽ-१नाराऽ२३४ः** । अत्र **भी**-कारः प्रकृतिः ॥ २ ॥

एह्यू वारे न्दुभिः ॥ ३ ॥

दी. एहियूषाऔहोहाइ (ऊ. ए. ४०७) इति **वारवन्तीये औहोऽ३१२३४ । भीः** । अत्र **भी**-कारः प्रकृतिः ॥ ३ ॥

---

10. S[4] om. दसीशब्दस्य; S[4] प्रकृतिः for प्रकृतिभावः

13. L[1] om. उत्तरे

16. L[1] om. औहो ··· इति वारवन्तीये

तन्ते वारे षि। पत्नीः ॥ ४ ॥

दी. **तन्तेमदाऔहोहाइ** (ऊ. ए. ५०८) इति **वारवन्तीये** द्वितीयायां **पीआया-ऽ२३४वाइ**। अत्र **षी**-कारः प्रकृतिः। तृतीयायाम् **उहुवाऽ२३४त्नीः**। अत्र **त्नी**-कारः प्रकृतिः ॥ ४ ॥

श्रुधीह वारे नवी। प्युषीम् ॥ ५ ॥

दी. **श्रुधीहावाऔहोहाइ** (ऊ. ए. ५०९) इति **वारवन्तीये** द्वितीयायां **नावीया-ऽ२३४साइम्**। अत्र **वी**-कारः प्रकृतिः। **औहोऽ३१२३४**। **पीम्**। अत्र **पी**-कारः प्रकृतिः ॥ ५ ॥

षेधे भि ॥ ६ ॥

दी. **पिबासुतस्याऽ३रसिनाः** (ऊ. ए. ५११) इति **निषेधे** तृतीयायां **मानस्तर-भीऽ३मातयाइ**। अत्र **भी**-कारः प्रकृतिः ॥ ६ ॥

रुणसाम्नि नृभिः ॥ ७ ॥ सप्तमः ॥ ७ ॥

दी. **पुनानस्सोमधारयोवा** (ऊ. ए. ५१४) इति **वरुणसाम्नि** तृतीयायां **नृऽ२-३भीः**। अत्र **भी**-कारः प्रकृतिः ॥ ७ ॥

इति ऊहे एकाहे प्रकृतिभावस्य सप्तमः खण्डः ॥ ७ ॥

इति फुल्लदीपे तृतीयाध्यायस्य सप्तविंशः खण्डः ॥ २७ ॥

अष्टाविंशः खण्डः — एकाहे अष्टमः

यौधा पर्युद्गीथे ॥ १ ॥

दी. **तवाऽ३१** (ऊ. ए. ५१६) इति **यौधाजये** द्वितीयायाम् **उद्गीथे पारीऽ३**। अत्र **री**-कारः प्रकृतिः ॥ १ ॥

देव्ये रेव ॥ २ ॥

दी. **रेऽ५व** (ऊ. ए. ५१७) इति **वामदेव्ये**। अत्र **रे**-कारः प्रकृतिः ॥ २ ॥

चित्पर्णे ॥ ३ ॥

दी. **इन्द्रमभोवा** (उ. ए. ५२२) इति **ऐडसौपर्णे आदऽ२इङ्काऽ२३४इचीत्**। अत्र **ची**-कारः प्रकृतिः ॥ ३ ॥

वारे रान्ती। गाहि। अभि ॥ ४ ॥

दी. **साओहोहाइ** (ऊ. ए. ५२८) इति **वारवन्तीये उहुवाऽ२३४न्ती**। अत्र **ती**-कारः प्रकृतिः। द्वितीयायां **षानागाऽ२३४ही**। अत्र **ही**-कारः प्रकृतिः। **उहुवाऽ२-३४भी**। अत्र **भी**-कारः प्रकृतिः ॥ ४ ॥

साहीये यस्ते ॥ ५ ॥

दी. **यस्तेऽ३४**। **मदोवरेणियः** (ऊ. ए. ५३१) इति **सत्रासाहीये**। अत्र **स्ते**-कारः प्रकृतिः ॥ ५ ॥

काशीते नए ॥ ६ ॥ एकाहाः ॥

दी. **पवस्वमधु** (ऊ. ए. ५३२) इति **प्रतीचीनेडे काशीते** तृतीयायाम् **अच्छा-वाजान्नाऽ३ए**। अत्र **ए**-कारः प्रकृतिः ॥ ६ ॥

इति ऊहे एकाहे प्रकृतिभावस्य पञ्चमः खण्डः ॥ ५ ॥

॥ एकाहः समाप्तः ॥

इति फुल्लदीपे तृतीयाध्यायस्य अष्टाविंशः खण्डः ॥ २८ ॥

---

14. S[4] प्रतीचीनेडं for प्रतीचीनेडे

इति त्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभाई-
द्वितीयनाम्ना कृते फुल्लदीपे तृतीयोऽध्यायः ॥

पुष्पसूत्रे तृतीयः प्रपाठकः समाप्तः ॥ ३ ॥

ॐ

2. s[4] colophon :- इति नानाभायिव्याख्याने फुल्लसूत्रे तृतीयः प्रपाठके एकाहे प्रकृतिभावस्य ॥ तृतीयः प्रपाठकः ॥

चतुर्थः प्रपाठकः

अथ अहीनाः

प्रथमः खण्डः

कृक्षें मदि । नारे । ऊतिः ॥ १ ॥

दी. **पन्यंपन्यमित्सोतारः** (ऊ. अ. ५३३) इति **श्रौतकक्षे मादीऽ२याऽ२३४या** । अत्र **दी**-कारः प्रकृतिः । तृतीयायां **नारेऽ२आऽ२३४स्मात्** । अत्र **रे**-कारः प्रकृतिः । **शतमूऽ२३तीऽ३४३ः** । अत्र **ती**-कारः प्रकृतिः ॥ १ ॥

स्वर्वन्निधने परि । पूष्णे । महे ।
पेयात् । क्रत्वे । श्वेच ॥ २ ॥

दी. **परीऽ३होइ** । (ऊ. अ. ५३६) इति **स्वर्वन्निधनसौहविषे** । अत्र **री**-कारः प्रकृतिः । **पूष्णोऽ३होइ** । अत्र **ष्णो**-कारः प्रकृतिः । द्वितीयायां **महेऽ३होइ** । अत्र **हे**-कारः प्रकृतिः । **पीऽ३यूऽ५षाद्५६ः** । अत्र **पीयू सर्वत्र** (पु. सू. ३. ८. १३) इति **पी**-कारः प्रकृतिः । तृतीयायां **स्यपेऽ२३४यात्** । अत्र **पे**-कारः प्रकृतिः । **क्रत्वेऽ३होऽ३** । अत्र **त्वे**-कारः प्रकृतिः । **विश्वेऽ३हौइ** । अत्र **श्वे**-कारः प्रकृतिः । **विश्वे२३४** । अत्र **श्वे**-कारः प्रकृतिः ॥ २ ॥

बोधीये शेय । धिये ॥ ३ ॥

दी. **जराबोधोवा** (ऊ. अ. ५३७) इति **जराबोधीये विशाइवाऽ२३इशे** । अत्र **शे**-कारः प्रकृतिः । द्वितीयायां **धियेवाऽ१जाऽ२३या** । अत्र **ये**-कारः प्रकृतिः ॥ ३ ॥

---

1. My[2] begins with श्रीगणेशाय नमः
10. L[1] स्वर्वन्निधने for स्वर्वन्निधन०
14. L[1] om. विश्वेऽ३४३ । अत्र श्वेकारः प्रकृतिः

मार्गीयवे किने ॥ ४ ॥

दी. तद्वोहोवा (ऊ. अ. ५३८) इति मार्गीयवे किनेऽ२३४५। अत्र ने-कारः प्रकृतिः ॥ ४ ॥

जये क्षारान्ते देव ॥ ५ ॥

दी. प्रसोऽ३१ (ऊ. अ. ५४७) इति आक्षाराꣳतयौधाजये माऽ३दे। अत्र दे-कारः प्रकृतिः। वीऽ२३४५ः। अत्र गृहिः सर्वत्र (पु. सू. ३. १६. ९) इति अनेन वी-कारः प्रकृतिः ॥ ५ ॥

वैखानसे प्रिया ॥ ६ ॥ प्रथमः ॥ १ ॥

दी. अभिप्रीऽ३याणिपवताइ (ऊ. अ. ५५०) इति वैखानसे प्री-कारः प्रकृतिः ॥

इति ऊहे अहीने प्रकृतिभावस्य प्रथमः खण्डः ॥ १ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य प्रथमः खण्डः ॥ १ ॥

द्वितीयः खण्डः

तानिन्यभि ॥ १ ॥

दी. अमीहाउ (ऊ. अ. ५५८) इति सन्तनिनि। अत्र भी-कारः प्रकृतिः ॥

पार्श्वे गहि ॥ २ ॥

दी. मोषू (ऊ. अ. ५६१) इति गायत्रपार्श्वे आगहीऽ२३४। अत्र ही-कारः प्रकृतिः ॥ २ ॥

---

7. L[1] om. अनेन वीकारः प्रकृतिः

14. S[4] सन्तनि for सन्तनिनि

वाचः साम्नि। दी द्वितीयम्। देव।

वह्निः स्तावे। स्वरी ॥ ३ ॥

दी. **अभित्युम्नाम्** (ऊ. अ. ५६६) इति **वाचस्साम्नि दाइदीऽ१हाइदेऽ२**। अत्र द्वितीयस्य **दी**-कारस्य **दे**-कारस्य च प्रकृतित्वम्। तृतीयायां **विशां वह्नीः**। अत्र प्रस्तावे **ह्नी**-कारः प्रकृतिः। **पावस्वारीऽ२**। अत्र **री**-कारः प्रकृतिः ॥ ३ ॥

शौक्ते श्रिये ॥ ४ ॥

दी. **सखा** (ऊ. ए. ५६७) इति **शौक्ते श्रियेऽ१**। अत्र **ये**-कारः प्रकृतिः ॥

सिते सने मदे ॥ ५ ॥ द्वितीयः ॥ २ ॥

दी. **इन्द्रायसोमपा** (ऊ. अ. ५६८) इति **आसिताद्ये नारेऽ२चादाऽ२**। अत्र **नरे सर्वत्र** (पु. सू. ३. १२. १) इति **रे**-कारः प्रकृतिः। द्वितीयायां **सानेऽ२मावाऽ२**। अत्र **ने**-कारः प्रकृतिः। तृतीयायां **बभ्रुंपुनन्तिवारेऽ२३णा**। अत्र **रेण सर्वत्र** (पु. सू. ३. ११. ६) इति **रे**-कारः प्रकृतिः। **योदेऽ२वान्वाऽ२इ**। अत्र **योदे सर्वत्र** (पु. सू. ३. १२. १) इति **दे**-कारः प्रकृतिः। **मदेऽ२नासाऽ२**। अत्र **दे**-कारः प्रकृतिः ॥ ५ ॥

इति ऊहे अहीने प्रकृतिभावस्य द्वितीयः खण्डः ॥ २ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

तृतीयः खण्डः

ज्ञीये परि नन्ति ॥ १ ॥

दी. **इन्द्राऽ५य** (ऊ. अ. ५७३) इति **यज्ञायज्ञीये रीऽ५षाइच्याऽ३साइ**। अत्र

---

10. & 12. L[1] om. रेकारः प्रकृतिः

13. My[2] S[4] om. अत्र देकारः प्रकृतिः

री-कारः प्रकृतिः । तृतीयायां तीऽ३वारेऽ३णा । अत्र ती-कारः प्रकृतिः । अत्रैव रेण सर्वत्र (पु. सू. ३. ११. ६) इति रे-कारः प्रकृतिः ॥ १ ॥

परे ज्ञीये षि। सइत् ॥ २ ॥

दी. परे अग्निमे पवाऽ५इत्रम् (ऊ. अ. ५७४) इति यज्ञायज्ञीये षीऽ३वाइश्वाऽ३ताः । अत्र षी-कारः प्रकृतिः । साऽ३२ईत् । अत्र ई-कारः प्रकृतिः ॥ २ ॥

विशीये प्रियम्। सन्ति ॥ ३ ॥

दी. विशोविशोहिंःवोऽ३अतिथाइम् (ऊ. अ. ५७५) इति विशोविशीये पूऽ३रूप्रीऽ३याम् । अत्र प्री-कारः प्रकृतिः । द्वितीयायां साऽ२३४न्ती । अत्र न्ती-कारः प्रकृतिः ॥ ३ ॥

संक्षारे भूमि । श्वानि ॥ ४ ॥

दी. औहोइहुवाऽ३होइ । उच्चातेजाऽ३ताऽ३मन्धसः (ऊ. अ. ५७८) इति इडानांसंक्षारे दिविसद्भूऽ३मीऽ३ । अत्र मी-कारः प्रकृतिः। तृतीयायाम् एनाविश्वाऽ३नीऽ३ । अत्र नी-कारः प्रकृतिः॥ ४ ॥

ष्मते सः पी ॥ ५ ॥

दी. हाउपरिसुवानोगिरिष्ठाहाउ (ऊ. अ. ५८१) इति हाविष्मते तृतीयायां देवासस्पीऽ३ । अत्र पी-कारः प्रकृतिः ॥ ५ ॥

धर्त्ता ज्ञीये त्वियो । मादि ॥ ६ ॥

दी. धर्त्ताऽ५दि (ऊ. ए. ५८८) इति यज्ञायज्ञीये त्वीयोरसो । अत्र त्वी-कारः प्रकृतिः। दीऽ३योनृऽ३भाइः । अत्र दी-कारः प्रकृतिः ॥ ६ ॥

---

1. My[2] रेकारश्च for तीकारः; L[1] My[2] om. अत्रैव रेण सर्वत्र इति रेकारः प्रकृतिः

देव्ये येद प्रिया ॥ ७ ॥ तृतीयः ॥ ३ ॥

दी. **काऽ५स्तम्** (ऊ. अ. ५९१) इति **वामदेव्ये** तृतीयायां **येऽ५द**। अत्र ये-कारः प्रकृतिः। **दताऽ३इप्रीऽ३यावसाउ**। अत्र **प्री**-कारः ॥ ७ ॥

इति ऊहे अहीने प्रकृतिभावस्य तृतीयः खण्डः ॥ ३ ॥

इति फुल्लदीपे तृतीयाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

चतुर्थः खण्डः

भीशवे सीद। नृभिः ॥ १ ॥

दी. **पुनानस्सोमधारयाए** (ऊ. अ. ५९६) इति **आभीशवोत्तरे त्वधायोनिमृतस्यसीऽ१दसाइ**। अत्र **सी**-कारः प्रकृतिः। तृतीयायां **नृऽ२३४भीः**। अत्र **भी**-कारः प्रकृतिः ॥ १ ॥

यानि पार्थे तानि सिष्ठे ॥ २ ॥

दी. **ओऽ३होऽ३होइ**। **अयꣳसोमाः** (ऊ. सं. ३४७) इति **पार्थे यानि** उदाहरणानि **तानि अयꣳसोमावासिष्ठे** भवन्ति। **औहोवाहाऽ३होइ**। **इहा**। **अयꣳसोमाः** (ऊ. अ. ५९७) इति **वासिष्ठे अस्यपाही**। अत्र **ही**-कारः प्रकृतिः। द्वितीयायां **षाडयोजी**। अत्र **जी**-कारः प्रकृतिः। **णीऽ३सात**। अत्र **णी**-कारः प्रकृतिः। **याइवस्नूनी**। अत्र **नी**-कारः प्रकृतिः। तृतीयायां **यायथावीद्**। अत्र **वी**-कारः प्रकृतिः ॥ २ ॥

देव्य एदु ॥ ३ ॥

दी. **एऽ५दु** (ऊ. अ. ५९८) इति **वामदेव्ये**। अत्र **ए**-कारः प्रकृतिः ॥ ३ ॥

साहीये सन्दे ॥ ४ ॥

दी. पवाऽ३४। स्वदक्षसाधनः (ऊ. अ. ६०१) इति सत्रासाहीये द्वितीयायां सन्देऽ३४। अत्र दे-कारः प्रकृतिः ॥ ४ ॥

बृहद्भारे मही ॥ ५ ॥

दी. परिप्रिया (ऊ. अ. ६०२) इति बृहद्भारद्वाजे द्वितीयायां जातोजाऽ२३ते। ते सर्वत्र (पु. सू. ३. ६. ८) इति अत्र ते-कारः प्रकृतिः। महान्माऽ२३ही। अत्र ही-कारः प्रकृतिः ॥ ५॥

क्रोशे धीभिः ॥ ६ ॥

दी. सोमाः (ऊ. अ. ६०३) इति क्रोशे द्वितीयायां धीभीः। अत्र भी-कारः प्रकृतिः ॥ ६ ॥

भ्रयश्वे सुते ॥ ७ ॥

दी. पराइपराइ (ऊ. अ. ६०६) इति आनूपवाभ्रयश्वे तृतीयायां सूतेऽ२चाइ त्वाऽ२। अत्र ते-कारः प्रकृतिः ॥ ७ ॥

धीगवषेधयोर्धियः ॥ ८ ॥ चतुर्थः ॥ ४ ॥

दी. सोमाःपवन्तआऽ१इन्दावाः (ऊ. अ. ६०९) इति आन्धीगवे धीऽ२याः। अत्र धी-कारः प्रकृतिः। सोमाःपवन्ताऽ३इदन्वाः (ऊ. अ. ६१०) इति निषेधे सुवाऽ३-धीयाः। अत्र धी-कारः प्रकृतिः ॥ ८ ॥

इति ऊहे अहीने प्रकृतिभावस्य चतुर्थः खण्डः ॥ ४ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

---

5. L[1] अत्र तेकारः ते सर्वत्रेति for ते सर्वत्र इति — अत्र तेकारः प्रकृतिः; S[4] before ते सर्वत्र adds: अत्र

11. My[3]L[1] om. आनूप

पञ्चमः खण्डः

त्रेये देवे ॥ १ ॥

दी. पवस्वश्रा (ऊ. अ. ६२३) इति आत्रेये देवेभ्योऽ३माऽ३ । अत्र वे-कारः प्रकृतिः ॥ १ ॥

ज्ञीयेऽभि तृतीयायाम् ॥ २ ॥

दी. अभाऽ५इम्रि (ऊ. अ. ६२८) इति **यज्ञायज्ञीये** तृतीयायाम् अभीऽर **ऋत-स्यदोहनाअनूष** । अत्र भी-कारः प्रकृतिः ॥ २ ॥

बोधीये देव । संवे ॥ ३ ॥

दी. नमस्तओवा (ऊ. अ. ६२९) इति **जराबोधीये गृणान्ताऽर३इदे** । अत्र दे-कारः प्रकृतिः । द्वितीयायाम् अग्नाइसाऽर३मृवे । अत्र वे-कारः प्रकृतिः ॥ ३ ॥

ज्ञीये दिया ॥ ४ ॥ पञ्चमः ॥ ५ ॥

दी. वृषाऽ५म (ऊ. अ. ६३०) इति **यज्ञायज्ञीये दीयाविशन्मनाऽरइषिभाउ** । अत्र दी-कारः प्रकृतिः ॥ ४ ॥

इति ऊहे अहीने प्रकृतिभावस्य पञ्चमः खण्डः ॥ ५ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

षष्ठः खण्डः

त्वाष्ट्री यवे ॥ १ ॥

दी. पवस्वदा (ऊ. अ. ६३३) इति **त्वाष्ट्रीसाम्नि यवेमदाऽउ१२वाऽर३** । अत्र वे-कारः प्रकृतिः ॥ १ ॥

---

18. s^4 before त्वाष्ट्री° adds: यवीद्धयन्त्यां

भीशवे मनी ॥ २ ॥

दी. अभिसोमासआयवए । ए (ऊ. अ. ६३५) इति आमीशवोत्तरे द्रस्याघिविष्टपेमानीऽ१षिणाः । अत्र नी-कारः प्रकृतिः ॥ २ ॥

सिष्ठे मथिः । गहि ॥ ३ ॥

दी. वयमेनामिदा (ऊ. अ. ६३७) इति [इ]दावासिष्ठे द्वितीयायाम् उरामाऽ१-थीऽ२ः । अत्र थी-कारः प्रकृतिः । तृतीयायां णआगाऽ१हीऽ२ । अत्र ही-कारः प्रकृतिः ॥ ३ ॥

वार्शे प्रिया ॥ ४ ॥

दी. प्राणाशिशूः (ऊ. अ. ६४०) इति वार्शे प्रीयाशुवाऽ३त् । अत्र प्री-कारः प्रकृतिः ॥ ४ ॥

ज्ञीये चाति सर्वत्र ॥ ५ ॥

दी. पवास्वाऽ५ (ऊ. अ. ६४१) इति यज्ञायज्ञीये द्वितीयायां त्रेऽ३आद्रूऽ३हाः । अत्र त्रे सर्वत्र (पु. सू. ३. १३. ७) इति [त्रे-कारः] प्रकृतिः । तृतीयायां तीऽ३जाभ्री-ऽ३षाइ । अत्र ती-कारः प्रकृतिः । जभ्रि सर्वत्र (पु. सू. ३. ६. १०) इति भ्री-कारः [च] प्रकृतिः ॥

सर्वसामसु चाती-शब्दस्य प्रकृतिः । उदाहरणम् । एपावा (र. क्षु. १८०) इति नित्यवत्सासु तृतीयायाम् आती । अत्र ती-कारः प्रकृतिः ॥ ५ ॥

न वाभ्रान्धीगवयोः ॥ ६ ॥

---

13. My[2] om. तृतीयायां

14. L[1]My[2] भ्रीकारः तीकारश्च जभ्री सर्वत्रेति for तीकारः प्रकृतिः । जभ्री सर्वत्र (पु. सु. ३. ६. ८) इति भ्रीकारः प्रकृतिः

16. L[1] My[2] om. उदाहरणम् ··· तीकारः प्रकृतिः

अथ निषेधमाह – **पवाऽ३१** (ऊ. अ. ६११) इति **श्यावाश्वे** तृतीयायां **पार्थिवी-श्वाताइ** । अत्र **चाती**-शब्दस्य **न** प्रकृति[भाव]: । **पवस्ववाजसाऽ१तायाइ** (ऊ. ए. ६१२) इति **आन्धीगवे** तृतीयायां **चाताऽ२३इजा** । अत्र **ती**-शब्दस्य **न** प्रकृतिभावः ॥ ६ ॥

हृदाग्नेये दूरे ॥ ७ ॥

दी. **अग्निन्नरोदीधितिभिः** (ऊ. अ. ६४२) इति **बृहदाग्नेये स्तन्दूऽ२रेऽ२३४दू** । अत्र **रे**-कारः प्रकृतिः ॥ ७ ॥

गते तेदि ॥ ८ ॥

दी. **तवाहाऽ३९सोमरारणा** (ऊ. अ. ६४८) इति **द्वैगते** द्वितीयायां **अहन्नक्त-मुतसोमातेऽ१दिवऽ२** । अत्र **ते**-कारः प्रकृतिः ॥ ८ ॥

गौङ्गवे दिवे पूर्वम् ॥ परि ॥ ९ ॥

दी. **तवाहाऽ३९सोमराणा** (ऊ. अ. ६४९) इति **गौङ्गवे इन्दोदिवेऽ३** । **दाइ-वाइ** । अत्र पूर्वस्यम् **दिवे**-शब्दस्य प्रकृतिभावः । नाग्रिमस्य । द्वितीयायां **पारीऽ२** । अत्र **री**-कारः प्रकृतिः ॥ ९ ॥

यास्ये पर्युद्गीथे । दिवा ॥ १० ॥

दी. **तवाह९सोमरारण** (ऊ. अ. ६५०) इति **द्विनिधन आयास्ये** द्वितीयायाम् **उद्गीथे पारीऽ३** । अत्र **री**-कारः प्रकृतिः । **दीऽ२३४वा** । अत्र **दी**-कारः प्रकृतिः ॥

यानि पार्थे तानि वाराहे ॥ ११ ॥

दी. **ओऽ३होऽ३होइ** । **प्रकावियाम्** (ऊ. सं. २२७) इति **पार्थे यानि** उदाहरणानि

---

2. S[4] तीशब्दस्य चातीशब्दस्य

15. L[1] द्विनिधनम् for द्विनिधन॰

18. S[4] वाराहे for पार्थे.

तानि अत्र **हाउहाउहुप्** । **प्रकावियाम्** (ऊ. अ. ६५१) इति **वाराहे** भवन्ति । **मावि-वक्ती** । अत्र **क्ती**-कारः प्रकृतिः । **तीऽ२राऽ५इ** । अत्र **ती**-कारः प्रकृतिः । द्वितीयायां **तीऽ३साऽ५काऽ६५६म्** । अत्र **ती**-कारः प्रकृतिः । तृतीयायां **यस्यजूतीम्** । अत्र **ती**-कारः प्रकृतिः । **तेनगावाः** । अत्र **ते**-कारः प्रकृतिः ॥ ११ ॥

वाशे शिप्री ॥ १२ ॥

दी. **कइवेदा** (ऊ. अ. ६५२) इति **वाशे** **मन्दानाऽ२३श्शीऽ३** । अत्र **शी**-कारः प्रकृतिः ॥ १२ ॥

इति ऊहे अहीने प्रकृतिभावस्य षष्ठः खण्डः ॥ ६ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

सप्तमः खण्डः

सारथिनि यासीत् । प्रमि । इव । वति ।
धियो । धेन । तंपि । तोत्रिः ॥ १ ॥

दी. **प्रोआयाऽ२३४सीत्** (ऊ. अ. ६५७) इति **यज्ञसारथिनि** । अत्र **सी**-कारः प्रकृतिः । **नप्रामीऽ२३४ना** । अत्र **मी**-कारः प्रकृतिः । **मर्याईऽ२३४वा** । अत्र **ई**-कारः प्रकृतिः । **युवातीऽ२३४भाइः** । अत्र **ती**-कारः प्रकृतिः । द्वितीयायां **प्रवोधीऽ२३४यो** । अत्र **धी**-कारः प्रकृतिः । **अभाइधेऽ२३४ना** । अत्र **धे**-कारः प्रकृतिः । तृतीयायां **संया-ताऽ२३४मूपी** । अत्र **पी**-कारः प्रकृतिः । **तेत्रीराऽ२३४हान्** । अत्र **त्री**-कारः प्रकृतिः ॥

स्रौग्मते पनी । यसी । मिद्री ॥ २ ॥

दी. **आऽ२३४** । **तेअग्रइध्री** (ऊ. अ. ६५८) इति **स्रौग्मते** **पानीऽ२याऽ२३-**

---

1. L[1] वाराहे भवन्ति for अत्र; L[1] om. भवन्ति

४सी। अत्र नी-कारः सी-कारश्च प्रकृती। समिद्दीऽ२दय। अत्र दी-कारः प्रकृतिः। द्वितीयायां शुक्रस्यज्योतिऽ३। अत्र ति-कारः अदीर्घः। अदीर्घं दीर्घवत्कुर्यात् द्विस्वरं यत्प्रयुज्यते। (ना. शि) इति वचनात्॥ २॥

यानि पार्थे तानि हाइउहुवाइ सिष्ठे॥ ३॥

दी. ओऽ३होऽ३होइ। शिशुंजज्ञा (ऊ. सं. ३३४) इति पार्थे यानि उदाहरणानि तानि अत्र शिशुञ्जज्ञावासिष्ठे भवन्ति। हाइ। उहुवाइ। शिशाऽ३४औहोवा (ऊ. अ. ६५९)इति वासिष्ठे। तोगणेना। अत्र णे-कारः प्रकृतिः। तीऽ३राऽ५इ। अत्र ती-कारः प्रकृतिः। द्वितीयायां वीᳲकवीनाम्। अत्र वीः-कारो वी-कारश्च प्रकृती॥

ज्ञीये तिवा। द्रिस। परि॥ ४॥

दी. पराऽ५इत्यम् (ऊ. अ. ६६१) इति यज्ञायज्ञीये तीऽ३वारेऽ३णा। अत्र ती-कारः प्रकृतिः। रेण सर्वत्र (पु. सू. ३. ११. ६) इति रे-कारस्य प्रकृतिभावः। योदेऽ२वान्। अत्र योदे सर्वत्र (पु. सू. ३. १२. १) इति दे-कारः प्रकृतिः। द्वितीयायां द्रीऽ३साᳲहाऽ३ताम्। अत्र द्री कारः प्रकृतिः। तृतीयायां रीऽ३षाइच्याऽ३साइ। अत्र री-कारः प्रकृतिः। नरेऽ२च। अत्र नरे सर्वत्र (पु. सू. ३. १२. १) इति नरेशब्दस्य प्रकृतिभावः॥ ४॥

आष्कारणिधने नृभिः॥ ५॥

दी. पुनानाऽ३रसोमधारया (ऊ. अ. ६६३) इति आष्कारणिधने तृतीयायां नृऽ२३भीः। अत्र भी-कारः प्रकृतिः॥ ५॥

---

3. S[4] om. द्विस्वरं यत् प्रयुज्यते
6. L[1] वासिष्ठे भवन्ति for अत्र
7. My[2] S[4] after वासिष्ठे add: भवन्ति
11. S[4] रेकारः प्रकृतिः for रेकारस्य प्रकृतिभावः
12. S[4] om. योदेऽ२वान्; My[2] देकारस्य for देकारः
14. S[4] रेकारः प्रकृतिः for नरेशब्दस्य प्रकृतिभावः

षेधज्ञीययोर्न्ने ॥ ६ ॥

दी. अभीनोवाजाऽ३सातामाम् (ऊ. अ. ६६४) इति निषेधे द्वितीयायां नाइने-ऽ३दाइष्ठा । अत्र ने-कारः प्रकृतिः । अभाऽ३इनः (ऊ. अ. ६६६) इति यज्ञायज्ञीये निनेऽ२दी । अत्र ने-कारः ॥ ६ ॥

मन्ते दित्याम् ॥ ७ ॥

दी. इमᳲस्तोममर्हतेजातवेदसाइ (ऊ. सं. ६६७) इति समन्ते तृतीयायां तुवामाऽ२३दी । अत्र दी-कारः प्रकृतिः ॥ ७ ॥

दस्ये सोमसाम्नि षसि । दासि ॥ ८ ॥

दी. दस्ये सच्छन्दस्ये । स्वच्छन्दसि बृहत्यां प्रयुक्ते पुनानस्सोऽ२मधारया (ऊ. अ. ६६८) इति सोमसाम्नि, – अथवा आर्षेयब्राह्मणे अपदासे द्वे (आ. ब्रा. ५. ५. १) इत्यभिधानात् दास्ये सोमसाम्नि इति सूत्रपाठान्तरम् । –, नोअर्षसी । अत्र सी-कारः प्रकृतिः । स्यसीदसी । अत्र सी-कारः प्रकृतिः ॥ ८ ॥

सिष्ठं पूर्वेणोक्तम् ॥ ९ ॥

दी. उहुवाइ । शिशाऽ३४औहोवा (ऊ. अ. ६७०) इति पूर्ववासिष्ठे । हाइ । उहुवाइ । शिशाऽ३४औहोवा (ऊ. अ. ६५९) इत्युत्तरवासिष्ठेन पूर्वेणैव प्रकृतिभावः उक्तः । तोगणेना । अत्र णे-कारः प्रकृतिः । तीऽ३राऽ५इ । अत्र ती-कारः प्रकृतिः । द्वितीयायां वीᳲकवीनाम् । अत्र वीः-करो वी-कारश्च प्रकृती भवतः ॥ ९ ॥

---

4. My[2] before निनेऽ adds: द्वितीयायां

10. L[1]My[2] om. अथवा .... ०पाठान्तरम्

14. L[1] My[2] om. पूर्व०

15. L[1]My[2] पूर्वेण वासिष्ठेन for उत्तरवासिष्ठेन; L[1] My[2] om. पूर्वेणैव; L[1] My[2] ०भावमुक्तम् for ०भाव उक्तः

17. L[1]My[2] om. भवतः

शाङ्र्गो हरिः ॥ १० ॥ सप्तमः ॥

दी. हाउधर्त्ता (ऊ. अ. ६७२) इति शार्ङ्गे हाउहारीः । अत्र री-कारः प्रकृतिः ॥ १० ॥

इति ऊहे अहीने प्रकृतिभावस्य सप्तमः खण्डः ॥ ७ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

अष्टमः खण्डः

अक्रान् वासिष्ठे थमे । सेनः । देवान् ।

णीत । देवान् । द्रेव । ज्योतिः ॥ १ ॥

दी. हाउ । उहुवाइ । अक्राऽ३४औहोवा (ऊ. अ. ६७३) इति वासिष्ठे मेविधर्मान् । अत्र मे-कारः प्रकृतिः । त्रेऽ३अधि । त्रे सर्वत्र (पु. सू. ३. १३. ७) इति त्रे-कारः प्रकृतिः । द्वितीयायां राधसेनाः । अत्र से-कारः प्रकृतिः । मत्सिदेवान् । अत्र दे-कारः प्रकृतिः । तृतीयायां णीतदेवान् । अत्र णी-कारो दे-कारश्च प्रकृती भवतः । द्रेऽ३पव । अत्र द्रे-कारः प्रकृतिः । तीऽ३राऽ५इ । अत्र ती-कारः प्रकृतिः ॥ १ ॥

सिते मदे ॥ २ ॥

दी. पराइत्याऽ२३४हर्यतऽहरिऽहाउ (ऊ. अ. ६७४) इति आसितोत्तरे योदेवाऽ३न्वाऽ३इ । अत्र योदे सर्वत्र (पु. सू. ३. १२. १) इति दे-कारस्य प्रकृतिभावः । मदेनाऽ३साऽ३ । अत्र दे-कारः प्रकृतिः ॥ २ ॥

याम एषि । एषि ॥ ३ ॥

11. My[2] om. त्रेकारस्य for त्रेकारः
12. L[1] om. प्रकृती भवतः

दी. **असावाइसो॒ऽ२३** (ऊ. अ. ६७६) इति **ऐडयामे रमताइयेऽ२३** । अत्र **ये**-कारः प्रकृतिः । तृतीयायां **स्वापराइयेऽ२३** । अत्र **ये**-कारः प्रकृतिः ।। ३ ।।

शने मती । सूरे । वीषः । ऊर्ता ।

षावित् ।। ४ ।। अहीनाः ।।

दी. **आजा** (ऊ. अ. ६७७) इति **औशने मतीऽ३नाम्** । अत्र **ती**-कारः प्रकृतिः । द्वितीयायां **नानउपस्तूरे** । अत्र **रे**-कारः प्रकृतिः । **वीषआवाः** । अत्र **वी**-कारः प्रकृतिः । **सऊऽ२३ती** । अत्र **ती**-कारः प्रकृतिः । तृतीयायां **ज्योतिषावीत्** । अत्र **वी**-कारः प्रकृतिः ।। ४ ।।

इति ऊहे अहीने प्रकृतिभावस्य अष्टमः खण्डः ।। ८ ।।

इति फुल्लदीपे तृतीयाध्यायस्य अष्टमः खण्डः ।। ८ ।।

।। अहीनाः समाप्ताः ।।

नवमः खण्डः — सत्रे प्रथमः

अथ सत्रम्

गतहन्मनयोरत्के ।। १ ।। प्रथमः

दी. **प्रसोमाऽ३देववीतयाइ** (ऊ. स. ६९०) इति **द्वैगते पयसामदिरोनजागृऽ-१वीऽ२ः** । अत्र **गृविः सर्वत्र** (पु. सू. ३. १६. ९) इति **वी**-कारस्य प्रकृतिभावः । द्वितीयायां **यतोअर्जुनोअत्केअव्यातोऽ२** । अत्र **त्के**-कारः प्रकृतिः ।।

प्रसोमाऽ३देववीतयाइ (ऊ. स. ६९१) इति **पौरुहन्मने नाजागृऽ२३४वीः** ।

---

1 . S[4] ऐडं for एड

6. L[1]My[2] om. नानउपसूरे । अत्र रेकारः प्रकृतिः

अत्र गृविः सर्वत्र (पु. सू. ३. १६. ९) इति वी-कारः प्रकृतिः। द्वितीयायां त्के अव्या- ऽ२३४ता। अत्र त्के-कारः प्रकृतिः ॥ १ ॥

इति ऊहे सत्रे प्रकृतिभावस्य प्रथमः खण्डः ॥ १ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य नवमः खण्डः ॥ ९ ॥

दशमः खण्डः — सत्रे द्वितीयः

शङ्कुनि वर्मी ॥ १ ॥

दी. एषस्यधा (ऊ. स. ७००) इति शङ्कुनि तृतीयायां वार्मीऽ२वाधाऽ२३। अत्र र्मी-कारः प्रकृतिः ॥ १ ॥

यानि पार्थे तान्यौशने ॥ २ ॥

दी. ओऽ३होऽ३होइ। साकमुक्षे (ऊ. ए. ४६३) इति पार्थे यानि उदाहरणानि तानि साकमुक्षोऔशने भवन्ति। साकाम्। (ऊ. स. ७०३) इति औशने योधनुत्रीः। अत्र त्री-कारः प्रकृतिः। क्षेऽ३अति। अत्र क्षे-कारः प्रकृतिः। द्वितीयायां न्वेऽ३पुरु। अत्र न्वे-कारः प्रकृतिः। स्रीऽ३याऽ५। त्रअ स्री-कारः प्रकृतिः। तृतीयायां भीऽ३स्सच। अत्र भी-कारः प्रकृतिः। तेसुमेधाः। अत्र ते-कारो मे-कारश्च प्रकृती। तीऽ३वस्र। अत्र ती-कारः प्रकृतिः ॥ २ ॥

ष्कले नेमि ॥ ३ ॥

दी. गोमन्नाऽ३इन्दो (उ. स. ७०५) इति पौष्कले तृतीयायां सनेमीऽ३तु। अत्र मी-कारः प्रकृतिः ॥ ३ ॥

---

1. L¹My² om. गृविः सर्वत्र इति
13. S⁴ om. तृतीयायां

वाशे षणे ॥ ४ ॥

दी. उभयꣳशा (ऊ. स. ७०६) इति वाशे द्वितीयायां धिषणोऽ२३नाऽ३इः। अत्र णो-कारः प्रकृतिः ॥ ४ ॥

मानवे वेध ॥ ५ ॥

दी. होवाइ। त्वामिदाह्योनरः (ऊ. स. ७०७) इति मानवोत्तरे द्वितीयायां ताऽ२इवेऽ२२४औहोवा। अत्र वे-कारः प्रकृतिः ॥ ५ ॥

आष्कारणिधने वेद। नेन्द्रो ॥ ६ ॥

दी. कईꣳवेऽ३दसुतेसचा (ऊ. स. ७०८) इति आष्कारणिधने काण्वे। अत्र वे-कारः प्रकृतिः। तृतीयायां नेऽ२३न्द्रो। अत्र ने-कारः प्रकृतिः ॥ ६ ॥

नित्रे स्याद्वि ॥ ७ ॥

दी. योराजाऽ३चर्षणाइनाम् (ऊ. स. ७१२) इति जनित्रे तृतीयायां यस्यद्वीऽ३ताविधर्त्ताराइ। अत्र द्वी-कारः प्रकृतिः ॥ ७ ॥

इन्द्रस्य यशसि त्राणि। एकः ॥ ८ ॥

दी. त्वमिन्द्रा। यशाः (ऊ. स. ७१३) इति इन्द्रस्य यशसि त्वंवृत्राणीऽ३हꣳसिया। अत्र णी-कारः प्रकृतिः। प्रतीनाएऽ२। अत्र ए-कारः प्रकृतिः ॥ ८ ॥

जमवर्ते तुते ॥ ९ ॥

दी. पिबासुतस्यरसिनोमत्स्वाहाउ (ऊ. स. ७१५) इति जमदग्नेरभीवर्ते तुतेऽ३होऽ२। अत्र ते-कारः प्रकृतिः ॥ ९ ॥

अभ्यन्ते मन्द्रैः। याहि। चित्। येमुः।

---

9. L[1] om. नेऽ२३न्द्रो … जनित्रे तृतीयायां (l. 11)

12. L[1] वीकारः for द्वीकारः

इत्। अतिधन्वे। हरि। गम्भी। सन्धे॥ १०॥

दी. अभिनिधनम् अन्ते यस्य तत् अभ्यन्तम्। तस्मिन् अभ्यन्ते। **औहोहोहाइ**। **आइही**। **आमा** (ऊ. स. ७१६) इति **अभिनिधने काण्वे द्रैऽ२३४राइ**। अत्र **द्रै**-कारः प्रकृतिः। **याहीमाऽ२३४यू**। अत्र **ही**-कारः प्रकृतिः। **मात्वाकाऽ२३४इचीत्**। अत्र **ची**-कारः प्रकृतिः। **नाइयेमूऽ२३४रीत्**। अत्र **ये**-करो **री**-कारश्च प्रकृती। **आतीधाऽऽ३४न्वे**। अत्र **ती**-कारो **न्वे**-कारश्च प्रकृती। द्वितीयायां **स्याहारीऽ२३४योः**। अत्र **री**-कारः प्रकृतिः। तृतीयायाम् **आइही**। **गाम्भी**। अत्र **भी**-कारः प्रकृतिः। **यावासाऽ२३४न्धे**। अत्र **धे**-कारः प्रकृतिः॥ १०॥

मनाज्ये गाहि। कण्वे। देया॥ ११॥

दी. **यथागौऽ२३रोअपाकृताम्** (ऊ. स. ७१७) इति **गौतमस्य मनाज्ये आपित्वेनऽप्रपित्वेतूयमागाऽ२३ही**। अत्र **ही**-कारः प्रकृतिः। **कण्वेऽ२षुसूऽ२३**। अत्र **ण्वे**-कारः प्रकृतिः। द्वितीयायां **राधोदेऽ२३याऽ३**। अत्र **दे**-कारः प्रकृतिः। तृतीयायां **राधोदेऽ२३याय**। अत्र **दे**-कारः प्रकृतिः॥ ११॥

मीढे ब्रवी॥ १२॥ द्वितीयः॥

दी. **तुवम** (ऊ. स. ७१८) इति **पौरुमीढे इन्द्रब्राऽ२३वी**। अत्र **वी**-कारः प्रकृतिः॥ १२॥

इति ऊहे सत्रे प्रकृतिभावस्य द्वितीयः खण्डः॥ २॥

इति फुल्लदीपे चतुर्थाध्यायस्य दशमः खण्डः॥ १०॥

---

6. L[1] My[2] om. द्वितीयायां
10. My[2] om. गौतमस्य
12. L[1] My[2] om. तृतीयायां ... देकारः प्रकृतिः

एकादशः खण्डः — सत्रे तृतीयः

बोधीये च्छन्ती । दर्शि ॥ १ ॥

दी. प्रतिष्यासोवा (ऊ. स. ७२१) इति जराबोधीये वियूच्छाऽ२३न्ती । अत्र ती-कारः प्रकृतिः । दिवोआऽ१दाऽ२३र्शी । अत्र र्शी-कारः प्रकृतिः ॥ १ ॥

परे बोधीये छति ॥ २ ॥

दी. परे अग्रिमे एषोउषोवा (ऊ. स. ७२२) इति जराबोधीये वियूच्छाऽ-२३ती । अत्र ती-कारः प्रकृतिः ॥ २ ॥

श्रुध्ये येह ॥ ३ ॥

दी. उषस्तच्चाऽ२३त्रम् (ऊ. स. ७२३) इति श्रुध्ये द्वितीयायाम् उषोअ-ध्येऽ२ह । अत्र ध्ये-कारः प्रकृतिः ॥ ३ ॥

वैश्वज्योतिषे षीद । येन । वेद ॥ ४ ॥

दी. प्रतुद्रवा (ऊ. स. ७२५) इति वैश्वज्योतिषे शन्निषीदा । अत्र षी-कारः प्रकृतिः । तृतीयायां काश्यियेना । अत्र ये-कारः प्रकृतिः । सचिद्विवे । अत्र वे-कारः प्रकृतिः ॥ ४ ॥

शने यदीम् । यन्ति ॥ ५ ॥

दी. आवो (ऊ. स. ७२६) इति औशने तृतीयायां यादीम् । अत्र दी-कारः प्रकृतिः । जयाऽ२३न्ती । अत्र ती-कारः प्रकृतिः ॥ ५ ॥

परे शने श्वाते । चीद्या । देत्र । सुमे ॥ ६ ॥

दी. परे अग्रिमे आइदाम् (ऊ. स. ७२७) इति औशने द्वितीयायां वत्सारुश-तींश्वे । अत्र श्वे-कारः प्रकृतिः । अनूऽ२३ची । अत्र ची-कारः प्रकृतिः । तृतीयायां

---

9. S[4] My[2] om. द्वितीयायाम्

देवशिष्टाइ । अत्र वे-कारः प्रकृतिः । सुमेऽ२३काइ । अत्र मे-कारः प्रकृतिः ॥ ६ ॥

भाशने देव । रथ्ये । तेह । तमे ॥ ७ ॥

दी. आभा (ऊ. स. ७२८) इति औशने देऽ३वयाः । अत्र दे-कारः प्रकृतिः । अवोश्वानूनꣳरथ्ये । अत्र थ्ये-कारः प्रकृतिः । द्वितीयायां पस्तुतेहा । अत्र ते-कारः प्रकृतिः । तृतीयायां तमेऽ२३ना । अत्र मे-कारः प्रकृतिः ॥ ७ ॥

शुभार्गवे म्नानि ॥ ८ ॥

दी. उच्चाते । जातमन्धाऽ३साः (ऊ. स. ७२९) इति आशुभार्गवे द्वितीयायां वराइवोऽ१वीऽ२३त् । अत्र वोवित् सर्वत्र (पु. सू. ३. ४. ९) इति वी-कारस्य प्रकृतिभावः । तृतीयायां द्यूम्नानीऽ३ । अत्र नी-कारः प्रकृतिः ॥ ८ ॥

वैधृतसिष्ठे याणि । धियः ॥ ९ ॥

दी. वैधृते विधृतिषु सत्रेषु विनियुक्ते अभिप्रियाणीऽ२ । (ऊ. स. ७३२) इति इति वासिष्ठे । अत्र णी-कारः प्रकृतिः । द्वितीयायां वक्तापताइर्द्धीऽ२ । अत्र र्द्धी-कारः प्रकृतिः ॥ ९ ॥

एताः कावे श्वेद ॥ १० ॥

दी. एतोवा (ऊ. स. ७३४) इति कावे तृतीयायां वाइश्वेऽ२दाहा । अत्र श्वे-कारः प्रकृतिः ॥ १० ॥

परे कावे वीहे ॥ ११ ॥

दी. परे अग्रिमे कावे अबोवा (उ. स. ७३५) इति कावे प्रासाऽ३वीहे । अत्र

---

7. L[1] My[2] trans. द्वितीयायां ... वीकारस्य प्रकृतिभावः after नीकारः प्रकृतिः ॥ (l. 9)
11. S[4] विधृति० for विधृतिषु
12. My[2] om. इति वासिष्ठे
15. L[1] om. तृतीयायां ... श्वेकारः प्रकृतिः; My[2] om. तृतीयायां .... इति कावे (l. 18)
18. L[1] om. परे ... इति कावे

वी-कारो **दे**-कारश्च प्रकृती ॥ ११ ॥

भरे पत्नीः। वे पूर्वम् ॥ १२ ॥ तृतीयः ॥

दी. तन्ताऽ३इमाऽ३दंगृणोमसोवा (ऊ. स. ७३७) इति **सौभरे** तृतीयायां **पाऽ२३४त्नीः** । अत्र **त्नी**-कारः प्रकृतिः । **दिवेऽ३हाऽ३इ** । अत्र पूर्वस्य **वे**-शब्दस्य प्रकृतिभावः । **नाग्रिमस्य** ॥ १२ ॥

इति ऊहे सत्रे प्रकृतिभावस्य तृतीयः खण्डः ॥ ३ ॥

इति फुल्लदीपे तृतीयाध्यायस्य एकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः — सत्रे चतुर्थः

अग्नेस्त्रिणिधने मन्दी ॥ १ ॥

दी. अनूपेगो (ऊ. स. ७४१) इति **अग्नेस्त्रिणिधने मान्दीमाऽ२३४दा** । अत्र **दी**-कारः प्रकृतिः ॥ १ ॥

संक्षारे देवे। देवे ॥ २ ॥

दी. औहोइहुवाऽ३होइ हिंन्वन्तिसूऽ३राऽ३मुस्रयः (ऊ. स. ७४८) इति **इडानाꣳसंक्षारे** द्वितीयायां **देवदेऽ३वेऽ३भ्यस्सुतः** । अत्र **दे**-कारो **वे**-कारश्च प्रकृती । तृतीयायां **वृष्टिन्देऽ३वेऽ३भ्योदुवः** । अत्र **दे**-कारो **वे**-कारश्च प्रकृती ॥ २ ॥

ज्ञीये सी। वी। तीस। ज्योतिषावित् ॥ ३ ॥

दी. आजाऽ५गृ (ऊ. ए. ७५१) इति **यज्ञायज्ञीये** द्वितीयायां **पुनानउपस्त्वरे-दधानओभेअप्रारोदसी** । अत्र **सी**-कारः प्रकृतिः । **वीऽ३षाआऽ३वाः** । अत्र **वी**-कारः

---

4. My[2] वेकारः प्रकृतिः for वेशब्दस्य प्रकृतिभावः
10. L[1] My[2] om. अग्नेस्त्रिणिधने ... दुवः । ... वेकारश्च प्रकृती ॥ (1. 15)

प्रकृतिः । ऊतीऽ२३सा । अत्र ती-कारः प्रकृतिः । तृतीयायां ज्योऽ३तीषाऽ३वीत् । अत्र ती-कारो वी-कारश्च प्रकृती ॥ ३ ॥

स्वारे कौत्से त्के ॥ ४ ॥ चतुर्थः ॥

दी. प्रसुन्वानायाऽ३अन्धसाः (ऊ. स. ७५८) इति स्वारकौत्से द्वितीयायाम् आजामिरत्केऽ३अव्याता । अत्र त्के-कारः प्रकृतिः ॥ ४ ॥

इति ऊहे सत्रे प्रकृतिभावस्य चतुर्थः खण्डः ॥ ४ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

त्रयोदशः खण्डः — सत्रे पञ्चमः

श्रीनिधने हिन्वे ॥ १ ॥

दी. वृषापवस्वधारया (ऊ. स. ७६०) इति हरिश्रीनिधने द्वितीयायां हिन्वे-वाऽ२३जाइ । अत्र न्वे-कारः प्रकृतिः ॥ १ ॥

कौत्से प्रियाः । रयिम् ॥ २ ॥

दी. अयꣳहीपूऽ२३ (ऊ. स. ७६४) इति ऐडकौत्से द्वितीयायां समूहिप्रीऽ२३ । अत्र प्री-कारः प्रकृतिः । तृतीयायां रायीऽ३ꣳहाइ । अत्र यी-कारः प्रकृतिः ॥ २ ॥

ऐटते म्नानि ॥ ३ ॥

दी. उच्च । एऊच्चा (ऊ. स. ७६६) इति ऐटते तृतीयायां द्युम्नाऽ२३४नी । अत्र नी-कारः प्रकृतिः ॥ ३ ॥

---

1. My^{2} ज्योती । अत्र तीकारः । षावीत् ।अत्र वीकारः । for ज्योतीषा s … प्रकृती
4. s^{4} स्वारं for स्वार०
10. My^{2} om. वृषापवस्वधारया
13. s^{4} ऐडं for ऐड

शने यन्तीः ॥ ४ ॥

दी. **तिस्रोवाचाः** (ऊ. स. ७६९) इति **औशने** द्वितीयायां **मर्जाऽयाऽ३न्तीऽ३ः** । अत्र **ती**-कारः प्रकृतिः ॥ ४ ॥

रूपे धेन । ब्रह्मीः ॥ ५ ॥

दी. **तिस्रोवाऽ२३४चाः** (ऊ. स. ७७०) इति **वैरूपे ताइधेऽ१नावाऽ२ः** । अत्र **धे**-कारः प्रकृतिः । द्वितीयायाम् **अभिव्राऽ२३ह्मीः** । अत्र **ह्मी**-कारः प्रकृतिः ॥ ५ ॥

साध्रे दिवे पूर्वम् ॥ ६ ॥

दी. **सुतासोऽ३माधुमत्तमाः** (ऊ. स. ७७१) इति **साध्रे** तृतीयायां **दिवेऽ५-दिवाइ** । अत्र पूर्वस्य **दिवे**-शब्दस्य प्रकृतिभावः । नाग्रिमस्य ॥ ६ ॥

वाश्वे तीर । वे पूर्वम् ॥ ७ ॥

दी. **सुताऽ३१** (ऊ. स. ७७९) इति **श्यावाश्वे** तृतीयायां **सोमस्पातीऽ३राऽ३** । अत्र **ती**-कारः प्रकृतिः । **सखेन्द्रस्यादाऽ३इवेऽ३** । अत्र पूर्वस्य **वे**-कारस्य प्रकृतिभावः । नाग्रिमस्य ॥ ७ ॥

मार्गीयवे मही ॥ ८ ॥ पञ्चमः ॥

दी. **परिप्रियादिवःकावाऽ३इरे** (ऊ. स. ७७६) इति **[ई]निधनमार्गीयवे** द्वितीयायां **महान्माऽ२३ही** । अत्र **ही**-कारः प्रकृतिः ॥ ८ ॥

इति ऊहे सत्रे प्रकृतिभावस्य पञ्चमः खण्डः ॥ ५ ॥

इति फुल्लदीपे तृतीयाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

---

2. L[1] om. औशने ... तीकारः प्रकृतिः, S[4] om. द्वितीयायां
5. L[1] om. तिस्रो .... वै०
8. S[4] द्वितीयायां for तृतीयायां
15. L[1] निधने for निधन

चतुर्दशः खण्डः — सत्रे षष्ठः

सुचे मन्दी ॥ १ ॥

दी. **सोमउष्वाणस्सो** (ऊ. स. ७८०) इति **यौक्तसुचे** तृतीयायां **मान्दी**ऽ२ । अत्र **दी**-कारः प्रकृतिः ॥ १ ॥

क्रौञ्चे मदे ॥ २ ॥

दी. पराइत्या२हाऽ३१२३४ (ऊ. स. ७८३) इति **वाङ्निधने क्रौञ्चे योदेवा-न्वा**ऽ३१२३४इ । अत्र **योदे सर्वत्र** (पु. सू. ३. १२. १) इति **यो**-कारस्य प्रकृतिभावः । **मदेनासा**ऽ३१२३ । अत्र **दे**-कारः प्रकृतिः ॥ २ ॥

शाकले न्वेवा ॥ ३ ॥

दी. **वृषापवा**ऽ२**स्वधारया** (ऊ. स. ७८९) इति **शाकले** द्वितीयायां **हाइन्वे**ऽ२ । अत्र **न्वे**-कारः प्रकृतिः ॥ ३ ॥

आकारणिधने भि पूर्वम् ॥ ४ ॥

दी. **पुरोजितीवोअन्धसः** (ऊ. स. ७९२) इति **आकारणिधने त्वाष्ट्रीसाम्नि** तृतीयायां **रोष**ऽ३**माभी**ऽ१**नारा**ऽ२ः । अत्र पूर्वस्य **भी**-शब्दस्य प्रकृतिभावः । नाग्निमस्य ॥

मार्गीयवे तेजा ॥ ५ ॥

दी. **उच्चौहोवा** (ऊ. स. ७९३) इति **मार्गीयवे तेजा**ऽ२ । अत्र **ते**-कारः प्रकृतिः ॥

द्वैगते सीद ॥ ६ ॥ सत्रम् ॥

दी. **पुनाना**ऽ२ ३**सोमधारया** (ऊ. स. ७९५) इति **द्वैगते त्वनधायोनिमृतस्या-सी**ऽ१**दसाइ** । अत्र **सी**-कारः प्रकृतिः ॥ ६ ॥

---

7. L[1] My[2] om. यो ··· प्रकृतिभावः
12. S[4] आनिधने, for आष्कारणिधने for आकारणिधने
13. S[4] आनिधने for आकारणिधने

इति ऊहे सत्रे प्रकृतिभावस्य षष्ठः खण्डः ॥ ५ ॥

॥ सत्रं समाप्तम् ॥

इति फुल्लदीपे चतुर्थाध्यायस्य चतुर्दशः खण्डः ॥ १० ॥

पञ्चदशः खण्डः — प्रायश्चित्ते प्रथमः

अथ प्रायश्चित्तम्

सफे शिक्षा । हिश । विद्वाः ॥ १ ॥

दी. उपशीऽ३क्षाप (उ. प्रा. ८०१) इति सफे । अत्र **शी-कारः** प्रकृतिः । आवाइहीऽ३शाऽ३ । अत्र **ही-कारः** प्रकृतिः । मानावीऽ३दाऽ३ः । अत्र **वी-कारः** प्रकृतिः ॥ १ ॥

त्रैककुभे ब्रवीमि गीथे ॥ २ ॥

दी. त्वमङ्गप्रशꣳसाऽ३इषाः (ऊ. प्रा. ८०४) इति **त्रैककुभे ब्राऽ२३४वी** । अत्र **वी-कारः** प्रकृतिः । द्वितीयायां इन्द्रब्रवीमीऽ३ताइ । इत्युद्गीथे **वी-कारो मी-कारश्च** प्रकृती ॥ २ ॥

काण्वे रिन्न ॥ ३ ॥

दी. तंवोदाऽ३स्मम‍ृतीषहाम् (ऊ. प्रा. ८०८) इति **आष्कारणिधने काण्वे** द्वितीयायां **गाऽ२३इरीम्** । अत्र **री-कारः** प्रकृतिः ॥ ३ ॥

उपास्मै ज्ञीये ते ॥ ४ ॥

दी. **उपाऽ५स्मै** (ऊ. प्रा. ८१०) इति **यज्ञायज्ञीये** द्वितीयायां **तेआ** । अत्र

---

6. My[2] before सफे adds: श्रीगणेशाय नमः

12. L[1] अत्र वीकारो My[2] वीमीकारौ for इत्युद्गीथे ... प्रकृती

ते-कारः प्रकृतिः ॥ ४ ॥

दवि ज्ञीये तिया। हेतृ। क्रमीत् ॥ ५ ॥

दी. द्वाऽ५इद्यु (ऊ. प्रा. ८११) इति यज्ञायज्ञीये ताऽ३तीऽ३यारूचा। अत्र ती-कारः प्रकृतिः। द्वितीयायां न्वानोहे। अत्र हे-कारः प्रकृतिः। क्राऽ३२मीत्। अत्र मी-कारः प्रकृतिः ॥ ५ ॥

पव ज्ञीये वारे। नधे ॥ ६ ॥

दी. पवाऽ५मा (ऊ. प्रा. ८१२) इति यज्ञायज्ञीये द्वितीयायां वारेऽ२३आ। अत्र रे-कारः प्रकृतिः। तृतीयायां वोनाऽ२३धे। अत्र धे-कारः प्रकृतिः ॥ ६ ॥

सफे सुन्वे। सुक्षि ॥ ७ ॥

दी. ससुन्वेऽ३यः (ऊ. प्रा. ८१३) इति सफे। अत्र न्वे-कारः प्रकृतिः। यास्सूऽ३क्षीऽ३। अत्र क्षी-कारः प्रकृतिः ॥ ७ ॥

ष्कले शिक्षा। हिश। रयिम् ॥ ८ ॥

दी. उपशीऽ३क्षाप (ऊ. प्रा. ८१४) इति पौष्कले। अत्र शी-कारः प्रकृतिः। हीशात्राऽ२३४वाइ। अत्र ही-कारः प्रकृतिः। विदारयीऽ२३४५म्। अत्र यी कारः प्रकृतिः ॥ ८ ॥

लेये नस्ते। हिशू ॥ ९ ॥

दी. मत्सियाऽ३पायितेमहाः (ऊ. प्रा. ८१५) इति कालेये द्वितीयायाम् आनस्तेऽ३गन्तुमत्सराः। अत्र स्ते-कारः प्रकृतिः। तृतीयायां तुवꣳहीऽ३शूरस्सनिता। अत्र ही-कारः प्रकृतिः ॥ ९ ॥

नौधसं पूर्वेणोक्तम् ॥ १० ॥

दी. ताऽ२३४म् (ऊ. प्रा. ८१६) इति ककुबुत्तरे नौधसे तंवोदस्मम् इति

पूर्वेण नौधसेन प्रकृतिभाव उक्तः। आऽ२३भी। अत्र भी-कारः प्रकृतिः। पूधेना-ऽ२३४वाः। अत्र धे-कारः प्रकृतिः। द्वितीयायां गाऽ२३इरीम्। अत्र री-कारः प्रकृतिः॥

लेये स्यते ॥ ११ ॥

दी. आत्वाराऽ३र्थयथोतयाइ (ऊ. प्रा. ८१७) इति **कालेये** तृतीयायां **यस्यते-ऽ३महिनामहाः**। अत्र **ते**-कारः प्रकृतिः ॥ ११ ॥

ष्कल इन्द्रा ॥ १२ ॥ प्रथमः ॥

दी. परिप्राऽ३ध (ऊ. प्रा. ८१८) इति **पौष्कले न्वाईऽ२३४न्द्रा**। अत्र **ई**-कारः प्रकृतिः ॥ १२ ॥

इति ऊहे सत्रे प्रकृतिभावस्य प्रथमः खण्डः ॥ १ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

षोडशः खण्डः — प्रायश्चित्ते द्वितीयः

भरे ब्रह्मे ॥ १ ॥

दी. एवाऽ३होऽ३असित्रीरयोवा (ऊ. प्रा. ८२१) इति **सौभरे** तृतीयायां **मोषू-ऽ३ब्राऽ३ह्मवतन्द्रयोवा**। अत्र **ह्म**-कारः प्रकृतिः ॥ १ ॥

नार्मेधे पातिं चतुर्थे स्वरे। आभि ॥ २ ॥

दी. इन्द्रं विश्वाअवीवृधाऽ३ने (ऊ. प्रा. ८२२) इति **नार्मेधे पाऽ२३४तीम्** इति **चतुर्थस्वरे ती**-कारः प्रकृतिः। द्वितीयायां **तुवाऽ२माऽ२३४भी**। अत्र **भी**-कारः प्रकृतिः ॥ २ ॥

लेये ण्वी ॥ ३ ॥

दी. इन्द्रायाऽ३हिंधियेषिताः (ऊ. प्रा. ८२३) इति **कालेये** द्वितीयायाम् **अण्वीभिस्तौ** । अत्र **ण्वी**-कारः प्रकृतिः ॥ ३ ॥

परे लेये यूथे ष्णिरे ॥ ४ ॥

दी. **गायन्ताऽ३इत्वागायत्रिणा** (ऊ. प्रा. ८२४) इति **परे** अग्रिमे **कालेये** द्वितीयायां **यूथेनवौ** । अत्र **थे**-कारः प्रकृतिः । **ष्णिरेऽ५जताइ** । अत्र **रे**-कारः प्रकृतिः ॥

कमश्वे र्मिणी । न्मात्री ॥ ५ ॥

दी. **आय×पूऽ३रन्नार्म्मिणीऽ६मा** (ऊ. प्रा. ८२५) इति **साकमश्वे** । अत्र **णी**-कारः प्रकृतिः । द्वितीयायाम् **अभिद्वाऽ३इजन्मात्रीऽ६रो** अत्र **त्री**-कारः प्रकृतिः ॥ ५ ॥

वारे शि । स्रि । तवेत् ॥ ६ ॥

दी. **प्रत्युवदाऔहोहाइ** (ऊ. प्रा. ८२८) इति **वारवन्तीये शीआयाऽ२३४ताइ** । अत्र **शी**-कारः प्रकृतिः । द्वितीयायाम् **उदूस्रीऽ२३४हा** । अत्र **स्री**-कारः प्रकृतिः । तृतीयायां **तवेदूऽ२३४हाइ** । अत्र **वे**-कारः प्रकृतिः ॥ ६ ॥

देव्ये दर्शि ॥ ७ ॥

दी. **प्राऽ५त्यु** (ऊ. प्रा. ८३१) इति **वामदेव्ये अदाऽ३र्शीऽ३आयताइ** । अत्र **र्शी**-कारः प्रकृतिः ॥ ७ ॥

परे देव्ये चोदे ॥ ८ ॥

दी. **परे** अग्रिमे **आऽ५इमाः** (ऊ. प्रा. ८३२) इति **वामदेव्ये** तृतीयायां **चोऽ५दे** । अत्र **दे**-कारः प्रकृतिः ॥ ८ ॥

श्रुध्ये श्विभ्याम् ॥ ९ ॥ द्वितीयः ॥ २ ॥

दी. **अग्नेविवाऽरस्वत्** (ऊ. प्रा. ८३८) इति **श्रुध्ये** तृतीयायां **सजूरश्वी** । अत्र

---

17. L[1] My[2] द्वितीयायां चोदेथासू for तृतीयायां चोऽ५दे

श्री-कारः प्रकृतिः ॥ ९ ॥

इति ऊहे सत्रे प्रकृतिभावस्य द्वितीयः खण्डः ॥ २ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य षोडशः खण्डः ॥ १६ ॥

सप्तदशः खण्डः — प्रायश्चित्ते तृतीयः

संहिते रिये । याभिः । कृत्नुमी ॥ १ ॥

दी. **अचिक्रदद्वृ** (ऊ. प्रा. ८४१) इति **संहिते री२ये**। अत्र **री**-कारो **ये**-कारश्च प्रकृती । द्वितीयायां **या२३भीः** । अत्र **मी**-कारः प्रकृतिः । तृतीयायां **त्नुमी-२माहाइ** । अत्र **मी**-कारः प्रकृतिः ॥ १ ॥

ज्ञीये त्नवे ॥ २ ॥

दी. **पुरो५जि** (ऊ. प्रा. ८४३) इति **यज्ञायज्ञीये दा३याइत्ना३वे** । अत्र **वे**-कारः प्रकृतिः ॥ २ ॥

श्रायन्तीये देवे ॥ ३ ॥ प्रायश्चित्तानि ॥

दी. **पवस्ववाजसा१तायाइ** (ऊ. प्रा. ८४७) इति **श्रायन्तीये दे२३वे** । अत्र **दे**-कारो **वे**-कारश्च प्रकृती ॥ ३ ॥

इति ऊहे सत्रे प्रकृतिभावस्य तृतीयः खण्डः ॥ ३ ॥

॥ प्रायश्चित्तं समाप्तम् ॥

इति फुल्लदीपे तृतीयाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

अथ क्षुद्राः

अष्टादशः खण्डः — क्षुद्रे प्रथमः

ण्वतर इन्द्र ॥ १ ॥

दी. अभित्वाशूरनोनुमाः (ऊ. क्षु. ८५०) इति कण्वरथन्तरे ईशानाऽ२३४मी । अत्र मी-कारः प्रकृतिः ॥ १ ॥

धसे त्वे ॥ २ ॥

दी. पूऽ२३४ । रोजतीवोअ । (ऊ. क्षु. ८५८) इति नौधसे दाऽ३याइत्वाऽ३वे । अत्र वे-कारः प्रकृतिः ॥ २ ॥

श्यैतधसे रितृ । स्रेणे । नीके । रेः ॥ ३ ॥

दी. अभिप्रवस्सुरा (ऊ. क्षु. ८६०) इति श्यैतनौधसे रीतृभ्यः । अत्र री-कारः प्रकृतिः । स्रेणवशोऽ२३४वा । अत्र स्रे-कारः प्रकृतिः । द्वितीयायां नीकेन । अत्र नी-कारः प्रकृतिः । तृतीयायां गाऽ२३इरेः । अत्र रे-कारः प्रकृतिः ॥ ३ ॥

क्रौञ्चेऽभि ॥ ४ ॥

दी. तंवोदस्माऽ३१२३४म् (ऊ. क्षु. ८६३) इति वाङ्निधने क्रौञ्चे अभीवास्माऽ३१२३४म् । अत्र भी-कारः प्रकृतिः ॥ ४ ॥

परे क्रौञ्चे जरि । हस्रे । तानी । गिरेः ॥ ५ ॥

दी. अभाइग्रावाऽ३१२३४ः (ऊ. क्षु. ८६४) इति परे अग्रिमे वाङ्निधने क्रौञ्चे योजारीतृऽ३१२३४ । अत्र री-कारः प्रकृतिः । सहास्रेणाऽ३१२३४इ । अत्र स्रे-कारः प्रकृतिः । द्वितीयायां शतानीकाऽ३१२३४इ । अत्र नी-कारः प्रकृतिः । तृतीयायां गिरेराइवाऽ३१२३४ । अत्र रे-कारः प्रकृतिः ॥ ५ ॥

---

3. My[2] before ण्वतर adds: श्रीगणेशाय नमः

17. My[2] trans. अभाइग्रावा .... इति after अग्रिमे

ण्वतरे भिः । अस्येत् ॥ ६ ॥

दी. आभित्वापूर्वपीतयाइ (ऊ. क्षु. ८६५) इति कण्वरन्तथरे भीऽ३राया-ऽ३वाः । अत्र भी-कारः प्रकृतिः । द्वितीयायाम् आऽ३स्येदाऽ३इन्द्राः । अत्र स्ये-कारः प्रकृतिः ॥ ६ ॥

ष्टम्भे तासि ॥ ७ ॥ प्रथमः ॥

दी. यद्यावओहाइ (ऊ. क्षु. ८६८) इति महावैष्टम्भे उतासीऽ१यूऽ२३ः । अत्र सी-कारः प्रकृतिः ॥ ७ ॥

इति ऊहे क्षुद्रे प्रकृतिभावस्य प्रथमः खण्डः ॥ १ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य अष्टादशः खण्डः ॥ १८ ॥

एकोनविंशः खण्डः — क्षुद्रे द्वितीयः

सहोदैर्घे श्वाद्रिः ॥ १ ॥

दी. हाउपिबा (ऊ. क्षु. ८७०) इति सहोदैर्घतमसे श्वाद्रीऽ२ः । अत्र द्री-कारः प्रकृतिः ॥ १ ॥

परे सहोदैर्घे नीषा । सचे । विक्मि ॥ २ ॥

दी. परे अग्रिमे हाऽउश्रुधाइ (ऊ. क्षु. ८७१) इति सहोदैर्घतमसे नीऽ१षाऽ२ । नीषाऽ२ । अत्र नी-कारः प्रकृतिः । सचेऽ२माऽ२३४औहोवा । अत्र चे-कारः प्रकृतिः । द्वितीयायां विवाऽ२क्मीऽ२३४औहोवा । अत्र क्मी-कारः प्रकृतिः ॥ २ ॥

उत्तरे मराये । नीषी । मारे ॥ ३ ॥

दी. उत्तरे अग्रिमे श्रूधाइ (ऊ. क्षु. ८७३) इति च्यावने मराये तृतीयायां मनी ।

---

19. L^1 My^2 om. च्यावने

षीह – । अत्र **नी**-कारः प्रकृतिः । **मारे** । अत्र **रे**-कारः प्रकृतिः ॥ ३ ॥

वारे भिः ॥ ४ ॥

दी. **रेवा२इन्द्राऔहोहाइ** (ऊ. क्षु. ८७४) इति **वारवन्तीये** तृतीयायाम् **औहोऽ-ऽ३१२३४ । भीः ।** अत्र **भी**-कारः प्रकृतिः ॥ ४ ॥

ण्वतरे प्ये ॥ ५ ॥

दी. **प्रासोमदेववीतयाइ** (ऊ. क्षु. ८७५) इति **कण्वरथन्तरे प्येऽ३आणोऽ३सा ।** अत्र **प्ये**-कारः प्रकृतिः ॥ ५ ॥

ष्टम्भे स्येशा । सखे ॥ ६ ॥

दी. **सुतासोमोहाइ** (ऊ. क्षु. ८८०) इति **महावैष्टम्भे** द्वितीयायां **विश्वास्येऽ-१शाऽ२३ ।** अत्र **स्ये**-कारः प्रकृतिः । तृतीयायां **सखेन्द्राऽ१स्याऽ२३ ।** अत्र **खे**-कारः प्रकृतिः ॥ ६ ॥

तव मराये पारि ॥ ७ ॥

दी. **हाउहाउहाउ । तावा** (ऊ. क्षु. ८८३) इति **मराये पारी ।** अत्र **री**-कारः प्रकृतिः । द्वितीयायां **पारी । पारी ।** अत्र **री**-कारौ प्रकृती ॥ ७ ॥

वारे र्णसिम् ॥ ८ ॥

दी. **इन्द्रायेन्द्राऔहोहाइ** (ऊ. क्षु. ८८५) इति **वारवन्तीयोत्तरे** द्वितीयायां **वाचोवीऽ२३४दाः ।** अत्र **वोवित्सर्वत्र** (पु. सू. ३. ४. ९) इति **वी**-कारः प्रकृतिः ।

---

1. L[1] om. षीह
3. S[4] उहुवाऽ२३४मीः for औहोऽ३१२३४मीः
9. L[1]. वैष्टम्भे for महावैष्टम्भे
14. S[4] om. second पारी; S[4] प्रकृतिः for रीकारौ प्रकृती
16. S[2] वारवन्तीये for वारवन्तीयोत्तरे
17. L[1]. चोवि for वोवित्

उहुवाऽ२३४सीम् । अत्र **सी**-कारः प्रकृतिः ॥ ८ ॥

त्वाष्ट्री गाहि । हरी ॥ ९ ॥

दी. **असाविसोऽ३हा** (ऊ. क्षु. ८८७) इति **त्वाष्ट्रीसाम्नि** **ष्णवागाहीऽ२** । अत्र **ही**-कारः प्रकृतिः । द्वितीयायां **ह्मणाहारीऽ२** । अत्र **री**-कारः प्रकृतिः ॥ ९ ॥

सिष्ठप्रिये स्ति । तोदि ॥ १० ॥

दी. **यदिन्द्राऽ२३** (ऊ. क्षु. ८८८) इति **वसिष्ठप्रिये नास्ती** । अत्र **स्ती**-कारः प्रकृतिः । तृतीयायां **यत्तंदीऽ२३** । अत्र **दी**-कारः प्रकृतिः । **अस्तिऽ३श्रुतंबृहाऽ२त्** । अत्र **स्ति**-कारः सार्धमात्रः ॥ १० ॥

महामित्रे कविः । वज्री । स्तोमैः ।

यसीः ॥ ११ ॥ द्वितीयः ॥ २ ॥

दी. **हयाइ** । **हयाऽ३** । **ओहाओहा(त्रिः)** । **पुरंभिन्दूः** (ऊ. क्षु. ८८९) इति **महवैश्वामित्रे युवाकावीऽ२ः** । अत्र **वी**-कारः प्रकृतिः । **धर्त्तावज्री** । अत्र **ज्री**-कारः प्रकृतिः । तृतीयायाम् **अभिस्तोमैः** । अत्र **मै**-कारः प्रकृतिः । **तिभूयासीः** । अत्र **सी**-कारः प्रकृतिः ॥

इति ऊहे क्षुद्रे प्रकृतिभावस्य द्वितीयः खण्डः ॥ २ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य एकोनविंशः खण्डः ॥ १९ ॥

विंशः खण्डः — क्षुद्रे तृतीयः

क्रौञ्चे घोषे ॥ १ ॥

---

6. L[1]. वासिष्ठे for वसिष्ठ°

7. L[1] My[2] अस्ती for अस्ति

8. My[2]L[1] om. स्तीकारः for स्तिकार ; S[4] दीर्घः for सार्धमात्रः; My[2] °मात्रिकः for °मात्रः; S[4] after °मात्रः adds:- अदीर्घं दीर्घवत् कुर्यात् इति नारादशिक्षावचनादत्र स्तिकारोऽदीर्घः

दी. एन्द्रयाहौहो (ऊ. क्षु. ८९१) इति क्रौञ्चाद्ये तृतीयायां सोमीघोषेऽ३। अत्र षे-कारः प्रकृतिः ॥ १ ॥

वितेत्सुरि ॥ २ ॥

दी. इमम्। इन्द्राऽ३ (ऊ. क्षु. ८९२) इति गौरीविते तृतीयायां त्सुरीऽ५-न्दवाः। अत्र री-कारः प्रकृतिः ॥ २ ॥

असावित इन्द्रि। सुते। ष्टुतीः ॥ ३ ॥

दी. असा। विसोऽ३ (ऊ. क्षु. ८९३) इति गौरीविते क्तुईऽ५न्द्रियाम्। अत्र ई-कारः प्रकृतिः। द्वितीयायां सुतेऽ५मनाः। अत्र ते-कारः प्रकृतिः। तृतीयायां ष्टुतीऽ५रुपा। अत्र ती-कारः प्रकृतिः ॥ ३ ॥

गायविते चेत ॥ ४ ॥

दी. गाय। तित्वाऽ३ (ऊ. क्षु. ८९४) इति गौरीविते द्वितीयायां थश्चेऽ५-तताइ। अत्र चे-कारः प्रकृतिः ॥ ४ ॥

ण्वतरे सिचम्। देवः ॥ ५ ॥

दी. देवोवोद्रविणोदाः (ऊ. क्षु. ८९६) इति कण्वरथन्तरे ष्टूऽ३आसीऽ३-चाम्। अत्र सी-कारः प्रकृतिः। आदिद्वोऽ२३४दे। अत्र दे-कारः प्रकृतिः ॥ ५ ॥

ज्ञीये सूरि ॥ ६ ॥

दी. सोमाऽ५ऽप। (ऊ. क्षु. ८९९) इति यज्ञायज्ञीये तासूऽ२३री। अत्र री-कारः प्रकृतिः ॥ ६ ॥

---

1. S[4] क्रौञ्चे for क्रौञ्चाद्ये
7. L[1] om. गौरीविते
14. My[2]. om. इति कण्वरथन्तरे

मरायेऽग्निम्। दीधि। प्रेद्धः ॥ ७ ॥

दी. **हाउहाउहाउ। अग्नीम्** (ऊ. क्षु. ९००) इति **च्यावने मराये**। अत्र **ग्नी**-कारः प्रकृतिः। **दीऽ३धिति**। अत्र **दी**-कारः प्रकृतिः। तृतीयायां **प्रेद्धो**। अत्र **प्रे**-कारः प्रकृतिः ॥ ७ ॥

वारे पूर्वे तिया ॥ ८ ॥

दी. **आश्वा। औहोऽ२३४वा** (ऊ. क्षु. ९०४) इति पूर्वे **वारवन्तीये** तृतीयायां **तीया। औहोऽ२३४वा**। अत्र **ती**-कारः प्रकृतिः ॥ ८ ॥

वाश्वे ताग्नेः ॥ ९ ॥

दी. **सोमःपवा** (ऊ. क्षु. ९०५) इति **त्रिष्टुप्श्यावाश्वे जनाऽ३४इताग्नेः**। अत्र **ग्ने**-कारः प्रकृतिः ॥ ९ ॥

शैखण्डिन आश्वि ॥ १० ॥

दी. **प्रताऽ३होइ** (ऊ. क्षु. ९०६) इति **शैखण्डिने आश्वीऽ३होऽ२३४**। अत्र **श्वी**-कारः प्रकृतिः। द्वितीयायां **यदीऽ३होइ**। अत्र **दी**-कारः प्रकृतिः ॥ १० ॥

श्येन ईय ॥ ११ ॥

दी. **गोवित्पवस्ववसुवाइत्** (ऊ. क्षु. ९०७) इति **श्येने** तृतीयायां **नाऽ२३ई**। अत्र **ई**-कारः प्रकृतिः ॥ ११ ॥

मार्गीयवे सन्ते ॥ १२ ॥ तृतीयः ॥ ३ ॥

दी. **रसौहोवा** (ऊ. क्षु. ९०९) इति **मार्गीयवे तेमाऽ२इ**। अत्र **ते**-कारः प्रकृतिः ॥ १२ ॥

---

2. My[2] om. च्यावने
3. My[2] om. तृतीयायां
9. My[2] om. त्रिष्टुप्

इति ऊहे क्षुद्रे प्रकृतिभावस्य तृतीयः खण्डः ॥ ३ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य विंशः खण्डः ॥ २० ॥

एकविंशः खण्डः — क्षुद्रे चतुर्थः

वार्त्रतुरे स्रेह । श्रौष्टे च यानि ॥ १ ॥

दी. **अयापवोवा** (उ. क्षु. ९१०) इति **वार्त्रतुरे** तृतीयायां **स्रे**। **हायाऽ२३४च्चा**। अत्र **स्रे**-कारः प्रकृतिः। **औहोहाइ**। **अयोहाइ** (ऊ. द. ११८) इति **श्रौष्टे यानि** उदाहरणानि तानि **च** इह वार्त्रतुरे भवन्ति। प्रथमायां **वम्नाऽ२३नी**। अत्र **नी**-कारः प्रकृतिः। **तोनाजूऽ२३४तीम्**। अत्र **ती**-कारः प्रकृतिः। द्वितीयायां **तोवाम्नाऽ२३४नी**। अत्र **नी**-कारः प्रकृतिः ॥ १ ॥

प्रवद्भार्गवे तिरे। तिसा। जूतिम्। मते ॥ २ ॥

दी. **प्रकावियाम्** (ऊ. क्षु. ९१२) इति **प्रवद्भार्गवे** **तीऽ२३रेभाऽ३नाउ**। अत्र **ती**-कारः प्रकृतिः। द्वितीयायां **तीऽ२साकाऽ३माउ**। अत्र **ती**-कारः प्रकृतिः। तृतीयायां **स्याऽ२जूतीम्**। अत्र **ती**-कारः प्रकृतिः। **तम्मिमते**। अत्र **ते**-कारः प्रकृतिः॥

उद्वद्भार्गवे येना। येति। ऋषिकृत् ॥ ३ ॥

दी. **शिशूञ्ज्ञाञ्ज्ञाऽ२३** (ऊ. क्षु. ९१३) इति **उद्वद्भार्गवे** **कावियेनाऽ२३**। अत्र **ये**-कारः प्रकृतिः। **त्रमताइयेऽ२३**। अत्र **ये**-कारः प्रकृतिः। द्वितीयायां **यऋषीकृऽ२३त्**। अत्र **षी**-कारः प्रकृतिः ॥ ३ ॥

सामाराजे थमेविध। मत्सि। देव।

---

7. L¹ om. च

13. L¹My² om. तम्मिमते। अत्र तेकारः प्रकृतिः।

वृणी । त्सुरि । ज्योतिः ॥ ४ ॥

दी. हाउहोवाऽ३हाइ । अक्रान्त्समुद्रऽ३ःप्रा (ऊ. क्षु. ९१७) इति सामराजे थमेऽ३वीऽ३ । अत्र मे-कारो वी-कारश्च प्रकृती । द्वितीयायां रुतम्माऽ३त्सीऽ३ । अत्र त्सी-कारः प्रकृतिः । थिव्रीदेऽ३वाऽ३ । अत्र दे-कारः प्रकृतिः । तृतीयायां वृणीऽ३-ताऽ३ । अत्र णी-कारः प्रकृतिः । अजनयत्सूऽ३री । अत्र री-कारः प्रकृतिः । येज्यो-ऽ३तीऽ३ः । अत्र ती-कारः प्रकृतिः ॥ ४ ॥

कुत्सस्याधिरथीये वाक्ति । एति

रेभन् । जूतिम् । मते ॥ ५ ॥

दी. होऽ३४वा । उहुवाऽ३ । होवा । प्रकावियाम् । (ऊ. क्षु. ९१५) इति कुत्सस्याधिरथीये माविवक्ती । अत्र क्ती-कारः प्रकृतिः । एतिरेभान् । अत्र ए-कारो रे-कारश्च प्रकृती । तृतीयायां यस्यजूतीम् । अत्र ती-कारः प्रकृतिः । तेनगावाः । अत्र ते-कारः प्रकृतिः ॥ ५ ॥

अक्रान् ज्योतिषे प्रथमे । देव । वृणी ॥ ६ ॥

दी. हाउहोवाऽ३हाइ । अक्रान्त्समुद्रःप्रथमेऽ३४३विधर्मन् (ऊ. क्षु. ९१७) इति तृतीये वैश्वज्योतिषे । अत्र मे-कारः प्रकृतिः । द्वितीयायां मत्सिद्यावापृथिवीदेऽ३४-३वसोम । अत्र दे-कारः प्रकृतिः । तृतीयायाम् अपांयद्गर्भोअवृणीऽ३४३ । अत्र णी-कारः प्रकृतिः ॥ ६ ॥

त्सप्रे सेनः । देवान् । पूर्वम् ॥ ७ ॥

---

3. L[1] My[2] om. द्वितीयायां

4. L[1] My[2] वृणीता-अजनयत्सूरी अत्र णी री प्रकृती भवतः for वृणीऽ३ताऽ३ । अत्र णीकारः प्रकृतिः । अजनयत् ... प्रकृतिः ।

15. S[4] after ॰ज्योतिषे adds: अक्रान्त्समुद्रः प्रथमेऽ३४३

दी. होईऽ२(त्रिः)आक्रान्त्समुद्रःप्रथ (ऊ. क्षु. ९१८) इति वात्सप्रे द्वितीयायां राधसेनाऽ२ः । अत्र से-कारः प्रकृतिः । सेनाऽ२ः । अत्रापि । द्वितीयायां पूर्वस्य देवाम्-शब्दस्य प्रकृतिः (?°तिभावः) । नाग्रिमस्य । मत्सिदेवाऽ२न् । अत्र दे-कारः प्रकृतिः । देवाऽ२न् । अत्रापि ॥ ७ ॥

यामे क्रमीदभि ॥ ८ ॥

दी. पुनानोआऽ२ (ऊ. क्षु. ९२०) इति यामे क्रमीदाऽ२३४भी । अत्र मी-कारो भी-कारश्च प्रकृती ॥ ८ ॥

गोराङ्गिरसे विश्व ॥ ९ ॥

दी. ओहोइहुऽ३वाऽ२३इ । हुवए । पुनानोआऽ३क्राऽ३मीदभि (ऊ. क्षु. ९२२) इति गोराङ्गिरसे विश्वामृधोऽ३वीऽ३चर्षणिः । अत्र वी-कारः प्रकृतिः ॥ ९ ॥

अयासोमीये न्द्रेण ॥ १० ॥

दी. एताऽ३मूऽ३त्यन्दशक्षिपाः (ऊ. क्षु. ९२३) इति अयासोमीये द्वितीयायां समाऽ३इन्द्रेऽ३ । अत्र न्द्रे-कारः प्रकृतिः ॥ १० ॥

हाइउहुवाइ सिष्ठे राजे ॥ ११ ॥

दी. हाइ । उहुवाइ । असाऽ३४औहोवा (ऊ. क्षु. ९२६) इति वासिष्ठे राजेऽ३४औहोवा । अत्र जे-कारः प्रकृतिः ॥ ११ ॥

इन्द्रस्यापामीवे नाति ॥ १२ ॥ चतुर्थः ॥

दी. ग्रोआ (ऊ. क्षु. ९२७) इति इन्द्रस्यापामीवे सख्युर्न्नप्रमिनाऽ३तीऽ३-

---

1. My[2] om. होई ··· वात्सप्रे
2. S[4] सेनाऽ२ः । अत्र सेकारः प्रकृतिः । for अत्र सेनाऽ२ः । अत्रापि
3. S[4] देवाऽ२न् । अत्र देकारः प्रकृतिः for अत्र देकारः प्रकृतिः । देवाऽ२न् । अत्रापि
14. S[2] B[1-3] PR. हाउहुवाइ for हाइउहुवाइ

साङ्गिरम् । अत्र **ती**-कारः प्रकृतिः ॥ १२ ॥

इति ऊहे क्षुद्रे प्रकृतिभावस्य चतुर्थः खण्डः ॥ ४ ॥

इति फुल्लदीपे चतुर्थाध्यायस्य एकविंशः खण्डः ॥ २१ ॥

द्वात्रिंशः खण्डः — क्षुद्रे पञ्चमः

अभ्यन्ते शिगा । रिय । रेज धीभिः

प्रदै । थिवीम् ॥ १ ॥

दी. अभिनिधनमन्ते अभ्यन्ते । **औहोहोहाइ । आइही । आदा** (ऊ. क्षु. ९३१) इति **काण्वे शीऽ२३४गा** । अत्र **शी**-कारः प्रकृतिः । **तामारीऽ२३४या** । अत्र **री**-कारः प्रकृतिः । द्वितीयायां **रेऽ२३४जा** । अत्र **रे**-कारः प्रकृतिः । **आग्निन्धीऽ२३४भीः** । अत्र **धी**-कारो **भी**-कारश्च प्रकृती । तृतीयायाम् **आइही** । **प्रादै** । अत्र **दै**-कारः प्रकृतिः । **राम्पृथीऽ२३४वीम्** । अत्र **थी**-कारो **वी**-कारश्च प्रकृती ॥ १ ॥

आत्वा भ्यन्त इन्द्र । हरी । रसि ॥ २ ॥

दी. अभिनिधनमन्ते । **[औहोहोहाइ] आइही । आत्वा** (ऊ. क्षु. ९३२) इति **काण्वे हारायाऽ२३४ई** । अत्र **ई**-कारः प्रकृतिः । द्वितीयायां **हारीमाऽ२३४यू** । अत्र **री**-कारः प्रकृतिः । तृतीयायां **स्वारासीऽ२३४नाः** । अत्र **सी**-कारः प्रकृतिः ॥ २ ॥

नैपातिथे न्द्रेस्वा ॥ ३ ॥

दी. **इन्द्रमिद्देवतातयाऽ३ए** (ऊ. क्षु. ९३४) इति **नैपातिथे** तृतीयायाम् **इन्द्रेस्वानाऽ३** । अत्र **न्द्रे**-कारः प्रकृतिः ॥ ३ ॥

---

7. My[2] om. अमि० ... ०निधनमन्ते (l. 13)
8. L[1] om. शीऽ२३४गा । अत्र शीकारः प्रकृतिः । ... आत्वा ... इति काण्वे (l. 14)

श्रायन्तीये वारि ॥ ४ ॥ क्षुद्राः ॥

दी. **अच्छानश्शीरशोऽ१चाइषाः** (ऊ. क्षु. ९३६) इति **श्रायन्तीये** द्वितीयायां **यावाऽ३री** । अत्र **री**-कारः प्रकृतिः । तृतीयायां **दानायवारीऽ१याणाम्** । अत्र **री**-कारः प्रकृतिः । **रीऽ२याणाम्** । अत्रापि **री**-कारः प्रकृतिः ॥ ४ ॥

इति ऊहे क्षुद्रे प्रकृतिभावस्य पञ्चमः खण्डः ॥ ५ ॥

॥ क्षुद्राः समाप्ताः ॥

इति फुल्लदीपे चतुर्थाध्यायस्य द्वाविंशः खण्डः ॥ २२ ॥

॥ ऊहं समाप्तम् ॥

रहस्ये दशरात्रः

त्रयोविंशः खण्डः — रहस्ये प्रथमः

हस्ये द्वितीये सन्धितरे णोति ॥ १ ॥

दी. **हस्ये** रहस्ये ऊह(?ह्य)गाने **सन्धिस्तोत्रे द्वितीये रथन्तरे** । **प्रात्युत्वदर्श्याय-तोवा** (र. द. ३) इति द्वितीये **रथन्तरे ज्योतिष्कृणोऽ२३तीऽ३** । अत्र **ती**-कारः प्रकृतिः ॥

तृतीये शँहि । सोमि ॥ २ ॥

दी. **आइमाउवान्दिविष्टयोवा** (र. द. ४) इति तृतीये **रथन्तरे वाइशंविशाऽ२-३९हीऽ३** । अत्र **ही**-कारः प्रकृतिः । तृतीयायां **पाइबत९सोऽ२३मीऽ३** । अत्र **मी**-कारः प्रकृतिः ॥ २ ॥

अरिष्टे पावि । त्राणि । तिभु ॥ ३ ॥

---

13. My[2] om. इति द्वितीये रथन्तरे
15. L[1] °न्दिविष्टे° for °न्दिविष्ट°

दी. **हाउ** । **होइया** । **पावी** (र. द. ८) इति **अरिष्टे** **वी**-कारः प्रकृतिः । **णीऽ३परियाइ** । अत्र **णी**-कारः प्रकृतिः । तृतीयायां **तीऽ३भुवने** । अत्र **ती**-कारः प्रकृतिः ॥ ३ ॥

वैराजे [श्राद्रिः] त्राणि ॥ ४ ॥

दी. **होइयाहोइयाहोइयाऽ३४३पिब** (र. द. १०) इति **महावैराजे** **श्राद्रिऽ२ः** (**द्रिः**)। अत्र **द्रि**-कारौ प्रकृती भवतः। अत्र **द्रि**-कारः सार्धमात्रः । द्वितीयायां **णीहरिया** । अत्र **णी**-कारः प्रकृतिः ॥ ४ ॥

बार्हद्गिरे हिवी । हरी ॥ ५ ॥

दी. **इन्द्रोमदा** (र. द. १२) इति **बार्हद्गिरे** द्वितीयायां **असिहिवी** । अत्र **वी**-कारः प्रकृतिः । तृतीयायां **युङ्क्ष्वामदच्युताऽहाऽ३री** । अत्र **री**-कारः प्रकृतिः ॥ ५ ॥

रश्म इन्द्रः । तामित् । रसे ॥ ६ ॥

दी. **एईन्द्रा** (र. द. १२) इति **पार्थुरश्मे** । अत्र **ई**-कारः प्रकृतिः । **एतामी** । अत्र **मी**-कारः प्रकृतिः । द्वितीयायां **हिवीरसेऽ२नियाः** । अत्र **से**-कारः प्रकृतिः ॥ ६ ॥

वाजीये वरीः ॥ ७ ॥

दी. **एस्वादोः** (र. द. १४) इति **रायोवाजीये** **याइन्द्रेणसयाऽ१वाऽ३रीः** । अत्र **री**-कारः प्रकृतिः ॥ ७ ॥

अष्टेडे र्मणि ॥ ८ ॥

दी. **ईडा** । **पवस्ववाजसातये** (र. द. १६) इति **अष्टेडपदस्तोभे** द्वितीयायां **पवमानविधर्मणीऽऽ२३४५** । अत्र **णी**-कारः प्रकृतिः ॥ ८ ॥

---

1. S^4 अत्र वीकारः प्रकृतिः इत्यरिष्टे for इति अरिष्टे वीकारः प्रकृतिः

5. L^1My^2 वैराजे for महावैराजे; S^4 om. अत्र द्रिकारौ ... भवतः; L^1My^2 om. अत्र द्रिकारः

10. L^1 before हरी adds: My^2 om. युङ्क्ष्वामदच्युता

तृतीयायां कावीः । अत्र वी-कारः प्रकृतिः ॥ १५ ॥

तरे भीषु । वासि ॥ १६ ॥ दशरात्रः ॥

दी. कयानश्चित्रआभुवोवा (र. द. २९) इति रथन्तरे तृतीयायां भीषुणस्सखी-नामविताज । अत्र भी-कारः प्रकृतिः । शातम्भवाऽ२३सीऽ३ । अत्र सी-कारः प्रकृतिः ॥

इति रहस्ये प्रकृतिभावस्य प्रथमः खण्डः ॥ १ ॥

॥ द्वादशाहस्य दशरात्रः समाप्तः ॥

इति फुल्लदीपे चतुर्थाध्यायस्य त्रयोविंशः खण्डः ॥ २३ ॥

संवत्सरः

चतुर्विंशः खण्डः — रहस्ये द्वितीयः

यज्जातरे तेय ॥ १ ॥

दी. याज्ञायथाअपूर्वियोवा (र. सं. ३६) इति रथन्तरे द्वितीयायां तेयज्ञोअजा-यत – । अत्र ते-कारः प्रकृतिः ॥ १ ॥

मत्स्यबृहाति षाते ॥ २ ॥

दी. औहोइमत्स्यपायितेमहाऽ३ए (र. सं. ३७) इति बृहति तेवाऽ३१ । अत्र ते-कारः प्रकृतिः ॥ २ ॥

प्रत्यतर एनम् ॥ ३ ॥

दी. प्रात्यस्मैपिपीषतोवा (र. सं. ३८) इति रथन्तरे द्वितीयायाम् एनं प्रत्येतन – । अत्र ए-कारः प्रकृतिः ॥ ३ ॥

यज्जास्वरे तन्ते ॥ ४ ॥

दी. याज्ञायाज्ञा (र. सं. ३९) इति चतुर्थस्वरे पयोनिधने द्वितीयायां तात्ते-तात्ते । अत्र ते-कारः प्रकृतिः ॥ ४ ॥

प्रसुस्वरे सवी ॥ ५ ॥

दी. प्रास्नप्रास्न (र. सं. ४०) इति चतुर्थस्वरे तृतीयायां सात्रीसावी । अत्र वी-कारः प्रकृतिः ॥ ५ ॥

मूर्धाभासे ग्निम् ॥ ६ ॥

दी. मूर्धानंदिवोअरतिंपृथाऽ२३इव्याः (र. सं. ५८) इति भासे वैश्वानरमृत-आजातमाऽ२३ग्नीम् । अत्र ग्नी-कारः प्रकृतिः ॥ ६ ॥

तीषु रेव ॥ ७ ॥

दी. हाउरेवा (र. सं. ६३) इति रेवतीषु । अत्र रे-कारः प्रकृतिः ॥ ७ ॥

बृहति हिवे ॥ ८ ॥

दी. औहोइत्वमग्नेयज्ञानांहोऽ३ए (र. सं. ६४) इति बृहति तृतीयायां थाहिवे । अत्र वे-कारः प्रकृतिः ॥ ८ ॥

परिजम्भे हविः ॥ ९ ॥

दी. परीतोषिञ्चतासुतम् (र. सं. ६६) इति वार्कजम्भोत्तरे सोमोयउत्त-मऽहावीः । अत्र वी-कारः प्रकृतिः । हावीः । अत्रापि ॥ ९ ॥

राजने स्वादी । योधीः ॥ १० ॥

दी. तदिदासा (ऊ. सं. ६७) इति राजने तृतीयायां स्वादोस्वादी । अत्र दी-कारः प्रकृतिः । नामियोधीः । अत्र धी-कारः प्रकृतिः ॥ १० ॥

---

1. & 4. L^1 om· चतुर्थ
10. S^4 हाम for हाउ

स्वाशिरामर्के कविः। विश्वे ॥ ११ ॥

दी. अयामायाम्। परिस्रुवाऽ२ (र. सं. ६९) इति स्वाशिरामर्के द्वितीयायां तुवंकाऽ२३४वीः। अत्र वी-कारः प्रकृतिः। तृतीयायां तुवेविश्वेऽ२। अत्र श्वे-कारः प्रकृतिः ॥ ११ ॥

इलान्दप्रथमायामीय। षिभा। णक्षि

द्वितीयायामग्ने। णक्षि। तृतीयायाम्माहि

अग्निम्। रेपु। दैवा (?वि) ॥ १२ ॥ संवत्सरः ॥

दी. अग्नेतवश्र (र. सं. ७०) इति इलान्दे प्रथमायां स्तोत्रीयायाम् ई। याऽ३। अत्र ई-कारः प्रकृतिः। पीभानुना। अत्र पी-कारः प्रकृतिः। पार्णाऽ३क्षी। अत्र क्षी-कारः प्रकृतिः। द्वितीयायां स्तोत्रीयायाम् आइ। रज्यन्नग्ने। ज्यन्नग्नेऽ३। ज्यन्नग्ने। अत्र ग्ने-कारः प्रकृतिः। पार्णाऽ३क्षी। अत्र क्षी-कारः प्रकृतिः। तृतीयायां स्तोत्रीयायां वानम्महो। अत्र ही-कारः प्रकृतिः। नम्महीऽ३। अत्र[ापि]। अत्र ही-कारः सार्धमात्रः। आ। ग्नीऽ३म्। अत्र ग्नी-कारः प्रकृतिः। धाइ। रेऽ३। अत्र रे-कारः प्रकृतिः। दैवाऽ३याम्। अत्र दै-कारः प्रकृतिः ॥ १२ ॥

इति रहस्ये प्रकृतिभावस्य द्वितीयः खण्डः ॥ २ ॥

॥ गवामयनस्य संवत्सरः समाप्तः ॥

इति फुल्लदीपे चतुर्थाध्यायस्य चतुर्विंशः खण्डः ॥ २४ ॥

9. S[4] om. आइ-। L[1] om. ज्यन्नग्नेऽ३। ज्यन्नग्ने;
10. L[1] My[2] after प्रकृतिः। adds: ज्यन्नग्ने अत्र ग्नेकारः प्रकृतिः
11. L[1] My[2] om. स्तोत्रीयायां; L वानमहि for वानजही; S[4] trans. नम्मही after वानम्मही and om. अत्रापि। अत्र हीकारः सार्धमात्रः
15. S[4] इति संवत्सरः समाप्तः for गवामयनस्य संवत्सरः समाप्तः; My[2] संवत्सरं समाप्तम् for संवत्सरः समाप्तः

पञ्चविंशः खण्डः — रहस्ये तृतीयः

एकाहाः

यस्ते हरे वरे। वे पूर्वम्। नधे ॥ १ ॥

दी. **यस्तेमदोहोहाइ** (र. ए. ७४) इति **वार्षाहरोत्तरे वारेऽ१णायाऽ२ः**। अत्र **रे**-कारः प्रकृतिः। द्वितीयायां **दाइवेऽ१दाइवाऽ२इ**। अत्र **पूर्वस्य वे**-कारस्य प्रकृतिः (१°तिभावः)। नाग्निमस्य। तृतीयायां **नाधेऽ१नूभाऽ२इः**। अत्र **धे**-कारः प्रकृतिः ॥ १ ॥

संस्तोभे। धारे। अभि ॥ २ ॥

दी. **पर्यूषुप्रधन्वावा** (र. ए. ७७) इति **मरुताꣳसꣳस्तोभे** द्वितीयायां **नद्यूरियं-विधारेशा**। अत्र **रे**-कारः प्रकृतिः। **रेशा(द्विः)**। अत्रापि। तृतीयायां **पराजियेवाजाꣳआभी**। अत्र **भी**-कारः प्रकृतिः। **आभी(द्विः)**। अत्रापि ॥ २ ॥

परे संस्तोभे तीनाम्। तीनाम् ॥ ३ ॥

दी. **परे** अग्निमे। **नदंवोअदतीनाम्** (र. ए. ७८) इति **मरुताꣳसꣳस्तोभे**। अत्र **ती**-कारः प्रकृतिः। **तीनाम्** (द्विः)। अत्रापि ॥ ३ ॥

तमसोऽर्के नृभिः। हरिः। त्वाभिः ॥ ४ ॥

दी. **धार्त्तां** (र. ए. ८०) इति **दीर्घतमसोऽर्के नृभीर्नृभीः**। अत्र **भी**-कारः प्रकृतिः। **नृभीः**। अत्रापि। **हारीः**। अत्र **री**-कारः प्रकृतिः। **त्वभीस्त्वभीः**। अत्र **भी**-कारः प्रकृतिः। **त्वभीः**। अत्रापि ॥ ४ ॥

---

8. L[1] om. मरुतॉं
9. s[4] trans. रेशा before अत्र रेकारः and om. अत्रापि
10. s[4] trans. आभी(द्विः) before अत्र भीकारः and om. अत्रापि
12. s[4] trans. परे अग्निमे after अदतीनाम् ; L[1] om. मरुतां
13. s[4] trans. तीनाम् before अत्र तीकारः and om. अत्रापि
15. s[4] नृभीर्नृभीः। नृभीः।अत्र भीकारः प्रकृतिः for नृभीर्नृभीः ··· अत्रापि
16. s[4] त्वभीस्त्वभीः — त्वभीः। अत्र भीकारः प्रकृतिः for त्वभीस् ··· अत्रापि

वत्सायां ग्वभिर्द्वितीयम् ।

हरिः । क्वभिः । प्राचीम् ॥ ५ ॥

दी. **एआया** (र. ए. ८२) इति **नित्यवत्सायां** द्वितीयस्य **ग्वभि**-शब्दस्य प्रकृतिः (?°तिभावः) । न प्रथमस्य । **सूरोनसयूऽ१ग्वाऽ३भीः** । अत्र **भी**-कारः प्रकृतिः । **पुनानोअरुषोऽ१हाऽ३रीः** । अत्र **री**-कारः प्रकृतिः । **क्वाभीः** । अत्र **भी**-कारः प्रकृतिः । द्वितीयायां **एप्राचीम्** । अत्र **ची**-कारः प्रकृतिः ॥ ५ ॥

बृहति सखि ॥ ६ ॥

दी. **औहोइमाभेममाश्रमिष्माऽ३ए** (र. ए. ८३) इति **बृहति** **खीयाइताऽ२३४वा** । अत्र **खी**-कारः प्रकृतिः ॥ ६ ॥

स्वाशिरामर्के दिवे पूर्वम् ॥ ७ ॥

दी. **अयामायाम्** । **यस्तेमदोऽ२** (र. ए. ८४) इति **स्वाशिरामर्के** द्वितीयायां **पूर्वस्य** **दिवे**-शब्दस्य प्रकृतिः (?°तिभावः) । नाग्रिमस्य । **दिवेदाऽ२३४इवाइ** । अत्र **वे**-कारः प्रकृतिः ॥ ७ ॥

बृहत्यस्मि ॥ ८ ॥

दी. **औहोइकिमित्तविष्णो – ए** (र. ए. ८५) इति **बृहति** **वाइष्टोआऽ२३-४स्मी** । अत्र **स्मी**-कारः प्रकृतिः ॥ ८ ॥

बलभिदि (?उद्भिदि) रौंसे ॥ ९ ॥ एकाहाः ॥

---

3. S[4] °वत्सासु for °वत्सायां

4. अग्रिमस्य for प्रथमस्य

13. My[2] breaks abruptly after प्रकृतिः ॥ and then begins: — देवेभ्यः संक्षारे (पु. सू. 7. 1.1) ; the portion from वेकारः upto नानाभाई भाष्यम् ॥ प्रथमे द्वितीये चाध्याये i. e. upto the beginning of the fifth adhyaya, is not found in L[1]

दी. होवाइ – पवतेहाऽ३र्याऽ३तोहरिः (र. ए. ८६) इति **बलमिदि अतिह्वराऽ३॰सीऽ३र॰हिया** । अत्र **सी**-कारः प्रकृतिः ॥ ९ ॥

इति रहस्ये प्रकृतिभावस्य तृतीयः खण्डः ॥ ३ ॥

॥ एकाहाः समाप्ताः ॥

इति फुल्लदीपे चतुर्थाध्यायस्य पञ्चविंशः खण्डः ॥ २५ ॥

षड्विंशः खण्डः — रहस्ये चतुर्थः

अहीनाः

यानि पार्थे तानि द्वितीये दोहे ॥ १ ॥

दी. **ओऽ३होऽ३होइ** । **अय॰सोमाः** (ऊ. सं. ३४७) इति **पार्थे यानि** उदाहरणानि तानि **अय॰सोमाः** (र. अ. ९५) इति द्वितीये **आज्यदोहे** भवन्ति । **अस्यपाही** । अत्र **ही**-कारः प्रकृतिः । द्वितीयायां **षाडयोजी** । अत्र **जी**-कारः प्रकृतिः । **णीऽ३सात** । अत्र **णी**-कारः प्रकृतिः । **याइवसूनी** । अत्र **नी**-कारः प्रकृतिः । तृतीयायां **यायथावीट्** । अत्र **वी**-कारः प्रकृतिः ॥ १ ॥

यानि संक्रोशे तानि तृतीये ॥ २ ॥

दी. **होइ । हो । हाऽ३होइ । तिस्रोवाचाः** (ग्रा. गे. १५. ६. ५२५. १) इति **संक्रोशे यानि** उदाहरणानि तानि **तिस्रोवाचाः** (र. अ. ९६) इति **आज्यदोहे** भवन्ति । **ईऽ३रय** । अत्र **ई**-कारः प्रकृतिः । **तिप्रवह्वीः** । अत्र **ह्वी**-कारः प्रकृतिः । **तीऽ३मूब्रह्म** । अत्र **ती**-कारः प्रकृतिः । **णोमनीषाम्** । अत्र **नी**-कारः प्रकृतिः । द्वितीयायां **धेऽ३नवः** । अत्र **धे**-कारः प्रकृतिः । तृतीयायां **नस्सुवस्ती** । अत्र **स्ती**-कारः प्रकृतिः । **तामदेना** । अत्र **दे**-कारः प्रकृतिः ॥ २ ॥

रश्मे याइ । वस्वोः ॥ ३ ॥

वतीष्विन्द्रा ॥ ९ ॥

दी. हावीन्द्रा (र. द. १७) इति रेवतीषु । अत्र वी-कारः प्रकृतिः ॥ ९ ॥

रैवतर्षभ इद्रे ॥ १० ॥

दी. सुरूपकृत्नुमूतये(त्रिः)। (र. द. १८) इति रैवतर्षभे द्वितीयायां गोदाइद्रे । अत्र द्रे-कारः प्रकृतिः ॥ १० ॥

श्येने दीर्घम् । शक्तिम् । पूर्वे । देवी ॥ ११ ॥

दी. ऊभाइ (र. द. १९) इति श्येने द्वितीयायां दीर्घाम् । अत्र दी-कारः प्रकृतिः । शाक्तीम् । अत्र क्ती-कारः प्रकृतिः । पूर्वे । अत्र र्वे-कारः प्रकृतिः । [तृतीयायां] देवी । अत्र दे-कारो वी-कारश्च प्रकृती ॥ ११ ॥

भद्रे रुद्रिः ॥ १२ ॥

दी. होइहा । इमानुकंभुवनासीषधेमाऽ३ । इहा (र. द. २०) इति भद्रे तृतीयायाम् आदित्यैरिन्द्रस्सगणोमरुद्रीऽ३ः । अत्र द्री-कारः प्रकृतिः ॥ १२ ॥

संकृतिनि परि ॥ १३ ॥

दी. एपारी (र. द. २४) इति संकृतिनि । अत्र री-कारः प्रकृतिः ॥ १३ ॥

भर्गे हविः ॥ १४ ॥

दी. यत् । परीतोषि (र. द. २५) इति भर्गे तामाऽ२९हाऽ२३४वीः । अत्र वी-कारः प्रकृतिः ॥ १४ ॥

तमसोऽर्के राजे । कविः ॥ १५ ॥

दी. आसा (र. द. २७) इति दीर्घतमसोऽर्के राजे । अत्र जे-कारः प्रकृतिः ।

---

2. S^4 ईकारः for वीकारः

4. L^1 रेवतऋषभे for रेवतर्षभे

दी. एस्वादोः (र. द. ९८) इति पार्थुरश्मे एयाई। अत्र ई-कारः प्रकृतिः। तृतीयायाम् एवस्वीः। अत्र स्वी-कारः प्रकृतिः॥ ३॥

अश्वव्रते श्पातिः॥ ४॥

दी. होहोइ – इत्यादि। अभिवाजी (र. अ. ९९) इति अश्वव्रते तृतीयायां धत्तादिवो भुवनस्यविश्पतीऽ२३४५ः। अत्र ती-कारः प्रकृतिः॥ ४॥

अयंपू – तमसोऽर्के पातिः॥ ५॥

दी. आयाम् (र. अ. १०१) इति दीर्घतमसोऽर्के पातीः। अत्र ती-कारः प्रकृतिः॥ ५॥

स्वर्वान्निधने यानि तानि परिप्र – तमसोऽर्के तेसो च॥ ६॥

दी. परीऽ३होइ (ऊ. अ. ५३६) इति स्वर्वन्निधनसौहविषे यानि उदाहरणानि तानि पारी (र. अ. १०४) इति दीर्घतमसोऽर्के भवन्ति। तेसो च अधिकम्। पारी। अत्र री-कारः प्रकृतिः। पूष्णे। अत्र ष्णे-कारः प्रकृतिः। द्वितीयायां माहे। अत्र हे-कारः प्रकृतिः। दाइव्याः। पी। अत्र पीयू सर्वत्र (पु. सू. ३. ८. १३) इति पी-कारः प्रकृतिः। तृतीयायाम् आइन्द्राः। ते। अत्र ते-कारः प्रकृतिः। पेयात्। अत्र पे-कारः प्रकृतिः। क्रात्वे। अत्र त्वे-कारः प्रकृतिः। वाइश्वे। अत्र श्वे-कारः प्रकृतिः॥ ६॥

तरे द्विषम्॥ ७॥

दी. आभित्वावृषभासुतोवा (र. अ. १०५) इति रथन्तरे द्वितीयायां माकीं-ब्रह्माऽ२३द्वीऽ३। अत्र द्वी-कारः प्रकृतिः॥ ७॥

बृहति थिवीम्॥ ८॥

दी. औहोइयज्ञा – ए (र. अ. १०६) इति बृहति थिवीम्। अत्र वी-कारः प्रकृतिः॥ ८॥

स्वाशिरामर्के कविः। शुचिः। मही ॥ ९ ॥

दी. अयामायाम्। परिप्रियाऽ२ (र. अ. ११२) इति स्वाशिरामर्के दिवऽ-काऽ२३४वीः। अत्र वी-कारः प्रकृतिः। द्वितीयायां तराशूऽ२३४चीः। अत्र ची-कारः प्रकृतिः। जातोजातेऽ२। अत्र ते सर्वत्र (पु. सू. ३. ६. ८) इति ते-कारः प्रकृतिः। महान्महीऽ२। अत्र ही-कारः प्रकृतिः ॥ ९ ॥

बृहति दिवे पूर्वम् ॥ १० ॥

दी. औहोइसुतासो – (र. अ. ११३) इति बृहति तृतीयायां पूर्वस्य दिवे-शब्दस्य प्रकृतिः (प्र°तिभावः)। दाइवेदाऽ२२४इ। वाइ। अत्र वे-कारः प्रकृतिः ॥ १० ॥

वाजीयेऽग्निम् ॥ ११ ॥

दी. एआग्नीम् (र. अ. ११७) इति रायोवाजीये। अत्र ग्नी-कारः प्रकृतिः ॥

पयसि विश्वे। तिमा ॥ १२ ॥ अहीनाः ॥

दी. परिसुवानोगाऽ३इरिष्ठाः (र. अ. १२०) इति पयसि तृतीयायां तुवेविश्वे। अत्र श्वे-कारः प्रकृतिः। देवासऽपीतीऽ३माशता। अत्र ती-कारः प्रकृतिः ॥ १२ ॥

इति रहस्ये प्रकृतिभावस्य चतुर्थः खण्डः ॥ ४ ॥

॥ अहीनाः समाप्ताः ॥

इति फुल्लदीपे चतुर्थाध्यायस्य षड्विंशः खण्डः ॥ २६ ॥

सप्तविंशः खण्डः — रहस्ये पञ्चमः

सत्राणि

वाजीये प्रथमेऽग्निम्। अग्निः ॥ १ ॥

दी. **एआग्नीम्** । **तम्मन्ये** – (र. स. १२२) इति **प्रथमे रायोवाजीये** । अत्र **ग्नी**-कारः प्रकृतिः । द्वितीयायाम् **एआग्नीः** । अत्र **ग्नी**-कारः प्रकृतिः ॥ १ ॥

द्वितीये महे ॥ २ ॥

दी. **एमाहे** (र. स. १२३) इति द्वितीये **रायोवाजीये** । अत्र **हे**-कारः प्रकृतिः ॥

तृतीये प्राति । वृषिः । तनी । तनी ॥ ३ ॥

दी. **एप्राती** (र. स. १२४) इति तृतीये **रायोवाजीये** । अत्र **ती**-कारः प्रकृतिः । **स्तोतावामश्विनाऽ१वाऽ२र्षीः** । अत्र **र्षी**-कारः प्रकृतिः । द्वितीयायां **दस्राहिरण्यवाऽ१र्ताऽ३नी** । अत्र **नी**-कारः प्रकृतिः । तृतीयायां **रुद्राहिरण्यवाऽ१र्त्ताऽ३नी** । अत्र **नी**-कारः प्रकृतिः ॥ ३ ॥

तमसोऽर्केऽभि । प्रि । निय । रिय ।
नृभिः । येमा । अभि । आधि ॥ ४ ॥

दी. **आभी** । (र. स. १२५) [इति **दीर्घतमसोऽर्के** ।] अत्र **भी**-कारः प्रकृतिः । **प्रीयाणिपवतेचनः** । अत्र **प्री**-कारः प्रकृतिः । **नीयह्वोअधि** । अत्र **नी**-कारः प्रकृतिः । **रीयस्यबृहतो** । अत्र **री**-कारः प्रकृतिः । तृतीयायां **नृभीः** । अत्र **भी**-कारः प्रकृतिः । **येमानꣳक्रोश** । अत्र **ये**-कारः प्रकृतिः । **आभी** । **आर्त** । अत्र **भी**-कारः प्रकृतिः । **आधी** । **त्राइ** – । अत्र **धी**-कारः प्रकृतिः ॥ ४ ॥

अह्व्यास्यायां तमसोऽर्के परि ॥ ५ ॥

दी. **आइणा** । **तो** (र. स. १२८) इति **अह्व्यास्यायाम्** **ऋचि** **दीर्घतमसोऽर्के** **पारी** । अत्र **री**-कारः प्रकृतिः ॥ ५ ॥

---

2. after प्रकृतिः । adds: द्वितीयायां ए आग्नीः । तइन्ये । इति प्रथमे रायोवाजीये । अत्र ग्नीकारः प्रकृतिः ।

संक्रुतिनि परि॥ सत्राणि॥ ६॥

दी. **एपारी** (र. अ. १२९) इति **संकृतिनि**। अत्र **री**-कारः प्रकृतिः॥ ६॥

इति रहस्ये प्रकृतिभावस्य पञ्चमः खण्डः॥ ५॥

॥सत्राणि समाप्तानि॥

इति फुल्लदीपे चतुर्थाध्यायस्य सप्तविंशः खण्डः॥ २७॥

अष्टाविंशः खण्डः — रहस्ये षष्ठः

प्रायश्चित्तानि

द्वितीये सन्धि–बृहति मही। तवे॥ १॥

दी. **सन्धिस्तोत्रे** **औहोइप्रत्यु – ए** (र. प्रा. १४६) इति द्वितीये **बृहति**। **महीवृणू**। अत्र **ही**-कारः प्रकृतिः। तृतीयायां **तवे**ऽ३४। अत्र **वे**-कारः प्रकृतिः॥

अग्ने–बृहति शुषे। श्विभ्याम्॥ २॥

दी. **औहो अग्ने – ए** (र. प्रा. १४८) इति [चतुर्थे **बृहति**] **शुषेजाता**। अत्र **षे**-कारः प्रकृतिः। तृतीयायाम् **अश्वीभ्याम्**। अत्र **श्वी**-कारः प्रकृतिः॥ २॥

त्रिक–बृहति सईम्॥ ३॥

दी. **औहोइत्रिक – ए** (र. प्रा. १४९) इति **बृहति** **सई**ऽ३४। अत्र **ई**-कारः प्रकृतिः॥ ३॥

यामे क्रमीत्। यधी॥ ४॥ प्रायश्चित्तानि॥

दी. **आयम्**। **गौ**ऽपाऽ२ (र. प्रा. १५३) इति **यामे** **श्विरक्रा**ऽ२३४**मीत्**। अत्र **मी**-कारः प्रकृतिः। तृतीयायां **यधीया**ऽ२३४**ताइ**। अत्र **धी**-कारः प्रकृतिः॥ ४॥

इति रहस्ये प्रकृतिभावस्य षष्ठः खण्डः ॥ ६ ॥

॥ प्रायश्चित्तानि समाप्तानि ॥

इति फुल्लदीपे चतुर्थाध्यायस्य अष्टाविंशः खण्डः ॥ २८ ॥

एकोनत्रिंशः खण्डः — रहस्ये सप्तमः

क्षुद्राः

रिक्षे वइ ॥ १ ॥

दी. **हाउयद्यावई** (र. क्षु. १६५) इति **अन्तरिक्षे** । अत्र **ई-**कारः प्रकृतिः ॥

वैराजर्षभे द्रिः । अस्ति । त्राणि । हँसि ॥ २ ॥

दी. **इयाहाउ । पिबासोमाम्** (र. क्षु. १६७) इति **वैराजर्षभे अश्वअद्रीः** । अत्र **द्री-**कारः प्रकृतिः । द्वितीयायां **चारुररती** । अत्र **स्ती-**कारः प्रकृतिः । **णीऽ३हरि** । अत्र **णी-**कारः प्रकृतिः । **अश्वहं॰सी** । अत्र **सी-**कारः प्रकृतिः ॥ २ ॥

उत्तरे षभे वाक्मि । नी । षी । वामित् ॥ ३ ॥

दी. **श्रुधीहवाम्** (र. क्षु. १६८) इति **उत्तरे वैराजर्षभे** द्वितीयायां **शोविवक्मी** । अत्र **क्मी-**कारः प्रकृतिः । तृतीयायां **भूरिमनी** । अत्र **नी-**कारः प्रकृतिः । **षीऽ३हव** । अत्र **षी-**कारः प्रकृतिः । **तेतुवामीत्** । अत्र **मी-**कारः प्रकृतिः ॥ ३ ॥

वत्सायां सईम् ॥ ४ ॥

दी. **एत्राइका** (र. क्षु. १६९) इति **नित्यवत्सायां साईम्** (त्रिः) । अत्र **ई-**कारः प्रकृतिः ॥ ४ ॥

प्रोषु—वत्सायां सङ्गे ॥ ५ ॥

दी. **एप्रोषू** (र. क्षु. १७०) इति **नित्यवत्सायां साङ्गे**। अत्र **गे**-कारः प्रकृतिः। अभ्यासेऽपि ॥ ५ ॥

अतीषङ्गे ण्वी ॥ ६ ॥

दी. **एयदिन्द्रचाइ** (र. क्षु. १७१) इति **अतीषङ्गे आण्वी**। अत्र **ण्वी**-कारः प्रकृतिः ॥ ६ ॥

ह्रस्वायां सखे ॥ ७ ॥

दी. **सुतासोमधुमत्तमाः। ए** (र. क्षु. १७५) इति **ह्रस्वावैरूपे** तृतीयायां **साखेऽरन्द्रस्या**। अत्र **खे**-कारः प्रकृतिः ॥ ७ ॥

वत्सायामवी। येव। पेगो ॥ ८ ॥

दी. **एसोमाः** (र. क्षु. १७९) इति **नित्यवत्सायाम् आवी**। अत्र **वी**-कारः प्रकृतिः। अभ्यासेऽपि। **अश्वाऽ१येऽ३वा**। अत्र **ये**-कारः प्रकृतिः। द्वितीयायाम् **अनूऽ१पेऽ३गो**। अत्र **पे**-कारः प्रकृतिः ॥ ८ ॥

वाज-वत्सायां त्रेधा। वींच ॥ ९ ॥

दी. **एपावा** (र. क्षु. १८०) इति **नित्यवत्सायां पवाऽ१इत्रेऽ३धा**। अत्र **त्रे**-कारः प्रकृतिः। द्वितीयायां **त्रआ**। **त्रे सर्वत्र** (पु. सू. ३. १३. ७) इत्यनेन अत्र **त्रे**-कारः प्रकृतिः। अभ्यासेऽपि। तृतीयायां **पृथाऽ१इवींऽ३ञ्चा**। अत्र **वी**-कारः प्रकृतिः। **आती**। अत्र **चाति सर्वत्र** (पु. सू. ४. ६. ५) इति **ती**-कारः प्रकृतिः। **जभ्रीऽ२-पाइ**। अत्र **जभ्रि सर्वत्र** (पु. सू. ३. ६. १०) इति **भ्री**-कारः प्रकृतिः ॥ ९ ॥

एतान्येवातीषङ्गयोर्वींवर्जम् ॥ १० ॥

दी. एतान्येवोदाहरणानि। **आवी**। **येव**। **पेगो**। **एसोमउष्वा** (र. क्षु. १८१) इति **अतीषङ्गे** भवन्ति। **आवी**। अत्र **वी**-कारः प्रकृतिः। **येऽ२वा**। अत्र

ये-कारः प्रकृतिः । द्वितीयायां **पेऽ२गो** । अत्र **पे**-कारः प्रकृतिः । **त्रेधा** । **त्रेआ** । **अती** । **जभ्री** । एतान्येवोदाहरणानि । **वी**-शब्दवर्जम् । **एपवस्तवा** । (र. क्षु. १८२) इति **अतीपङ्क्ते** भवन्ति । **त्रेऽ२धा** । अत्र **त्रे**-कारः प्रकृतिः । द्वितीयायां **त्रेआ** । **त्रे सर्वत्र** (पु. सू. ३. १३. ७) इत्यनेनात्र **त्रे**-कारः प्रकृतिः । तृतीयायां **वाऽ२इश्वा** । अत्र **वीं**-शब्दः (?°शब्दस्य) न प्रकृतिभावः । **आती** । अत्र **चाति सर्वत्र** (पु. सू. ४. ६. ५) इत्यनेन **ती**-कारः प्रकृतिः । **जभ्रीऽ२षाइ** । अत्र **जभ्रि सर्वत्र** (पु. सू. ३. ६. १०) इत्यनेन **भ्री**-कारः प्रकृतिः ॥ १० ॥

सुता-तरे वे ॥ ११ ॥

दी. सुतासोमधुत्तमोवा (र. क्षु. १९३) इति **रथन्तरे** तृतीयायां **वेदाऽ२३४-इवा** । अत्र **वे**-कारः प्रकृतिः ॥ ११ ॥

तव-बृहति दिवे पूर्वम् ॥ १२ ॥

दी. औहोइतवाह॰सोम – ए (र. क्षु. १९४) इति **बृहति दाइवेदाऽ२३-४इवाइ** । अत्र पूर्वस्य **दिवे**शब्दस्य प्रकृति[भाव]ः ॥ १२ ॥

अरिष्टे सखे । वे । पूर्वम् ॥ १३ ॥

दी. हाह । होइया । सुता (र. क्षु. २००) इति **अरिष्टे** तृतीयायां **साखे** । अत्र **खे**-कारः प्रकृतिः । **दिवेदाऽ२३४इवाइ** । अत्र पूर्वस्य **वे**-कारस्य प्रकृति[भाव]ः ॥ १३ ॥

वत्सायामग्निम् । यजि । परि । णीनाम् । सहि ॥ १४ ॥

दी. एआग्नीम् (र. क्षु. २०२) इति **नित्यवत्सायाम्** । अत्र **ग्नी**-कारः प्रकृतिः । द्वितीयायाम् **एयाजी** । अत्र **जी**-कारः प्रकृतिः । **पारी** । अत्र **री**-कारः प्रकृतिः । अभ्यासेऽपि । **होतारश्चर्षाऽ१णीऽ३नाम्** । अत्र **णी**-कारः प्रकृतिः । तृतीयायाम् **एसाही** । अत्र **ही**-कारः प्रकृतिः ॥ १४ ॥

तमसोऽर्के मतिस ॥ १५ ॥

दी. **आक्रान्** (र. क्षु. २०३) इति **दीर्घतमसोऽर्के**। द्वितीयायां **मात्सी** (चतुः)। अत्र **त्सी**-कारः प्रकृतिः ॥ १५ ॥

इन्द्र वज्रि आद्यायामिन्द्रो द्वितीयायां
पूर्तिस्तृतीयायां छान्दसीषु सिमासु ॥ १६ ॥

दी. एऽ२। **विदामघवन्विदाः** (अ. गा. ६. २. २९१-३) इति **छान्दसीषु सिमासु** प्रथमायां स्तोत्रीयायाम् **ईन्द्रा**। **द्युम्ना**। अत्र **ई**-कारः प्रकृतिः। अभ्यासेऽपि। **रायेवाजायवाऽ१ज्रीऽ३वाः**। अत्र **ज्री**-कारः प्रकृतिः। द्वितीयायाम् **ईन्द्रो**। अत्र **ई**-कारः प्रकृतिः। अभ्यासेऽपि तथैव। तृतीयायां **पूर्तीः**। अत्र **र्ती**-कारः प्रकृतिः। अभ्यासेऽपि। महच्छन्दसि (!) भवाः छान्दसी (?स्यः) [तासु] ॥ १६ ॥

अतीषङ्गेन व्याख्यातः प्रकृतिभावः ॥
प्रकृतिभावः ॥ १७ ॥ [क्षुद्राः ॥]

दी. **सिमासु** इति पदमुभयत्र संबध्यते। एऽ२। **सोमउष्वाणस्सोतृभाइः** (र. क्षु. २०४) इति **सिमासु एसोमउष्वा** (र. क्षु. १८१) इति **अतीषङ्गेन प्रकृतिभावो व्याख्यातः**। उक्तः। प्रथमायाम् **आवी**। अत्र **वी**-कारः प्रकृतिः। अभ्यासेऽपि। **अश्वाऽ१येऽ३वा**। अत्र **ये**-कारः प्रकृतिः। द्वितीयायाम् **अनूऽ१पेऽ३गो**। अत्र **पे**-कारः प्रकृतिः। एऽ२। **पवस्ववाजसातयाइ** इति सिमासु **एपवस्वत्रा** (र. क्षु. १८२) इति **अतीषङ्गेन प्रकृतिभावो व्याख्यातः**। उक्तः। द्वितीयायां **त्वआ**। अत्र **त्वे**-कारः प्रकृतिः। अभ्यासेऽपि। तृतीयायाम् **आती**। अत्र **चाति सर्वत्र** (पु. सू. ४. ६. ५) इत्यनेन **ती**-कारः प्रकृतिः। अभ्यासेऽपि। **जभ्रीऽ२षाइ**। अत्र **जभ्रि सर्वत्र** (पु. सू. ३. ६. १०) इत्यनेन **श्री**-कारः प्रकृतिः। अभ्यासेऽपि। अभ्यासः प्रकरणसमाप्त्यर्थः ॥ १७ ॥

इति रहस्ये क्षुद्रे प्रकृतिभावे सप्तमः खण्डः ॥ ७ ॥

॥ **क्षुद्राः समाप्ताः** ॥

॥ प्रकृतिभावः समाप्तः ॥

इति फुल्लदीपे चतुर्थाध्यायस्यैकोनत्रिंशः खण्डः ॥ २९ ॥

इति त्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभाई-

द्वितीयनाम्ना कृते फुल्लदीपे चतुर्थोऽध्यायः ॥

पुष्पसूत्रे चतुर्थः प्रपाठकः समाप्तः ॥ ४ ॥

पञ्चमः प्रपाठकः

प्रथमः खण्डः

अथ वृद्धावृद्धे

सौभराभीवर्तजयानां वृद्धं तुरीयम् ॥ १ ॥

वि. सौभराभीवर्तयौधाजयानां साम्नां चतुर्थमक्षरं दीर्घं च यत् तत् **वृद्धं** भवति। ऋग्दीर्घाक्षरस्य वृद्धिर्भवतीत्यर्थः। तुरीयशब्देन चतुर्थमुच्यते। दीर्घं द्विमात्रम्। वृद्धं त्रिमात्रम्। अत्रोदाहरणानि। **सौभरे वयमुत्वा**द्यान्त्ययोः (ऊ. द. १६)। **अभीवर्ते पुनानस्सोमा**द्ययोः (ऊ. सं. ३१५)। **यौधाजये तवाहं॒सोमा**द्यायाम् (ऊ. ए. ५१६) इति सूत्रार्थः। **जयानाा**मिति संबन्धसामान्ये षष्ठी। सा यथायोगं विशेषेष्ववतिष्ठते। अथवा प्रातिपदिकार्थमात्रमविवक्षितविभक्त्यर्थमधिक्रियते। एवं षष्ठीसंबन्धः॥ १॥

भाष्यम् (भा.) जितं भगवता तेन हरिणा लोकधारिणा।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना॥

सौभराभीवर्तयौधाजयानां साम्नां चतुर्थमक्षरं दीर्घं यत् तत् वृद्धं भवति। तुरीयशब्देन चतुर्थमुच्यते। दीर्घं द्विमात्रम्। वृद्धं त्रिमात्रम्। ऊदाहरणानि। **सौभरे वयमु त्वा-** (ऊ. द. १६) आद्यान्त्ययोः। **अभीवर्ते पुनानस्सोम-** (ऊ. सं. ३१५) आद्यान्त्ययोः। **यौधाजये तवाहं॒सोम-** (ऊ. ए. ५१६) आद्यायाम्॥ १॥

---

4. My[3] begins with श्री गणेशाय नमः; A^{1-2} M^{1-2} T यौधाजयानां for जयानां
5. A[1] KA[2] M^{1-2} TMy[1] om. KMy[1] om. च
6. A[1]A[2] M^{1-2} TMy[1] om. तुरीयशब्देन ... त्रिमात्रम्
7. A[1] आद्यन्तयोः for आद्यान्त्ययोः
9. A[2]. om. जायानाम् ... षष्ठी संबन्ध; KS[1]S[2] TMy[1] om. सा; KS[1]S[2] अतिवर्तते, TMy[1] इति वर्तते for अवतिष्ठते
10. A[1] विवक्षितम् for अविवक्षित०

प्रस्माऽ३१ । वाऽ३जे । अत्र जे इति तुरीयमक्षरं न वृद्धं भवति । तन्ताऽ३इमाऽ३दं – वा (ऊ. स. ७३७) इति सौभरे द्वितीयायां येनाऽ३ज्योऽ३तीं॰पिआयवोवा । अत्र तीं-इति तुरीयमक्षरं न वृद्धम् ॥ २ ॥

अति मधु दस्मम् ॥ ३ ॥

वि. ह्रस्वस्यापि वृद्धिर्भवति । ग्रहणात् । उदाहरणम् – **परिधी॰रति** (ऊ. ए. ५१६) । **उदु त्ये मधु** (ऊ. द. २१६) **तं वो दस्मम्** (ऊ. प्रा. ८०३) इत्येते वर्धन्ते । अभीवर्ते द्वे । **सौभरे** चैकम् ॥ ३ ॥

भा. ह्रस्वानामपि वृद्धिप्रापणार्थमाह – **अतीति** । एतानि ह्रस्वान्यपि वर्धन्ते । ह्रस्वोदाहरणानि – **परिधी॰रति** । **उदु त्ये मधु** । **तं वो दस्मम्** । **अभीवर्ते** ॥ ३ ॥

दी. ह्रस्वाक्षराणामपि वृद्धिप्रापणार्थमाह – **अतीति** । **अति** । **मधु** । **दस्मम्** । एतानि ह्रस्वान्यपि वर्धन्ते । ह्रस्वानामुदाहरणानि – **अभीवर्ते एकर्चे पराऽ३इधाऽ३इ॰राति तां इहोवा** (ऊ. सं. ३०१) । **उदूऽ३त्येऽ३माधुमत्तमोवा** (ऊ. द. २१६) । **तंवोऽ-३दाऽ३स्मामृतीषहोवा** (ऊ. सं. २३६) । अत्र चतुर्थं ह्रस्वं वृद्धम् ॥ ३ ॥

अनाद्यं जये ॥ ४ ॥

---

1. EL[1]My[3] चतुर्थं न वृद्धम् for जे इति ... भवति; EL[1]My[3] om. तन्ता ... इति;
2. L[1]EMy[3] om. द्वितीयायां;
3. EL[1]My[3] चतुर्थं for तुरीयमक्षरं
4. s[2] before अति .... adds: ह्रस्वानामपि वृद्धिप्रापणार्थमाह
5. A[1]M[1]M[2] om. °स्यापि ... भवति; S[1] trans. ग्रहणात् before ह्रस्वस्य
6. A[1]A[2]M[1]M[2]TS[1]S[2] after वर्धन्ते add: ह्रस्वत्वादप्राप्ता अपि
11. S[4] ह्रस्वाक्षराण्यपि वृद्धं भवति for ह्रस्वान्यपि वर्धन्ते; L[1] om. एकर्चे
12. S[4] after इहोवा adds: अत्र राति इत्यत्र अकार इति तुरीयमक्षरं ह्रस्वं वृद्धं भवति; S[4] after °मात्तमोवा adds: अत्र मा इति तुरीयमक्षरं ।
13 S[4] after होवा adds: इत्यभीवर्ते अत्र स्मा इति तुरीयमक्षरं ह्रस्वं वृद्धम् । ; S[4] om. अत्र .... वृद्धम्

दी. प्रथमे द्वितीये चाध्याये एकाहाहीनसत्राणां क्रतुप्रायश्चित्तानां क्षुद्राणां यज्ञानां च सामानि उक्तानि । तृतीये चतुर्थे चाध्याये आइभावप्रकृतिभावावुक्तौ । पञ्चमेऽध्याये वृद्धमवृद्धं चोच्यते – **सौभरेति** । सौभरं च अभीवर्तश्च यौधाजयं च । [तेषां] **सौभराभीवर्तजयानां** साम्नां **तुरीयं** चतुर्थमक्षरं दीर्घं द्विमात्रं यत् तत् **वृद्धं** त्रिमात्रं भवति । उदाहरणानि **सौभरे वयाऽ३मूऽ३त्वामपूर्वियोवा** (ऊ. द. १६) । अत्र **त्वा** इति तुरीयमक्षरं दीर्घं भवति । **अभीवर्ते पुनाऽ३नाऽ३स्सोमधारयोवा** (ऊ. सं. ३१५) । अत्र **सो** इति तुरीयमक्षरं दीर्घं वृद्धं भवति । **यौधाजये तवाऽ३१ । हाऽ३ॅसो** (ऊ. ए. ५१६) । अत्र **सो** इति तुरीयमक्षरं दीर्घं वृद्धं भवति ॥ १ ॥

अपीयूवाजे तीॅषि ॥ २ ॥

वि. अकारः प्रतिषेधार्थः । पूर्वलक्षणप्राप्तस्य प्रतिषेधः । **प्रत्नं पीयूषायं** (ऊ. ए. ३८०) **यौधाजये** प्रस्तावे । **प्र स्म वाजेषु नो अव** (सा. १५४५; ऊ. ए. ४१३) इत्यत्र **यौधाजये** । **येन ज्योतींषि** (सा. ८८१; ऊ. स. ७३७) इत्यत्र **सौभरे** । एतानि उदाहरणानि ॥ २ ॥

भा. अस्यापवादमाह – **अपीयू-** इति । अकारः प्रतिषेधार्थः । **प्रत्नं पीयू-** (ऊ. ए. ३८०) **यौधाजये** । **प्र स्म वाजे**– (ऊ. ए. ४१३) इति च । **येन ज्योतींषि** (सा. ८८१; ऊ. स. ७३७) **सौभरे** । एतेषु वृद्धिप्रतिषेधः ॥ २ ॥

दी. अस्यापवादमाह – **अपीयू** इति । अकारः प्रतिषेधार्थः । **यौधाजये प्रत्नाऽ३१म्** । **पीऽ३यू** (ऊ. ए. ३८०) अत्र **यू** इति तुरीयमक्षरं दीर्घं द्विमात्रं भवति । वृद्धं न भवतीत्यर्थः । **पाहाऽ३१इ** । **नोऽ३अ** (ऊ. ए. ४१३) इति **यौधाजये** तृतीयायां

---

5. L^1 EMy^3 om. अत्र त्वा … भवति
6. L^1 EMy^3 om. अत्र सो … भवति
9. S^2 before अपीयू adds: अस्यापवादमाह
12. S^2 A^1A^2 KM^1M^2 TMy^1 before एतानि add:- इति
18. EL^1 My^3 om. अत्र यू इति … तृतीयायां (L. 19)

वि. **अन्**-कारः प्रतिषेधार्थः । पूर्वसूत्रस्य यदाद्यमुदाहरणं तन्न वर्धते । **परिधी१रति** (ऊ. ए. ५१६) **यौधाजये** ॥ ४ ॥

भा. अस्यापवादमाह – **अनाद्यम्**-इति । अकारः प्रतिषेधार्थः । एतेषां त्रयाणामुदाहरणानां यदाद्यमुदाहरणं **परिधी१रति** इति तस्य वृद्धिः न भवति **यौधाजये** ॥ ४ ॥

दी. अस्यापवादमाह – **अनाद्यमि**ति । अकारः प्रतिषेधार्थः । **अति** । **मधु** । **द्स्रम्** । एतेषां त्रयाणां यदाद्यं **परिधी१रती**ति तस्य वृद्धिर्न भवति । **यौधाजये** **प[३]रा[२]ऽ३१इ** । **धा[२]ऽ३इ१र** (ऊ. ए. ५१६) अत्राकारस्यावृद्धिः ॥ ४ ॥

श्यावाश्वे च ॥ ५ ॥

वि. दीर्घं तुरीयमित्यनुवर्तते । **श्यावाश्वे च ऋचि** दीर्घं **चतुर्थमक्षरं वर्धते** । **पुरोजिती** (ऊ. द. ११) इत्येवमादीनि ॥ ५ ॥

भा. यदधिकृतं तद्भवतीति । किं चाधिकृतम् ? **दीर्घं चतुर्थमक्षरं वृद्धं भवतीति**। उदाहरणम् – यथा **पुरोजिती**त्येवमादि ॥ ५ ॥

दी. **श्यावाश्वे साम्नि** चकारात् चतुर्थं दीर्घमक्षरं वृद्धं भवति । वृद्धं तुरीयमित्यस्याधिकारात् । उदाहरणम् – **पु[३]रो[२]ऽ३१** । **जी[२]ऽ३[४]ती** (ऊ. द. ११) इत्येवमादीनि ॥ ५ ॥

अ-या-वा-स्वा-सोम-धा ॥ ६ ॥

---

1. $S^1A^1A^2M^1M^2T$ अनाद्यं परिर्धीरतितां यौधाजये न वर्धते । पुर्वसूत्रस्य (A^1 पूर्वस्य for पूर्वसूत्रस्य) आद्यमुदाहरणम् । आकारः प्रतिषेधे for अन्कारः ... पूर्वसूत्रस्य ... यौधाजये
4. PD^4 trans. इति after भवति
5. My^1 ०षेधे ०षेधार्थः
6. S^4 यौधाजये तुरीयाक्षरस्य अकारस्य वृद्धिः [न] भवति for तस्य वृद्धिर्न भवति
7. My^1 L^1E om˙ अत्राकारस्यावृद्धिः
9. KMy^1 om. च; S^2R ऋग् for ऋचि
11. PL^2 A^3 after ०कृतं add न
14. S^4 after इति adds: श्यावाश्वे । अत्र ती इति तुरीयमक्षरं दीर्घम् । वृद्धं भवति ।

वि. अकारः प्रतिषेधार्थः । **समु प्रिया** (सा. ८१९) । **अभी नो वा** (सा. १२३८) **परि स्य स्वानो** (सा. १२४०) । **इन्द्राय सोम** (सा. १३३१) **सहस्रधार** (सा. ८७४) इत्येते **या-वा-स्वा-सोम-धा** न वर्धन्ते । पञ्चैतान्युदाहरणानि । एकाक्षराणि चत्वारि । **सोम** इति द्व्यक्षरं कुतः? **ते पूतासो** (सा. ११०२) **सुष्वाणा सो** (सा. ११०३) प्रभृतीनां वृद्धिप्रतिषेधाप्राप्त्यर्थं द्व्यक्षरग्रहणम् ॥ ६ ॥

भा. अकारः प्रतिषेधार्थः । पूर्वलक्षणप्राप्तानां **वृद्धिप्रतिषेधः** । एकाक्षराण्युदाहरणानि । यथा **या-वा-स्वा-सोम-धा** । **समु प्रिया** । **अभी नो वा** । **पवस्व वा** (सा. १०१६) । **परि स्य वा** । **इन्द्राय सोम** । द्व्यक्षरमुदाहरणं गृह्यते सोमशब्दस्यैव प्रतिषेधार्थम् । तेन किम्? **ते पूतासो** (सा. ११०२) **सुष्वाणासो** (सा. ११०३) प्रभृतीनां वृद्धिर्भवति । **सहस्रधा** (सा. ८७४) ॥ ६ ॥

दी. अस्यापवादमाह – **अयावे**-ति । अकारः प्रतिषेधे । पूर्वलक्षणेन प्राप्तानां श्यावाश्वानां तुरीयाक्षरस्य वृद्धिप्रतिषेधः । एकाक्षराण्युदाहरणानि । **या** । **वा** । **स्वा** । **सोम** । **धा** । [इति] । **अयंपू** – (ऊ. ए. ४४४) **श्यावाश्वे** द्वितीयायां **समू**^{३२}**ऽ३१** । **प्री**^{२}**ऽ३या**^{४र}**ः** । अत्र **या**-इति तुरीयमक्षरं न वृद्धम् । **पवा**^{३२}**ऽ३१** । **स्वा**^{२}**ऽ३वा**^{४र} (ऊ. अ. ६११) इति **श्यावाश्वे** । अत्र **वा**-इति तुरीयमक्षरं न वृद्धम् । **अभीनो** (ऊ. ए. ४६९) **श्यावाश्वे** तृतीयायां **परा**^{३२}**ऽ३१इ** । **स्वा**^{२}**ऽ३स्वा**^{४र} । अत्र **स्वा**-इति तुरीयमक्षरं न वृद्धम् । **इन्द्रा**^{३२}**ऽ३१** ।

---

1. A^1A^2 M^{1-2} ०षेधे, KTS^1My^1 षेधः for ०षेधार्थः
2. A^1M^1 after सोम add:- पवस्व वाजसा
4. S^2 after द्व्यक्षरम् adds: उदाहरणम् ; A^1 om. कुतः
5. A^1 M^1M^2 r वृद्धिप्रतिषेधप्राप्त्यर्थं My^1 वृद्धिप्राप्त्यर्थं for वृद्धिप्रतिषेधाप्राप्त्यर्थं
12. My^3 om. तुरीयाक्षरस्य
13. My^3L^1E om. अयंपू and द्वितीयायां
14. My^2 om. अत्र या इति .... न वृद्धम्
15. My^3 L^2 om. इति श्यावाश्वे .... न वृद्धम् ; L^2My^3 om. अभी ... तृतीयायां
16. My^3 om. अत्र स्वा ··· न वृद्धम्

याऽ३सो । मपा (ऊ. ए. ४७५) । अत्र श्यावाश्वे सोमेति द्व्यक्षरमुदाहरणं गृह्यते सोमशब्दस्यैव तुरीयाक्षरस्य सो-कारस्य वृद्धिप्रतिषेधार्थम् । नान्येषाम् । तेन किम्? सोमाः पवन्ते (ऊ.अ. ६०८) इति श्यावाश्वे द्वितीयतृतीययोः स्तोत्रीययोः तेपूऽ३१ । ताऽ३सो । अत्र सो-इति तुरीयाक्षरं वृद्धम् । सोमशब्दरहितत्वात् । सुष्वाऽ३१ । णाऽ३सो । अत्र सो-इति तुरीयाक्षरं वृद्धम् । एतत्प्रभृतीनां वृद्धिर्भवति । सुतासोम (ऊ. स. ७७२) श्यावाश्वे तृतीयायां सहाऽ३१ । स्राऽ३धा । अत्र धा-इति तुरीयमक्षरं न वृद्धम् ॥ ६ ॥

म ॥ ७ ॥

वि. तुरीयमित्यनुवर्तते । श्यावाश्वे तुरीयो म-शब्दो ग्रहणात् वर्धते । सुतासोम (ऊ. स. ७७२) इत्यत्र ॥ ७ ॥

भा. म-शब्दश्च ग्रहणात् वर्धते । ह्रस्वोऽपि सन् । सुतासोम (ऊ. स. ७७२)॥

दी. सूत्रे म-शब्दग्रहणात् ह्रस्वोऽपि म-कारो वर्धते । ह्रस्वमकारस्योदाहरणम् – सुताऽ३१ । सोऽ३मा (ऊ. स. ७७२) इति श्यावाश्वे । अत्र म-कारस्य तुरीयाक्षरस्य ह्रस्वस्य वृद्धिविधानम् ॥ ७ ॥

सफपौष्कलयोर्वै ह्रीष्याम् ॥ ८ ॥

वि. सफपौष्कलयोः प्रस्तावे ह्रीष्यां प्रत्ययभूतायां दीर्घाक्षरस्य वृद्धिः । सफे पवस्व (ऊ. द. ८) मध्यमायाम् । पौष्कले इन्द्रमच्छ (ऊ. द. १०) इत्येवमादि ॥

---

1. L^2 om. अत्र श्यावाश्वे My^3 om. याऽ३ … श्यावश्वे
2. L^2My^3 om. तुरीयाक्षरस्य; My^3 °षेधार्थः for °षेधार्थम्; L^2 My^3 om. सोमा …. स्तोत्रीययोः
4. L^2 My^3 om. अत्र …. °रहितत्वात्; L^2 My^3 om. अत्र …वृद्धम्;
5. L^2 My^3 om. एतत्प्रभृतीनां; … My^3 om. सुता …. तृतीयायां
6. L^2 My^2 om. अत्र … वृद्धम्
11. ε^4 पूर्वसूत्रे सोमशब्द° for सूत्रे मशब्द°
12. L^2 My^3 om. इति and trans. सुता … सोमा after श्यावाश्वे; L^2My^2 om. अत्र … °विधानम्
15. Ts प्रत्यङ्ग for प्रत्यय°

भा. **सफपौष्कलयोः** साम्नोः **प्रस्तावे** प्रस्तावविषये **हीष्यां** प्रत्ययभूतायां दीर्घाक्षरस्य । वृद्धिरित्यनुवर्तते । तुरीयमिति निवृत्तम् । अर्थादिह षष्ठाक्षरस्य वृद्धिः । उदाहरणानि । सफे **पवस्व मधु**– (ऊ. द. ९) मध्यमायाम् । **पौष्कले इन्द्रमच्छसुता**- (ऊ. द. १०) **तृचे** । एवमादीनि ॥ ८ ॥

दी. **सफपौष्कलयोः साम्नोः** प्रस्तावे **हीष्यां** प्रत्ययभूतायां दीर्घाक्षरस्य वृद्धिः । उदाहरणानि – **सफे पवस्व** (ऊ. द. ९) मध्यमायाम् । **महिंयूँऽ३क्षत** । **मोमाऽ२३४दाः** । अत्र **मो**-कारस्य दीर्घाक्षरस्य वृद्धिः । **पौष्कले इन्द्रमच्छ**- (ऊ. द. १०) तृचे **इन्द्रमाऽ३च्छसु** । **ताईऽ२३४माइ** । अत्र **ता**-कारस्य दीर्घस्य वृद्धिः । एवमादीनि ॥ ८ ॥

ऊने ॥ ९ ॥

वि. स्वस्मादक्षरपरिमाणादूने पादे । **सफपौष्कलयोर्वे हीष्याम्** इत्यनुवर्तते । प्रस्तावे हीष्यां परतः ह्रस्वस्यापि **वृद्धिर्भवति** । उदाहरणम् – **ससुन्वेऽ३४यः** (ऊ. प्रा. ८१३) **प्राणाशाऽ३इशुः** (ऊ. सं. ३६४) ॥ ९ ॥

भा. **ऊने** च पादे स्वस्मादक्षरपरिमाणात् ह्रस्वस्यापि वृद्धिः । सफपौष्कलयोरेव । **ससुन्वेयः** (ऊ. प्रा. ८१३) । **प्राणाशिशुः** (ऊ. सं. ३६४) इति च ॥ ९ ॥

दी. **ऊने** पादे सफपौष्कलयोः प्रस्तावे हीष्यां प्रत्ययभूतायां ह्रस्वाक्षरस्यापि वृद्धिः । सफे **ससुन्वेऽ३यः** । **वासूऽ२३४नाम्** (ऊ. प्रा. ८१३) । अत्र **व**-कारस्य ह्रस्वस्यापि वृद्धिः । पौष्कले **प्राणाशाऽ३इशुः** । **माहाऽ२३४इनाम्** (ऊ. सं. ३६४) । अत्र ह्रस्वस्यापि **म**-कारस्य वृद्धिविधानम् ॥ ९ ॥

---

4. A¹S¹S²A² M¹M² आदि for आदीनि
7. L¹ My³ om. अत्र ... वृद्धिः
8. L¹ My³ om. अत्र .... वृद्धिः ।
16. s⁴ om. सफे; L¹ My³ om. अत्र ··· वृद्धिः
17. L¹ My³ om अत्र .... °विधानम्

द्विपदायाम् ॥ १० ॥

वि. पूर्ववदधिकारः । **द्विपदायां** सफपौष्कलयोः प्रस्तावे ङीप्यां परतः ह्रस्वस्यापि वृद्धिर्भवति । **परिप्रधन्व- सफपौष्कलयोः** (ऊ. ए. ३८३; ऊ. प्रा. ८१८) ॥ १० ॥

भा **द्विपदायां** सफपौष्कलयोः ह्रस्वं [अक्षरं] वर्धते **परिप्रधन्वेत्यत्र** । ङीप्यां प्रत्ययभूतायामित्यनुवर्तते ॥ १० ॥

दी. यस्यामृचि द्वौ पादौ स्तः सा द्विपदा । तस्यां **द्विपदायाम्** सफपौष्कलयोः प्रस्तावे ङीप्यां प्रत्ययभूतायां ह्रस्वमक्षरं वर्धते । **परिप्रधन्व- सफे । पौष्कले च । परिप्रा-३ध । न्वाईऽ२३४न्द्रा** (ऊ. ए. ३८३; प्रा. ८१८) । अत्र न्व-कारस्य ह्रस्वस्यापि वृद्धि-विधानम् ॥ १० ॥

सखातुरीयम् ॥ ११ ॥

वि. **सखाय आ निषीदत** (ऊ. सं. ३४०) इत्यत्र पौष्कले प्रस्तावे **तुरीयमक्षरं** वर्धते । योनिवद्भावादप्राप्तम् ॥ ११ ॥

भा. **सखाय आ** (ऊ. सं. ३४०) पौष्कले प्रस्तावे चतुर्थमक्षरं वर्धते ॥ ११ ॥

दी. **सखाय आ निषीदत** (ऊ. सं. ३४०) इति पौष्कलस्य प्रस्तावे **तुरीयं** चतुर्थ-मक्षरं वर्धते । **सखायाऽ३आनि** इति पौष्कले आकारस्य तुरीयाक्षरस्य दीर्घस्य वृद्धिः ॥ ११ ॥

स्ये महिद्वितीयमन्वायिक्याम् ॥ १२ ॥

वि. **रहस्ये** विषये **महित्रीणा- द्वितीयम्** अक्षरं वर्धते । दीर्घमित्यधिकारः अन्व-

---

6. My^{3} ^{1} om यस्याम् ··· तस्यां ।
7. L^{1} सफपौष्कलयोः परिप्रधन्वेन्द्र for परिप्रधन्व- । सफे । पौष्कले च
8. L^{1} My^{3} om अत्र ... विधानम्
11. A^{1}A^{2}M$^{1-2}$ trans. अक्षरं after वर्धते
15. L^{1} om. इति ... वृद्धिः
17. A$^{1-2}$M^{2}TS^{1} after द्वितीयम् add: महाइत्राइणा द्वितीयम् ; A$^{1-2}$ M^{2}IS^{1} before वर्धते add: दीर्घं

यिक्यां सत्याम् । सा चेन्महित्रीणा प्रतिपादमन्विता अनुगता **भवति** । **नैकस्मिन्** पाद इत्यर्थः । उदाहरणम्– स्वाशिरामर्के **पवस्व देवा-** (र. द. २२) दिषु । अरिष्टे **सुता-सोमायाम्** (र. क्षु. २००) **आज्यदोहे प्रसुन्वानायाम्** (र. अ. ९४) वैराजर्षभे **तवाहꣳ सोमा-** (र. क्षु. १७७) दिषु च ॥ १२ ॥

भा. रहस्ये विषये **महित्रीणाद्वितीयम्** । दीर्घमित्यधिकारात् द्वितीयमक्षरं वर्धते । **अन्वयिक्या**मिति । सा चेन्महित्रीणा प्रतिपादमन्विता अनुगता भवति । नैकस्मिन् पादे इत्यर्थः । उदाहरणानि– स्वाशिरामर्के **पवस्वदेव-** (र. द. २२) **यस्ते मदो-** (र. ए. ८४) **स्वादिष्ठये-** (र. ए. ७२) त्यादिषु । अरिष्टे **सुतासोमायाम्** (र. क्षु. २००) आज्यदोहे **प्रसुन्वानायाम्** (र. अ. ९४) वैराजर्षभे **तवाहꣳसोम** (र. क्षु. १७७) **परोजित्या-** (र. क्षु.१७८) दिषु ॥ १२ ॥

दी. महाइत्राऽ२३४इणाम् (ग्रा. गे. ५. ८. १९२) इति महित्रीणापर्व । **रहस्ये** आरण्यके गाने महित्रीणाया**मन्वयिक्याम्** प्रतिपादमन्वितायाम् अनुगतायां सत्यां महित्रीणाया द्वितीयाक्षरं वर्धते । दीर्घमित्यधिकारात् दीर्घमक्षरं वर्धते । उदाहरणानि– **पवस्व देव आ-** (र. द. २२) इति स्वाशिरामर्के **पवस्वदाऽ२इ** । **व आऽयूऽ२३४षाक्** । अत्र महित्रीणाया द्वितीयमक्षरं दीर्घं वर्धते । **यस्ते मदो वरे-** (र. ए. ८४) स्वाशिरामर्के **यस्ते-मदोऽ२** । **वराइणाऽ२३४याः** । अत्र महिद्वितीयं दीर्घं वर्धते । **तवाहꣳसो-** (र. क्षु. १७७) वैराजर्षभे **तवाहꣳसोऽ२** । **मराराऽ२३४णा** । अत्र महिद्वितीयं दीर्घं वर्धते । एवमादिषूदाहारणेषु ॥ १२ ॥

अत्वमीड्ख ॥ १३ ॥

---

1. K[1]A[2] M[1-2] S[1] T महित्रीणामित्यर्थः for सा चेत ... पाद इत्यर्थः
2. A[1-2] M[1-2] TS[1] आज्यदोहादिषु for सुता° ... दिषु (l. 4)
13. T[1] om पवस्व .... इति; My[3] trans. पवस्व देव after °मर्के and om. इति
15. My[3] om. स्वाशिरामर्के
16. L[1] My[3] om. अत्र ... वर्धते; My[3] trans. तवाहंसो after वैराजर्षभे
17. L[1] My[3] om. अत्र .... वर्धते

वि. **महिद्वितीयमन्वयिक्याम्** इत्यनुवर्तते । अकारः प्रतिषेधार्थः । **समुद्रो वाचमीङ्खय** (र. क्षु. २००) इत्यत्र महित्वीणाद्वितीयस्य दीर्घाक्षरस्य वृद्धिप्राप्तस्य अरिष्टे वृद्धिप्रतिषेधः ॥ १३ ॥

भा. अकारः वृद्धिप्रतिषेधार्थः । **समुद्रो वाचमीङ्खय** (र. क्षु. २००) इत्यरिष्टे महित्वीणाद्वितीयस्य दीर्घस्य वृद्धिप्राप्तस्य वृद्धिप्रतिषेधः ॥ १३ ॥

दी. अकारः प्रतिषेधार्थः । **हाह** । **होइया** । **सूता**[४ ५] (र. क्षु. २००) इत्य**रिष्टे** महित्वीणाया द्वितीयाक्षरस्य दीर्घस्य वृद्धिप्राप्तस्य वृद्धिप्रतिषेधः । तृतीयायां **सामू**[४ ५] । **द्रोवाऽ२**[१र] । **चमीङ्खाऽ२३४याः**[३२र ३ ५] । अत्र महीद्वितीयाक्षरं दीर्घं न वृद्धम् ॥ १३ ॥

हं गि यँ मि मादि मघो पारिष्टे रायि भृ थि ॥ १४ ॥

वि. अधिकारः पूर्ववत् । महित्वीणाद्वितीयं ह्रस्वं वर्धते । **परि स्वानो गिरिष्ठाः** (र. सं. ६९) इत्यत्र **गिरि**-शब्दस्य ह्रस्वस्यापि वृद्धिः । **घृणातपन्तमतिसूर्यम्** (र. क्षु. १७७) इत्यत्र **प**-शब्दस्य । अधिकारवचनात् । **जघ्निर्वृत्रममि** (र. ए. ८४) इत्यत्र **मि**-शब्दस्य । **स्वादिष्ठया मदि**- (र. ए. ७२) इत्यत्र **दि**-शब्दस्य । **पर्षि राधो मघो**- (र. ए. ७२) । **इन्दुरिन्द्राय पवते** (र. क्षु. २००) । अरिष्टे **प**-शब्दस्य । तस्मिन्नेव **सोमस्पती रयीणाम्** (र. क्षु. २००) **र**-शब्दस्य । **हता मखं न भृगव** (र. अ. ९४) **भृ**-शब्दस्य । **अप श्वानं श्नथि** (र. क्षु. १७८) इत्यत्र **थि**-शब्दस्य । स्वाशिरामर्कवैराजर्षभारिष्टाज्यदोहेषु । अरिष्टग्रहणात् वैराजर्षभे **शकुना इव पप्तिम** (र. क्षु. १७७) इत्यत्र वृद्धिः

---

8. L[1]My[3] om. अत्र ... वृद्धम्
11. A[2]TS[1-2]My[1] om. इत्यत्र ... वृद्धिः
12. A[2]TS[1-2]My[1] om. इत्यत्र .... °वचनात् ; A[2]IS[1]S[2]My[1] om. इत्यत्र मिशब्दस्य
13. A[2]TS[1-2]My[1] om. इत्यत्र दिशब्दस्य; A[1]दिशब्दः for दिशब्दस्य and adds: thereafter तस्यामेव स्तोत्रीयायां दिशब्दस्य ह्रस्वस्य वृद्धिः ।
14. A[2]TS[1-2]My[1] om. पशब्दस्य । तस्मिन्
15. A[2]IS[1-2]My[1] om. °णां रशब्दस्य; A[5]T S[1-2]My[1] om. °गव भृशब्दस्य
16. A[2]TS[1-2]My[1] om. थिशब्दस्य; A[1]KM[1-2] °मर्के for °मर्क°

न भवति ॥ १४ ॥

भा. ह्रस्वं महित्रीणाद्वितीयं वर्धते । वक्ष्यमाणेषूदाहरणेषु । **गि-यें-मि-मदि-मघो-पारिष्टे रयि-भृ-थि** । **परि स्वानो गिरिष्ठाः** (र. सं. ६९) इति स्वाशिरामर्के । **घृणा तपन्तमति सूर्यम्** । (र. क्षु. १७७) इति वैराजर्षभे । **जघ्निर्वृत्रममि-** (र. ए. ८४) । **स्वादिष्ठया मदि-** (र. ए. ७२) । **पर्षि राधो मघो-** (र. ए. ७२) । त्रीण्यपि स्वाशिरामर्के । **इन्दुरिन्द्राय पवते सहस्रधारः** (र. क्षु. २००) । **प**-अरिष्टग्रहणात् वैराजर्षभे **शकुना इव पप्तिम** (र. क्षु. १७७) इति **प**-शब्दस्यावृद्धिः । **सोमस्पती रयी-** (र. क्षु. २००) अरिष्टे । **हता मखं न भृ-** (र. अ. ९४) आज्यदोहे । **अप श्वान॰श्नथि** (र. क्षु. १७८) वैराजर्षभे । यथासंख्येनोदाहरणानि ॥ १४ ॥

दी. ह्रस्वं महित्रीणाया द्वितीयमक्षरं वर्धते वक्ष्यमाणेषूदाहरणेषु । **गि** । **यें** । **मि** । **मदि** । **मघो** । **पारिष्टे** । **रयि** । **भृ** । **थि** । **परिस्वानो गिरिष्ठाः** (र. सं. ६९) इति स्वाशिरामर्के । **परिसुवाऽ२** । **नो गाइराऽ२३४इष्ठाः** । अत्र महिद्वितीयं वर्धते । इयाहाउ । **तत्राह॰सोऽ२** (र. क्षु. १७७) इति वैराजर्षभे **घृणातपन्तमतिसूऽ२** । **रियां पाऽ२३४राः** । अत्र **यें**-इति महिद्वितीयं ह्रस्वं वर्धते । **जघ्निर्वृत्रममि-** । **स्वादिष्ठया मदि-** । **पर्षि राधो मघो-** । [इमानि] त्रीण्यपि स्वाशिरामर्के वृद्धानि । **यस्ते मदो** (र. ए. ८४) स्वाशिरामर्के द्वितीयायां **जघ्निर्वृत्राऽ२म्** । **अमाइत्राऽ२३४याम्** । अत्र **मि**-इति महिद्वितीयं ह्रस्वं वर्धते । **स्वादिष्ठयाऽ२** । **मदाइष्ठाऽ२३४या** (र. ए. ७२) अत्र स्वाशिरामर्के **दि**-इति महिद्वितीयं ह्रस्वं वर्धते । अत्रैव तृतीयायां **पर्षिराऽ२** । **धोमाघोऽ२३४नाम्**

---

12. L¹My³ om. अत्र ·· वर्धते
14. L¹My³ om. अत्र ... वर्धते
15: L¹ om. वृद्धानि ···· द्वितीयायां; My³ om. यस्ते ... द्वितीयायां
16· My³ L¹ om. अत्र ... वर्धते
17. L¹My³ om. अत्र ... वर्धते
18. My³L¹ om. अत्रैव

(र. ए. ७२) अत्र म-इति महिद्वितीयं ह्रस्वं वर्धते । हाइ । होइया । सुता (र. क्षु. २००) इत्यरिष्टे द्वितीयतृतीययोः **आइन्दूः । इन्द्राऽ२ । यपावाऽ२३४ताइ । साहा । स्वधाऽ२ । र२पावाऽ२३४ताइ** । अत्र प-इति महिद्वितीये ह्रस्वे वर्धते । अरिष्टग्रहणात् वैराजर्षभे **शकुना इव पप्तिमा** (र. क्षु. १७७) इति प-शब्दस्यावृद्धिः । **सोमस्पतिरयी** (र. क्षु. २००) अरिष्टे **सोमाः । पताऽ२इ । ईरायाऽ२३४णाम्** । अत्र र-इति महिद्वितीयं ह्रस्वं वर्धते । **च्योहम्** । **प्रसुन्वानाऽ२** (र. अ. ९४) इति ऋतनिधनाज्यदोहे **हतामखाऽ२म् । न-भृगाऽ२३४वाः** । अत्र भृ-इति महिद्वितीयं ह्रस्वं वर्धते । **पुरोजिताऽ२इ** (र. क्षु. १७८) इति वैराजर्षभे **अपश्वानाऽ२म् । श्नथाइष्टाऽ२३४ना** । अत्र **थि**-इति महिद्वितीयं ह्रस्वं वर्धते ॥ १४ ॥

त्रिष्टुभि चोतायां शने च द्वितीयचतुर्थस्थम् ॥ १५ ॥

वि. अन्वयिक्यामित्यनुवर्तते । ऊतायां पर्वजातौ द्वितीयचतुर्थस्वरस्थे दीर्घेऽक्षरे त्रिष्टुभि वर्धते अन्वयिक्यां सत्याम् । औशने च ऊतायां द्वितीयचतुर्थस्वरस्थं वर्धते । पृथग्ग्रहणात् अन्वयिक्यामसत्यामपि भवति । ऊत एकाम्परः । **ऊतएकाम्** । उदाहरणं प्रकाव्यायां पार्थवाराहकुत्सरथीयादिषु ॥ १५ ॥

---

1. L¹My³ om. अत्र ... वर्धते
3. L¹My³ om. अत्र ··· वर्धते
5. L¹My³ om. अत्र ... वर्धते
6. My³ om. ऋतनिधन०
7. L¹My³ om. अत्र .... वर्धते
8. L¹My³ om. अत्र ... वर्धते
11. A¹M¹⁻² जागतौ for जातौ
12. M¹⁻² after त्रिष्टुभि add: पच्छन्दसि, and A¹ छन्दः; My³ mo. च
13. A¹⁻²M¹⁻²T सत्याम् for असत्याम्; My³ ऊता । काऽ३स्वरः for ऊत एकाम्परः
14. A¹⁻²m¹⁻² TS¹ om. ०कुत्सरथीय०

भा. त्रिष्टुभि ऊतायां पार्थवाराहकुत्सरथीयादिषु द्वितीयस्वरस्थं चतुर्थस्वरस्थं च दीर्घमक्षरं वर्धते। अधिकारात् त्रिष्टुभि वृषशोणादिषु। औशनस्य पृथग्ग्रहणं प्रतिपादमन्वयिक्यामित्यधिकारात् औशने न प्राप्नोति। एकत्वादूतायाः कृतं पृथग्ग्रहणम् ॥ १५ ॥

दी. ऊतएकाम्। इदमूतापर्व। त्रिष्टुभि च्छन्दसि ऊतायां पर्वणि पार्थ-वाराह-वासिष्ठ-कुत्सरथीयादिषु सामसु। त्रिष्टुभि औशने ऊतायां च द्वितीयस्वरस्थं चतुर्थस्वरस्थं च दीर्घमक्षरं वर्धते। उदाहरणानि। **प्रकाव्यमिति** त्रिष्टुभि पार्थे **माविवक्ती**। **णाअयाह्नः** (ऊ. सं. २२७)। अत्र ऊताया द्वितीयचतुर्थमक्षरं वर्धते। **प्रकाव्यम्** (ऊ. अ. ६५१) इति वाराहे एतदेवोदाहरणम्। **औहोवाहाऽ३होइ**। **इहा**। **वृषाशोणो** (ऊ. द. ४२) इति वासिष्ठे **वीमुतद्याम्**। **शृण्वआजाउ**। अत्र ऊतायाः द्वितीयतुरीयमक्षरं वर्धते। **प्रकाव्यम्** (ऊ. क्षु. ९१५) इति कुत्सस्याधिरथीये **माविवक्ती**। **णाआयह्नः**। **तेनगावाः**। एवमादिषु ऊतायाः द्वितीयचतुर्थमक्षरं वर्धते। त्रिष्टुभि औशने **प्रातू** (ऊ. द. ४) इत्यत्र **वाजमर्षा**। **कावियेना**। ऊताया द्वितीयतुरीयमक्षरं वर्धते। अत्रौशनस्य पृथग्ग्रहणं प्रतिपादमन्वयिक्याधिकारात् औशने न प्राप्नोति। ऊतायाः एकत्वात् पृथग्ग्रहणं कृतम् ॥ १५ ॥

अ-यतीं-युधा-तेदे ॥ १६ ॥

---

1. P after त्रिष्टुभि adds: च and after ऊतायां adds: वर्धतेः V^3 कुत्सस्याधिरथीय for कुत्सरथीय; B^4 om. त्रिष्टुभि .... चतुर्थस्वरस्थं
5. L^1 after औशने adds: च
6. L^1My^3 त्रिष्टुभि पार्थे प्रकावियाम् उशने वब्रुवाणाः माविवक्ति। हाउ २हुप् for प्रकाव्यमिति ... वर्धते
8. s^4 om. औहो .... इहा
9. s^4 रोमदाया for शृण्वआजाउ; L^1My^3. om. अत्र ... वर्धते; My^3 होऽवा। उहुवाऽ३। होवा। प्रकावियाम् for प्रकाव्यम्
10. L^1My^3 कुत्सरथीये for कुत्सस्याधिरथीये; My^3 before माविº adds: वब्रुवाणाः; My^3 om. णाअ ... गावाः
11. L^1 My^3 om. ऊतायाः .... वर्धते; My^3 om. प्रातू इत्यत्र
12. My^3 after ºमर्षा। adds: रक्षमाणाः

वि. अकारः प्रतिषेधे। ऊतायां द्वितीयचतुर्थस्थमित्यनुवर्तते। ऊतायां द्वितीयस्थस्य वृद्धिप्राप्तस्य वृद्धिर्न भवति। **प्रतिधेनुमिवायतीम्** (ऊ. स. ७२६) **गोविन्दुर्द्रप्स आयुधा**। (ऊ. अ. ६५९) **स्वायुधःपवते दे-** (ऊ. स. ७२५)। इत्येषु औशनपार्थज्योतिषेषु उदाहरणानि॥

भा. अकारः प्रतिषेधार्थः। द्वितीयचतुर्थस्य दीर्घस्य ऊतायां वृद्धिप्राप्तस्य प्रतिषेधः। **प्रतिधेनुमिवायतीम्** (ऊ. स. ७२६)। **गोविन्दुर्द्रप्स आयुधा** (ऊ. स. ६५९)। **स्वायुधः पवते दे** (ऊ. स. ७२५)। औशनवासिष्ठवैश्वज्योतिषेषु॥ १६॥

दी. अकारः प्रतिषेधे। ऊतायां द्वितीयस्वरस्थस्य दीर्घस्य वृद्धिप्राप्तस्य वृद्धिप्रतिषेधः। **आबो** (ऊ. स. ७२६) इत्यौशने **प्रतिधेनूम्**। **इवाय**। **तीमुषासाम्**। अत्र **तीम्**-इति ऊतायाः द्वितीयस्वरस्थमक्षरं न वर्धते। **शिशुं जज्ञानम्** (ऊ. अ. ६५९) इति वासिष्ठे **धानिबिभ्रात्**। अत्र **धा**-इति ऊतायाः द्वितीयस्वरस्थमक्षरं न वर्धते। **प्रतुद्रवा** (ऊ. स. ७२५) इति वैश्वज्योतिषे **देवइन्दूः**। अत्र **दे**-इति ऊतायाः द्वितीयस्वरस्थमक्षरं न वर्धते॥ १६॥

स्ये च॥ १७॥

वि. अ-इत्यधिकृत्य। ऊहरहस्ये च ऊतायां द्वितीयचतुर्थस्वरस्थे अक्षरे न वर्धते। **अयं सोम- तिस्रोवाचाज्यदोहा-** (र. अ. ९५; ९६)दिषु॥ १७॥

---

1. S^1M^{1-2} T ऊतायाः for ऊतायां; $A^1M^{1-2}T$. द्वितीयचतुर्थम्, for द्वितीयचतुर्थस्थम्
2. A^1 अवृद्धिः for वृद्धिर्न
3. My^1. ०ज्योतिषादिषु for ०ज्योतिषेषु
7. L^1My^2 ०षेधार्थः for षेधे
8. L^1My^3 om. अत्र ... वर्धते; My^3 after इवायतीम्, adds: प्रतिधूनूम्। इवाय। तीम्
9. My^3 हाइ। उहुवाइ। शिशाऽ३४ओहोवा for शिशुंजज्ञानम्; My^3 गोविन्दुर्द्रप्स आयुधा। दुर्द्रा। प्साऽउइ आयुधानि बिभ्रत् for धनिबिभ्रात्।
10. L^1My^3 om. अत्र .... वर्धते; My^3 after प्रतुद्रवा adds: परिको। शंनिषीदा।
11. My^3 after ०ज्योतिषे adds: स्वायुधः पवते दे। सुवा[यु]धाः। पवते।; L^1My^3 om. अत्र दे इति ... न वर्धते
13. A^1 चतुर्थस्थे, S^1KT द्वितीयचतुर्थस्थे for द्वितीयचतुर्थस्वरस्थे

भा. **रहस्ये** च यदधिकृतं तत् भवति। किं चाधिकृतम्? प्रतिषेधः। तेन रहस्ये च ऊतायां द्वितीयचतुर्थस्य सर्वत्र वृद्धिप्रतिषेधः ॥ १७ ॥

दी. रहस्ये आरण्यके गाने चकारात् यदधिकृतं तद्भवति। किं चाधिकृतम्? वृद्धिप्रतिषेधः। तेन ऊतायां पर्वणि द्वितीयचतुर्थस्वरस्थस्याक्षरस्य सर्वत्र वृद्धिप्रतिषेधः। राजने **तदिदासा**। **भुव**। **नेषुज्येष्ठाम्** (र. सं. ६७)। इत्यादिषु। अत्र **ने-ज्ये**-अक्षरयोरवृद्धिः ॥ १७ ॥

अ-तये ॥ १८ ॥

वि. पूर्वसूत्रेणावृद्धिप्राप्तस्य **तये**-शब्दस्यावृद्धिप्रतिषेधः। **महऽपुरूणि सातये** (र. अ. ९५) इत्यत्र **तये**-शब्दो वर्धत इत्यर्थः ॥ १८ ॥

भा. सोऽयमपवादः। **महऽपुरूणि सातये** इत्यत्र **ये**-शब्दस्य वृद्धिरेव ॥ १८ ॥

दी. अकारः प्रतिषेधार्थः। **महऽपुरूणि सातये** इत्यत्र **तये**-शब्दस्य वृद्धिरेव। **अयऽसोम** (र. अ. ९५) इती**निधने** **आज्यदोहे** **याइवस्नी**। अत्र **या**-इति द्वितीयस्वरस्याक्षरस्य वृद्धिः ॥ १८ ॥

वकः सर्वत्र ॥ १९ ॥

---

4. L^1My^3 °चतुर्थस्य for °चतुर्थस्वरस्थस्य।
5. S^4 om. इत्यादिषु; L^1My^3 om. अत्र ... अवृद्धिः
6. S^4 after अवृद्धिः adds: एवमादीनि।
8. T. °सूत्रस्य or °सूत्रेण।
9. $A^1M^{1-2}T$. om. इत्यत्र तये; S^1 om. इत्यत्र
11. S^4 °षेधे for °षेधार्थः
12. S^4 My^3 अयंसोमाः। इन्द्र तु। भ्यंसुन्वायि for अय सोमः; S^4 निधानाज्य° for °निधने आज्य° L^1My^3 om. अत्र या ... वृद्धिः; My^2 before याइ° adds:- महः पुरू। णीऽ३सात।
13. S^4. अवृद्धिः for वृद्धिः
14. My^1 A^1 K^1M^{1-2} A^2TS^{1-2} after वकः om. सर्वत्र

वि. **वक-शब्दो** वर्धते। दीर्घाधिकारात् वृद्धिः (म् ?) न प्राप्नोति। अतो व-कारस्य वृद्धिर्निपात्यते। **शुचिबन्धुः पावकः** (ऊ. सं. २२७) इति पार्थादिषु ॥ १९॥

भा. **शुचिबन्धुः पावक** (सा. ५२४; ११११६) इत्यत्र **व-कारस्य** सर्वत्र वृद्धिः ॥

दी. **शुचिबन्धुः पावक** (सा. ५२४; ११११६) इत्यत्र **व-कारस्य** सर्वत्र योनौ ऊहे च वृद्धिः। ऊतायामेव। **हाउहाउहुप्**। **प्रकावियाम्** (२ १ र) (ऊ. अ. ६५१) इति वाराहे **धुःपवाकाः** (२ ३ ४ ५)। अत्र चतुर्थस्वरस्थस्य व-कारस्य वृद्धिः ॥ १९ ॥

अन्त्यम् ॥ २० ॥

वि. ऊतायामन्त्यं सर्वत्र वर्धते। ह्रस्वं दीर्घं च **सर्व-शब्दात्** ॥ २० ॥

भा. ऊतायां सर्वत्र **अन्त्यम्** अक्षरं वर्धते। ह्रस्वं दीर्घं च **सर्व-शब्दात्** ॥ २० ॥

दी. **सर्वत्र-शब्दः** उभयत्र संबध्यते। ऊतायां सर्वत्र **अन्त्यम्** अक्षरं वर्धते। ह्रस्वं दीर्घं च। **सर्व-शब्दात्**। उदाहरणम्– **ऊतएकाम्**। अत्र **कामि**त्यकारस्य वृद्धिः। इत्यादिषु ॥ २० ॥

अपुरन्धिं-प्रशस्तिम् ॥ २१ ॥

वि. पूर्वसूत्रप्राप्तेरपवादः। **पुरन्धि-प्रशस्तिम्-शब्दौ** न वर्धेते। **वर्धया वाचं जनया पुरंधिम्** (र. अ. ९६) **यां ते वसिष्ठो अर्चति प्रशस्तिम्** (र. क्षु. १६७) [इति]

---

1. $A^{1}M^{1-2}$ अवृद्धिप्राप्तस्य for वृद्धि .... वकारस्य
2. T. after इति adds: अत्र; My^{1} $KAM^{1-2}S^{1-2}$ om. इति
6. $My^{3}L^{1}$ अत्र ··· वृद्धिः
7. My^{1} $A^{1-2}KM^{1-2}TS^{1-2}$ before अन्त्यम्। add: सर्वत्र
8. S^{2} before ऊतायम् adds: ऊतायामित्यनुवर्तते
9. $A^{1}M^{1-2}My^{1}$ $S^{1}K$ सर्वत्र for सर्व
10. $Pv^{2}L^{2}$ before उतायाम्। add: सर्वत्रान्त्यम्।
11. S^{4} सर्वत्र- for सर्व-; L^{1} om. ऊत ... वृद्धिः; My^{3} om. अत्र ... वृद्धिः
14. $A^{1}M^{1-2}$ सूत्रस्य प्राप्ते for सूत्रप्राप्तेर् $KA^{2}M^{1-2}$०शब्दो न वर्धते for ०शब्दौ न वर्धेते

आज्यदोह-वैराजर्षभयोः ॥ २१ ॥

भा. अकारः प्रतिषेधार्थः । ऊतायामन्त्यस्याक्षरस्य वृद्धिप्रतिषेधः । **वर्धया वाचं जनया पुरंधिम्- आज्यदोहे । यां ते वसिष्ठो अर्चति प्रशस्तिम्- वैराजर्षभे** ॥ १२ ॥

दी. अकारः प्रतिषेधार्थः । ऊतायां पर्वणि अन्त्यस्याक्षरस्य वृद्धिप्रतिषेधः । **तिस्रो-वाचाः** (र. अ. ९६) इति **आज्यदोहे यापुरन्धिम्** । अत्र **न्धिम्**-इत्यन्त्याक्षरस्यावृद्धिः । **पिबासोमाम्** (र. क्षु. १६७) इति **वैराजर्षभे तिप्रशस्तिम्** । अत्र **स्तिम्**-इत्यन्त्यस्याक्षरस्यावृद्धिः ॥ २१ ॥

आन्धादिः श्मे ॥ २२ ॥

वि. दीर्घाधिकारो निवृत्तः । **पार्थुरश्मे आन्धादिर्वर्धते । असाविदेवंगोर-ऋजीकाऽ३माऽन्धाऽ३ः** (ग्रा. गे. ८. ९. ३१३. १) । इत्यान्धाः । आन्धायामा-द्यक्षरमित्यर्थः ॥ २२ ॥

भा. पार्थुरश्मे **आन्धाया आदिः** वर्धते **इन्द्रोमदा-** (र. द. १३) **स्वादोरित्थयोः** (र. अ. ९८) । दीर्घमित्यधिकारो निवृत्तः ॥ २२ ॥

दी. **आन्धाया** मध्यमोऽभ्यासः । **आन्धा** इत्यान्धापर्व । **पार्थुरश्मे आन्धायाः आदिर्वर्धते** । उदाहरणम्– **एईन्द्रा** (र. द. १३) । **एस्वादोः** (र. अ. ९८) इत्यादिषु । अत्र दीर्घमित्यधिकारो निवृत्तः ॥ २२ ॥

अ-घृष्णास्मान्मघोवृष्णावस्वीश्च ॥ २३ ॥

वि. पूर्वसूत्रस्यापवादः । **घृष्णास्मान्मघोर्वृष्णावस्वीश्च** इत्येते न वर्धन्ते । **घृष्णवे**

---

2. v² ०षेधे for षेधार्थः
5. My³ after ०दोहे adds: वर्द्धया वाचं जनया पुरंधि; L¹ om. अत्र ... वृद्धिः
6. L¹My³ before पिबा adds: इया हाउ; My³ after ०र्षभे adds: यांते वशिष्ठे अर्चेति प्रशस्तिम् । ; L¹ My² om. अत्र ... ०वृद्धिः
18. A¹M¹⁻² om. च

धीयते धनम् (र. द. १३)। **अस्मा॰इन्द्रवसौ दधः** (र. द. १३) **मधो×पिबन्ति गौर्याः** (र. अ. ९८)। **वृष्णा मदन्ति शोभया** (र. अ. ९८)। **वस्वीरनुस्वरा** (र. अ. ९८) पञ्चैतानि उदाहरणानि ॥ २३ ॥

भा. अकारः प्रतिषेधार्थः। **पार्थुरश्मे** आन्धादेर्वृद्धिप्रतिषेधः वक्ष्यमाणेषूदाहरणेषु। **धृष्णवे**। **अस्मा॰इन्द्र**। **मधोः पिबन्ति**। **वृष्णामदन्ति**। **वस्वीरनु** ॥ २३ ॥

दी. अकारः प्रतिषेधार्थः। **पार्थुरश्मे**। **चकारात्** आन्धाया आदेर्वृद्धिप्रतिषेधः वक्ष्यमाणेषूदाहरणेषु। **एईन्द्रा** (र. द. १३)। इति **पार्थुरश्मे** तृतीयायाम्। **एधृष्णा**। अत्र धृ-कारस्यावृद्धिः। **एअस्माँ**। अत्र अकारस्यावृद्धिः। **एस्वादोः** (र. अ. ९८) इति पार्थुरश्मे। **एमधोः**। अत्र म-कारस्यावृद्धिः। **एवृष्णा**। अत्र वृ-कारस्यावृद्धिः। **एवस्वीः**। अत्र व-कारस्यावृद्धिः ॥ २३ ॥

रवे घ॰षष्ठम् ॥ २४ ॥

वि. भा. **रौरवे** प्रस्तावे **दीर्घं षष्ठमक्षरं** वर्धते **पुनानस्सोमादिषु** ॥ २४ ॥

दी. **रौरवे** प्रस्तावे **दीर्घं** षष्ठमक्षरं वर्धते। **पुनानस्सोमाऽ३धाराऽ२३४या** (ऊ. द. २) इत्यादिषु ॥ २४ ॥

अ-नोऽत्र ॥ २५ ॥

---

2. $A^1KM^{1-2}TS^2$ om. शोभया; A^1M^{1-2} om. स्वरा
4. V^2 आन्धादि० for आन्धादेर्; V^2 om. उदाहरणेषु;
6. S^4 ०षेधे for ०षेधार्थः
7. L^1MY^3 om. एईन्द्रा .... तृतीयायाम्
8. L^1MY^2 om. अत्र .... ०वृद्धिः; L^1MY^3 om. एस्वादोः इति पार्थुरश्मे।
12. $A^{1-2}KM^{1-2}TS^{1-2}MY^1$ om. प्रस्तावे; A^1M^{1-2} trans. दीर्घं after षष्ठम्; $A^{1-2}KM^{1-2}TS^{1-2}$. पुनानादिषु for पुनानस्सोमादिषु
14. S^4 अत्र धाकारस्य षष्ठमक्षरस्य दीर्घस्य वृद्धिः for इत्यादिषु

वि. पूर्वसूत्रेण वृद्धिप्राप्तस्य **नोऽव** इत्येतस्य [वृद्धि]प्रतिषेधः । **प्र स्म वाजेषु नोऽव** (ऊ. ए. ४१०) इत्युदाहरणम् ॥ २५ ॥

भा. **प्र स्म वाजेषु नोऽव** (ऊ. ए. ४१०) इति **रौरवे** एव षष्ठाक्षरस्य वृद्धिप्रतिषेधः ॥ २५ ॥

दी. रौरवे दीर्घस्य षष्ठाक्षरस्य वृद्धिप्रतिषेधः । उदाहरणम् । **पाहि नो अग्न** (ऊ. ए. ४१०) इति **रौरवे** तृतीयायां
२ र र १र ५
प्रस्मवाजेषूऽ३नोआऽ२३४वा । अत्र **नो**-कारस्य षष्ठाक्षरस्य दीर्घस्यावृद्धिः ॥ २५ ॥

अ-भरादिर्यौधाजये सर्वम् ॥ २६ ॥

वि. भकाररेफादीन् वर्जयित्वा **यौधाजये षष्ठं सर्वं** वर्धते । **सर्व**-शब्दात् दीर्घं ह्रस्वं च । **पुनाना**दिषु । अभरादीति किम् ? **उत्सो देवो** (ऊ. द. ३) **पाहि चतसृभिः** (ऊ. अ. ६१८) इत्येवमादिषु । वृद्ध्यभावात् ॥ २६ ॥

भा. सोऽयमपवादपूर्वको विधिः । भकाररेफौ मुक्त्वा **यौधाजये** अन्यत्सर्वं ह्रस्वं दीर्घं **वा** षष्ठमक्षरं वर्धते । **अदब्धः सुरभि-** (ऊ. अ. ६१८) **पाहि चतसृभिः** (ऊ. ए. ४१३) **उत्सो देवो हिर॰** (ऊ. द. ३) एतेषु वृद्धिप्रतिषेधः । भकाररेफादित्वात् ॥ २६ ॥

दी. अकारः प्रतिषेधार्थः । यौधाजये भकारादिः रकारादिः [च] षष्ठमक्षरं न

---

1. T नोवा for नोऽवा; S[2] अस्य for एतस्य
3. PLB[4] एषः for एव
5. S[4] before रौरवे adds: अकारः प्रतिषेधे ।; L गौरव॰ for रौरवे; L[1]MY[3] om. पाहि ... तृतीयायां
6. L[1]MY[3] om. अत्र ... ॰वृद्धिः
9. A[1]M[1-2] om. सर्वं; S[2] after षष्ठं adds: अक्षरं; A[2] सर्वत्र for सर्वं
12. A[3]L[2]B[4]. om. सोऽयम् ... विधिः
13. V[2] om. वा
14. PV[2] after हिर॰ add. एतान्युदाहरणानि
15. S[4] ॰षेधे for षेधार्थः; L[1]MY[3] om. षष्ठमक्षरं

वर्धते । अन्यत् सर्वं ह्रस्वं दीर्घं वा षष्ठमक्षरं वर्धते । **पराऽ३१इ** । (ऊ. अ. ६१८) इति यौधाजये तृतीयायां **र-भिन्ताऽ२३४राः** । **पाहाऽ३१इ** (ऊ. ए. ४१३) इति यौधाजये द्वितीयायां **सु** । **मिर्वाऽ२३४साउ** । अत्र भ-कारादित्वान्न वृद्धिः । **पुनाऽ३१** (ऊ. द. ३) इति यौधाजये द्वितीयायां **हि** । **रण्याऽ२३४याः** । अत्र **र**-कारादित्वान्न वृद्धिः । अन्यत्रोदाहरणम् । **पराऽ३१इ** । **धाऽ३इ१र** । **ति** । **त१आऽ२३४इहाइ** । (ऊ. ए. ५१६) अत्र **ताँ**-इति षष्ठाक्षरस्य तकारादित्वात् वृद्धिः । एवमादीनि ॥ २६ ॥

अ-रारण ॥ २७ ॥

वि. पूर्वसूत्रेणावृद्धिप्राप्तस्य रारण-शब्दस्य वृद्धिर्विधीयते । **तवाहं सोम रारण-** (ऊ. ए. ५१६) [इति] उदाहरणम् ॥ २७ ॥

मा. सोऽयमपवादः । **[तवाहं सोम] रारण** (ऊ. ए. ५१६) इति **र**-कारादित्वात् प्रतिषेधस्य प्रतिप्रसवः ॥ २७ ॥

दी. अकारः प्रतिषेधार्थः । अयं रकारादेरपवादः । **तवाऽ३१** । **हाऽ३१सो** । **म** । **राराऽ२३४णा** (ऊ. ए. ५१६) । अत्र **रा**--कारस्य षष्ठाक्षरस्य वृद्धिः । रकारादित्वात्

---

1. L¹My³ अदा३२ । ध्या३सु । र । भिंता२३४ राः । पहा३१ । इचा३त । सूमिर्वां २३४साउ for परा ... माउ (1. 3)
2. S⁴ after भिन्ताऽ२३४राः adds: अत्र भिकारस्य षष्ठमक्षरस्यात्रृद्धिः ।
3. S⁴ मिकारस्य षष्ठमक्षरस्यात्रृद्धिः । इति भकारादिरवृद्धिः for भकादित्वान्न वृद्धिः ।; Y¹ उत्सो३१ दे३वो for पुनाऽ३१ इति यौधाजये
5. L¹om. अन्यत्रोदाहरणम्
6. L¹ om. ताम् इति षष्ठाक्षरस्य; S⁴ om. तकरादित्वात्; L¹ om. एवमादीनि
8. S² before तवाहं adds: पूर्वसूत्रस्यापवादः
10. A³L² om. सोऽयमपवादः; Pv²B⁴ सोऽयमपवादपूर्वको विधिः भकाररेफौ मुक्त्वा । अरारण रकारादित्वात् for सोऽयमप ... रकारादित्वात्; the passage सोऽयम् .... मुक्त्वा (p. 147, l. 12.) was wrongly inserted here by P²V⁴ from the commentary of the preceding sutra
12. S⁴ ०षेधे for ०षेधार्थः
13. L¹My³ om. राकारस्य; L¹ tran. वृद्धिः before षष्ठ०

प्रतिषेधस्य प्रतिप्रसवः ॥ २७ ॥

स्तावोपान्त्यं देव्ये दा-खी-सो ॥ २८ ॥

वि. **वामदेव्ये प्रस्तावोपान्त्यस्य** पूर्वमक्षरं **दा । खी । सो** वर्धते । उदाहरणानि– **कस्त्वा सत्यो मदानाम्** (ऊ. द. ५)। **अभी षु णः सखीनाम्** (ऊ. द. ५) **अनु हि त्वा सुतं सो-** (ऊ. सं. ३५०) ॥ २८ ॥

भा. **प्रस्तावोपान्त्यमक्षरं वामदेव्ये** वर्धते **दा । खी । सो** । एतल्लक्षणं यावदुक्तमेव । **कस्त्वा सत्यो मदा-** (ऊ. द. ५) । **अभी षु णः सखी-** (ऊ. द. ५) । **अनु हि त्वा सुतꣳसो-** (ऊ. सं. ३५०) ॥ २८ ॥

दी. वामदेव्ये **प्रस्तावोपान्त्यमक्षरं** वर्धते । अन्त्याक्षरस्य पूर्वमक्षरमुपान्त्यम् । **दा । खी । सो । काऽ५यां** (ऊ. द. ५) इति **वामदेव्ये** द्वितीयायां **सत्योऽ३माऽ३-दानाम्** । अत्र **दा**-कारस्य उपान्त्यस्य वृद्धिः । तृतीयायाम् **आऽ३भी । षूणाऽ३स्साऽ३खी-नाम्** । अत्र **खी**-कारस्य उपान्त्यस्य वृद्धिः । **पाऽ५रि । ऊषूऽ३** (ऊ. सं. ३५०) इति वामदेव्ये तृतीयायां **हित्वाऽ३सूऽ३तँसोमा** । अत्र **सो**-कारस्य उपान्त्यस्य वृद्धिः । एतल्लक्षणं यावदुक्तमेव ॥ २८ ॥

हो हव्ये ॥ २९ ॥

---

2. & 6. L^2 ०सौ for ०सो

3. KTS^{1-2} प्रस्तावान्त्यस्य for प्रस्तावोपान्त्यस्य; $A^{1-2}M^{1-2}$ वर्धन्ते for वर्धते; My^3 om. उदाहरणानि

4. S^2 before कस्त्वा adds: अन्त्यस्य समीपमुपान्त्यम् ;

10. L^1My^3 om. कायां ··· द्वितीयायां; L^1My^3 before ०सत्यो adds: काऽ५स्त्वा

11. My^3L^1 om. अत्र ···· वृद्धिः; L^1My^3 om. तृतीयायाम्

12. L^1My^3 om. अत्र ... वृद्धिः; L^1My^2 om. पा४रि ... तृतीयायां

13. L^1My^3 om. अत्र ··· वृद्धिः

वि. & भा. **वैतहव्ये** प्रस्तावोपान्त्यो **हो**-शब्दो वर्धते । **इन्द्र इन्नो महोनाम्** (ऊ. द. १८) इत्यत्र ॥ २९ ॥

दी. **पान्तमा वो अन्धस** (ऊ. द. १८) इति **वैतहव्ये** तृतीयायां प्रस्तावोपान्त्यो
३　　४　२　४ ५
हो-शब्द एव वर्धते । **आऽ५इन्द्रइत्** । **नोऽ३माऽ३होनाम्** । अत्र **हो**-कारस्य उपान्त्यस्य वृद्धिः ॥ २९ ॥

णी जनित्रे ॥ ३० ॥

वि. **जनित्रे** पूर्वे प्रस्तावोपान्त्यं **णी** वर्धते । **यो राजा चर्षणीनाम्** (ऊ. स. ७१२) इत्यत्र ॥ ३० ॥

भा. पूर्वे **जनित्रे** **णी**-शब्दस्य प्रस्तावोपान्त्यस्य वृद्धिः । त्रिष्वप्येतेषु योनिवद्भावादवृद्धिप्राप्तानां वृद्धिरुच्यते ॥ ३० ॥

दी. **यो राजा** (ऊ. ६. ७१२) इति पूर्वे **जनित्रे** **णी**-शब्दस्य प्रस्तावोपान्त्यस्य
५रर २　४५ ४ ५
वृद्धिः । **योराजाऽ३चर्षणाइनाम्** । अत्र **णी**कारस्य प्रस्तावोपान्त्यस्य वृद्धिः । वामदेव्य-वैतहव्यजनित्रेषु योनिवद्भावादवृद्धिप्राप्तानां वृद्धिरुच्यते ॥ ३० ॥

श्टृङ्गे ॥ ३१ ॥

---

1. $A^{2-1}KM^{1-2}TS^{1-2}My^{1}$ ०पान्त्यं for पान्त्यो; S^{1} before वैतहव्ये adds: प्रस्तोवोपान्त्य-मित्यनुवर्तते; $My^{1}A^{1}KM^{1-2}T$ om. ०शब्दो; $A^{2}S^{1-2}$ after हो- ins. इत्ययं; B^{4} after ०शब्दो adds: एव; $PA^{3}L^{2}V^{2}B^{4}$ om. ०नाम् इत्यत्र.

3. L^{1} पाऽ५न्तम् for पान्तमा वो अन्धसः

4. $L^{1}My^{3}$ om. अत्र ··· वृद्धिः

7. $A^{1}M^{1-2}$ om. जनित्रे; M^{2} (अ)न्त्यं for पान्त्यं; $A^{2}S^{2}$ णी-शब्दो for णी; My^{3} om. णी

9. V^{3} पूर्व० for पूर्वे

10. PB^{4} वृद्धिप्रा० L वृद्धिमप्रा० for अवृद्धिप्रा०

11. S^{4}पूर्व० for पूर्वे

12. $L^{1}My^{3}$ om. अत्र ... वृद्धिः; S^{4} om. वामदेव्य ....वृद्धिरुच्यते

वि. **गौशृङ्गे** सर्वासु स्तोत्रीयासु प्रस्तावोपान्त्यं वर्धते । **सोमःपुनानो असदच्चमूषु** इत्यत्र **आजागृव्याम्** (ऊ. क्षु. ९१९) । द्वितीयतृतीययोश्च ॥ ३१ ॥

भा. **गौशृङ्गे** प्रस्तावोपान्त्यं वर्धते ॥ ३१ ॥

दी. गौशृङ्गे प्रस्तावोपान्त्यं वर्धते । **आजागृविर्विप्रः** (ऊ. क्षु. ९१९) इति गौशृङ्गे **तीनाःसोमः** । **पूना** । अत्र **पू**-कारस्य प्रस्तावोपान्त्यस्य वृद्धिः । द्वितीयायां **प्रारो** । तृतीयायां **हूवाःआ** । एवं प्रस्तावोपान्त्यस्य वृद्धिः ॥ ३१ ॥

लेये द्विपदासु ॥ ३२ ॥

वि. **द्विपदासु कालेये** प्रस्तावोपान्त्यं वर्धते **एषब्रह्मायाम्** (ऊ. प्रा. ८०७) ॥

भा. **कालेये एषब्रह्मायां** (ऊ. प्रा. ८०७) प्रस्तावोपान्त्यस्य वृद्धिः ॥ ३२ ॥

दी. **एष ब्रह्मा** (ऊ. प्रा. ८०७) इति **द्विपदासु कालेये** प्रस्तावोपान्त्यस्य वृद्धिः । **एषाऽ३ ब्राह्मा** । अत्र **ब्रा**-कारस्य प्रस्तावोपान्त्यस्य वृद्धिः । द्वितीयायां **तुवाऽ३माइच्छा** । तृतीयायां **विसूऽ३ तायाः** । एवं प्रस्तावोपान्त्यस्य वृद्धिः ॥ ३२ ॥

ज्ञीये दान्त्ये ॥ ३३ ॥

वि. **यज्ञायज्ञीये पादान्त्ये** अक्षरे परतः प्रस्तावोपान्त्यं वर्धते । **यज्ञादयः** । पादान्त्ये इति किम्? **समिद्धमग्निम्** (ऊ. ए. ४२५) इत्यादिर्न वर्धते ॥ ३३ ॥

---

1. My¹KA²T¹S¹ om. स्तोत्रीयासु; KMy¹ om. सोमः पुनानो असदच्चमूषु
2. A¹⁻²M¹⁻²TS¹ आजागृविरित्यत्र for आजागृव्याम्; KMy¹ om. द्वितीयतृतीययोश्च
4. L¹My³ आजागृविर्विप्रः ऋताऽम् माऽ२३४ तीनां सोमः पुना for अजागृवि ... वृद्धिः
9. PA³ स्तावोपान्त्य° for प्रस्तावोपान्त्यस्य; V²PL²A³ स्तावो° for प्रस्तावो°
11. L¹My³ om. अत्र ... प्रस्तावोपान्त्यस्य .... एवं .... वृद्धिः (l. 12)
13. My¹A¹⁻²M¹⁻²TV² दान्ते for दान्त्ये
14. S² before यज्ञा adds: प्रस्तावोपान्त्यमित्यनुवर्तते; A¹⁻²M¹⁻² पदान्ते, T पादान्ते for पादान्त्ये;
15. A¹M¹⁻² आदयः, A² अत्र मि for आदिः

भा. यज्ञायज्ञीये पादान्त्येऽक्षरे प्रत्यये प्रस्तावोपान्त्यमक्षरं वर्धते । यथा **यज्ञा-यज्ञा वः-** (ऊ. द. १४) **परि त्यं हर्यतम्-** (ऊ. अ. ६६१) **अयं पूषा-** (ऊ. अ. ५८३) [इति-] आदिषु । पादमध्ये तु प्रत्यये न वर्धते । यथा **अभि प्रियाणि** (ऊ. अ. ६२८) **वृषा मती-** (ऊ. अ. ६३०) **आ जागृविः** (ऊ. स. ७५१) इत्येवमादिषु ॥ ३३ ॥

दी. यज्ञायज्ञीये पादान्त्ये अक्षरे परे सति प्रस्तावोपान्त्यमक्षरं वर्धते । **यज्ञाऽ-५य । ज्ञावोऽ३ग्नायाइ** (ऊ. द. १४) इत्यादिषु । पादमध्ये तु अपादान्त्ये अक्षरे परे सति प्रस्तावोपान्त्यमक्षरं न वर्धते । यथा **अभाऽ५इप्रि । याऽ३णाऽ३इपवताइ** (ऊ. अ. ६२८) । **वृषाऽ५ म । ताऽ३इनाऽ३म्पवताइ** (ऊ. अ. ६३०) । **आजाऽ५ गृ । वाऽ३इवोऽ३इप्रऋताम्** (ऊ. स. ७५१) । इत्येवमादिषु ॥ ३३ ॥

सनाद्वितीयं वैरूपे ॥ ३४ ॥

वि. वैरूपे स न इन्द्राय यज्यवे (ऊ. सं. २५४) इत्यत्र द्वितीयमक्षरं वर्धते । योनिवद्भावादप्राप्तम् ॥ ३४ ॥

भा. गायत्रे साम्नि **वैरूपे स न इन्द्रा-** (ऊ. सं. २५४) इत्यत्र द्वितीयस्याक्षरस्य वृद्धिः । योनिवद्भावात् अवृद्धिप्राप्तेर्वचनम् ॥ ३४ ॥

दी. उच्चातेऽ२३४जा (ऊ. सं २५४) इति **वैरूपे स न इन्द्रायेत्यत्र** प्रस्तावे द्वितीयस्याक्षरस्य वृद्धिः । **सनाआऽ२३४इन्द्रा ।** अत्र योनिवद्भावादवृद्धिप्राप्तौ वचनम् ॥

---

1. PL[2] पदान्त्यम् for पादन्त्ये
5. L[1] om. यज्ञा ··· सति
6. S[4] अपदान्त्ये for अपादान्त्ये
7. S[4] after पवताइ adds: व इत्युपान्त्यमक्षरं न वर्धते
8. S[4] after पवताइ adds: अपदान्त्यमुपान्त्यमक्षरं न वर्धते
9. S[4] after ऋताम् adds: अपदान्त्यमुपान्त्यमक्षरं न वर्धते
11. A[1-2] KTS[1] om. वैरूपे
13. PL[2] AV[2] गायत्री for गायत्रे; V[2] om. साम्नि
14. LB[4] अप्राप्ते for °प्राप्तेः
16. S[4] द्वितीयाक्षरस्य for द्वितीयस्याक्षरस्य

प्राह्वां घं ह्वं चासंयोगे ॥ ३५ ॥

वि. द्वितीयमित्यनुवर्तते । **प्रहूयसायां** द्वितीयमक्षरं **दीर्घं ह्रस्वं च असंयोगे** प्रत्यये वर्धते । **गोपीथा** । **या** । **प्राहूयाऽ२३४साइ** (ग्रा. गे. १. २. १६. १) । बृहदाग्नेयैडसौपर्णपौष्कलनौधसादिषु ॥ ३५ ॥

भा. प्रहूयसायां द्वितीयमक्षरं वर्धते । **दीर्घं ह्रस्वं च** यत्रासंयोगपरम्- ह्रस्वस्यैतद्विशेषणम् **असंयोग** इति परत्वात् । उदाहरणानि बृहदाग्नेय-ऐडसौपर्ण-पौष्कल-नौधसादिषु । श्येतनौधसे च । अक्षरव्याख्यानमेतत् ॥ ३५ ॥

दी. **प्राहूयाऽ२३४साइ** (ग्रा. गे. १. २. १६. १) इति प्रहूयसापर्व । **प्राह्वां** प्रहूयसायां पर्वणि द्वितीयमक्षरं दीर्घं वर्धते । **ह्रस्वं च** वर्धते **असंयोगे** अक्षरे परे सति । **औहोइत्वामिद्धिहवामहाऽ३ए** (र. द. ५) इति **बृहत्साम्नि स्काराऽ२३४वाः** । अत्र का-इति द्वितीयमक्षरं दीर्घं वर्धते । **उद्धेदभ्योवा** (ग्रा. गे. ३. २. १२५. १) इति **ऐडसौपर्णे श्रुतामाऽ२३४घाम्** । अत्र **ता**-इति द्वितीयमक्ष दिर्घं वर्धते । **इन्द्रमाऽ२३च्छसु** (ऊ. द. १०) इति **पौष्कले तूहाराऽ२३४याः** । अत्र **हा**-इति द्वितीयमक्षरं ह्रस्वं वर्धते । एवं **नौधसादिषु** । **त्वँहिक्षैतवद्यशः** (ग्रा. गे. २. ९. ८४. १) इति **बृहदाग्नेये नापत्याऽ२३४साइ** । अत्र संयोगपरत्वात् द्वितीयस्याक्षरस्य न वृद्धिः ॥ ३५ ॥

अ-वकया ॥ ३६ ॥

---

1. A[1]M[1-2] प्रहूसायां घं ह्रस्वं, for प्र ह्वां घं ह्वं; A[2]T प्रह्वा for प्राह्वां
2. A[1]M[1-2] प्रहूयसायाः for प्रहूसायां; A[1-2]M[1-2] TS[1] ह्रस्वं दीर्घं for दीर्घं ह्रस्वं
5. V[2]B[4] प्रहूयासा, L[2] प्रहूयसां for प्रहूयसायां; P यत्तत् for यत्र; V[2] ह्रस्वं दीर्घमक्षरं वर्धते । ह्रस्वं चासंयोगपरम् for दीर्घं ह्रस्वं ... असंयोगे,
6. B[4] असंयोगपरत्वात् for असंयोग इति परत्वात् ; PV[2] om. परत्वात् ; B[4] om. उदाहरणानि; P; om. नौधस.
7. A[3] ०व्याख्यातम् for व्याख्यानम् ; V[2] नौधसम् for नौधसे and om. च अक्षरव्याख्यानमेतत्
9. L[1]MY[3] after दीर्घं om. वर्धते ।
10. & 12. & 13. L[1]MY[2] om. अत्र .... वर्धते
15. L[1]My[3] om. अक्षरस्य , S[4] द्वितीया० for द्वितीयस्या०

वि. अकारः प्रतिषेधे । उत्सर्गप्राप्तस्य ह्रस्वस्यासंयोगपरत्वात् वृद्धिप्राप्तस्यापवादः । बृहदाग्नेये पुरोजित्यां **यो धारया पावकया** (ऊ. सं. ३१९) इत्युदाहरणम् । **पावकाऽ२-३४या आओऽ२३४हो । इयाहाइ** ॥ ३६ ॥

भा. उत्सर्गप्राप्तस्य ह्रस्वस्यासंयोगपरत्वात् वृद्धिप्राप्तस्यापवादः ॥ ३६ ॥

दी. अकारः प्रतिषेधार्थः । **पुरोजितीवो अन्धसः** (ऊ. सं. ३१९) इति बृहदाग्नेये द्वितीयायां प्राह्वयसायां पर्वणि **पावकाऽ२३४या** । अत्र व-कारस्य द्वितीयाक्षरस्य वृद्धि-प्रतिषेधः ॥ ३६ ॥

भिस्सु शत्रवे धृष्णु सोम ॥ ३७ ॥

वि. & भा. प्रह्वयसायामिदमेव । ह्रस्वस्य संयोगपरत्वात् अवृद्धिप्राप्तस्य वृद्धिरुच्यते । **अध्वर्यो अद्रिभिस्सु** (ऊ. अ. ६४५) ऐडसौपर्णे । **भियसमाधेहि शत्रवे** (ऊ. प्रा. ८१४) पौष्कले । **धृष्णुया** (ऊ. क्षु. ८६०) श्यैतनौधसे । **इद्राय्सोम स्वादुः परिप्रधन्वायां** (ऊ. प्रा. ८१८) पौष्कले ॥ ३७ ॥

दी. भिस्सु । शत्रवे । धृष्णु । सोम । एतेषु प्राह्वयसायां ह्रस्वस्य संयोगपरत्वात् अवृद्धिप्राप्तस्य वृद्धिरुच्यते । **अध्वर्यओवा** (ऊ. अ. ६४५) इति **ऐडसौपर्णे** । **द्राइभा-इस्सुऽ२३४ताम्** । अत्र **भाइः**-कारस्य द्वितीयाक्षरस्य संयोगे परे वृद्धिः । **उपशीऽ२क्षाप** (ऊ. प्रा. ८१४) इति पौष्कले **हीशात्राऽ२३४वाइ** । अत्र **शा**-इति द्वितीयाक्षरस्य संयोगे

---

1. KS[1]MY[1] °षेधः for °षेधे; A[1-2]M[1-2]TK असंयोगे for असंयोग°
2. L[2] पुरोजितीव बृहदाग्नेये for बृहदाग्नेये पुरोजित्यां
5. S[4] °षेधे for षेधार्थः
6. L[2]My[3] before अत्र add इति and om. वकारस्य द्वितीयाक्षरस्य
9. A[1]M[2] प्राह्वयायाम्, L[2] प्रह्वयसायाम् for प्रह्वयसायाम ; L[2] वृद्धिमप्राप्तस्य for अवृद्धिप्राप्तस्य
10. PL[2]A[3]V[2] om. ऐडसौपर्णे, B[4] सौपर्णे for ऐडसौपर्णे
11. A[3]L[2]B[4]V[2] om. स्वादुः; PA[3]LV[2]B[4] add. पौष्कले after सोम
12. PA[3]LV[2]B[4] om. पौष्कले
15. & 16 L[1]My[3] om. अत्र ... वृद्धिः

परे वृद्धिः । **अभिप्रवस्सुरा** (ऊ. क्षु. ८६०) इति **श्यैतनौधसे** द्वितीयायां **ताइघाण्णूऽ२-४या** । अत्र **धा**-इति द्वितीयाक्षरस्य संयोगे परे वृद्धिः । **परिप्राऽ३धा** (ऊ. प्रा. ८१८) इति पौष्कले **मास्वाऽ३४दूः** । अत्र **मा**-इति द्वितीयाक्षरस्य संयोगे वृद्धिः ॥ ३७ ॥

वारानिहोतयोश्च ॥ ३८ ॥

वि. **वारानिहोतयोश्च** द्वितीयमक्षरं वर्धते असंयोगे प्रत्यये । **वारवाऽ२३४न्ताम्** । **निहोताऽ२३४सा** वारवन्तीयाभिनिधनकाण्वाग्नेस्त्रिणिधनादिषु । ह्रस्वस्यैवासंयोगे विशेषणम् ॥

भा. यदधिकृतं तद्भवति । किंचाधिकृतम् । दीर्घमक्षरं वर्धते । ह्रस्वं चासंयोग-परमिति । उदाहरणानि वारवन्तीयाभिनिधनकाण्वाग्नेस्त्रिणिधनादिषु ॥ ३८ ॥

दी. **वारावाऽ२३४न्ताम्** इति वारापर्व । **निहोताऽ२३४सा** इति निहोतापर्व । **वारानिहोतयोः** पर्वणोः **च**-कारात् यदधिकृतं तद्भवति । किं चाधिकृतम्? दीर्घमक्षरं वर्धते । ह्रस्वं च असंयोगे परे [इति] । उदाहरणानि । **अश्ववन्नत्वाँऔहोहाइ** (ग्रा. गे. १. २. १७. ३) इति **वारवन्तीये** **वाराऽऽ२३४न्ताम्** । अत्र द्वितीयाक्षरस्य असंयोगे वृद्धिः । **औहोहोहाइ** । **आइही** । **वायाम्** (ग्रा. ग्रे. ७. ३. २६१. ३) इति **अभिनिधने काण्वे** **स्रुतावाऽ२३४न्ताः** । **आपोनाऽ२३४त्रु** । अत्र **ता**-इति **पा**-इति अक्षरद्वयस्य असंयोगे दीर्घस्य वृद्धिः । **प्रसोमदा** (ग्रा. गे. १४. ५. ५१४. १) इति **अग्नेस्त्रिणिधने** **वावी-ताऽ२३४याइ** । अत्र **वी**-कारस्य दीर्घस्य द्वितीयाक्षरस्य असंयोगे वृद्धिः । **निहोताऽ२३-४सा** (ग्रा. गे. १. १. १. १) । अत्र **हो**-इति द्वितीयाक्षरस्य असंयोगे वृद्धिः ॥ ३८ ॥

नासादधीन् ॥ ३९ ॥

---

6. A[2-1]M[1-2] ऐटत for वारवन्तीयामिनिधनकाण्व; TS[1] add. ऐटत before वारवन्तीय

9. B[4] om· अग्नेस्त्रिणिधन; p. adds: काण्व after °णिधन°

13. & 15. L[1]My[3] om. अत्र ... वृद्धिः

15. L[1]My om. आपोनात्र

17. L[1]MY[3] after याइ add. इत्यादिषु and om. अत्र ... वृद्धिः

वि. पूर्वसूत्रस्यापवादः । **स नो दूराच्चासात्** (ऊ. ए. ४९१) **गंभीरा९उद-धीन्** (ऊ. स. ७१६) इत्यत्र वाराद्वितीयं न वर्धते ॥ ३९ ॥

भा. उत्सर्गप्राप्तस्यापवादः । **स नो दूराच्चासच्च** (ऊ. ए. ४९१) **वारवन्तीये** । **गम्भीरानू उदधीन्** (ऊ. स. ७१६) अभिनिधने काण्वे ॥ ३९ ॥

२र र रर

दी. नकारः प्रतिषेधार्थः । वारापर्वणि उत्सर्गप्राप्तस्यापवादः । **स नो दूरा-औहोहाइ** इति । **अश्वन्नत्वा** (ऊ. ए. ४९१) **वारवन्तीये** तृतीयायां **चाअसाऽ२३४च्चा** । अत्र अकारस्य द्वितीयाक्षरस्य असंयोगे अवृद्धिः । **आमन्द्रैरिन्द्र** (ऊ. स. ७१६) इति **अभिनिधने काण्वे** तृतीयायां **दधी९राऽ२३४५न्वा** । अत्र **धी-**कारस्य द्वितीयाक्षरस्यासंयोगे अवृद्धिः ॥ ३९ ॥

मुद्रंन-द्रस्वब्दी-चर्कृत्य-निष्यते-णिमृढ्वम् ॥ ४० ॥

वि. ग्रहणात् संयोगेऽपि वर्धन्ते । **समुद्रं न संवरणानि** (ऊ. द. ८८) । **इन्द्रस्वब्दीव** (ऊ. द. १२८) । **चर्कृत्यानि कृण्वतः** (ऊ. क्षु. ८३१) । **न जातो न जनिष्यते** (ऊ. क्षु. ८३१) । **नीवशीर्षाणिमृढ्वम्** (ऊ. ए. ५२८) अग्नेस्त्रिणिधनाभि-निधनवारवन्तीयेषु ॥ ४० ॥

भा. अप्राप्तप्रापणार्थं ह्रस्वत्वात् संयोगपरत्वाच्च अवृद्धिप्राप्ता निपात्यन्ते । **मुद्रंन** । **द्रस्वब्दी** । **चर्कृत्या** । **निष्यते** । **णिमृढ्वम्** । अग्नेस्त्रिणिधनाभिनिधनकाण्वारवन्तीयेषु यथासंख्येन ॥ ४० ॥

---

2. A²S² वाराद्वयं T वारवन्तीयं for वाराद्वितीयं
5. L¹My³ om. नकारः प्रतिषेधार्थः
6. L¹MY³ om. अश्वन्नत्वा; L¹My³ om. तृतीयायां
7. L¹MY³ om. अत्र ... वृद्धिः; L¹My³ अहोहोहाइ आइही गाम्भी for आमन्द्रैरिन्द्रः
8. L¹My³ अत्र ··· अवृद्धिः
11. s² after वर्धन्ते adds: ह्रस्वस्यापि वृद्धिर्भवति
15. v² प्रापणार्थः for प्रापणार्थं; PDA³ ह्रस्वत्वासंयोग० for ह्रस्वत्वात् सयोग०
17. LAB³ om. यथासंख्येन

दी. **मुन्द्रन** । **ह्रस्वब्दी** । **चर्कृत्या** । **निष्यते** । **णिमृद्वयम्** । एतेषामप्राप्तानां प्रापणार्थं ह्रस्वत्वात् संयोगपरत्वाच्च अवृद्धिप्राप्तौ वृद्धिर्निपात्यते । उदाहरणानि–**सोमउष्वा** (ऊ. द. ८८) इति **अग्नेस्त्रिणिधने** [तृतीयायां] **सामूद्राऽ२३४न्ना** । अत्र मू-कारस्य द्वितीयाक्षरस्य ह्रस्वस्य संयोगे परे वृद्धिः । **औहोहोहाइ** । **आइही** । **वाय्याम्** (ऊ. द. १२८) इति **अभिनिधने काण्वे** द्वितीयायाम् **आइन्द्रास्वाऽ२३४ब्दी** । अत्र **द्रा**-कारस्य द्वितीयाक्षरस्य ह्रस्वस्य संयोगे परे वृद्धिः । **औहोहोहाइ** । **आइही** । **आदा** (ऊ. क्षु. ९३१) इति **अभिनिधने काण्वे** द्वितीयायां **चार्काऽ२३४र्त्यो** । अत्र **र्का**-इति द्वितीयाक्षरस्य ह्रस्वस्य संयोगे परे वृद्धिः । **अभित्वाशा औहोहाइ** (ऊ. क्षु. ८६१) इति **वारवन्तीये** द्वितीयायां **ज्ञाना-इष्याऽ२३४ताइ** । अत्र **नि**-इति द्वितीयाक्षरस्य संयोगे वृद्धिः । **साऔहोहाइ** (ऊ. ए. ५२८) इति **वारवन्तीये** तृतीयायां **णाइमार्दूऽ२३४वाम्** । अत्र **मृ**-कारस्य द्वितीयाक्षरस्य संयोगे परे वृद्धिः ॥ ४० ॥

निहोता णस्सो-पंमघ-ज्ञैःपरि-क्रतुरि-मान्‌गो॥ ४१ ॥

वि. वारायाः स्थाने निहोता भवति वक्ष्यमाणेषूदाहरणेषु । अग्नेस्त्रिणिधने **स्वासु-पिशङ्गरूपम्मघवन्** (ऊ. द. १२८) । प्लवे **शिशुंनयज्ञैः परि-** (ऊ. द. १३२) । **क्रतु-रिन्दुर्विच-** (ऊ. अ. ६०७) **अनूपे गोमान्गो-** (ऊ. स. ७४१) अग्नेस्त्रिणिधने ॥ ४१ ॥

वि. वारोदाहरणान्युक्तानि । इदानीं निहोतोदाहरणानि उच्यन्ते । **सोमउष्वा-**

---

3 & 5. LMy[3] om. अत्र ... वृद्धिः
5. L[1]My[3] om. द्वितीयायां
7. L[1]My[3] om. द्वितीयायां; L[1]My 7, 9 & 10 om. अत्र ... वृद्धिः
8. L[1]My[3] om. द्वितीयायां; S[4] तृतीययां for द्वितीयायां
10. L[1]My[2] om. तृतीयायां
13. S[4] before वरायाः adds: वारा इत्यनुवर्तते; M[2]. वक्ष्यमाणोदा° for वक्ष्यमाणेषूदा°
14. KS[1-2] M[2] om. °घवन्
15. A[1] M[1-2] after श्व. add. आग्नेये and A[2] अग्नेः
16. PLA[3] वाराहो° for वारो°; V[2] om. वारो .... उच्यन्ते

णस्सो (ऊ. द. ८८) अग्नेस्त्रिणिधने। **पिशङ्गरूपंमघ**° (ऊ. द. १२८) अभिनिधने। **शिशुंन यज्ञैः परि** (ऊ. द. १३२) प्लवे। **क्रतुरिन्दुः** (ऊ. अ. ६०७) **अनूपेगोमान्गो** (ऊ. स. ७३१) अग्नेस्त्रिणिधने॥ ४१ ॥

दी. वारोदाहरणान्युक्तानि। इदानीं निहोतोदाहरणान्युच्यन्ते। **णस्सो**। **पंमघ**। **ज्ञैःपरि**। **क्रतुरि**। **मान्गो**। [इति]। **सोमउष्वा** (ऊ. द. ८८) इत्यग्नेस्त्रिणिधने **णस्सोतृऽ२३४भीः**। अत्र निहोतापर्वणः **तृ**-इति द्वितीयमक्षरम् असंयोगे वर्धते। **औहोहोहाइ**। **आइही**। **वायाम्** (ऊ. द. १२८) इति **अभिनिधने काण्वे** तृतीयायां **पन्माघाऽ२३४वान्**। अत्र **न्मा**-इति द्वितीयाक्षरमसंयोगे वर्धते। **हा**। **वोऽ३हा** इत्यादि **साखायाऽ२३४आ** (ऊ. द. १३२) इति **प्लवे ज्ञैःपाराऽ२३४भू**। अत्र **पा**-इति द्वितीयमक्षरमसंयोगे वर्धते। **श्रीणन्तोगो** (ऊ. अ. ६०७) इति अग्नेस्त्रिणिधने **क्रतूराऽ२३४इन्दूः**। अत्र **तू**-इति द्वितीयमक्षरमसंयोगे वर्धते। **अनूपेगो** (ऊ. स. ७४१) इति अग्नेस्त्रिणिधने **मान्गोभाइराऽ२३४क्षाः**। अत्र **भाइ**-इति तृतीयमक्षरमसंयोगे वर्धते॥ ४१ ॥

दन्वते च ॥ ४२ ॥

वि. **वैदन्वते च** वारायाः स्थाने निहोता भवति। योनिवद्भावात् प्राप्तमिदं सूत्रं नारम्भणीयम्। योनिवद्भावान्निहोतापि। एतत्सूत्रारम्भः **असंयोगे** इति पर्युदासात् अप्राप्तायाः वृद्धेः प्राप्त्यर्थः। प्रथमपर्वणि द्वितीयपर्वणि च पूर्ववत् प्राप्ते[ः] ॥ ४२ ॥

भा. परिवैदन्वते निहोता भवन्ति॥ ४२ ॥

---

2. P परिप्लवे for प्लवे

6, 8, 9, 11 & 12. L[1]My[3] om. अत्र ... वर्धते

7. My[3]L[1] om. काण्वे तृतीयायां

14. S[2] before वैदन्वते adds: वारानिहोतयोरित्यनुवर्तते; A[2-1]M[1-2]Ts[1] om. वारायाः स्थाने; A[1]K M[1-2] My[1] अप्राप्तम् for प्राप्तम्; A[2] om. योनिवद् ... नारम्भणीयम्

15. A[2] after निहोतापि adds: इदं सूत्रं नारम्भणीयम्

16. S[2]My[1] प्राप्त्यर्थम् for प्राप्त्यर्थः

17. P. ऐड for परि

दी. च-कारात् संयोगेऽपि । असंयोगेऽपि वैदन्ाते निहोता पर्वणो वर्धते । **औऽ३होइ** इत्यादि **पराइखऽ२३४नो** (ऊ. द. १११)। इति वैदन्वते । अत्र रा-इति द्वितीयमक्षरं संयोगे वर्धते । निहोता भवतीत्यर्थः । तुवेवाऽ२३४इवे इति तृतीयायां **सजोषाऽ२३४साः । देवसाऽ२३४ऽपी । तिमाशाऽ२३४ता । मदाइपूऽ२३४सा । वेषाआऽ२३४सी ।** एतेषामसंयोगे द्वितीयमक्षरं वर्धते ॥ ४२ ॥

अ-गिरिप्रभृति तिस्रः ॥ ४३ ॥

वि. गिरिप्रभृतयस्तिस्रः निहोता न भवन्ति । योनिवत् वारा एव भवन्तीत्यर्थः । एवं **कविरि**त्युत्तरत्र किं कर्तव्यम्? **दन्वते च** (पु. सू. ५. १. ४२) इति निहोता भवति आसामान्त्यम् ॥ ४३ ॥

भा. अकारः प्रतिषेधार्थः । **गिरिप्रभृतयस्तिस्रः** वारा एव भवन्ति ! शेषा निहोताः ॥ ४३ ॥

दी. अकारः प्रतिषेधार्थः । **गिरिष्ठाप्रभृतयः तिस्रः** वारा एव भवन्ति । शेषा निहोताः। **गिराऽ२३४इष्ठाः । पवित्रेऽ२३४सो । मोअक्षाऽ२३४रात्** (ऊ. द. १११) ॥

त्रैशोके चाद्यान्त्ययोः ॥ ४४ ॥

---

1. L^1 My^3 om. चकारात् ... वर्धते
2. My^3 after वैदन्वते adds: चकारात् निहोता भवति; L^1My^3 om. अत्र .... एतेषामसंयोगे ... वर्धते (l. 5)
7. A^1 M^{1-2} S^1 °प्रभृति पर्वणि for प्रभृतयस्तिस्रः; A^2 T. om. गिरिप्रभृति; A^{1-3} M^{1-3} S^1 भवति for भवन्ति; $A^{1-2}M^{1-2}TS^1$ om. वारा एव भवन्तीत्यर्थः; $A^{1-2}M^{1-2}IS^{1}$- after योनिवत् add. गिरि (A^2T before गिरि add. तिस्रः) प्रभृति वर्तमान S^1 वर्तते A^2T वर्तमाने for वर्तमान) गिरिप्रभृतेरूर्ध्वं त्रिषु पर्वसु निहोता न भवति
9. $A^{1-2}M^{1-2}$ T after आसामान्त्यं add. निहोता भवति; $A^1M^{1-3}T$ आसामान्ता for आसामान्त्यं; My' trans. निहोता भवति after °सामान्त्यम्
10. V^2. om. एव
12. S^4 षेधे for षेधार्थः; S^4 एवं for एव; S^4 om. शेषा निहोताः
13. S^4 after अक्षा२३४रात् adds: एवं वारा भवन्ति
14. My^1 आन्तयोः for अन्त्ययोः

वि. & भा. **वैशोके चाद्यान्त्ययोः** स्तोत्रीययोः निहोते भवतः ॥ ४४ ॥

दी. **विश्वोहाइ** (ऊ. द. ७३) इति **त्रैशोके** प्रथमतृतीययोः स्तोत्रीययोः निहोते भवतः । **छुन्तारा२३४साम्** । तृतीयायां **हियोजा२३४सा** । मध्यमायां **वारा** । **तारस्वी२३४नाः** ॥ ४४ ॥

ऐटतसारथिनोरविगीता ॥ ४५ ॥

वि. ऐटतयज्ञसारथिनोर्निहोता भवति विशेषगीतं वर्जयित्वा । किमर्थम्? **असंयोगे** इति पर्युदासनिषेधार्थम् ॥ ४५ ॥

भा. **ऐटते** च **यज्ञसारथिनि** च अविगाने न प्रतिपन्नाः सर्वा निहोता भवन्ति ॥

दी. निहोता **अविगीता** । न विशेषेण गीता । ह्रस्वस्यासंयोगे **परे** न गीता । संयोगे परे गीतेत्यर्थः । **ऐटते** च **यज्ञसारथिनि** च अविगानं न प्रतिपन्ना सर्वा निहोता भवति । अध्व । एआध्वा (ऊ. द. १४४) इति **ऐटते सोमांगा२३४वी** इत्यादिषु । **प्रोअ.या२३४सीत्** (ऊ. स. ६५७) इति यज्ञसारथिनि **सोमाक्का२३४ला** एवमादिषु ॥

वैश्वामित्रे च सर्वासु ॥ ४६ ॥

वि. **वैश्वामित्रे च सर्वासु** स्तोत्रीयासु निहोता भवति । सर्वास्विति **असंयोगे** इति पर्युदासनिषेधार्थम् ॥ ४६ ॥

भा. निहोता भवन्ति **प्रसुन्वानायाम्** ॥ ४६ ॥

दी. **वैश्वामित्रे सर्वासु** स्तोत्रीयासु निहोता भवन्ति । **प्रसुन्वानाय अन्धसः**

---

1. S² befor. त्रैशोके adds: निहोता इत्यनुवर्तते; A¹M¹⁻²S¹ My³ अन्तयोः for अन्त्ययोः; A¹⁻²KM¹⁻²S¹⁻²TMy¹ निहोता भवति for निहोते भवतः
3. L¹ om. तृतीयायां
5. A¹⁻² M¹⁻² TS¹ ॰गीते for गीता
6. A¹⁻² M²T ऐडत॰ for ऐटत; A². om. भवति; My¹ सर्वास्विति for विशेष॰ … किमर्थम्
8. V²L ॰गीते (गानेन) अविप्रतिपन्नाः for ॰गाने न प्रतिपन्नाः
14. My¹ om. सर्वास्विति …. निषेधार्थम्

(ऊ. स. ७५७) इति वैश्वामित्रे **मर्तोनाऽ२३४वा** । द्वितीयायां **भुजाइनाऽ२३४पू** । तृतीयायां **वियास्ताऽ२३४स्ता** । अत्रापि अविगीतेत्यर्थः ॥ ४६ ॥

नवे च विकल्पे ॥ ४७ ॥

वि. & भा. पूर्वे **मानवे विकल्पे** विषये निहोता भवति शग्ध्यूष्वादिषु ॥ ४७ ॥

दी. पूर्वे **मानवे विकल्पविषये** निहोता भवति। **शग्ध्यूषू** (ऊ. स. ७१०) इति **पूर्वमानवे शचाइपाऽ२३४ताइ** । द्वितीयायां **चरामाऽ२३४साइ** । तृतीयायां **हिराण्याऽ-२३४याः** । अत्रापि **च**-कारात् अविगीतेत्यधिकारः ॥ ४७ ॥

नैकर्चे ॥ ४८ ॥

वि. **एकर्चे** मानवे निहोता न भवति । वारा भवतीत्यर्थः ॥ ४८ ॥

भा. पूर्वे **एकर्च**मानवे **मन्द्रयाया** (ऊ. सं. ३५५) इति निहोताप्रतिषेधः ॥ ४८ ॥

दी. **एकर्चे पूर्वमानवे** निहोता **न** भवति । **मन्द्रयाया** (ऊ. सं. ३५५) इति मानवाद्ये **ताइधाराऽ२३४या** । वारा भवतीत्यर्थः ॥ ४८ ॥

॥ निहोताः समाप्ताः । असंयोगाधिकारो निवृत्तः ॥

यवे मह्याम् ॥ ४९ ॥

वि. & भा. **मार्गीयवे** महित्वीणाद्वितीयमक्षरं ह्रस्वं दीर्घं च वर्धते । **अस्य प्रत्नादिषु** ॥ ४९ ॥

---

1. L^1MY^3 after मर्तोनाऽ२३४वा adds: इत्यादिषु and om. द्वितीयायां ···· अविगीतेत्यर्थः;
4. L^1A^1 M^{1-2} TV^2B^4 ॰पूर्वे for पू॰; $A^{2-1}M^{1-2}V^2B^4$ विकल्प॰ for विकल्पे; $PL^2A^3V^2B^4$ भवन्ति; for भवति $A^{1-2}M^{1-2}T$ S^{1-3} My^1 om. शग्ध्यूष्वादिषु;
12. L^1MY^3 एकोर्चे पूर्वमानवे for मानवाद्ये; L^1MY^3 om. वारा भवतीत्यर्थः
13. RMy^3 om. असंयोगाधिकारो निवृत्तः
15. $A^{1-3}KM^{1-3}TS^1PV^2B^4$ om. अक्षरं; $A^{1-1}KM^{1-2}TS^{1-1}$ om. ह्रस्वं दीर्घं चः P after च adds: सर्वं; $A^{1-2}KM^{1-2}TS^{1-2}$ om. अस्यप्रत्नादिषु

दी. **मार्गीयवे मह्यां** महित्रीणायां द्वितीयमक्षरं दीर्घं ह्रस्वं च वर्धते । **महाइत्रा-ऽ२३४इणाम्** इति महित्रीणापर्व । **अस्यौहोवा** (ऊ. अ. ५५२) इति **मार्गीयवे अनूत्रू-ऽ२३४ताम्** । अत्र **नू**-इति महित्रीणाद्वितीयमक्षरं ह्रस्वं वर्धते । इत्यादिषु ॥ ४९ ॥

अ-रसं दो-षं-प्र ॥ ५० ॥

वि. & भा. अकारः प्रतिषेधार्थः । मार्गीयवे **रसं ते मित्रो अर्यमा** (ऊ. क्षु. ९०९) **तव त्य इन्दो अन्धसः** (ऊ. द. १४२) **दिवः पीयूषमुत्तमम्** (ऊ. द. १४२) **कुवित्सस्य प्र हि व्रजम्** (ऊ. अ. ५३८) इत्येतेषु महित्रीणाद्वितीयस्य वृद्धिर्न भवति ॥

दी. अकारः प्रतिषेधे । **रसम्** । **दो** । **षम्** । **प्र** । एतेषु मार्गीयवे महित्रीणायां द्वितीयस्याक्षरस्य वृद्धिप्रतिषेधः । **रसौ होवा** (ऊ. क्षु. ९०९) इति **मर्गीयवे त्रोअयाँऽ-ऽ२३४मा** । अत्र महित्रीणायां द्वितीयमक्षरम् अ-कारो न वर्धते । **अध्वौहोवा** (ऊ. द. १४२) इति मार्गीयवे **तवौहोवा** इति द्वितीयायां **दोअन्धाऽ२३४साः** । अत्र अ-कारस्य न वृद्धिः । **दिवौहोवा** इति तृतीयायां **षमुत्ताऽ२३४माम्** । अत्र **मु**-कारः महिद्वितीयं न वर्धते । **तद्वौहोवा** (ऊ. अ. ५३८) इति मार्गीयवे **कुवौहोवा** इति तृतीयायां **प्रहित्रा-ऽ२३४जाम्** । अत्र **हि**-कारो महिद्वितीयं न वर्धते ॥ ५० ॥

भि थें चाद्ययोः ॥ ५१ ॥

---

1. RL^{1}My^3 after च adds: सर्वं
3. LMy^3 अत्र ... वर्धते
5. AM$^{1-2}$T om. अकारः प्रतिषेधार्थः; PA^{3}V^{2}B^4 रसं दो । षं । प्र । for मार्गीयवे; A^{1}M^{1}TM^2 after मार्गीयवे add. मह्यादिद्वितीयं रसंदोषंप्र इत्येते न वर्धन्ते । उदाहरणानि
7. A^{1}M$^{1-2}$ om. इत्येतेषु ... भवति; A^2 S$^{1-2}$K. अत्र for एतेषु; PA^{3}V^{2}B^{4}L^2 वृद्धिप्रतिषेधः for वृद्धिर्न भवति
10. L^{1}My^3 om. अत्र ··· इति मार्गीयवे (l. 11)
11. L^{1}My^3 मार्गीयवे for द्वितीयायां; L^{1}My^3 om. अत्र ... वृद्धिः
12. S^4 मुकारस्य for मुकारः
13. S^4 तृतीयायां for मार्गीयवे; S^4 मार्गीयवे for तृतीयायां
14. My^{3}L^1 om. अत्र ... वर्धते
15. PV^{2}B^{4}A^{3}L^{2}AM$^{1-2}$L^1 थे for भिथें

वि. अनुष्टुभि पार्थे पूर्वयोः स्तोत्रीययोः महिद्वितीयं वर्धते पवस्ववाजायाम् ॥

भा. पार्थे चाद्ययोः स्तोत्रीययोर्महित्रीणाद्वितीयस्य वृद्धिः पवस्ववाजायाम् ॥ ५१ ॥

दी. अनुष्टुभि पार्थे आद्ययोः प्रथमद्वितीययोः स्तोत्रीययोः । चकारत् महित्रीणायाम् द्वितीयस्याक्षरस्य वृद्धिः । **ओऽ३होऽ३होइ** । **पव** । **स्वाऽ२** (ऊ. द. ९४) इति **पार्थे जसाताऽ२३४याइ** । द्वितीयायां **तिधाइताऽ२३४याः** । अत्र महिद्वितीयस्य वृद्धिः ॥

अनद्रु ॥ ५२ ॥

वि. हरिंपवित्रे अद्रु[हः इत्यत्र अद्रु]शब्दे वृद्धिर्न भवति ॥ ५२ ॥

भा. अस्यापवादः । **हरिंपवित्रे अद्रुहः** (ऊ. द. ९४) इत्यत्र ॥ ५२ ॥

दी. अनु-निषेधार्थः । **अद्रु**-शब्दस्य वृद्धिप्रतिषेधः । **पवस्ववाज** (ऊ. द. ९४) इति अनुष्टुभि पार्थे द्वितीयायां त्रेअद्रूऽ२३४हाः । अत्र **अद्रु**-शब्दस्य महिद्वितीयस्य अवृद्धिरित्यर्थः ॥ ५२ ॥

घं वैधृते ॥ ५३ ॥

वि. वैधृते वासिष्ठे महित्रीणायां दीर्घमक्षरं वर्धते ॥ ५३ ॥

भा. वैधृते वासिष्ठे **अभिप्रियाणि** (ऊ. स. ७३२) इत्यत्र महित्रीणाद्वितीयं दीर्घं वर्धते ॥ ५३ ॥

दी. अभिप्रियाणि (ऊ. स. ७३२) इति **वैधृते** विधृतिसत्रे विनियुक्ते वासिष्ठे

---

1. S[2] before अनुष्टुभि adds: मह्यमित्यनुवर्तते । द्वितीयमिति च
2. A[1] om. पवस्ववाजायाम् ; A[2]M[1]T °वाजसातये P °वाजेत्येतासु for °वाजायाम्
3. R om. अनुष्टुभि RL[1]My[3] om. चकारात्
4. S[4] after इति adds: अनुष्टुभि
5. L[1]MY[3] om. अत्र .... वृद्धिः
8. V[2] om. अस्यापवादः; B[4]L[2]A[3] om. °ह इत्यत्र; V[3] after इत्यत्र adds: अपवाद;
9. MY[3] om. पवस्व .... द्वितीयायां
10. RL[1] om. अनुष्टुभि पार्थे द्वितीयायां; RL[1]My[3] om. अत्र ... इत्यर्थः ॥
13. A[1-2]M[1-2] वासिष्ठे वैधृते for वैधृते वासिष्ठे;

महित्रीणायां द्वितीयमक्षरं दीर्घं वर्धते । **अभिप्रियाणीऽ२** (ऊ. स. ७३२) **इति वैधृते वासिष्ठे चनोहाऽ२३४इताः** । अत्र **नो**-इति महिद्वितीयं दीर्घं वर्धते ॥ ५३ ॥

च्चि ॥ ५४ ॥

वि. अवद्युतानः **कलशाँ२अचि** (ऊ. स. ७३२) अत्र **चि**-शब्दो वर्धते ह्रस्वोऽपि । ग्रहणात् ॥ ५४ ॥

भा. **अवद्युतानः कलशाँ२अचि** (ऊ. स. ७३२) अत्र **चि**-शब्दो ह्रस्वोऽपि वर्धते ॥ ५४ ॥

दी. वैधृते वासिष्ठे **चि**-शब्दो ह्रस्वो वर्धते । **अवद्युतानाऽ२ः** (ऊ. स. ७३२) इति वैधृते वासिष्ठे [तृतीयायां] **अचाइक्राऽ२३४दात्** ॥ ५४ ॥

सर्वं जानित्रसंक्षाररथिराजेषु ॥ ५५ ॥

वि. **पूर्वजिनित्रेडानांसंक्षारयज्ञसारथिसामराजेषु** मह्यादिद्वितीयं सर्वं वर्धते ॥

भा. एतेषु सामसु महित्रीणाद्वितीयं सर्वं वर्धते । ह्रस्वं दीर्घं च ॥ ५५ ॥

दी. **जनित्रं** च **इडानांसंक्षारं** च **यज्ञसारथि** च **सामराजं** च । एतेषु सामसु महित्रीणायां द्वितीयं सर्वं वर्धते । ह्रस्वं दीर्घं च । **अभिसोऽ३मासआयवाः** (ऊ. अ. ५४१) इति **पूर्वजनित्रे मनाइषाऽ२३४इणाः** । अत्र **नी**-इति महिद्वितीयं दीर्घं वर्धते । द्वितीयायां **नऊर्माऽ२३४इणा** । अत्र ऊ-कारस्य महिद्वितीयं दीर्घं वर्धते । तृतीयायां

---

2. RL[1]My[3] om. अत्र .... वर्धते; S[4] after वर्धते adds: एवमादीनि

3. MY[1]A[1-7] KM[1-2] S[1-3]L[2] अचि for चि

11. S[2] before पूर्व° adds: मह्यां द्वितीयं चानुवर्तते; A[1]M[1-2] r om. सर्वं

13. P adds: वर्धते after दीर्घं च

16. RL[1]My[3] om. अत्र... तृतीयायां (L. 17)

स्वधामाँऽ२३४णा । अत्र ध-कारस्य महिद्धितीयं ह्रस्वं वर्धते । इत्यादिषु ॥

औहोइहुवाऽ३होइ । पवमानाऽ३स्याऽ३जिघ्नतः (ऊ. द. १७९) इति इडानां संक्षारे जिराआऽ२३४जाइ । द्वितीयायां हाराइश्वाऽ२३४न्द्राः । तृतीयायां दधातुस्तोऽ२३४त्राइ । अत्र सर्वासु महिद्धितीयं वर्धते । प्रोआयाऽ२३४सीत् । (ऊ. अ. ६५।७) इति यज्ञसारिथिनि सखासाऽ२३४ख्यूः । अत्र खा-इति महिद्धितीयं दीर्घं वर्धते । इत्यादिषु ॥

पवौहोवा (ऊ. सं. २६३) इति सामराजे मोआश्नूऽ२३४ताइ । द्वितीयायां रमाशाऽ२३४वाः । तृतीयायां स्वमायाऽ२३४या । अत्र सर्वासु महिद्धितीयं वर्धते । इत्यादिषु ॥ ५५ ॥

द्यौताने तृचमध्ये ॥ ५६ ॥

वि. **द्यौताने** आद्यान्त्यौ पादौ मुक्त्वा **तृचमध्ये** महिद्धितीयं वर्धते ॥ ५६ ॥

भा. **अधाहीन्द्र गिर्वण** (ऊ. ए. ४०२) इत्यत्र आद्यान्त्यौ मुक्त्वा **तृचमध्ये** महित्तीणाद्वितीयस्य वृद्धिः ॥ ५६ ॥

दी. **अधाहीन्द्र** (ऊ. ए. ४०२) इति **द्यौताने** आद्यान्त्यौ मुक्त्वा **तृचमध्ये** महित्तीणायां द्वितीयस्य वृद्धिः । हाऽ३ इत्यादि अधाहियाऽ२इ इति द्यौताने द्रगिर्वाँऽ२३४णाः । रुवर्वाँऽ२३४इदाः । इत्याद्यान्ते महित्तीणे मुक्त्वा मध्ये सर्वत्र वृद्धिः । मईमाऽ२३४हाइ । इत्यादिषु ॥ ५६ ॥

---

1. L[1]My[3] om. अत्र ... वर्धते
3. L[1]My[3] om. द्वितीयायां; L[1]MY[3] om. तृतीयायां ... वर्धते (l. 4)
5. L[1]My[3] om. अत्र ... वर्धते
7. L[1]My[3] om. द्वितीयायां
8. L[1]My[3] om. तृतीयायां; L[1]My[2] om. अत्र ...वर्धते
11. S[2] वर्जयित्वा for मुक्त्वा
14. L[1] om. अधाहीन्द्र इति

अ-चतुरक्षरे ॥ ५७ ॥

वि. **द्यौताने चतुरक्षरे** वैकृतगाने महिद्वितीयं न वर्धते ॥ ५७ ॥

भा. **चतुरक्षरं** वैकृतं गानं मुक्त्वा । **ससृग्महे वाद्वृध्वा१ॅसम्** इति **च** ॥ ५७ ॥

दी. द्यौताने **चतुरक्षरे** वैकृतगाने महित्रीणायां द्वितीयस्य न वृद्धिः । **साऽ३** । **सृग्माऽ२३४हाइ** । **वाऽ३** । **वृध्वाऽ२३४१ॅसाम्** । अत्र महिद्वितीयं वर्धते ॥ ५७ ॥

एकर्चे चोत्तरयोः ॥ ५८ ॥

वि. & भा. **एकर्चे** द्यौताने **उत्सोदेवायां** (ऊ. प्रा. ८४९) उत्तरयोः पादयोः महित्रीणाद्वितीयस्य वृद्धिः ॥ ५८ ॥

दी. **उत्सो देवो हिरण्यय** (ऊ. प्रा. ८४९) इति **एकर्चे** द्यौताने उत्तरयोः पादयोर्महित्रीणायां द्वितीयस्याक्षरस्य वृद्धिः । हाऽ३ इत्यादि **उत्सोदेवोऽ२** इत्येकर्चे द्यौताने **मधुप्राऽ२३४याम्** । **स्थमासाऽ२३४दात्** । अत्र महिद्वितीयं वर्धते ॥ ५८ ॥

घं यामे ॥ ५९ ॥

वि. **यामे आयंगौर्** (र. प्रा. १५३) इत्यत्र महित्रीणाद्वितीयस्य दीर्घस्य वृद्धिः ॥

इति फुल्लसूत्रविवरणे प्रथमेऽ-(पञ्चमेऽ-)ध्याये वृद्धावृद्धे प्रथमः खण्डः ॥ १ ॥

---

2. $A^{1-2}M^{1-2}TS^{1}$ तृचे चतुरक्षरगानं वर्जयित्वा प्रथमान्ताभ्यामन्येषु महिद्वितीयं वर्धते for चतुरक्षरे······वर्धते

5. L^{1} om. अत्र महिद्वितीयं वर्धते

7. $A^{1-2}KM^{1-2}S^{1-2}$ देव इति for देवायां

8. T द्वितीयमक्षरं for °द्वितीयस्य

10. $L^{1}My^{3}$ om. एकर्चे

11. L^{1} om. अत्र ···· वर्धते

13. S^{2} before यामे adds: महिद्वितीयमित्यनुवर्तते; $KS^{2}My^{1}$ after इत्यत्र adds: पुनानोअक्रमीदित्यत्र च

14. colophon in $A^{2}TS^{1}A^{1}M^{1-2}S^{1}$:- इति वृद्धावृद्धे ($A^{1}M^{1-2}$ °द्धः) प्रथमः खण्डः ॥ in KS^{2} इति प्रथमस्य प्रथमः खण्डः; My^{1} प्रथमस्य प्रथमः

भा. यामे दीर्घं महित्रीणा द्वितीयं वर्धते । आयंगौर् (र. प्रा. १५३) इत्यत्र ॥

इति पुष्पसूत्रभाष्ये प्रथमस्य (पञ्चमाध्यायस्य) प्रथमा खण्डिका ॥ १ ॥

दी. आयंगौर् (र. प्रा. १५३) इति यामे महित्रीणायां द्वितीयं दीर्घं वर्धते । आयम् । गौऽऽपाऽ२ । इति यामे द्वितीयायां तिरोचाऽ२३४ना । अपानाऽ२३४ताइ । तृतीयायां विराजाऽ२३४ताइ । यधीयाऽ२३४ताइ । अत्र महिद्वितीयं दीर्घं वर्धते ॥

इति फुल्लदीपे पञ्चमाध्यायस्य वृद्धावृद्धः प्रथमः खण्डः ॥ १ ॥

द्वितीयः खण्डः

पृश्निन्यपादादिर्भात् ॥ १ ॥

वि. पृश्निनि पादादीन् वर्जयित्वा स्तोभात् परो वर्धते परीतोष्यादिषु ॥ १ ॥

भा. पृश्निनि अपादादिः स्तोभात्परं वर्धते परीतोष्यादिषु ॥ १ ॥

दी. पृश्निनि स्तोभात् परः अपदादिः वर्धते । पराइतोऽ२३४ींचतासुतँहाउ (ऊ. सं. २६५) इति पृश्निनि नारियोअ । मामद्रिभिः । अत्र ना-इति मा-इति स्तोभात् परः अपदादिर्वर्धते । इत्यादिषु ॥ १ ॥

अ-नोविभिरप्सु-रुता-भ-ज्राः ॥ २ ॥

वि. नूनं पुनानो अविभिः (ऊ. अ. ५७९) सुते चित्वाप्सुम (ऊ. अ. ५७९) विश्वासान्तरुता (ऊ. द. ७४) इन्द्रं तं शुम्भपुरु- (ऊ. द. ७४) हस्तेनवज्रः (ऊ. द. ७४) । इत्येते न वर्धन्ते ॥ २ ॥

---

4. L¹My³ om. द्वितीयायां
5. L¹ My³ om. तृतीयायां and अत्र ... वर्धते
12. L¹My³ om. अत्र .... वर्धते
15. S² before नूनं adds: पूर्वसूत्रस्यापवादः

भा अः प्रतिषेधे। **नोविभिः**। **अप्सु**। **रुता**। **भ**। **ज्रः**। **नूनं पुनानोऽविभिः** (ऊ. अ. ५७९) **सुते चित्वाप्सु** (ऊ. अ. ५७९) **विश्वासान्तरुता** (ऊ. द. ७४) **इन्द्रतंशुम्भ** (ऊ. द. ७४) **हस्तेनवज्रः** (ऊ. द. ७४)। एतेषु अपदादेः स्तोभात्परस्यावृद्धिः ॥ २ ॥

दी. अकारः प्रतिषेधार्थः। **नोविभिः**। **अप्सु**। **रुता**। **भ**। **ज्रः**। एतेषु **अपादादेः स्तोभात्** परस्य न वृद्धिः। **परीतोष्यां** (ऊ. प्र. ५७९) **पृश्निनि** द्वितीयायां **नो अविभिः**। तृतीयायां **अप्सुमदा**। एतयोरादिर्न वर्धते। **यो राजा** (ऊ. द. ७४) इति। पृश्निनि **रुता**। द्वितीयायां **भपुरुह**। तृतीयायां **ज्रःप्रतिधा**। एतेषामादिर्न वर्धते ॥

आद्यात् ॥ ३ ॥

वि. **आद्यात्** परो वर्धते। प्रस्तावे पृश्निनि ॥ ३ ॥

भा. **आद्यात्** अक्षारात् परस्य अक्षरस्य वृद्धिः ॥ ३ ॥

दी. **पृश्निनि** स्तोत्रीयायाम् **आद्यात्** अक्षरात् पराक्षरस्य वृद्धिः। **पराइतोऽ२३ षिश्वतासुतहाउ** (ऊ. अ. ५७९)। अत्र **राइ**-इति द्वितीयाक्षरस्य वृद्धिः। **योराजाऽ२३चर्षणीनाँहाउ** (ऊ. द. ७४)। अत्र **रा**-इति द्वितीयाक्षरस्य वृद्धिः। **पुनानाऽ२-३स्सोमधारयाहाउ** (ऊ. अ. ५९५)। अत्र **ना**-इति द्वितीयाक्षरस्य वृद्धिः ॥ ३ ॥

---

1. A[1-2]KM[1-2]S[1-2]T om. अः प्रतिषेधः ... ज्रः
3. M[1-2]A[1-2]KS[1-2]T इत्येते न वर्धन्ते for एतेषु .... अवृद्धिः
5. S[4] ०षेधे ०षेधार्थः
6. My[3] after परस्य ins. अक्षरस्य; S[4] ०तोषीति for तोष्यां
7. L[1]. om. एतयोर् ··· वर्धते
8. om. एतेषाम् ... वर्धते
10. S[2] before आद्यात् adds: पृश्निनीत्यनुवर्तते; A[1-2]M[2]T om. प्रस्तावे; M[1] om. प्रस्तावे पृश्निनि
11. B[4] पराक्षरस्य for परस्याक्षरस्य
13, 14, & 15. L[1]My[3] om. अत्र ... वृद्धिः

अनुत्सो यस्य ॥ ४ ॥

वि. **उत्सो देवो** (ऊ. अ. ५९५) **यस्य द्विता** (ऊ. द. ७४) न वर्धते ॥ ४ ॥

भा. अनुत्सः । **उत्सो देवः** (ऊ. अ. ५९५) । **यस्य द्विता** (ऊ. द. ७४) इति च । आद्यात् परस्य प्रतिषेधः ॥ ४ ॥

दी. **अन्** प्रतिषेधार्थः । पृश्निनि **उत्सो देव** (ऊ. अ. ५९५) इत्यस्याद्याक्षरात् परस्य वृद्धिप्रतिषेधः । **यस्य द्विता** (ऊ. अ. ७४) इत्यत्रापि । **पुनान** (ऊ. अ. ५९५) इति द्वितीयायाम् **उत्सोदाऽ२३इवोहिरण्ययोहाउ** । **योराजा** (ऊ. द. ७४) इति तृतीयायां **यस्यद्वीऽ२३ताविधर्तरिहाउ** । एतयोराद्यात् परस्याक्षरस्य वृद्धिः ॥ ४ ॥

आभीशवेऽभिगीतात् ॥ ५ ॥

वि. **आभीशवे अभिगीतात्** परो वर्धते अभिसोमादिषु । आभीशवे द्वित्वेऽपि ॥

भा. **आभीशवे तवाहँसोम-** (ऊ. द. ७०) आदिषु अभिगीतात् परस्य वृद्धिः ॥

दी. **तवाहँसोमरारेणए । ए ।** (ऊ. द. ७०) इति आभीशवोत्तरे पर्वभेदो नास्त्येव । **अभिगीतात्** अक्षरात् **प**-कारस्य वृद्धिः । **तपन्तमतिस्वगायपारः** । अत्र **य**-कारे अभिगीतः । अभिगीतलक्षणं तु मात्रालक्षणे प्रसिद्धम्– **अभिगीतं द्वितीयादि प्रथमान्तम्** । **अभिगीतेऽर्धमात्रा द्वितीये ॥ प्रथमेऽध्यर्धा** (मा. ल. ३. ४; ७) । अत्र **पा**-इति अभिगीतात् परो वर्धते । एवमादिषु ॥ ५ ॥

अ-द्रि-नोअर्ष-ण्यम् ॥ ६ ॥

---

3. PL[2]A[3]V[2] अनुत्सो देवः for उत्सो देवः
6. L[1] om. यस्य … द्वितीयायाम्
8. L[1] om. एतयोर् … वृद्धिः
11. L[2] om. तावाहँसोम-आदिषु
12. L[1] आमीशवे for आमीशवोत्तरे
13. L[1] अभयद्धारे for अत्र यकारे
14. L[1]My[3] om. प्रसिद्धम् … परो वर्धते (L. 16)

वि. **सुषावसोममद्रि-** (ऊ. द. १८६), **अपो वसानो अर्ष-** (ऊ. अ. ५९६), **उत्सो देवो हिरण्य** (ऊ. अ. ५९६) एते न वर्धन्ते ॥ ६ ॥

भा. **सुषावसोममद्रिभिर्नूनं पुनानो** (ऊ. द. १८६) **अपो वसानो अर्ष** (ऊ. अ. ५९६) **उत्सो देवो हिरण्य-** (ऊ. अ. ५९६) एतेषु अभिगीतात् परस्यापि वृद्धिः ॥

दी. अ-कारः प्रतिषेधे । **द्रि** । **नोअर्ष** । **ण्य** । एतेषु अभिगीतात् परस्य वृद्धिप्रतिषेधः । **परीतोषिञ्चतासुतम्** । **ए** । (ऊ. द. १८६) इत्याभीशवाद्ये द्वितीयायां **सुषावसोऽ३मामद्रिभाइः** । अत्र **द्रि**-इति अभिगीतात् परो न वर्धते । एवमाभीशवोत्तरेऽपि । **पुनानस्सोमधारया** । **ए** । (ऊ. अ. ५९६) इत्याभीशवोत्तरे **अपोवसाऽ३नोअर्षसाइ** । अत्र **र्ष**-इत्यभिगीतात् परो न वर्धते । अत्रैव द्वितीयायाम् **उत्सोदेवोऽ३हाइरण्यया:** । अत्र **ण्य**-इत्यभिगीतात् परो न वर्धते ॥ ६ ॥

तस्माच्च ॥ ७ ॥

वि. अभिगीतात् परात् परम् अक्षरं वर्धते । तृतीयमित्यर्थः ॥ ७ ॥

भा. **तस्माच्चा**भिगीतात्परं वर्धते ॥ ७ ॥

दी. **तस्माद**भिगीतात् परादक्षरात् परस्याक्षरस्य वृद्धिः । **परीतोषिंचतासुतम्** । **ए** । (ऊ. द. १८६) इति आभीशवाद्ये द्वितीयायां **सुषावसोममद्रिभिरे** इत्यस्यां

---

6. L[1]My[3] om. परीतो .... सुतम्; My[3]L[1] om. द्वितीयायां and trans. इत्याभीशवाद्ये after अद्रिभाइः

7. L[1]My[3] om. अत्र ... ०शवोत्तरेऽपि

9. L[1]My[3] om. अत्र ... न वर्धते ।; My[3] om. अत्रैव द्वितीयायाम्

10. L[1]My[3] om. अत्र ... न वर्धते

12. L[1]A[3]V[2] परस्याक्षरस्य वृद्धिः for परम् ... वर्धते; PB[4] om. अक्षरम् ; A[1-2]KM[1-2]S[1-2]TMY[1] परोऽक्षरो for परम् अक्षम् ;PA[3]V[2]L[2] B[4] om. तृतीयमित्यर्थः

14. L[1]MY[3] om. परीतो० ... द्वितीयायां

15. इत्याभीशवे for इत्यस्याम् ।

पुनानो अविभिऽपरिस्रावा । अत्र वा-कारस्यान्त्याक्षरस्य अभिगीतात् परस्याक्षरस्य वृद्धिः । इत्येवमादिषु ॥ ७ ॥

अ-विर्-यम्-दम्-तो-रः ॥ ८ ॥

वि. [परीतोष्याम्] (ऊ. द. १८६) **सोमो य उत्तमं हविः ।** उत्सोदेवायाम् (ऊ. अ. ५९६) **मधुप्रियम् । अभि सोमायां** (ऊ. अ. ६३५) **मद्यं मदम् । मदच्युतः ।** तवाहंसोम- (ऊ. द. ७०) तृतीयायां **सूर्यं परः ।** एतेषु अभिगीतात् परात् परस्य वृद्धिप्रतिषेधः ॥ ८ ॥

भा. अ-प्रतिषेधे । **विः । यम् । दम् । तः । रः । सोमो य उत्तमं हविः । मधुप्रियम् । मद्यं मदम् । मदच्युतः । सूर्यं परः ।** एतेषु अभिगीतात्परस्य वृद्धिप्रतिषेधः ॥ ८ ॥

दी. अ-कारः प्रतिषेधे । **विः । यम् । दम् । तः । रः ।** एतेषु अभिगीतात् परात् परस्य वृद्धिप्रतिषेधः । **परीतोषिंचतासुतम् ।** ए । (ऊ. द. १८६) इत्याभीशवाद्ये **सोमोयऊऽ२त्ताँमँहाविः ।** अत्र **विर्**-इत्यन्त्याक्षरस्य अवृद्धिः । **पुनान** (ऊ. अ. ५९६) इत्याभीशवोत्तरे द्वितीयायाम् **उत्सोदेवोहिरण्यए** इत्यस्यां **नऊधर्दिवियन्माधुप्रायम् ।** अत्र **यम्**-इत्यन्त्यस्य अक्षरस्य अवृद्धिः । **अभिसोमासआयवए । ए ।** (ऊ. अ. ६३५) इत्याभीशवोत्तरे **पवन्तेमाऽ३दायम्मादम् ।** अत्र **दम्**-इत्यन्त्याक्षरस्य अवृद्धिः । अत्रैव द्वितीयायां **मत्सराःसोऽ३मादच्युतः ।** अत्र **तः**-इत्यन्त्याक्षरस्य अवृद्धिः । **तवाहँसोमरारण ए । ए ।** (ऊ. द. ७०) इत्याभीशवोत्तरे तृतीयायां **दुहानोबभ्रऊधनि-**

1. L¹My³ om. अत्र ··· इत्येवमादिषु
7. A³L²B⁴ अवृद्धिः for वृद्धिप्रतिषेधः
13. L¹MY³ आभीशवे for आभीशवाद्ये; L¹My³ om. अत्र···· अवृद्धिः; L¹My³ om. पुनानः ··· द्वितीयायम्
14. L¹My³ इत्याभीशवे for इत्यस्यां
16. L My³ °शवे for °शवोत्तरे; L¹MY³ अत्र ... द्वितीयायां
17 L¹MY³ om. अत्र ··· अवृद्धिः
18. L¹My³ om. तवाहं ··· तृतीयायां

ए। इत्यस्यां तपन्तमतिम्रायम्पारः। अत्र रः-इत्यन्त्यस्याक्षरस्य अवृद्धिः॥ ८॥

नौधस आइन्द्रान्तात्॥ ९॥

वि. **नौधसे** (ऊ. द. ६) आइन्द्रान्तात् परस्याक्षरस्य वृद्धिः। आइन्द्रेति किम्? संहिते स्वादिष्ठायां (ऊ. द. ८) **आऽ२३इन्द्रा। याऽ२पा**॥ ९॥

भा. **नौधसे** आइन्द्रान्तात् परस्य वृद्धिप्रतिषेधः॥ ९॥

दी. **नौधसे** आइन्द्रान्तात् परस्याक्षरस्य वृद्धिः। **आऽ२३इन्द्राम्**। इत्यान्द्रापर्वे। **ताऽ२३म्। वोदस्समृती** (ऊ. प्रा. ८१६) इति **नौधसे आऽ२३भी। वात्सन्न। आऽ२३-इन्द्राम्। गाइर्भिन्नवा**। अत्र वा-इति गा-इति आइन्द्रात्परस्याक्षरस्य वृद्धिः॥ ९॥

अ-तं-नपु-णः॥ १०॥

वि. & भा. अः प्रतिषेधे। **तम्। न पु। णः। क्षुमन्तम्** (ऊ. प्रा. ८१६) **गिरिन्नपु** (ऊ. प्रा. ८१६) **शिक्षाणः** (ऊ. सं. ३४३) एतेषाम् आइन्द्रान्तात् परेषां वृद्धिप्रतिषेधः॥ १०॥

दी. अकारः प्रतिषेधे। **तम्। नपु। णः।** एतेषु आइन्द्रात्परस्य वृद्धि-प्रतिषेधः। **ताऽ२३४म्** (ऊ. द. ६) इति **नौधसे** [तृतीयायां] **क्षूऽ२३मा। तंवा-जम्**। अत्र **तम्**-इति आइन्द्रात्परस्य अवृद्धिः। अत्रैव द्वितीयायां **गाऽ२३रीम्। न पुरु-भोऽ२३४वा**। अत्र **न**-इत्याइन्द्रात्परस्यावृद्धिः। **आऽ२३४इ। द्रक्रतुन्नआ** (ऊ. सं. ३४३)

---

1. L^{1}My^3 आभीशवे for अस्यां: L^{1}My^3 om. अत्र ... अवृद्धिः
3. A$^{1-2}$KM$^{1-2}$S$^{1-2}$r. om. नौधसे; A$^{1-2}$KS^{2}1M^2 after इन्द्रान्तात् add द्वयात्; A^{1}M$^{1-1}$ इन्द्रान्ता द्वयात् S^1 इन्द्राद्वयात् for इन्द्रान्तात्
8. My^{3}L^1 om. अत्र .... वृद्धिः
10. My^1 om. अः.... णः।
11. PA^{3}L^{2}V^{2}B^{4}r एतेषु for एतेषाम्; PA^{3}L^{2}V^{2}B^4 A^{1}M$^{1-2}$T परस्य for परेषाम्
14. My^{3}L^1 om. अत्र ··· द्वितीयायां
16. My^{3}L^1 om. अत्र ... अवृद्धिः

इति नौधसे **शाऽ२३इश्वा । णो अस्मिन्** । अत्र **णो**-इति आइन्द्रात्परस्यावृद्धिः ॥ १० ॥

विच्छन्दसि च पूर्वात् ॥ ११ ॥

वि. & भा च-शब्दात् प्रतिषेधाधिकारोऽनुवर्तते । **विच्छन्दसि च पूर्वात्** तंत्रोदसकककुबुत्तरादिषु । नौधसे **आइन्द्रात्परस्य** वृद्धिप्रतिषेधः ॥ ११ ॥

दी. च-शब्दात् प्रतिषेधाधिकारोऽनुवर्तते । **विच्छन्दसि** बृहतीछन्दसोऽन्यच्छन्दस्सु । नौधसे **पूर्वात्** आइन्द्रात्परस्य वृद्धिप्रतिषेधः । **पूऽ२३४ । रोजितीवोआ । धासाः** (ऊ. क्षु. ८५८) इति नौधसे **आऽ२३४पाः । श्वा** । अत्र **श्वा**-इत्यवृद्धिः । **आऽ२३४इ । दुरश्वोनक्** (ऊ. क्षु. ८५१) इति नौधसे **सोऽ२३मामु । वि** । अत्र **वि**-इत्यस्यावृद्धिः ॥

लेयप्रस्तावसदृक्तुरीयँ शिप्रम्-अति-सुताद्ययोः ॥ १२ ॥

वि. कालेयप्रस्तावसदृशेषु सामसु चतुर्थमक्षरं वर्धते । नान्यत्र ॥ १२ ॥

भा. कालेयप्रस्तावसदृशेषु सामसु चतुर्थमक्षरं वर्धते । **मदेषु शिप्रम्** (ऊ. द. ७) कालेये । **परिधीँरति** (ऊ. अ. ६४९) गौङ्गवपौरुहन्मनद्वैगतेषु । **सुतासोमाद्ययोश्च** । लेयप्रस्तावसदृशां मध्ये एतेष्वेव चतुर्थमक्षरं वर्धते। नान्यत्र ॥ १२ ॥

दी. तरोभिर् (ऊ. द. ७) इति **कालेये** तृतीयायां **मदेषूऽ२३शाइप्रमन्धसाः** इति **कालेयप्रस्तावसदृशेषु** सामसु प्रस्तावस्य चतुर्थमक्षरं वर्धते । अत्र **शाइ**-इति तुरीयमक्षरं

---

1. MY^3L^1 om. अत्र .... अवृद्धिः
3. $A^{1-2}KM^{1-2}S^1$ om. चशब्दात्; $A^{1-2}M^{1-2}$ विच्छन्दस्सु for विच्छन्दसि; A^3 पूर्वस्मात्, L^2B^4 पूर्वत्वात् for पूर्वात्
4. $PA^3L^2V^2B^4$ om. तंत्रो ... नौधसे
7 & 8. L^1My^3 om. अत्र ... अवृद्धिः
11. A^{2-1} शिप्रमन्धसः, $PA^3V^2B^4$ शिप्र for शिप्रम्
12. $TS^{1-2}K$ द्वैगतसाध्रेषु for द्वैगतेषु; $A^{1-1}M^{1-2}$ after द्वैगतेषु add: साध्रेषु; $PA^3V^2B^4L^2$ om. च
13. $PA^3V^2B^4L^2$ सार्वत्रिकं लक्षणं नैतत् । एतेष्वेव for लेय ... नान्यत्र
14. L^1My^3 om. तरोभिर् .... तृतीयायां
15. L^1My^3 शाइप्र अति for अत्र .... वर्धते । एवं

वर्धते । एवं गौङ्गवपौरुहन्मनद्वैगतेषु । तवाहँसो (ऊ. अ. ६४९) इत्यादिषु द्वितीयायां परिधाऽ३इँरातिताः इहाइ । अत्र रा-कारस्य तुरीयस्य वृद्धिः । सुतासोमाद्ययोः । सुतासोऽऽ३माधुमत्तमाः (ऊ. स. ७७१) । अत्र मा-कारस्य तुरीयस्य वृद्धिः । अत्रैव द्वितीयायाम् इन्दुराऽ३इन्द्रायपवताइ । अत्र न्द्रा-कारस्य तुरीयस्य वृद्धिः । सार्वत्रिकं लक्षणं नैतत् । एतेष्वेव ॥ १२ ॥

थादेश्च परम् ॥ १३ ॥

वि. **कालये** उद्गीथादेः **परं** वर्धते । उद्गीथद्वितीयस्य **वृद्धिरित्यर्थः** ॥ १३ ॥

भा. कालेयसाम्नि उद्गीथात्परस्य वृद्धिः । उद्गीथद्वितीयं वर्धत इत्यर्थः ॥ १३ ॥

दी. कालेये साम्नि **उद्गीथात् परस्य** वृद्धिः । उद्गीथस्य द्वितीयमक्षरं वर्धत इत्यर्थः । **तरोभिर्व** (ऊ. द. ७) इति कालेये द्वितीयायां **मदाइषुशाइ** । अत्र **दा**-इति उद्गीथद्वितीयस्य वृद्धिः ॥ १३ ॥

नोत्तरयोर्व्रात्ये ॥ १४ ॥

वि. & भा. व्रात्यस्तोमकालेये पवस्वमधुमत्तमाया**मुत्तरयो**स्तोत्रीययोरुद्गीथादेः परस्य वृद्धिप्रतिषेधः ॥ १४ ॥

दी. **व्रात्यस्तोमे** क्रतुविशेषे **पवस्वाऽ३मधुमत्तमाः** (ऊ. ए. ३९९) इति **कालेये उत्तरयोः** स्तोत्रीययोरुद्गीथादेः परस्य वृद्धिर्न भवति । द्वितीयायां **यस्यतेपाइ** । तृतीयायां

---

1. S^4 trans. एवं after द्वैगतेषु ।; L^1My^3 om. इत्यादिषु द्वितीयायां
2. L^1My^3 om. अत्र .... वृद्धिः
3. L^1My^3 om. अत्र मा-.... द्वितीयायां
4. L^1My^3 om. अत्र .... वृद्धिः
7. $A^3L^2KT^1$ om. अर्थः
10. L^1My^2 om. तरोभिर्व ... द्वितीयायां; L^1MY^3 om. अत्र ... वृद्धिः
13. A^1M^{1-2} om. व्रात्य....०प्रतिषेधः; A^1KS^{1-2} गीथद्वितीयस्य, T उद्गीथद्वितीयस्य for उद्गीथादेः परस्य
14. A^3V^2 अवृद्धिः for वृद्धिप्रतिषेधः
16. L^1My^3 om. भवति । द्वितीयायां ... तृतीयायां

ससुप्रकाइ । अत्र स्य-इति सु-इति उद्गीथद्वितीयस्यावृद्धिः ॥ १४ ॥

ष्कले योनौ ॥ १५ ॥

वि. & भा. पौष्कले योनावेव उद्गीथादेः परस्य वृद्धिः ॥५१ ॥

दी. पौष्कले योनावेव उद्गीथादेः परस्य वृद्धिः । **वृषाणंया** (ऊ. द. १०) अत्र षा-कारस्य उद्गीथद्वितीयस्य वृद्धिः। **नोत्तरयोः** । द्वितीयायाम् । **इन्द्रायपा** । तृतीयायां **ग्राभंगृभ्णा** । अत्र न्द्रा-इति भँ-इति इत्येतयोरुद्गीथद्वितीयस्य अवृद्धिः ॥ १५ ॥

हव्ये च ॥ १६ ॥

वि. & भा. वैतहव्ये च येनावेव उद्गीथादेः परस्य वृद्धिः ॥४ ॥

दी. पाऽ५न्तम् (ऊ. द. १८) इति **वैतहव्ये च योनावेव** उद्गीथादेः परस्य वृद्धिः । **आइन्द्रामभाइ** । अत्र न्द्रा-कारस्य उद्गीथद्वितीयस्य वृद्धिः । **नोत्तरयोः** । द्वितीयायां **पूरुहूताम्** । तृतीयायाम् **आइन्द्रइन्नो** । अत्र रु-कारस्य न्द्र-कारस्य एतयोरुद्गीथद्वितीयस्य अवृद्धिः ॥ १६ ॥

उपाशि-परिप्रधन्व-सखा-प्राणा-तृचयोः ॥ १७ ॥

वि. & भा. वृद्धिप्रसङ्गाद्वैतहव्यस्य ग्रहणं योन्यधिकारार्थम् । पौष्कले **उपशिक्षादिषु** उद्गीथद्वितीयस्य वृद्धिः ॥ १७ ॥

---

1. L[1]My[3] om. अत्र ... अवृद्धिः
3. A[1]M[1-2] om. पौष्कले .... वृद्धिः; PA[3]L[2] om. उद्गीथादेः परस्य वृद्धिः
4. L[1]My[3] om. अत्र ... वृद्धिः
5. L[1]My[3] om. द्वितीयायाम् and तृतीयायां
6. L[1]My[3] om. अत्र ... अवृद्धिः
10. L[1]My[3] om. अत्र न्द्राकारस्य .... ०द्वितीयस्य वृद्धिः
13. Kधनु for धन्व; A[1]M[1-2] om. ०धन्व०
14. My[1] om.० वृद्धि०
15. A[1]KA[2]M[1-2]TS[1-2] ०द्वितीयं वर्धते for द्वितीयस्य वृद्धिः

दी. वृद्धिप्रसङ्गाद्वितहव्यस्य ग्रहणं योन्यधिकारार्थम् । पौष्कले उपशिक्षादिषु उद्गीथद्वितीयस्य वृद्धिः । **उपशीऽ३क्षाप** (ऊ. प्रा. ८१४) इति **पौष्कले मियासमा** । अत्र **या**-इति । **परिप्राऽ३ध** (ऊ. प्रा. ८९८) इति पौष्कले **यसो** । अत्र **सो**-इति । **सखाप्राणातृचयोः** । **सखायाऽ३आनि** (ऊ. सं ३४०) इति **पौष्कलतृचे** प्रथमायां **पुनानाया** । द्वितीयायां **सुजातागा** । तृतीयायां **यथाशर्द्धा** । **प्राणाशाऽ३इशुः** (ऊ. सं ३६४) इति **पौष्कले** प्रथमायां **हिन्वन्नृता** । द्वितीयायाम् **अभाक्तयात्** । तृतीयायां **पृष्ठाइषुवाइ** । एतेषामुद्गीथद्वितीयस्य वृद्धिः ॥ १७ ॥

शने च स्वासु ॥ १८ ॥

वि. & भा. **औशने स्वासु** तृचे उद्गीथद्वितीयस्य **वृद्धिः** । **प्रतु द्रव** (ऊ. द. ४) इत्यत्र ॥ १८ ॥

दी. **प्रातू** (ऊ. द. ४) इति **औशने स्वासु** तृचे उद्गीथद्वितीयस्य **वृद्धिः** । **द्रवापरिकोशाम्** । अत्र **वा**-इति । द्वितीयायां **युधाऽ२पवतेदाइ** । अत्र **धा**-इति । तृतीयायां **विप्राऽ२पुरएता** । अत्र **प्रा**-इति । एतेषामुद्गीथद्वितीयस्य वृद्धिः ॥ १८ ॥

इनोराद्यायां च विकल्पे ॥ १९ ॥

वि. & भा. **इनोराजन्** (ऊ. ए. ४१४) **इत्यौशने आद्यायां स्तोत्रीयायां विकल्पे**

---

1. My³ om. वृद्धिः० My³R करणार्थम् for कारार्थम्
2. L¹My³ om. अत्र या-इति
3. L¹MY³ om. अत्र सो-इति
4. S⁴ पौष्कले for पौष्कलतृचे; L¹My³ om. प्रथमायां and द्वितीयायां
5. L¹My³ om. तृतीयायां and प्रथमायां
6. L¹My³ om. द्वितीयायां and तृतीयायां; L¹My³ om. एतेषाम् .... वृद्धिः
9. A¹⁻²M¹⁻²S¹⁻³T My¹ trans. स्वासु before औशने and om. तृचे; PA³L²V²B⁴ om. प्रतुद्रव इत्यत्र
12. My³L¹ om. अत्र ··· द्वितीयायां and अत्र ··· तृतीयायां
13. L¹My³ om. अत्र ... वृद्धिः
15. A²PB⁴L²A³S² विकल्प for विकल्पे

विषये उद्गीथद्वितीयस्य वृद्धिः ॥ १९ ॥

दी. आइनाः (ऊ. ए. ४१४) इत्यौशने **आद्यायां** स्तोलीयायां **विकल्पविषये** उद्गीथादेः परस्य वृद्धिः । **राजन्नरताइः** । **राजानरताइः** । अत्र विकल्पे जा-इति उद्गीथ-द्वितीयस्य वृद्धिः ॥ १९ ॥

हिष्ठीये च ॥ २० ॥

वि. & भा. **प्रमँहिष्ठीये च** उद्गीथादेः परस्य वृद्धिः ॥ २० ॥

दी. **प्रमँहाऽ३इष्ठायगायता** (ऊ. द. ६५) इति **प्रमँहिष्ठीये** उद्गीथादेः परस्य वृद्धिः । **ऋताव्नेऽ२** । अत्र **ता**-इति । तृतीयायां **क्रुवाइन्नोऽ२** । अत्र **वा**-इति । एतयोरुद्गीथद्वितीयस्य वृद्धिः ॥ २० ॥

अम ॥ २१ ॥

वि. प्रमंहिष्ठीये मध्यमस्तोलीयायां वृद्धिप्रतिषेधः ॥ २१ ॥

भा. अकारः प्रतिषेधे । **प्रमँहिष्ठीये च मध्यमायां** स्तोलीयायाम् उद्गीथ-द्वितीयस्य वृद्धिप्रतिषेधः ॥ २१ ॥

दी. अकारः प्रतिषेधे । **प्रमंहिष्ठीये** मध्यमस्तोलीयायामुद्गीथद्वितीयस्य वृद्धि-प्रतिषेधः । **आवँसाताऽ२इ** । अत्र **वँ**-इति उद्गीथद्वितीयस्य अवृद्धिरित्यर्थः ॥ २१ ॥

प्र-तृ-जा-प्लुतो वलोपश्च द्वि-तृ-त-नीचः फे ॥ २२ ॥

वि. **सफे प्रियंदेवायाम्** (ऊ. ए. ४६७) इति **ऋतेन य ऋतजातो विवावृधे**

---

1. PA[3]L[2]V[2]B[4] उद्गीथादेः परस्य for उद्गीथद्वितीयस्य
3. L[1]My[3] om. अत्र … वृद्धिः
6. A[1-2] KM[1-2] IS[1-2] उद्गीथद्वितीयस्य for उद्गीथादेः परस्य
8. L[1]My[3] om. अत्र … तृतीयायां; L[1]. om. अत्र … वृद्धिः
12. P ०षेधार्थः for ०षेधे
15. L[1]My[3] om. अत्र … अवृद्धिरित्यर्थः

इत्यत्र प्रथमतृतीययोर्विकल्पयोर्जाशब्दः प्लुतो भवति । प्रथमतृतीये इत्यर्थः । व-लोपश्च इयेनद्वितीयतृतीययोः विकल्पयोस्तशब्दो नीचैर्भवति ॥ २२ ॥

भा. प्रियंदेवायाम् ऋतेन य ऋतजातो विवावृधे इत्यत्र सफे (ऊ. ए. ४६७) प्रथमतृतीययोर्विकल्पयोः जा-शब्दः प्लुतो भवति । व-कारलोपश्च तयोरेव विकल्पयोः । द्वितीय-तृतीययोर्विकल्पयोस्तशब्दो नीचो भवति ॥ २२ ॥

दी. आसोताऽ३परि (ऊ. ए. ४६७) इति सफे तृतीयायां प्रीयन्देऽ३वाय इत्यस्याम् ऋतेन य ऋतजातो विवावृधे इत्यत्र प्रथमतृतीययोः विकल्पयोः जा-कारः प्लुतो भवति । तयोरेव व-कारलोपश्च । द्वितीयतृतीययोः विकल्पयोस्तशब्दो नीचो भवति । प्रथमे विकल्पे तृतीये विकल्पे च । तजातोऽ३वाऽ३इ । अत्र जा-कारस्य द्वितीयस्य प्लुतो भवति । वृद्धिरित्यर्थः । अत्रैव व-कारलोपश्च भवति । तृतीयविकल्पे च तजातोऽ३वा-ऽ३इवाऽ३ । अत्र पूर्ववद् वृद्धिर्लोपश्च । द्वितीयायां तजातोवाऽ३इवाऽ३ । अत्र त-कारस्य नीचो भवति । अत्र व-कारलोपः । अत्र जा-इति द्वितीयस्य अवृद्धिश्च भवतीत्यर्थः ॥ २२ ॥

हाति कृष्टात् ॥ २३ ॥

वि. & भा. बृहति कृष्टात् परस्य वृद्धिः । उपायद्वितीयस्येत्यर्थः ॥ २३ ॥

दी. बृहत्साम्नि उपद्रवादौ कृष्टात् कर्षणात् परस्याक्षरस्य वृद्धिः । हुऽ२ आर्वा-ऽ२३४ (र. द. ५) इत्यादिषु ॥ २३ ॥

अवृद्धः श्येने जिग्यु ॥ २४ ॥

वि. श्येनबृहति कृष्टात् परस्य वृद्धिप्रतिषेधः । नाऽ२जिग्यूऽ२३४षाइ ॥ २४ ॥

---

6. L[1]My[3] trans. इति सफे after देऽ३वाय and om. आसोता .... तृतीयायां
7. L[1]My[3] om. इत्यस्याम्
8. L[1]My[3] प्रथमे ... भवतीत्यर्थः ॥ (L. 12)
14. A[3]PV[2]B[4]L[2] प्रतिहारस्य for उपायद्वितीयस्य
17. AM[1-2]TS[1] श्येने न for श्येने

भा. **श्येने** बृहति क्रुष्टात् परस्य **जिग्यु**-शब्दस्य वृद्धिप्रतिषेधः ॥ २४ ॥

दी. **श्येने** श्येनयज्ञे । **त्वामिद्धि** (र. द. ५) इति बृहत्साम्नि क्रुष्टात् परस्य जिग्यु-शब्दस्य वृद्धिप्रतिषेधः । **नाऽ२जिग्यूऽ२३४** । अत्र क्रुष्टात् परस्यावृद्धिः ॥ २४ ॥

यमं-वोबृ ॥ २५ ॥

वि. संधिस्तोत्रे च बृहति **पिबतं सोम्यं मधु** (र. प्रा. १४७) **श्रवो बृहत्** (र. प्रा. १४८) इति च क्रुष्टात्परस्य वृद्धिप्रतिषेधः ॥ २५ ॥

भा. संधिस्तोत्रे च बृहति **पिबतं सोम्यं मधु** (र. प्रा. १४७) **अस्मेधेहि श्रवो** ॥ **बृहत्**- (र. प्रा. १५८) अनयोः क्रुष्टात्परस्य वृद्धिप्रतिषेधः ॥ २५ ॥

दी. **औहोइमाउवान्दिविष्टयाऽ३ए** (र. प्रा. १४७) इति बृहत्साम्नि तृतीयायाम् **औहोइचोदाऽ३ए** इत्यस्यां क्रुष्टात्परस्य **यंम**-शब्दस्य वृद्धिप्रतिषेधः । **माऽ२यम्माऽ२३४** । अत्र क्रुष्टात्परस्यावृद्धिः । **अग्ने विवस्वदुषसः** (र. प्रा. १४८) इति बृहत्साम्नि तृतीयायाम् **औहोअग्नाऽ३ए** इत्यस्यां क्रुष्टात्परस्य **वोबृ**-शब्दस्य वृद्धिप्रतिषेधः । **श्राऽ२वोबृऽ२३४** । अत्र क्रुष्टात्परस्यावृद्धिः ॥ २५ ॥

प्रत्यवरोहे च ॥ २६ ॥

वि. बृहति तृतीयायां **प्रत्यवरोहे** विषये क्रुष्टात्परस्य वृद्धिप्रतिषेधः । **त्वमग्ने** (र. सं. ६४) बृहति **षूऽ२ सुक्राऽ२३४** । इत्यादि प्रत्यवरोहः ॥ २६ ॥

भा. बृहति स्तोत्रीयोत्तमायां प्रत्यवरोहविषये क्रुष्टात्परस्य वृद्धिप्रतिषेधः ॥ २६ ॥

---

3. L¹MY³ om. अत्र ... अवृद्धिः
5. A¹⁻²M¹⁻²s¹ trans. संधिस्तोत्रे .... ०प्रतिषेधः (l. 6) after प्रत्यवरोहः (l. 16)
7. PV² before श्रवो adds: अस्मे धेहि;
9. L¹My³ trans. बृहत्साम्नि after दाऽ३ए and om. औहो .... इति
10. L¹MY³ om. इत्यस्यां
11 & 12. s¹ om. अत्र ... अवृद्धिः
15. A³ नाऽ२जाइ । नाऽ२ जिग्यूऽ२३ एमवादीनि for त्वमग्ने ... प्रत्यवरोहः

दी. बृहत्साम्नि स्तोत्रोत्तमायां प्रत्यवरोहविषये क्रुष्टात्परस्य वृद्धिप्रतिषेधः । नाऽऽ२- जिग्यूऽ२३४ (र. द. ५) । अत्र क्रुष्टात्परस्यावृद्धिः । प्रत्यवरोहस्य लक्षणमुक्तं निदाने- बृहतो रोहाः । वृणीमहा । मदाइषु वान्तौ पूर्वौ वृद्धौ निधनोपाये च द्वितीयमक्षरं वर्धयेत् स तृतीयः । तदुपरिष्टात् स्तोत्रस्य प्रत्यवरोहेत् (नि. सू. २. ९) इति ॥ २६ ॥

शाक्त्ये च ॥ २७ ॥

वि. & भा. शात्तये च क्रुष्टात् परस्य वृद्धिप्रतिषेधः । च-शब्दात् प्रतिषेधाधिकारोऽनुवर्तते । प्रवइन्द्रायाम् ॥ २७ ॥

दी. प्रवइन्द्राऽ२ (ऊ. द. १९) इति शात्त्ये । च-कारात् क्रुष्टात् परस्य वृद्धिप्रतिषेधः । प्रवाऽ२इन्द्रा । हराऽ२अश्वा । एवमादिषु ॥ २७ ॥

न य-म ॥ २८ ॥

वि. सखायास्सा । चक्रमासा । (ऊ. द. १९) एतयोर्वृद्धिः ॥ २८ ॥

भा. न प्रतिषेधे । सखायास्सो । चकृमासा । इति क्रुष्टात् परस्य वृद्धिरेव भवति ॥

दी. न प्रतिषेधे । शाक्त्ये सखायस्सो- । चकृमासा- इति च क्रुष्टात्परस्य वृद्धिरेव भवति । सखाऽ२यास्सो अत्र या-कारस्य क्रुष्टात् परस्य वृद्धिरित्यर्थः । द्वितीयायां चकृऽ२मासा । अत्र मा-कारस्य क्रुष्टात्परस्य वृद्धिः ॥ २८ ॥

जये हारात् ॥ २९ ॥

वि. & भा. यौधाजये प्रतिहारात् परं वर्धते ॥ २९ ॥

---

2. L[1]My[3] अत्र … अवृद्धिः S[4] after अवृद्धिः adds: एवमादिषु
3. L[1]My[3] बृहतौ for बृहतो
6. A[1-2]M[1-2]S[1-2]T om. शाक्त्ये च; AP[2]V[2]L[2]B[4] om. चशब्दात् … °वर्तते । …इन्द्रायां ॥
14. L[1]My[3] om. अत्र …इत्यर्थः
15. L[1]My[3] om. अत्र … वृद्धिः
17. pA[3]L[2]3[4]V[2] परस्य वृद्धिः for परं वर्धते

दी. **पुनाऽ३१** (ऊ. द. ३) इति **यौधाजये प्रतिहारात्** परस्य वृद्धिः। **उत्सा-ऽ२ः । दाइवोऽ२** । अत्र **दा-** इति प्रतिहारात् परस्य वृद्धिः ॥ २९ ॥

अ-विता-षभो-रिया-चत ॥ ३० ॥

वि. **दिवो न वारं सविता** (ऊ. ए. ३८०) **यूथेन निष्ठा वृषभो** (ऊ. ए. ३८०)। **स त्वं नो वीर वीर्याय** (ऊ. ए. ४००) **पाहि चत-** (ऊ. ए. ४१३) इत्यत्र यौधाजये प्रतिहारात् परस्य वृद्धिप्रतिषेधः ॥ ३० ॥

भा. अः प्रतिषेधे । **विता । षभो । रिया । चत । दिवोन वारंसविता** (ऊ. ए. ३८०)। **यूथेन निष्ठा वृषभो** (ऊ. ए. ३८०)। **स त्वं नो वीर वीर्याय** (ऊ. ए. ३८०) **पाहि चत-** (ऊ. ए. ४१३) [एतेषां प्रतिहारात्परस्यावृद्धिः] ॥ ३० ॥

दी. अकारः प्रतिषेधे। **विता । षभो । रिया । चत** । एतेषु **यौधाजये** प्रतिहारात् परस्य वृद्धिप्रतिषेधः । **प्रताऽ३२म्** । **पीऽ३यू** । **षम्** (ऊ. ए. ३८०) इति यौधाजये द्वितीयायां **रँसाऽ२** । **विताऽ२** । अत्र **वि**-इति। प्रतिहारात् परस्य अवृद्धिः । तृतीयायां **स्थावाऽ२** । **षभोऽ२** । अत्र **ष**-इति । **तुवेऽ३१** (ऊ. ए. ४००) इति **यौधाजये रवाऽ२इ** । **रियाऽ२** । अत्र **रि**-इति । **पाहाऽ३१इ** (ऊ. ए. ४१३) इति यौधाजये **पाहाऽ२इ** । **चताऽ२** । अत्र **च**-इति। एतेषां प्रतिहारात् परस्यावृद्धिः ॥ ३० ॥

वने हारादिः ॥ ३१ ॥

वि. & भा. **च्यावने प्रतिहारादिर्** वर्धते । अभिद्युम्नायामुत्तमपादादिरित्यर्थः ॥

दी. **अभाऽ२३४इ । द्युम्नम्** (ऊ. द. ९१) इति **च्यावने प्रतिहारादिर्** वर्धते ।

---

2. L^1My^3 om. अत्र … वृद्धिः
12. L^1yM^3 द्वितीयतृतीययोः for द्वितीयायां; L^1MY^3 om. अत्र ….अवृद्धिः। तृतीयायां
13. L^1MY^3 om. अत्र ष इति
14. L^1My^3 om. अत्र रि इति
15. L^1My^3 om. अत्र … अवृद्धिः
17. $A^3PB^4V^2L^2$ इत्यत्र for उत्तमपदादिरित्यर्थः

वा[१]इको[२]शा[२]ऽ३म्माऽ३ । अत्र वा-इति प्रतिहारादेर्वृद्धिः ॥ ३१ ॥

अनेकर्चे दादौ ॥ ३२ ॥

वि. **एकर्चे** च्यावने **पादादौ** प्रतिहारदिर्न **वर्धते** ॥ ३२ ॥

भा. **अन्**-प्रतिषेधे । **एकर्चे** च्यावने यः प्रतिहारः पादादौ तस्य वृद्धिप्रतिषेधः । प्रतिहारद्वित्वात् पादादिग्रहणम् ॥ ३२ ॥

दी. अन्-प्रतिषेधे । **प[३]वाऽ२३४** । **स्व[५]म** (ऊ. ए. ४९९) इति **एकर्चे** च्यावने यः प्रतिहारः पादादौ तस्य वृद्धिप्रतिषेधः । **म[१]हाइ[२]यू[२]ऽ३क्षाऽ३** । अत्र **मा**-इति प्रतिहारादिर्न वर्धते । प्रतिहारद्वित्वात् पादादिग्रहणम् ॥ ३२ ॥

भासे च नौ ॥ ३३ ॥

वि. **गायत्रीभासे च योनावेव** पादादिस्थस्य प्रतिहारादेर्वृद्धिः ॥ ३३ ॥

भा. दादाविति योगविभागः । **गायत्रीभासे च योनावेव पादादिस्थस्य** प्रतिहारस्य वृद्धिरुच्यते । अस्यापि प्रतिहारद्वित्वम् ॥ ३३ ॥

दी. दादाविति योगविभागः । **य[५]स्ते[२]** । **मा[२]ऽ३दो[४]** (ऊ. अ. ५६४) इति गायत्रीभासे च योनावेव पादादिस्थस्य प्रतिहारस्य वृद्धिरुच्यते । **दाइवाऽ२३** । अत्र **दा**-इति प्रतिहारादेर्वृद्धिः । भासस्यापि प्रतिहारद्वित्वम् । **च-शब्दानुकर्षात्** ॥ ३३ ॥

रश्मे च ॥ ३४ ॥

---

1. L¹My³ om. अत्र ··· वृद्धिः
8. S⁴ after °ग्रहणम् dds: प्रतिहारविकल्पत्वात् पादादिग्रहणम्
9. PL²B⁴V² before भासे adds: दादौ
12. A³ after °द्वित्वम् adds: प्रतिहारादेर्वृद्धिः । चशब्दानुकर्षात्
14. L¹My³ om. अत्र ··· वृद्धिः
15. S⁴ °विकल्पम् for °द्वित्वम्
16. KTS¹ रश्च्ये for रश्मे; S⁴ तैरश्मे for रश्च्ये

वि. तैरश्चे योनावेव प्रतिहारादिर्वर्धते ॥ ३४ ॥

भा. तैरश्चे च योनावेव प्रतिहारादेर्वृद्धिः । च-शब्दानुकर्षात् ॥ ३४ ॥

५र २ ४ ५ ५
दी. श्रुधीहाऽ३वन्तिरश्चिया: (ऊ. द. ६७) इति तैरश्चे योनावेव प्रतिहारादे-
१
र्वृद्धिः । च-शब्दानुकर्षणात् । रायास्पूर्धीऽ३ । अत्र राया-इति प्रतिहारादेर्वृद्धिः ॥

नित्रे च ॥ ३५ ॥

वि. & भा. पूर्वे जनित्रे च योनावेव प्रतिहारादेर्वृद्धिः ॥ ३५ ॥

५ २ ४५ ५
दी. नहि वाऽ३श्चारमश्चना (ग्रा. गे. ६. १. २४१. १) इति पूर्वे जनित्रे
१ २ १
योनावेव प्रतिहारादेर्वृद्धिः । वाइश्चेऽ३होइ । अत्र वा-इति वृद्धिः ॥ ३५ ॥

त्र्यन्ते च त्वाष्ट्रीसाम्नि ॥ ३६ ॥

वि. त्रिणिधने त्वाष्ट्रीसाम्नि योनावेव प्रतिहारादिर्वर्धते ॥ ३६ ॥

भा. योनावेव प्रतिहारादेर्वृद्धिः ॥ ३६ ॥

२र र
दी. सुतासोमा (ऊ. द. ६४) इति त्र्यन्ते त्वाष्ट्रीसाम्नि च योनावेव प्रतिहारादे-
१ २ २
र्वृद्धिः । दाइवानुगच्छाऽ३न्तुवाऽ३: । अत्र दा-इति प्रतिहारादेर्वृद्धिः ॥ ३६ ॥

हव्ये चायोनौ ॥ ३७ ॥

---

3. S[4] तैरश्च्ये for तैरश्चे
4. L[1]My[2] om. अत्र .... वृद्धिः
6. My[1]Ks[1] पूर्वे for पूर्वे; A[1-2]M[1-2] trans. पूर्वे .... वृद्धिः after ... वृद्धिः (l. 11)
8. L[1]My[3] om. अत्र .... वृद्धिः
11. after वृद्धिः ॥ A[1-2]M[1-2]S[1-2]T adds: तिथे च ॥ दैवातिथे च योनावेव प्रतिहारादेर्वृद्धिः ॥ All the southern MSS, except K, have the sutra तिथे च । and the commentary thereon. The Ms K has readings that often corresponds to the so called northern version. In such cases we have always preferred the readings of K. Rāmakṛṣna-dikṣita also has not taken notice of this sūtra. Thus तिथे च appears to be an interpolation and hence, has been omitted.

वि. & भा. **वैतहव्ये** च योनिवर्जं प्रतिहारादिर्वर्धते ॥ ३७ ॥

दी. **अयोनौ** योनिवर्जम् । **पाऽ५न्तम्** (ऊ. द. १८) इति **वैतहव्ये** द्वितीयायां **पूऽ५रुहू** इत्यस्यां प्रतिहारादेर्वृद्धिः । **आइन्द्रइतिब्र** । अत्र **आइ**-इति प्रतिहारादेः **वृद्धिः** । एवमादिषु ॥ ३७ ॥

मत्स-रि-शब्दाः स्वासूत्तरयोर्दैव्ये ॥ ३८ ॥

वि. प्रतिहाराधिकारो निवृत्तः । **स्वासु वामदेव्ये** (ऊ. द. ५) **उत्तरयोः** स्तोत्रीययोः **मँहिष्ठो मत्स-** इत्यत्र **मत्स-शब्दौ विताजरि** इत्यत्र **रि**-शब्दश्च योनिवद्भावाद-वृद्धिप्राप्ता वर्धन्ते ॥ ३८ ॥

भा. **मत्स** । **रि** । एते शब्दाः **स्वासु वामदेव्ये उत्तरयोः** स्तोत्रीययोः **वर्धन्ते** ॥

दी. **काऽ५या** (ऊ. द. ५) इति **स्वासु वामदेव्ये उत्तरयोस्तोत्रीययोः मत्स** । **रि** । इत्येते शब्दाः वर्धन्ते । **काऽ५स्त्वा** । इत्यस्यां **मा** । **हिष्ठोमात्सादन्ध** । अत्र **मा**-इति **त्सा**-इत्येतयोः वृद्धिः । **आऽ५मी** इत्यस्याम् । **आ** । **विताजराइतृ** । अत्र **रा**-इति वृद्धिः । अत्र **स्वासु**-शब्देन योनिरुत्तराद्वयं च स्वाः [इति कथ्यन्ते] ॥ ३८ ॥

त्सोदे हारे थे च धौ च हारे यास्ये ॥ ३९ ॥

वि. **ऐडायास्ये पुनानस्सोमायां** (ऊ. द. ४०) **त्सो**-शब्द-**दे**-शब्दौ **प्रति-हारादौ** वर्धते । **उद्गीथे** च । **धौ**-शब्दः प्रतिहारे ॥ ३९ ॥

---

1. L[1]My[3] om. पाऽ५न्तम् ; L[1]My[3] trans. इति वैतहव्ये after पूरुहू । and om. द्वितीयायां and इत्यस्यां.
3. L[1]My[3]om. अत्र.... वृद्धिः
10. L[1]MY[3] om. इति
11. My[3] om. कास्त्वा इत्यस्यां; My[3] om. अत्र....इत्यस्याम् ।
12 My[3] om. अत्र ... वृद्धिः
15. A[1-2]M[1-2] ऐडमा० for ऐडा०;
16. KM[1] ०हारे for ०हारादौ T ०हरादौ for हारे

भा. **पुनानस्सोमधार-** (ऊ. द. ४०) इत्यत्र **प्रतिहारोद्गीथयोः त्सोदे**-शब्दौ वर्धेते । **प्रतिहारे धौ**-शब्दश्च साध्य **आयास्ये** ॥ ३९ ॥

दी. **आइपुना** (ऊ. द. ४०) इति **ऐडायास्ये प्रतिहारोद्गीथयोः त्सोदे**-शब्दो वर्धते । **ऊत्सोदेवा३१ः** । [द्वितीयायाम्] **उद्गीथादेश्च** । **ऊत्सोदेवा३१ः** । **अत्र त्सोदे**-इति उद्गीथादेश्च वृद्धिः । तृतीयायां प्रतिहारे **धौ**-शब्दो वर्धते । **नृमिधौंता३१ः** । अत्र **धौ**-इति प्रतिहारमध्ये वृद्धिः ॥ ३९ ॥

देवो जयसाप्तमिकत्रिणिधनायास्येषु च थे सार्वादिः ॥ ४० ॥

वि. यौधाजयसाप्तमिकत्रिणिधनायास्येषु च उद्गीथे **सार्वाया आदिर्दे**-शब्दो वर्धते

---

2. P ०शब्दो वर्धते for ०शब्दौ वर्धेते

4. L[1] उद्गीथादेश्च । ... वृद्धिः

6. L[1] om. अत्र ... वृद्धिः

7. A[1-7]M[1-2]T read: देवो .... धनायास्येषु च and थे सार्वादिः as two seperate sutras and comment them accordingly. All southern MSS except S[1] and K agree in this respect. The commentary, as found in these MSS, is given below with their variants added in brackets थे हार इति वर्तते (T. थे हारादित्यनुवर्तते) यौधाजयसाप्तमिकत्रिणिधनायास्येषु उत्सोदेवोशब्दो वर्धते (S[1-2] उत्सोदेवशब्द उद्गीथे सार्वादिर्वर्धते) उदाहरणानि- पुनान- द्वितीयायामेव प्रथमायामौपद्रविकत्वात् । थेहार इत्यधिकारात् (T. औपद्रविक इत्युद्गीथे हार इत्यधिकारात्; S[1-2] ०औपद्रविकत्वात् । थे इत्युक्तत्वात्) प्रत्युदाहरणम् — षासाइपा२३४वा । माना२ । वानाइ-वा२३४षों । अचा२इ । स्तायासा२३४ मू । द्रवा२ ॥ साप्तमिकत्रिणिधनयोः (T. ०धनयास्ययोः) सर्वत्र । औपद्रविकः सर्वो (T. ०द्रविकाः सर्वे) योनिवद्भावात् वर्धते (T. वर्धन्ते)। जये हारादिति (S[1-2] जये तु जये हारादिति; T om. जये हारादिति) ॥

थे सार्वादिः ॥ एतेषु सामसु उद्गीथे सार्वादिर्वर्धते । सार्वायाः (A[1-2]M[1-3]T सर्वस्य) आदिः सर्वादि; (A[1-2]M[1-2] पूर्वस्यादिः T om. सर्वादिः) । आदिशब्देन पूर्वादिर्गृह्यते । उद्गीथे सर्वायां T A[1-2]M[1-2] सर्वस्य) पूर्वस्यादिर्वर्धते । न प्रतिहार इत्यर्थः (S[1] om. थे सार्वादिः ॥ एतेषु सामसु ... न प्रतिहार इत्यर्थः) ॥

उत्सोदेव इत्यत्र ॥ ४० ॥

भा. एतेषु उद्गीथे सार्वाया आदेर्देव-शब्दस्य वृद्धिः ॥ ४० ॥

दी. यौधाजये साप्तमिकायास्ये त्रिणिधनायास्ये च उद्गीथे सार्वाया आदेः देव-शब्दस्य वृद्धिः । पुनाऽ३१ (ऊ. द. ३) इति यौधाजये द्वितीयायां दाइवोऽ२ । अत्र दा-इति उद्गीथसार्वादिर्वर्धते । पुनानस्सोमधारया (ऊ. द. १२६) इति साप्तमिकायास्ये द्वितीयायां दाइवोऽ२ । अत्र दा-इति उद्गीथसार्वादिर्वर्धते । पुनानस्सोमधारयाहाउहोवा (ऊ. द. ४१) इति त्रिणिधनायास्ये द्वितीयायां दाइवोऽ२ । अत्र दा-इति उद्गीथे सार्वादिर्वर्धते । द्वादशाहस्य सप्तमेऽहनि भवं साप्तमिकम् । सार्वाऽ२म् इति प्रथमद्वितीयस्वरे सार्वापर्व । अत्र देव-शब्दोऽपि प्रथमद्वितीयस्वरे ॥ ४० ॥

यवाख्ययोर्हितान्तः ॥ ४१ ॥

वि. और्णायवाख्यायोः साम्नोर्हितान्तो वर्धते । अर्धर्चान्त इत्यर्थः ॥ ४१ ॥

भा. और्णायवाख्ययोः साम्नोः सहितान्तो वर्धते ॥ ४१ ॥

दी. परिप्रिया (ऊ. द. ७५; सं. २७०) इति और्णायवाख्ययोः साम्नोः हितान्तो वर्धते । परिप्रियादिवꣳकवीः (ऊ. सं. २७०) इति और्णायवाद्ये वयाꣳसि-नप्त्योर्हिताः । अत्र हिताः-इत्यन्तो वर्धते । परिप्रियाऽ२दिवꣳकवाइः (ऊ. द. ७५) इति और्णायवोत्तरे वयाऽ२होऽ१वाꣳसिनप्त्योवोर्हिताः । अत्र हिताः-इत्यन्तो वर्धते ॥

श्वतः पाष्ठौहे ॥ ४२ ॥

वि. पाष्ठौहे अस्मभ्यꣳसोम विश्वताः (ऊ. द. ६०) इति श्वतान्तो वर्धते ॥

---

3. S^4 साप्तमिकमा° for साप्तमिका°
4. 6 & 7. L^1My^3 om. द्वितीयायां and om. अत्र----वर्धते; S^4 before दाइवो adds: उद्गीथादिः
11. $A^3PL^2V^2B^4$ om. अर्धर्चान्त इत्यर्थः
14. My^3 हितस्यान्तो for हितान्तो; L^1My^3 om. परि .... और्णायवाद्ये
15. L^1MY^3 om. अत्र ... और्णायवोत्तरे
16. L^1My^3 om. अत्र.... वर्धते

भा. **अस्मभ्यं सोम विश्वतः** (ऊ. द. ६०) इति [श्वतः]शब्दः पाष्ठौहे वर्धते॥

दी. **तिस्रोवाचाऽ२उदीरताइ** (ऊ. द. ६०) इति **पाष्ठौहे** तृतीयायाम् **अस्मभ्यꣳ-सोमविश्वताः** । अत्र श्वताः-इत्यन्तो वर्धते॥ ४२ ॥

ष्टु प्रिये ॥ ४३ ॥

वि. & भा. **वसिष्ठप्रिये नकिष्ट्वानुमज्मना** (ऊ. द. ८१) इति ष्टु-शब्दो वर्धते॥

दी. **इममीऽ२३** (ऊ. द. ८१) इति **वसिष्ठप्रिये** द्वितीयायां **नकाइष्टूवाऽ३** । अत्र ष्टू-शब्दो वर्धते॥ ४३ ॥

सोमा वार्शे ॥ ४४ ॥

वि. & भा. **वार्शे अप्सा इन्द्रायां** (ऊ. द. ८४) **सोमा अर्षन्तु** इत्यत्र **मा**-शब्दस्य वृद्धिः ॥ ४४ ॥

दी. **अर्षा सोमा** (ऊ. द. ८४) इति **वार्शे** द्वितीयायां **सोमा अर्षाऽ३** । अत्र **मा**-शब्दस्य वृद्धिः ॥ ४४ ॥

सोमो दन्वते ॥ ४५ ॥

वि. **वैदन्वते** तृतीये **पवित्रे सोमो अक्षरत्** (ऊ. द. १०९) इत्यत्र अभ्यस्तसोम-शब्दो वर्धते ॥ ४५ ॥

भा. **वैदन्वते** तृतीये **सोम**-शब्दो वर्धते॥ ४५ ॥

दी. **पाऽ५रि** (ऊ. द. १०९) इति तृतीये **वैदन्वते पवित्रे** । **सोमोऽ२३** ।

---

1. P after वधते adds: सहितान्तो वर्धते
2. My[3] trans. अस्मभ्यं ···· विश्वताः after वर्धते
3. My[3] om. अत्र; My[3] शब्दो for अन्तो
6. L[1]My[3] om. द्वितीयायां
7. L[1]My[3] om. अत्र···· वर्धते
11. My[3] इति for अत्र
17. My[3] सोमेति सोशब्दो वर्धते । पवित्रे । सोमोऽ२३ ॥ for पवित्रे···· वृद्धिः ॥

अत्र सो-इति वृद्धिः ॥ ४५ ॥

तुरे ध्माखादिः ॥ ४६ ॥

वि. वार्त्रतुरे ध्माखादिः वर्धते । धाश्वित्ताकाऽ२३ । क्वेयथक्वे- (सा. २७१) [इत्यत्र] ध्माखजकृऽ२त् इति ध्माखा । ध्माखाया आद्यमक्षरमित्यर्थः ॥ ४६ ॥

भा. वार्त्रतुरे ध्माखादिर्वर्धते । ध्माखजकृत् एषा ध्माखा । धाश्वित्ताका । पक्वं धूना । ताँअपाचाइ । एता ध्माखाः ॥ ४६ ॥

दी. अयापवोवा (ऊ. क्षु. ९१०) इति वार्त्रतुरे ध्माखादिर्वर्धते । ध्माखजकृऽ२३त् इत्यत्र आदिग्रहणेन धाश्वित्ताकाऽ२३ । द्वितीयायां पाक्वन्धूनाऽ२३ । तृतीयायां ताँअपाचाऽ२३इ । एवं ध्माखादिर्वर्धते । क्वेयथेति तृतीये (?प्रथमे) साम्नि (ग्रा. गे. ७. ४. २७१. ३) ध्माखापर्व ॥ ४६ ॥

अयोनौ ॥ ४७ ॥

वि. योनौ वार्त्रतुरे (ग्रा. गे. ९. ११. ३३४. १) ध्माखादेर्वृद्धिर्न भवति । भिर्भयमान एव भवति ॥ ४७ ॥

भा. योनौ वार्त्रतुरे ध्माखादेर्वृद्धिप्रतिषेधः । भिर्भयमाऽ३नाऽ३ ॥ ४७ ॥

दी. यजामहोवा (ग्रा. गे. ९. ११. ३३४. १) इति योनौ वार्त्रतुरे ध्माखादिर्न वर्धते । भिर्भयमानाऽ२३ः । अत्र भि-कारो न वर्धते ॥ ४७ ॥

पुत्रेऽर्धेडोपाय आद्यमाद्यायाम् ॥ ४८ ॥

---

1. L[1] om. अत्र.... वृद्धिः;
2. A[2]M[1-2]T combine sutras: तुरे ध्माखादिः and अयोनौ into one and explain वार्त्रतुरे ध्माखादिरूपेण वृद्धिर्विधीयते । मिर्भयमानमयोनौ (M[1-2]० मान । ग योनौ; T ०मानायां योनौ) मिर्भयमान (A[1] ०मानम्, M[2]T ०माना) एव भवति । अयोनौ वार्त्रतुरे भिर्भयमानायां (M[2] ०मा.ना, A[2] ०मानया) ध्माखादिर्भवतीत्यर्थः । ध्माखाक्वे यथक्वे अलर्षी युध्माखनकृत् धाश्वित्ताका ॥
8. L[1]My[3] after ०ग्रहणेन add: एवमादिषु and om. धाश्वि... ध्माखापर्व ॥ (l.10)

वि. **उद्वंशपुत्रे** **अर्धेडोपाये** उवित्यर्धेडोपायां पूर्वमुपद्रवपर्वणि **आद्यमक्षरं वर्धते।** प्रथमायां स्तोतीयायां याञ्जुजौवा३ ॥ ४८ ॥

भा. **उद्वंशपुत्रे** **अर्धेडोपाये** आद्यमक्षरं वर्धते। आद्यायां स्तोतीयायां याञ्जु-जौवा३ ॥ ४८ ॥

दी. **प्रवाः** (ऊ. द. १२०) इत्युद्वंशपुत्र **आद्यायां** स्तोतीयायाम् अर्धेडोपाये वाशब्दविषये पर्वणि **आद्यं** प्रथममक्षरं वर्धते। याञ्जुजौवा३। अत्र या-इति वर्धते॥ ४८ ॥

वंशीये च ॥ ४९ ॥

वि. & भा. **उद्वंशीये च** अर्धेडोपाये आद्यमक्षरं वर्धते। सर्वत्र ॥ ४९ ॥

दी. **गायन्तित्वागायत्रिणआ** (ऊ. द. २०८) इति **उद्वंशीये** त्वर्धेडोपाये वा-शब्दविषये पर्वणि आद्यमक्षरं वर्धते सर्वत्र। वायाऽ३उवाऽ३। द्वितीयायां ष्णाइराऽ३-२उवाऽ३। तृतीयायां श्रूताऽ३उवाऽ३। एवं सर्वत्राद्यमक्षरं वर्धते ॥ ४९ ॥

अभ्यः ॥ ५० ॥

वि. उद्वंशीयेऽर्धेडोपाये **अरंधामभ्य इन्दवः** (ऊ. स. ७१९) इति **भ्य-शब्दो न वर्धते** ॥ ५० ॥

भा. अ-कारः प्रतिषेधार्थः। **अरंधामभ्य इन्दवः** (ऊ. स. ७१९) इत्यर्धेडोपाये भ्य-शब्दस्य वृद्धिप्रतिषेधः ॥ ५० ॥

दी. अकारः प्रतिषेधः। **अरन्तइन्द्रकुक्षयआ** (ऊ. स. ७१९) इति **उद्वंशीये**

---

3. $M^{1-2}S^{1-2}TA^{2}$ after ०पाये add: उविस्यर्धेडोपायं (TS^{1} ०पायां S^{2} ०पाये) पूर्वमर्धेडाया उपायाः पूर्वपादे ($S^{1}A^{2}$ ०पदे); $A^{2}M^{1-2}KS^{1-2}$ प्रथमायां for आद्यायां
6. $L^{1}My^{3}$ om. अत्र ... वर्धते
7. उद्वंशीये for वंशीये
8. $A^{1-2}KM^{1-2}S^{1-2}$ om. आद्यमक्षरं
9. $L^{1}My^{3}R$ ०डाया उपाये for ०डोपाये
10. $L^{1}MY^{3}$ after उवा add: एवमादिषु and om. द्वितीयायां ... वर्धते (l. 11)
15. V^{2} om. अकारः प्रतिषेधार्थः

[तृतीयायास्] अर्धेडाया उपाये अरन्धामभ्य इति भ्य-शब्दस्य वृद्धिप्रतिषेधः । भ्यआऽ-२उवाऽ२ । अत्र भ्य-इत्यवृद्धिः ॥ ५० ॥

आन्धीगवे च द्वितीयम् ॥ ५१ ॥

वि. आन्धीगवे उपायद्वितीयं वर्धते । निधनस्य पूर्वमुपद्रवसंज्ञा । उपद्रवद्वितीयं वर्धते इत्यर्थः ॥ ५१ ॥

भा. आन्धीगवे चोपायद्वितीयं वर्धते ॥ ५१ ॥

दी. पुरोजितीवोऽ१न्धासाः (ऊ. द. १२) इति आन्धीगवे । च-कारात् उपायद्वितीयमक्षरं वर्धते । योऽ२दी । अत्र दी-इति वृद्धिः । एवमादिषु ॥ ५१ ॥

असन्तु ॥ ५२ ॥

वि. यज्ञाय सन्त्वद्रय इति उपद्रवद्वितीयं न वर्धते । याज्ञाऽ३उवा । याऽऽ२ऽस । तूऽ२३त्रा ॥ ५२ ॥

भा. यज्ञाय सन्त्विति प्रतिषेधः ॥ ५२ ॥

दी. इन्दुरश्वोनकाऽ२त्वाँयाः इत्यान्धीगवे तृतीयायां याऽ२स । अत्र सन्तुशब्दस्य वृद्धिप्रतिषेधः ॥ ५२ ॥

स्वारे च पर्णे योनौ ॥ ५३ ॥

वि. स्वारे च सौपर्णे योनौ उपायद्वितीयं वर्धते । नान्यत्र । रामाइ ॥ ५३ ॥

भा. स्वारे सौपर्णे च योनावेव उपायद्वितीयं वर्धते । अन्यत्र प्रतिषेधः ॥ ५३ ॥

---

1. S[4] om. भ्यशब्दस्य ... ०षेधः
2. L[1]My[3] om. अत्र ... ०वृद्धिः
4. S[2] before आन्धीगवे add: उपायद्वितीयमित्यनुवर्तते
7. L[1] adds: तद् before उपाय०
8. L[1]My[3] om. अत्र .... वृद्धिः
10. My[1] ०द्वितीयो for ०द्वितीयं
13. L[1]MY[3]R om. तृतीयायां; M[4]ES[4] सन्त्वित्यत्र स इत्यवृद्धिः for सन्तु... ०षेधः ।
17. P स्वार for स्वारे

दी. उद्धेदभिश्रुतामाऽ३घाम् (ऊ. अ. ५४८) इति स्वारसौपर्णे योनावेव उपायद्वितीयमक्षरं वर्धते । **रामाइ** । अत्र मा-इति वृद्धिः । अन्यत्र प्रतिषेधः । अत्र द्वितीयायां **चत्रु** । इत्यादिषु ॥ ५३ ॥

पृष्ठे चाजिगसुरूपाणां च ॥ ५४ ॥

वि. & भा. एतेषु च योनावेव उपायद्वितीयं वर्धते ॥ ५४ ॥

दी. **पिबाऽ३सुतस्यरसिनाः** (ऊ. अ. ६४४) इति **पृष्ठे च** योनावेवोपायद्वितीयं वर्धते । **तुताइधाऽ२३याऽ२३४ः** । अत्र ता-इति । अन्यत्र प्रतिषेधः । **मिमाताऽ२-३याऽ३४३इ** ॥ ५४ ॥

स्वादाइष्ठाया (ग्रा. गे. १२. १. ४६८. १) इति **आजिगे** । **स्वादिष्ठयाऽ२** (ग्रा. गे. १२. १. ४६८. १) इति **सुरूपाद्ये** । **स्वादिष्ठयौहोऽ२** (ग्रा. गे. १२. १. ४६८. ३) इति **सुरूपोत्तरे** च । उपायद्वितीयमक्षरं वर्धते योनावेव । **तवाइन्द्रऽ२३ताऽ-३४३ः** । अत्र वा-इति । चकारात् योनावित्यधिकारः । अन्यत्र उपायद्वितीयाक्षरस्य वृद्धिप्रतिषेधः । **उच्चातेजा** (ऊ. द. २०९) इत्याजिगे **महिश्राऽ२३वाऽ३४३ः** । **पवस्व-दाऽ२इ** (ऊ. द. १५७) इति **सुरूपाद्ये** **हधर्माऽ२३णाऽ३४३** । **परिसुवौहोऽ२** (ऊ. अ. ५३५) इति **सुरूपोत्तरे** **वेधाआऽ२३साऽ३४३इ** ॥ ५४ ॥

---

2. L[1]My[3] om. अत्र .... वृद्धिः; L[1]My[3] om. अत्र द्वितीयायां
4. KTS[1-2]My[1] read पृष्ठे च as a seperate sutra and then comment:- पृष्ठे च योनावेवोपायद्वितीयं वर्धते ॥ आजिगसुरूपाणां ज ॥ योनावेवोपायद्वितीय वर्धते; in T अजिग-सुरूपाणां च comes first and then पृष्ठे च follows.; M[1-3] om. पृष्ठे च.
6. S[4] om. योना० ... वर्धते
7. My[3] om. अत्र ता इति; S[4] om. अन्यत्र ... याऽ३४३इ
10. सुरूपे for सुरूपाद्ये
11. S[4] trans उपाय .... योनावेव । after वा -इति । (l. 12)
12. My[3] om. अत्र वाइति; L[1]My[3] om. चकारात्... ०कारः; L[1]MY[3] om. उपायद्वितीयाक्षरस्य वृद्धि०
13. S[4] om. उच्चा... वेधा आऽ२३साऽ३४३इ ॥ (l. 15)

मीढे व्यम् ॥ ५५ ॥

वि. & भा. **पौरुमीढे** उपायद्वितीयं तालव्यं वर्धते । **त्वमङ्गप्रशंसादिषु** ॥

दी. **तुवम** । **गप्राऽ३४औहोवा** (ऊ. स. ७१८) इति **पौरुमीढे** उपायद्वितीयं तालव्यं वर्धते । **मिताइवाऽ२३४५चाऽ६५६ः** । अत्र **ता**-इति उपायद्वितीयमक्षरं वर्धते । एवमादिषु । तालव्यादन्यत्र वृद्धिर्न भवतीत्यर्थः ॥ ५५ ॥

अशी ॥ ५६ ॥

वि. & भा. **जीवा ज्योतिरशीमहि** (ऊ. सं. ३६१) इति **शी-शब्दो** न वर्धते ॥

दी. **इन्द्रक्र** (ऊ. सं. ३६१) इति **पौरुमीढे अशीमहीति शी-शब्दस्य** वृद्धि-प्रतिषेधः । **अशीमाऽ२३४५हाऽ६५६इ** । अत्र **शी**-इति उपायद्वितीयमक्षरं तालव्यं न वर्धते ॥ ५६ ॥

गीथाद्यं कावे ते ॥ ५७ ॥

वि. **कावे उद्गीथाद्यं ते-शब्दो** वर्धते । **अञ्जते व्यञ्जते** (ऊ. ए. ४७१) इति । नान्यत्रेत्यर्थः ॥ ५७ ॥

भा. कावे उद्गीथाद्यमक्षरं वर्धते । **तेव्यञ्जते** (ऊ. ए. ४७१) इत्यत्र ॥ ५७ ॥

दी. **अञ्जोवा** (ऊ. ए. ४७१) इति **कावे उद्गीथाद्यं ते**-अक्षरं वर्धते । **ताइ-विअञ्जताइ** । अत्र **ता**-इति उद्गीथाद्यमक्षरं तालव्यं वर्धते ॥ ५७ ॥

ज्ञीये स्वासु पुना देवः ॥ ५८ ॥

---

4. L^1My^3 om. अत्र ... वर्धते
5. L^1My^3 om. तालव्याद् .... इत्यर्थः ।
7. $A^3PL^2V^2B^4$ प्रतिषेधः $KM^1 1M^2$ न वृद्धः, S^1 न वृद्धिः for शीशब्दो न वर्धते
8. S^4 om. शी-शब्दस्य .... ०षेधः
9. L^1My^3 om. अत्र .... न वधते
12. $KAM^{1-2}S^{1-2}$ गीथाद्यं for उद्गीथाद्यं
16. L^1My^3 om. अत्र .... वर्धते

वि. यज्ञायज्ञीये **पुनानस्सो-देवोवस्तृचयोश्चोद्गीथाद्यमक्षरं** वर्धते ॥ ५८ ॥

भा. यज्ञायज्ञीये उद्गीथाद्यमक्षरं वर्धते। **स्वासु तृचे। पुनानस्सो-** (ऊ. द. २१२) **देवोवः-** (ऊ. ए. ४०६) तृचयोश्च ॥ ५८ ॥

दी. **यज्ञाऽ५य** (ऊ. द. १४) इति **स्वासु** तृचे यज्ञायज्ञीये। **पुनाऽ५नः** (ऊ. द. २१२) इति यज्ञायज्ञीये **देवोऽ५वः** (ऊ. ए. ४०६) इति यज्ञायज्ञीये च उद्गीथाद्यमक्षरं वर्धते। स्वासु यज्ञायज्ञीये **आइराइरा**। द्वितीयायां **माइत्राम्**। तृतीयायां **माहा**। अत्र उद्गीथाद्यं वर्धते। **पुनाऽ५नः** (ऊ. द. २१२) इति यज्ञायज्ञीये **आपोवसा**। द्वितीयायां **दाइवो**। तृतीयायां **साधा**। एवमुद्गीथाद्यमक्षरं वर्धते। **देवोऽ५वः** (ऊ. द. ४०६) इति यज्ञायज्ञीये **पूर्णोविवा**। द्वितीयायां **वोदाइ**। तृतीयायां **दाइवाः**। एवमुद्गीथाद्यं वर्धते ॥ ५८ ॥

आद्यायामन्यत्र ॥ ५९ ॥

वि. & भा. अन्यत्र यज्ञायज्ञीये आद्यायामेवोद्गीथाद्यस्य वृद्धिः। **अयं पूषा-** (ऊ. अ. ५८६) आदिषु ॥ ५९ ॥

दी. **अन्यत्र** त्रिभ्यः अन्येषु यज्ञायज्ञीयेषु **अद्यायाम्** एव स्तोत्रीयायामुद्गीथाद्याक्षरस्य वृद्धिः अयंपूषादिषु। **अयाऽ५मपू** (ऊ. अ. ५८६) इति **यज्ञायज्ञीये** प्रथमायामेव।

2. KA²M¹⁻²TS¹⁻² trans. उद्गीथा° … वर्धते after तृचयोश्च and om. स्वासु तृचे
4. S⁴ om. पुनाऽ५नः …. यज्ञायज्ञीये च
6. S⁴ om. स्वासु यज्ञायज्ञीयेः RL¹My³ om. द्वितीयायां and तृतीयायां
7. RL¹My³ अत्र … वर्धते
8. RL¹My³ om. तृतीयायां and एवम् … वर्धते
9. RL¹My³ om. द्वितीयायां and तृतीयायां
12. KA²M¹⁻²S¹⁻² उद्गीथादेः for उद्गीथाद्यस्य
14. L¹My³ उद्गीथाद्यस्य for उद्गीथाद्याक्षरस्य
15. S⁴ om. अयंपूषादिषु; RL¹My³ om. अयाऽ … प्रथमायामेव

सोमश्पुना। अत्रोद्गीथाद्यमक्षरं वर्धते। उत्तरयोः स्तोत्रीययोरवृद्धिरेव। एवमादिषु॥

प्रमंह्याद्ययोर्भात् ॥ ६० ॥

वि. & भा. **प्रमंहिष्ठीये** आद्ययोः स्तोत्रीययोः स्तोभात् परं वर्धते ॥ ६० ॥

दी. **प्रमँहाऽ३इष्ठायगायता** (ऊ. द. ६५) इति **प्रमँहिष्ठीये** आद्ययोः स्तोत्रीययोः स्तोभात् परं वर्धते। **उपाऔऽ३हो** इति **औहो**-स्तोभात् परं **स्तोतासोऽ३आऽ३**। अत्र **स्तो**-इति वृद्धिः। द्वितीयायां **समाऔऽ३हो**। **धोद्युम्नीऽ३याऽ३**। अत्र स्तोभात् परं **धो**-इति वृद्धिः। तृतीयायां स्तोत्रीयायामवृद्धिरेव ॥ ६० ॥

रिष्ठाः शाम्मे ॥ ६१ ॥

वि. & भा. **शाम्मदे परिस्रानो गिरिष्ठाः** (ऊ. अ. ५८२) इति **ष्ठा-शब्दो** वर्धते ॥ ६१ ॥

दी. **परिस्रुवानोऐ** (ऊ. अ. ५८२) इति **शाम्मदे गिरिष्ठाऐऽ२**। अत्र **ष्ठा**-शब्दस्य वृद्धिः ॥ ६१ ॥

त्रे वैश्वामित्रे ॥ ६२ ॥

वि. सवीरायां **वैश्वामित्रे** **त्रे**-शब्दो वर्धते। इतरयोः प्रतिषेधः ॥ ६२ ॥

भा. **वैश्वामित्रे** सवीरायां **हरिश्पवित्रे** (ऊ. स. ७५७) इति **त्रे**-शब्दस्य वृद्धिः ॥

दी. **प्रसुन्वानाय अन्धसः** (ऊ. स. ७५७) इति **वैश्वामित्रे** तृतीयायां **त्रेआऽ२-व्याऽ२३४ता**। अत्र **त्रे**-शब्दस्य वृद्धिः ॥ ६२ ॥

---

1. RL[1]My[3] om. अत्र ··· एवमादिषु
3. A[2]KM[1-2]S[1-2] My[1] परस्य वृद्धिः for परं वर्धते
5. RL[1]My[3] om. उपाऔऽ३हो ... परं
6. RL[1]My[3] om. अत्र .... समाऔहो; and अत्र .... अवृद्धिरेव
9. PA[3]L[2]V[2]B[4] शब्दस्य वृद्धिः for शब्दो वर्धते
15. PV[2] om. वैश्वामित्रे
16. RL[1] सवीरो दक्षसाधनः for प्र सुन्वानायान्धसः; L[1]R om. तृतीयायां

कृते थे तुरीयं सर्वत्र ।

वि. & भा. **हाविष्कृते** उद्गीथे चतुर्थमक्षरं वर्धते सर्वत्र ॥

षष्ठं च ध्वक्षयोः ॥ ६३ ॥

वि. & भा. ध्व-शब्दे क्ष-शब्दे **च** प्रत्ययें परत उद्गीथे षष्ठस्य वृद्धिः । **मन्द्र-ओजिष्ठो अध्व** (ऊ. द. १९५) । **पवित्रे सोमो अक्ष** (ऊ. अ. ५८५) ॥ ६३ ॥

दी. **त्वँसोमासिधाहाउरायूः** (ऊ. द. १९५) इति **हाविष्कृते** उद्गीथे चतुर्थ-मक्षरं वर्धते । **सर्वत्र** सर्वेषु हाविष्कृतेषु । ध्व-शब्दे क्ष-शऽदे **च** प्रत्यये ऊद्गीथे **षष्ठस्य** अक्षरस्य वृद्धिः । **मन्द्रओजाइ** । **ष्ठोआध्वाऽ२३राइ** । अत्र ध्व-इत्यक्षरे प्रत्यये आ-इति षष्ठाक्षरस्य वृद्धिः । **परिसुवानोगाहाउराइष्ठाः** (ऊ. अ. ५८५) इति हाविष्कृते **पवित्रेसो** । **मोआक्षाऽ२३रात्** । अत्र क्षा-इत्यक्षरे प्रत्यये आ-इति षष्ठाक्षरस्य वृद्धिः । अन्यत्र तुरीया-क्षरस्य वृद्धिः ॥ ६३ ॥

पाजे थे भे दैर्घ्ये ॥ ६४ ॥

वि. & भा. पा-शब्दजे-शब्दौ **उद्गीथे स्तोभे** प्रत्यये वर्धेते **दैर्घश्रवसे** । **ऊर्जो-नपा** । **भुवद्वाजे** ॥ ६४ ॥

दी. **यज्ञायज्ञावोअग्नयओहाओहाऽ३ए** (ऊ. प्रा. ८४०) इति **दैर्घश्रवसे**

---

1. विवरण reads कृते थे तुरीयं सर्वत्र and षष्ठं च ध्वक्षयोः as two seperate sutras
2. $PV^2B^4A^3$ उद्गीथ for उद्गीथे
3. $PKA^2S^{1-2}V^2B^4A^3S^4L^1$ om. च
4. $A^2KM^{1-2}TS^{1-2}$ ध्वक्षइत्येतयोः for ध्वशब्दे क्षशब्दे च प्रत्यये; $A^3PL^2B^4V^2$ om. परतः; $PA^3L^2B^4V^2$ उगीद्‌थ for उद्गीथे
7. L^1My^3 उद्गीथ for उद्गीथे
8. L^1My^3 om. अत्र ... वृद्धिः
10. L^1 om. अन्यत्र ··· वृद्धिः
13. $A^2KM^{1-2}S^{1-2}My^1$ परतः for प्रत्यये

उद्गीथे स्तोभे प्रत्यये **पा**-शब्द**जे**-शब्दौ वर्धेते। अत्र द्वितीयायाम् **ऊर्जोनपा**। अत्रोद्गीथे स्तोभे प्रत्यये **पा**-शब्दस्य वृद्धिः। तृतीयायां **भुवद्वाजाइ**। अत्रोद्गीथे स्तोभे प्रत्यये **जे**-शब्दस्य वृद्धिः ॥ ६४ ॥

परे सर्वत्र ॥ ६५ ॥

वि. & भा. **परे** स्तोभे प्रत्यये पूर्वमक्षरं **सर्वत्र** वर्धते ॥ ६५ ॥

दी. **सर्वत्र** सर्वदैर्घश्रावसेषु **परे** अग्रिमे स्तोभे प्रत्यये पूर्वस्याक्षरस्य वृद्धिः। यज्ञा-यज्ञेति दैर्घश्रवसे प्रथमायाम् **आमृतम्**। **जातावेदसाम्**। अत्र उत्तरे स्तोभे प्रत्यये सर्वत्र पूर्वाक्षरस्य वृद्धिः। न पूर्वस्तोभे प्रत्यये वृद्धिः। **इराइराचदक्षसे** ॥ ६५ ॥

अककुभि ॥ ६६ ॥

वि. **ककुप्सु** दैर्घश्रवसे परे स्तोभे प्रत्यये पूर्वस्याक्षरस्यावृद्धिः। **यज्ञायज्ञोत्तरयोः** ॥

भा. ककुप्सु परे स्तोभे प्रत्यये पूर्वस्याक्षरस्य वृद्धिर्न भवति। यज्ञायज्ञातृचे उत्तरयोः स्तोत्रीययोर्दैर्घश्रवसे ॥ ६६ ॥

दी. **ककुप्सु** अग्रिमे स्तोभे प्रत्यये पूर्वस्याक्षरस्य वृद्धिर्न भवति। **यज्ञायज्ञा व** (ऊ. प्रा. ८४०) इति तृचे दैर्घश्रवसे उत्तरयोः स्तोत्रीययोः ककुप्छन्दसि। **यामसयुः**। **भूवद्वृधे**। अत्र परे स्तोभे प्रत्यये पूर्वस्याक्षरस्यावृद्धिः ॥ ६६ ॥

हव्ये त्सिबायाम् ॥ ६७ ॥

---

1. RL^{1}My^3 om. अत्र द्वितीयायाम् and अत्र .... तृतीयायां
2. RL^{1}My^3 om. अत्र ... वृद्धिः
5. PA^{3}L^{2}V^{2}B^4 पूर्वस्याक्षरस्य वृद्धिः for पूर्वमक्षरं वर्धते
6. RMy^3 °श्रवसे for श्रवसेषु; S^4 om. पूर्वस्याक्षरस्य; RMy^3 om. यज्ञा ... आमृतम्
7. RL^{1}My^3 om. अत्र ··· वृद्धिः
8. S^4 om. न पूर्व .... दक्षसे
14. RL^{1}My^3 om. ककुप्छन्दसि
15. RL^{1}MY^3 om. अत्र ·· अवृद्धिः

वि. **वैतहव्ये एव त्सिबायां** परतः पूर्वस्याक्षरस्य वृद्धिः ॥ ६८ ॥

भा. **वैतहव्ये त्सिबायां** प्रत्ययभूतायां पूर्वस्याक्षरस्य वृद्धिः ॥ ६८ ॥

दी. त्साऽ२इबाऽ२३४औहोवा इति त्सिबापर्व । पाऽ५न्नाम् (ऊ. द. १८) इति **वैतहव्ये त्सिबायां** प्रत्ययभूतायां पूर्वमक्षरं बर्धते । णाइनाऽ२माऽ२३४औहोवा । द्वितीयायां वाइताऽ२नाऽ२३४औहोवा । एवमादिषु ॥ ६८ ॥

अयादौ ॥ ६९ ॥

वि. यकारादौ त्सिबायां परतः पूर्वस्य न वृद्धिः । **माहांअभिज्ञु** ॥ ६९ ॥

भा. अकारः प्रतिषेधे । यकारदौ त्सिबायां प्रत्ययभूतायां पूर्वस्य वृद्धिप्रतिषेधः ॥ **माहांअभिज्ञुआ** ॥ (६९) ॥

दी. **यादौ** यकारादौ त्सिबायां प्रत्ययभूतायां पूर्वस्याक्षरस्य वृद्धिप्रतिषेधः । **पान्तमावो** (ऊ. द. १८) इति वैतहव्ये तृतीयायाम् आ । याऽ२माऽ२३४औहोवा । अत्र आ- इति पूर्वस्याक्षरस्यावृद्धिः ॥ ६९ ॥

घृतनिधनसांवर्तयोराद्यायम् ॥ ७० ॥

वि. **घृतनिधनसांवर्तयोराद्यायां** स्तोत्रीयायां त्सिबाप्रत्यये पूर्वस्य वृद्धिः । **इदं ह्यन्वो** (ऊ. द. २७) **एन्द्र नो गधि** (ऊ. द. १७२) ॥ ७० ॥

इति फुल्लसूत्रविवरणे प्रथमेऽध्याये वृद्धावृद्धो द्वितीयः खण्डः ॥ २ ॥

भा. **घृतनिधने सांवर्ते च आद्यायां** स्तोत्रीयायां त्सिबाप्रत्यये पूर्वस्य वृद्धिः ।

---

2. $A^2KM^{1-2}TS^{1-2}$ after हव्ये add: एव; $A^2KM^{1-2}TS^{1-2}$ परतः for प्रत्ययभूतायां; $A^3PB^4L^3$ after वृद्धिः add: जायीह्वायाभित्येवमादि
3. L^1 om. त्साऽ२ … इति
5. L^1My^3 om. द्वितीयायां …औहोवा
10. L^1My^3 om पान्तम् … तृतीयायाम्
11. L^1MY^3 om. अत्र… अवृद्धिः
14. T त्सिबायां for त्सिबा
16. My^1 इति प्रथमस्य द्वितीयः for इति …. खण्डः

इदं ह्यनु (ऊ. द. २७) एन्द्र नो गधि (ऊ. द. १७२) ॥ ७० ॥

इति पुष्पसूत्रभाष्ये प्रथमस्य द्वितीया खण्डिका समाप्ता ॥ २ ॥

दी. इदँ ह्यनूऽ३ ओजसा (ऊ. द. २७) इति घृतश्चुन्निधने एन्द्रनोऽ२गधिप्राया (ऊ. द. १७२) इति सांवर्ते च आद्यायां स्तोतीयायां त्सिबाप्रत्यये पूर्वस्य वृद्धिः । घृतश्चुन्निधने स्वगाइः । वाऽ२नाऽ २३४ औहोवा । अत्र गाइः इति त्सिबापूर्वस्य वृद्धिः । सांवर्ते श्वताः । पाऽ२त्थूँऽ२३४औहोवा । अत्र ता-इति त्सिबापूर्वस्य वृद्धिः ॥ ७० ॥

इति पुल्लदीपे पञ्चमाध्यायस्य वृद्धावृद्धो द्वितीयः खण्डः ॥ २ ॥

तृतीयः खण्डः

घमृगाद्यं तमसे ॥ १ ॥

वि. दैर्घतमसे दीर्घमृगाद्यक्षरं वर्धते । बोधा सु मे (ऊ. क्षु. ८७०) इत्येवमादीनि ॥ १ ॥

भा. सहोदैर्घतमसे ऋगाद्यं दीर्घमक्षरं वर्धते । बोधा सु मे (ऊ. क्षु. ८७०) भूरिहिते (ऊ. क्षु. ८७१) इत्येवमादीनि ॥ १ ॥

दी. हाउपिषा (ऊ. क्षु. ८७०) इति सहोदैर्घतमसे तृतीयायां हाउबोधा

---

2. S⁴ om. एन्द्र ... निधने(1.4)

4. L¹ om. अत्र .... वृद्धिः; S⁴ after वृद्धिः adds: एन्द्रनोस .... सांवर्ते वृद्धिः

5. S⁴ om. सांवर्ते ; L¹My³ om अत्र....वृद्धिः

6. My³ om वृद्धावृद्धो

13 The manuscript M⁴ does not contain the previous chapters. Of the fifth chapter too it does not have the first two khandas. It commences: –

श्रीः फुल्लसूत्रदीपिका । श्रीवासुदेवाय नमः ॥ श्रियै नमः॥ सप्तस्वरैः समस्तं यो जगदेकमनोहरम् । संजीवयतु विश्वात्मा स नो विष्णुः प्रसीदतु ॥ सामजालजलाकीर्णं छन्दःकल्लोलसंकुलम् । तन्त्रग्राहान्वितं वन्दे सामवेदमहार्णवम् ॥ ; L¹M⁴My³ om. हाउ .... तृतीयायां

इत्यस्याम् ऋच आद्यं दीर्घमक्षरं वर्धते । अत्र **बो**-इति ऋगाद्यदीर्घाक्षरस्य वृद्धिः । **श्रुधी-हवम्** (ऊ. क्षु. ८७१) इति **सहोदैर्घतमसे** तृतीयायां हाउभूराइ । अत्र भू इति ऋगाद्य-दीर्घाक्षरस्य वृद्धिः । एवमादिषु ॥ १ ॥

यश्च ॥ २ ॥

वि ऋगाद्यो ह्रस्वोऽपि **यः**शब्दो वर्द्धते । **यस्ते मदो** (ऊ. क्षु. ८७०) ॥ २ ॥

भा. यकारश्च ऋगाद्यो ह्रस्वोऽपि वर्धते । **यस्ते मदो** (ऊ. क्षु. ८७०)॥ २ ॥

दी. यकारश्च ऋच आद्यो ह्रस्वोऽपि वर्धते । **हाउयास्ताइ** (ऊ. क्षु. ८७०) ॥ २ ॥

परात्सर्वत्र ॥ ३ ॥

वि. आद्यात् **परात्** परस्य वृद्धिः । पादतृतीयमित्यर्थः ॥ ३ ॥

भा. ऋगाद्यात् परात्परं वर्धते । तृतीयमित्यर्थः । **पिबा सोम** (ऊ. क्षु. ८७०) इती **सो**-शब्दस्य वृद्धिः ॥ ३ ॥

दी. सहोदैर्घतमसे ऋच आद्यात् परात् परमक्षरं वर्धते । तृतीयमित्यर्थः । हाउ-पिबा । **सो** इति । अत्र **सो**-शब्दस्य वृद्धिः । एवं **सर्वत्र** ॥ ३ ॥

नाहम् ॥ ४ ॥

वि. **तवाहंसोमारारां** (ऊ. क्षु. ८८१) आद्यात् परात्परस्य वृद्धिप्रतिषेधः । अकारस्य वृद्धिर्न भवतीत्यर्थः ॥ ४ ॥

---

1 M⁴L¹My³ सहोदैर्घतमसे for इत्यस्याम्

2. M⁴¹LMy³ om अत्र ... वृद्धिः

7. s⁴ after स्ताइ adds: अत्र या इति ऋगाद्यह्रस्वाक्षरस्य वृद्धिः ।

10. KA²M¹⁻²TS¹⁻³ अद्यात् for ऋगद्यात्; PV²L²A³ ऋगाद्य for ऋगद्यात्.

12 s⁴ after वर्धते adds. हाउपिवा इति सहोदैर्घतमसे द्वितीयायां

13. L¹M⁴My³ om. अत्र .... वृद्धिः; s⁴ सो इति तृतीयाक्षरस्य for सोशब्दस्य.

15. PA³L²V²B⁴ अकारस्य तृतीयस्य for अद्यात् परात्परस्य.

भा. तवाहं सोमारारं (ऊ. क्षु. ८८१) अकारस्य तृतीयस्य वृद्धिप्रतिषेधः ॥ ४ ॥

दी. हताश (ऊ. क्षु. ८८१) इति सहोदैर्घतमसे अहाँसो इत्यत्र अकारस्य तृतीयस्य न वृद्धिः ॥ ४ ॥

पादतुरीयम् ॥

वि. अहमित्यनुवर्तते । **पादतुरीयं** हमित्येतदक्षरं वर्धते । तत्रैव ॥

वात्सप्रे त्रिष्टुभि ॥ ५ ॥

वि. पादतुरीयमित्यनुवर्तते । त्रिष्टुभि वात्सप्रे **सोमः पवतायां** (ऊ. अ. ७९) पादे पादे चतुर्थमक्षरं वर्धते ॥ ५ ॥

भा. त्रिष्टुभि वात्सप्रे सोमः पावतायां पादे पादे चतुर्थमक्षरं वर्धते ॥ ५ ॥

दी. हाउहाउहाउ इत्यादि **सोमः पवा** (ऊ. द. ७९) इति त्रिष्टुप्छन्दसि वात्सप्रे पादे पादे चतुर्थमक्षरं वर्धते । **जनितादाइ** । एवमादिषु ॥ ५ ॥

पाष्टे च दीर्घे ॥ ६ ॥

वि. दीर्घे अक्षरे **पञ्चमाष्टमे** वर्धते वात्सप्रे ॥ ६ ॥

भा. **पञ्चमाष्टमे च** अक्षरे दीर्घे पादे पादे वर्धते वात्सप्रे ॥ ६ ॥

दी. त्रिष्टुभि वात्सप्रे पादे पादे **पञ्चमाष्टमे च** अक्षरे **दीर्घे** वर्धते । **तेजनि । तामतीनाम्** । अत्र **ते** इति पादपञ्चमाक्षरस्य दीर्घस्य **ता**-इति पादाष्टमाक्षरस्य दीर्घस्य च वृद्धिः ॥ ६ ॥

---

2. S[4] तृतीयाक्षरस्य. for तृतीयस्य
4. The southern MSS read पादतुरीयम् and वात्सप्रे त्रिष्टुभि as two separate sutras.
6. A[3]L[3] पवते इत्यत्र for पवतायां
7. MY[1]K पादचतुर्थं for पादे पादे चतुर्थं
12. S[4] after दाइ adds: अत्र दाइ इति पादतुरीयाक्षरस्य वृद्धिः ; My[3]M[4] इत्यादिषु for एवमादिषु
17. ML[1]My[3] om. अत्र.... वृद्धिः

स्य-त्रम् ॥ ७ ॥

वि. & भा. स्य-शब्द-त्र-शब्दौ ह्रस्वावपि वर्धेते पञ्चमौ । **जनितेन्द्रस्य । सोमः प्रवित्रम्** (ऊ. द.७९) ॥ ७ ॥

दी. त्रिष्टुभि वात्सप्रे **स्य-शब्द-त्र-शब्दौ** पञ्चमौ ह्रस्वावपि वर्धेते । **जनितेन्द्रा । स्याजनि** । अत्र **स्या** इति पञ्चमस्य ह्रस्वस्य वृद्धिः । **सोमपवाइत्रामति** । (ऊ. द. ७९) अत्र **त्रा** इति पञ्चमस्य ह्रस्वस्य वृद्धिः ॥ ७ ॥

षा-णी दान्ते ॥ ८ ॥

वि. षा-शब्द-**णी**-शब्दौ पादान्ते विषये वर्धेते ॥ ८ ॥

भा. **षाणी** इत्येतौ शब्दौ पादान्ते वर्धेते ॥ ८ ॥

दी. त्रिष्टुभि वात्साप्रे **षा । णी** । इत्येतौ शब्दौ पादान्तौ वर्धेते तृतीयायां स्तोत्रीयायाम् । **पवमा । नोमानीषाः । वृजने । मावराणी** ॥ ८ ॥

क्षौद्रेऽतिचतुर्थम् ॥ ९ ॥

वि. & भा. **क्षौद्रे** वात्सप्रे **पुरोजित्याम्** (ऊ. क्षु. ८९८) **अतीत्य चतुर्थं** वर्धते । पञ्चममित्यर्थः ॥ ९ ॥

दी. हाउ इत्यादि **पुरोजिताइ** (ऊ. क्षु. ८९९) इति **क्षौद्रे** क्षुद्रपर्वणि वात्सप्रे **चतुर्थमक्षरमतीत्य** पञ्चमं वर्धते । **पुरोजिताइ । वो** । अत्र **वो-इति** पञ्चममक्षरं वर्धते । इत्यनुष्टुभि विशेषः ॥ ९ ॥

---

5. M[4]LMy[3] अत्र पञ्चमम् for अत्र ...वृद्धिः
6. M[4]L[1]My[3] अत्रापि पञ्चमम् for अत्र ....वृद्धिः
7. My[1] KS[1]S[2]B[4] दान्त्ये for दान्ते.
8. KS[1]S[2] पादान्ते for पादान्त्ये
9. V[2] षाशब्दणीशब्दौ पादान्त्यौ for षाणी ... पादान्ते; PA[3]L[2] पादन्तौ for पादान्ते;
10. S[4]M[4]L[1] पादान्ते for पादान्तौ
11. S[4] after ॰षाः । अत्र षा इति पादान्त्याक्षरस्य वृद्धिः and after णी adds: अत्र णी इति पादान्त्याक्षरस्य वृद्धिः
13. A[2]KM[1]TS[1-2] om. पुरोजित्यां
16. My[3]L[1]M[4] om. अत्र.... वर्धते

ती च ॥ १० ॥

वि. ती-शब्दश्च वर्धते । **पुरोजितीत्यत्र** ॥ १० ॥

भा. शब्दश्चतुर्थो वर्धते । पुरोजिती ॥ १० ॥

दी. क्षौद्रे वात्सप्रे ती-शब्दश्चतुर्थो वर्धते । **पुरोजिताइ** (ऊ. क्षु. ८९८) । अत्र ता-इति चतुर्थमक्षरं च वर्धते ॥ १० ॥

धीगवे स्तावषष्ठं प्रत्युत्क्रामति सर्वत्र ॥ ११ ॥

वि. & भा. आन्धीगवे प्रस्तावषष्ठमक्षरं प्रत्युत्क्रामति सर्वत्र । **परित्यं हर्यताम्** (ऊ. ए. ४७६) इति ॥ ११ ॥

दी. **परित्यँहर्यताऽ१९हाराइम्** (ऊ. ए. ४७६) इत्यान्धीगवे प्रस्तावे षष्ठमक्षरं प्रत्युक्रामति । उच्चस्वरो भवति सर्वसामसु ॥ ११ ॥

चमं योनौ ॥ १२ ॥

वि. **यौनौ पुरोजित्याम्** (ग्रा. गे. १६.८.५४५.६) आन्धीगवे **पञ्चममक्षरं** प्रत्युत्क्रामति ॥ १२ ॥

भा. आन्धीगवे पञ्चममक्षरं प्रत्युत्क्रामति **योनौ** पुरोजित्याम् ॥ १२ ॥

---

2. $A^3PL^2V^2B^4$ चतुर्थे for च; $PA^3I^1V^2B^4$ om. इत्यत्र
4. M^4L^1 om. अत्र··· वर्धते
7. A^2T. om. आन्धीगवे ... सर्वत्र; K सर्वासु P. सर्वेषु for सर्वत्र; $KA^2M^{1-2}S^{1-2}T$ सखायो दीर्घजा इह्वयाम् for परित्यं हर्यतामिति.
10. My^1 om. उच्चस्वरो ··· प्रत्युत्क्रामति (p. 203,110)
11. The Northern MSS and also the MSS of फुल्लदीप read चमं योनौ and पर्यूषु विशस्त्वां रित्वं यां च as a single sūtra and comment accordingly. While चमं योनौ refers to आन्धीगव of ग्रामेगेय based on पुरोजिती (सा ५४५) the sūtra पर्यूषु refers to the gāṇas of उत्तरार्चिक. Since these two sūtras are concerned with gānas of two different books of melodies it is not correct to combine them into one. Further, च in the latter clearly indicates that it is distinct from the former, i.e. from चमं योनौ. We have therefore, followed what is known as Southern version i.e, vivaraṇa pāṭha.
12. $A^2M^{1-2}TS^{1-2}$ om. पुरोजित्याम्

दी. **पुरोजितीवोऽ१न्धासाः** (ग्रा. गे. १६. ८. ५४५.६) इति **योनावान्धीगवे** पञ्चममक्षरं **वो**-इति प्रत्युत्क्रामति । उच्चस्वरो भवति ॥ १२ ॥

पयूर्षु विशस्त्वां रि त्वन्द्यां च ॥ १३ ॥

वि. पर्यूषु प्रध (ऊ. द. २१९) **विशो विशो वो** (ऊ. ए. ४२३) **त्वां रिहन्ति धी** (ऊ. अ. ६१२) **त्वं द्यां च महि** (ऊ. अ. ६१२) इत्येतेषु च पञ्चमं प्रत्युत्क्रामति ॥ १३ ॥

भा. पर्यूष्वादिषु च पूर्वोक्तान्युदाहरणानि ॥ १३ ॥

दी. पर्यूष्वादिषु च **पर्यूषु प्रधाऽ१न्वावा** (ऊ. द. २१९) **विशोविशोवोऽ१ अताइथाइम्** (ऊ. ए. ४२३) **त्वां रिहन्तिधाऽ१इतायाः** (ऊ. अ. ६१२) **त्वन्द्याश्च महाऽ१इव्रता** (ऊ. अ. ६१२) । एतेषु पञ्चममक्षरं प्रत्युत्क्रामति ॥ १३ ॥

द्विपदास्वाद्यम् ॥ १४ ॥

वि. & भा. द्विपदास्वान्धीगवे पवस्वसोमायाम् (ऊ. प्रा. ८४८) **आद्यमक्षरं** प्रत्युत्क्रामति ॥ १४ ॥

दी. पाऽ१वास्वा (ऊ. प्रा. ८४८) इत्यादि **द्विपदास्वान्धीगवे आद्यं** प्रथममक्षरं प्रत्युत्क्रामति ॥ १४ ॥

---

2. S[4] om. उच्चस्वरो भवति

4. A[2]TS[1-3] om. पर्यूषु प्रध··· प्रत्युत्क्रामति (L. 6) ; K आन्धीगवे एतेषु for पर्यूषु प्रध ...इत्येतेषु

8. S[4] after च adds: पञ्चममक्षरं प्रत्युत्क्रामति उच्चस्वरो भवति; S[4] after प्रधाऽन्वावा adds: धा इति पञ्चममक्षरं प्रत्युत्क्रामति.

9. S[4] after थाइम् adds: अत्र वो इति पञ्चमाक्षरं प्रत्युत्क्रामति। पवस्व वाजसाऽ१तायाइ इत्यान्धीगवे द्वितीयायां; S[4] after इतायाः adds: अत्र धा इति पञ्चमाक्षरं प्रत्युत्क्रामति । अत्रैव तृतीयायां

10. S[4] अत्र हा इति for एतेषु.

12. A[3]PL[1]B[4]V[2] trans. पवस्व सोमायां after क्रामति; K om. आन्धी···· सोमायां

13. A[2]S[1-2] om. द्विपदासु.... प्रत्युत्क्रामति; M[2] after अक्षरं adds: वृद्धं

आइन्द्रा सोमाभिधा ॥ १५ ॥

वि. द्विपदास्वान्धीगवे सोमाभिधौ आइन्द्रा भवतः स्वादिष्ठायाम् (ग्रा. गे. १२. १. ४६५. १) । आऽ२इन्द्राऽ२३ ॥ १५ ॥

भा. सोमशब्देऽभिधाशब्दे च आइन्द्रा भवति । पवस्वसोमायामेव (ऊ. प्रा. ८४८) ॥ १५ ॥

दी. आऽ२३इन्द्रा इत्याइन्द्रापर्व । पाऽ१वास्वा (ऊ. प्रा. ८४८) इत्यान्धीगवे सोमशब्देऽभिधाशब्दे च आइन्द्रा भवति । सोऽ२३मा । भाऽ२३इधा ॥ १५ ॥

म्रे तृतीये वार्धस्वतन्वाराता शता ॥ १६ ॥

वि. वाम्रे तृतीये पादे वार्धस्वतन्वा आराता शता इत्येतास्तिस्रः पर्वगीतयो भवन्ति । अभिसोमा-(ऊ. सं. २७८)दिषु । अधज्मोधवादिवायां (ग्र. गे. २. ५. ५२. १) वार्धस्वतन्वा । गाइराऽ१ममाऽ२ ॥ त्वन्नो अग्न (ग्रा. गे. १. १.६.२) । द्वितीयायां स्या औऽ३हो । आरातेः ॥ आत्वासहस्रमा । शताम् (ग्रा. गे. ६. २. २४५. ४) । तृतीये पादे एतेषां पर्वणां गीतयो भवन्तीत्यर्थः ॥ १६ ॥

भा. वाम्रे तृतीये पादे त्रीणि पर्वाणि भवन्ति । वाम्रे तृतीये पादे एव वार्धस्वतन्वाराता शता भवन्ति । अधज्मोधवे-(ग्रा. गे. २. ५. ५२. १)त्यत्र वार्धस्वतन्वा पञ्चाक्षरा । त्वन्नो अग्ने-(ग्रा. गे. १. १. ६.२)त्यत्र आराता द्वितीये साम्नि । आत्वासहस्रम् (ग्रा. गे ६. २. २४५. ४) शताम एतत्पर्वत्रितयं भवति अभिसोमादिषु । सामुद्रस्या । धिवाऽ३इष्टापे । मनाउवाऽ३ । इत्येवम् । ॥ १६ ॥

---

2. $A^2M^2S^1$ अइन्द्राद्वौ भवतः । आदिशब्दः प्रकारवचनः पूर्वोक्त for आइन्द्रा … स्वादिष्ठायाम्-

4. P शब्दोऽ …॰शब्दश्च for शब्देऽ … शब्दे च

7. S^4 after इधा adds: इति द्वे आइन्द्रे भवतः

9. Ks^{1-2} My^1 om. पर्वगीतयः

10, s^{1-2} om. भवन्तिः A^2 after भवन्ति adds: वार्धस्वतन्वा एकाक्षरोच्चाआराता त्र्यक्षरा श्शान्धा (शाता?) द्व्यक्षरा

14. $A^3L^2B^4$ एव सर्वा for त्रीणि पर्वाणि; P om. त्रीणि; A^3L^2 राता P एता for एव

15. $A^3PL^2V^2$ om. वार्धस्व…त्रितयं भवति (1. 17)

दी. **अग्निसोमासश्रा । हाऽ३हाऽ३इ** (ऊ. सं. २७८) इति **वाम्रे** तृतीये पादे **वार्धस्वतन्वा** इति पञ्चाक्षरं पर्व । **आराते**ः इति त्र्यक्षरम् । **शता** इति द्व्यक्षरम् । एवं पर्वत्रये वृद्धिर्भवति । **समुद्रस्या । धिवाइष्टापे । मनाउवाऽ३** (ऊ. सं. २७८) ॥ १६ ॥

अदब्धायां त्वान्धा मध्ये ॥ १७ ॥

वि. **अदब्धस्सुरभिन्तर** (ऊ. अ. ६०४) इत्यस्यां मध्ये **आन्धा** भवति । आरातायाः स्थाने इत्यर्थः ॥ १७ ॥

भा. **अदब्धायां** (ऊ. अ. ६०४) **तु** वाम्रे **आन्धा मध्ये** भवति । आरातायाः स्थाने । **सुतेचित्वा । प्सुमादा । मआउवाऽ३** । इत्येवम् ॥ १७ ॥

दी. **अदब्धस्सुरभि** (ऊ. अ. ६०४) इति वाम्रे **तु मध्ये** मध्यमे पर्वणि आरातायाः स्थाने आन्धापर्व भवति । **सुतेचित्वा । प्सुमादा । मआउवाऽ३** । इत्येवम् ॥ १७ ॥

मानॄगो च मागायतोपहिता ॥ १८ ॥

वि. आन्धा इत्यनुवर्तते । **अनूपे गोमानॄगो** (ऊ. द. ८७) इत्यत्र **मागायतोपहिता आन्धा** भवति । **मागायतापूर्वा आन्धा** भवतीत्यर्थः । इन्द्रायसामगायतायां (ग्रा. गे. १०. ४. ३८८. २) **मागायत** इति वार्धस्वतन्वायाः स्थाने ॥ १८ ॥

भा. **आनूपे गोमान् गोभिर्** (ऊ. द. ८७) इत्यत्र आन्धा **च** मध्ये भवति । **मागायता** चास्य पूर्वा भवति । वर्धस्वतन्वायाः स्थाने **आनूपेगो । मानॄगो । भिरउवाऽ३** । इत्येवम् ॥ १८ ॥

---

5. $S^{1-2}K$ ॰न्तरायां for ॰न्तर इत्यस्यां
7. A^2 आन्धा for आरातायाः
9. S^4 before अदब्ध॰ adds: परितोषिञ्चता इति वाम्रे तृतीयायां; S^4 अस्यां पूर्वोक्तत्रिषु पर्वसु for वाम्रे तु मध्ये
10. S^4 अत्र मादा इत्यान्धापर्व भवति for इत्येवम्
12. $A^2M^{1-2}TS^1$ om. अनु॰
13. $KM^{1-2}TS^2A^2$ गायते for गायातायां मागायत
14. $M^{1-2}S^1A^1T$ om. वार्धस्व ....स्थाने
15. P after भवति adds: आराताया स्थाने मान् गोमायते एहित्वमानू गोशब्दश्चान्धा भवति

दी. **सोम उष्वाणस्सो** (ऊ. द. ८७) इति वाम्रे मध्यमायाम् **आनूपे गोमान्** गोभिरित्यत्र आन्धापर्व मध्ये भवति । **मागायता** च आन्धापर्वण उपहितपूर्वा वार्धस्वतन्वा ।

१ २ ३ २ १ ‒ २

स्थाने भवति । **मागायता** इति चतुरक्षरं पर्व भवतीत्यर्थः । **आनूपेगो** । **मागो** । **भिराउवाऽ३** । इत्येवम् ॥ १८ ॥

तुवि शुद्धीयौदलयोः ॥ १९ ॥

वि. **शुद्धाशुद्धीये** (ऊ. द. १६५) **औदले** (ऊ. द. १६८) च **वि**-शब्दो वर्धते । **तुविद्युम्नं विभासहम्** इति ॥ १९ ॥

भा. **तुविद्युम्नम्** इत्यत्र [शुद्धा-]**शुद्धीये** पदनिधने (ऊ. द. १६५) **औदले** (ऊ. द. १६८) च **वि**-शब्दस्य वृद्धिः । योनिवद्भवादवृद्धिः ॥ १९ ॥

२ १र र २र १र २ १ १२र

दी. **अमीनोवाजसातमाम्** (ऊ. द. १६५) इति **पदनिधनशुद्धाशुद्धीये अभी-**

र१

नोवा (ऊ. द. १६८) इति **औदले** च **तुविद्युम्नम्** इत्यत्र **वि**-शब्दस्य वृद्धिः । योनिवद्-

२ १

भावान्न भवति वृद्धिः प्राप्ता । शुद्धाशुद्धीये **तुवाइद्यूऽ२३म्नाऽ३म्** । औदले चैवम् ॥ १९ ॥

धारं वाचः साम्नि ॥ २० ॥

वि. & भा. **वाचःसाम्नि सहस्रधारम्** इति **धा**-शब्दस्य वृद्धिः ॥ २० ॥

३र४र५र र २

दी. **आसोतापा । हो** (ऊ. से. २५९) इति **वाचःसाम्नि** द्वितीयायां **सहस्र-**

१ २

धारम् इति **धा** शब्दस्य वृद्धिः । **साहस्रधा** ॥ २० ॥

सिते थे द्वितीयम् ॥ २१ ॥

---

2. S[4] पर्वणात् for पर्वणः; S[4]L[2] मागायत for मागायाता

6 T °शुद्धीयौदलयोः for °शुद्धीये औदले च; A[2] तुश्शब्दविशब्दौ वर्धेते for विशब्दो वर्धते

9. S[1-2] om. योनिवद्भावादवृद्धिः

12. S[4] अवृद्धिप्राप्ते वृद्धिरित्यर्थः L[1] अवृद्धिप्राप्ता for न भवति वृद्धिः प्राप्ता; S[4] after °म्नाऽ३म् adds: अत्र वा इति वृद्धिः । अभीनोवा; L[1] after चैवं adds: योनिवद्भावान्न भवति वृद्धिः प्राप्ता

14. PL[2] om. वाचःसाम्नि

16. S[4] after सहस्रधा adds: अत्र धा इति वृद्धिः

वि. **गायत्रीसामासिते** सर्वासूद्गीथद्वितीयस्य वृद्धिः । योनौ न ॥ २१ ॥

भा गायत्रीसामा**सिते उद्गीथे द्वितीय**मक्षरं वर्धते । **पवस्वदेव** (ऊ. द. १६०) आदिषु ॥ २१ ॥

दी. **पवस्वदेवआ इयाऽ३४ईया** (ऊ. द. १६०) इति गायत्रीसामासिते उद्गीथे द्वितीयमक्षरं वर्धते । **युषागिन्द्रं गच्छतु** तौऽ२ । एवमादिषु ॥ २१ ॥

आयास्य आन्धान्तः ॥ २२ ॥ असंयोगे ॥ २३ ॥

वि. त्रिणिधनायास्ये **आन्धान्तो** वर्धते **असंयोगे** प्रत्यये ॥ २२-२३ ॥

भा. त्रिणिधने **आयास्ये आन्धाया अन्तो** वर्धते । **रा३या३आ३यो३** । एषा आन्धा ॥ २२ ॥

संयोगे तु प्रत्यये आन्धाया वृद्धिप्रतिषेधः । **सादत्प्रात्नाम्** ॥ २३ ॥

दी. **पुनानस्सोमधा हाउहोवा** (ऊ. द. ४१) इति त्रिणिधने आयास्ये **आन्धाया अन्तो** वर्धते । **रायाआऽ२३४** इति मध्यमोऽभ्यास आन्धापर्व ॥ २२ ॥

अः प्रतिषेधे । संयोगे तु प्रत्यये आन्धायाः वृद्धिप्रतिषेधः । **प्रत्नँसधस्थमाहाउ-होवा** इति त्रिणिधने आयास्ये **सादत्प्राऽ२३४त्नाम्** ॥ २३ ॥

द्वैगतेऽभिगीतात् ॥ २४ ॥

वि. & भा. **द्वैगते अभिगीतात्** परं वर्धते **परीतोषि-** (ऊ. अ. ६१९) आदिषु ॥ २३ ॥

---

2. S[1] T after °सिते add: युषम्यस्तेमदायां तृचयोः (S[1] मदतृचयोः); A[2] om. उद्गीथे.... वर्धते
5. S[4] before एवम् adds: अत्र षा इति उद्गीथद्वितीयस्य वृद्धिः ।
6. The m:ss of vivarana combine sūtras 22 & 23
7. T after °यास्ये adds: प्रहूयसाद्ये
8. L[2]A[3]B[4] आं३धाआं३धा for रा३या३आ३यो३
11. M[4] °धनम् for °धने
14. S[4] after °त्नाम् adds: अत्र द इति संयोगे प्रत्यये अवृद्धिः
16. A[2]TS[1-2]M[1-2]My[1] पर; for परं ; A[2]M[1-2]TS[1-2] om. परीतोष्यादिषु.

दी. **परीतोऽ३षिञ्चतासुताम्** (ऊ. अ. ६१९) इति **द्वैगते अभिगीतात्** अक्षरात् परं वर्धते । **न्वाँयोनर्योअप्स्वअन्ताराऽ२** । अत्र अ-कारोऽभिगीतः । तत्परस्य **न्वा-इत्यस्य** वृद्धिः ॥ २३ ॥

नवमाच्च प्रसोमप्रान्त्ययोस्तवमध्यमायां च तृतीये ॥ २५ ॥

वि. & भा. द्वैगते एव **तृतीये** पादे **नवमादक्षरात्** परं वर्धते **प्रसोमदेव-** (ऊ. स. ६९०) प्रथमान्त्ययोः स्तोत्रीययोः । तृतीयायां तु विकर्षं कृत्वा **तवाहंसो-** (ऊ. अ. ६४८) **मध्यामयां च**-शब्दात् तृतीये पादे, नवमादक्षरात् परं वर्धते ॥ २५ ॥

दी. प्रसोमाऽ२देववीतयाइ (ऊ. स. ३९०) इति **द्वैगते** प्रथमतृतीययोः **ऋचोः** तृतीये पादे नवमादक्षरात् परं वर्धते । तृतीयायां तु विकर्षं कृत्वा **तवाहाऽ३१सोम** (ऊ. अ. ६४८) इति **द्वैगते** मध्यमायां च-शब्दात् तृतीये पादे, नवमादक्षरात् परं वर्धते । **प्रसोम-द्वैगते पयसामदिरोनजागृऽ१वीऽ२ः** । तृतीयायां **हिन्वन्त्यपयसोयथाराऽ१थाऽ२म्** । **तवाहाऽ३१सोमरारणा** (ऊ. अ. ३४८) इति **द्वैगते** मध्यमायां **अहन्नक्तमुतसोमातेऽ१दि-वाऽ२** । अत्र सर्वत्र तृतीयः पादो ग्राह्यः । न पर्वदशमाक्षरम् । २५ ॥

बृहत्यौ होवायाः परं षष्ठमक्षरं कृष्यते ॥ २६ ॥

वि. & भा. बृहति औहोवायाः परं षष्ठमक्षरं कृष्यते त्वामिध्यादिषु ॥ २६ ॥

---

2. M^{4} आं ; L^{1} अं- for अ- ; $L^{1}M^{4}My^{3}$ om. तत्परस्य···· वृद्धिः
4. $A^{2}M^{1}TS^{1}$ reed तवमध्यमायां च तृतीये as a separate sūtra
5. $A^{2}M^{1-2}$ Ts^{1-2} परो for परं
6. $PB^{4}S^{2}V^{2}A^{3}$ om. स्तोत्रीययोः; $A^{2}M^{1}TS^{1}$ om . तृतीयायां तु विकर्षं कृत्वा
7. $A^{1}M^{1-2}S^{1}$ च एतेषु दशममक्षरं वर्धते । तृतीये पादे इत्यर्थः ॥ for चशब्दात् ···वर्धते
8. L^{1}. om. °तृतीययोः ऋचोः
10. प्रसोमाऽ३देवीतयाइ इति for प्रसोम°
11. S^{4} after वीऽ२ः adds: अत्र जा-इति नवमाक्षरात् परस्य वृद्धिः and L^{1} नवमाक्षररारीरे(!) वृद्धिः; S^{4} after थाऽ२म् adds: अथ था-इति नवमाक्षरात् परस्य वृद्धिः । अत्र न्त्य इति विकर्षेत्
12. S^{4} after दिवाऽ२ adds: अत्र मा इति नवमाक्षरात् परस्य वृद्धिः
15. $M^{1-2}S^{1-2}$ om. बृहति ··· त्वामिध्यादिषु

दी. औहोइत्वामिद्धिहवामहाऽ३ए (र. द. ५) इत्यादि **बृहत्साम्नि औहोवायाः परं षष्ठमक्षरं कृष्यते** । कर्षणं भवति । **द्रासाऽ३१त्** ॥ २६ ॥

त्वमग्न आद्यायामाद्यम् ॥ २७ ॥

वि. **त्वमग्ने**-(र. सं ३४)**बृहति** प्रथमायाम् औहोवायाः परमाद्यमक्षरं कृष्यते ॥ २७ ॥

भा. त्वमग्ने-बृहति **औहोवायाः** परं प्रथममेवाक्षरं कृष्यते ॥ २७ ॥

दी. औहोइत्वमग्नेयज्ञानाꣳहोऽ३ए (र. सं. ६४) इति बृहति **आद्यायाम्** ऋचि **औहोवायाः** परं प्रथममक्षरं कृष्यते । कर्षणं भवति । **षाऽ३१म्** ॥ २७ ॥

मध्यमायां तृतीयम् ॥ २८ ॥

वि. & भा. **मध्यमायां** स्तोत्रीयायाम् औहोवायाः परं **तृतीय**मक्षरं कृष्यते ॥ २८ ॥

दी. त्वमग्ने- (र. सं. ६४)बृहति **मध्यमायां** स्तोत्रीयायाम् औहोवायाः परं **तृतीय**मक्षरं कृष्यते । **भाइः** । **याजाऽ३१** ॥ २८ ॥

उत्तमायां चतुर्थम् ॥ २९ ॥

वि. & भा. **त्वमग्ने**-(र. सं. ६४)बृहति **उत्तमायां** स्तोत्रीयायाम् **औहोवायाः** परं **चतुर्थ**मक्षरं कृष्यते ॥ २९ ॥

दी. **त्वमग्ने**- (र. सं. ६४)बृहति **उत्तमायां** स्तोत्रीयायाम् औहोवायाः परं **चतुर्थ**मक्षरं कृष्यते । **चदाइ** । **वाआऽ३१** ॥ २९ ॥

अनुष्टुप्प्रथमायां च ॥ ३० ॥

---

2. S⁴ after द्रासा३१त् । adds: अत्र सा इति षष्ठमक्षरं कृष्यते
10. A²KM¹S¹M²S²My तृतीयं for स्तोत्रीयायां and after परं om. तृतीयम्
11. M⁴L¹ इति त्वस्यां for बृहति
12. M⁴ om. तृतीयम् ...परं (l. 15); S⁴ after जाऽ३१ । adds: अत्र जा इति कर्षणम्
16. S⁴ after आ३१ । adds: अत्र आ इति चतुर्थमक्षरं कर्षणम्

वि. अनुष्टुभि बृहति औहोवायाः परं चतुर्थमक्षरं कृष्यते **प्रथमायां** स्तोत्रीयायाम् । **पुरोजिती** (र. सं. ६१) इत्यादिषु ॥ ३० ॥

भा. अनुष्टुप्**प्रथमायां च** बृहति औहोवायाः परं चतुर्थमक्षरं कृष्यते **पुरोजित्यादिषु**॥ ३० ॥

दी. **औहोइपुरोजितीवोअन्धसाऽ३ए** (र. सं. ६१) इति **अनुष्टुभि** बृहति प्रथमायां स्तोत्रीयायामौहोवायाः परं चतुर्थमक्षरं कृष्यते । **श्वानाम्** । **श्राथाऽ३१इ** ॥ ३० ॥

श्येनोत्तरयोर्द्वितीयम् ॥ ३१ ॥

वि. **श्येने** बृहति उत्तरयोः स्तोत्रीययोरौहोवायाः परं द्वितीयमक्षरं **कृष्यते** । **औहोइसत्वाऽ३मे** । **त्राहाऽ३१** ॥ ३१ ॥

भा. **श्येने** बृहति यत् द्विपदोत्तरासु गीतं तत्र **उत्तरयोः** स्तोत्रीययोः औहोवायाः परं द्वितीयवक्षरं कृष्यते ॥ ३१ ॥

दी. श्येनयज्ञे **औहोइत्वामिद्धिहवामहाऽ३ए** (र. द. ५) इति बृहत्साम्नि यत् द्विपदोत्तरासु गीतं तत्र **औहोइसत्वाऽ३मे** । **औहोइगामाऽ३ए** । इत्यु**त्तरयोः** स्तोत्रीययोः औहोवायाः परं द्वितीयमक्षरं कृष्यते । द्वितीयायां **त्राहाऽ३१** । तृतीयायां **यामाऽ३१इ**॥

सप्तमं किमित्पूर्वयोः ॥ ३२ ॥

वि. & भा. **किमित्ते** बृहति **पूर्वयोः** स्तोत्रीययोः औहोवायाः परं **सप्तम**मक्षरं कृष्यते ॥ ३२ ॥

दी. **औहोइकिमित्ते विष्णो परिचाऽ३ए** (र. ए. ८५) इति बृहत्साम्नि प्रथम-

---

6. S[4] after थाऽ३१ । adds: अत्र था इति चतुर्थमक्षरं कृष्यते

10. A[2]TPA[3]L[2]B[4] श्येन for श्येने; A[2]M[1-2]S[1-2]T om. यत् ... तत्र

14. M[4]L[1]My[3] om. द्वितीयायां; M[4]L[1]My[3] om. तृतीयायां; S[4] after यामाऽ३१ । adds: अत्र हा इति मा इति द्वितीयमक्षरं कृष्यते

16. KM[1-2]TS[1] om. बृहति; KA[2]M[1-2]TS[1] om. औहोवायाः परं & अक्षरम्

द्वितीययोः स्तोत्रीययोः औहोवायाः परं सप्तममक्षरं कृष्यते । पोआस्मदा । पगूहाऽ३१ः । गृणामिता । वसामाऽ३१ ॥ ३२ ॥

तव-मध्यमायां च ॥ ३३ ॥

वि. तवाहँसोम-(र. क्षु. १९४) मध्यमायां च सप्तमं कृष्यते ॥ ३३ ॥

भा. तवाहँसो-(र. क्षु. १९४)बृहति मध्यमायामौहोवायाः परं सप्तमं कृष्यते ॥

दी. औहोइतवाहꣳसोमरारणाऽ३ए (र. क्षु. १९४) इति बृहति मध्यमायां स्तोत्रीयायाम् औहोवायाः परं सप्तमं कृष्यते । आहांनक्ताम् उतासोऽ३ ॥ ३३ ॥

गौशृङ्गेऽष्टादशविंशे ष्टुभि ॥ ३४ ॥

---

2. S[1-2] after वसामऽ३१ । adds: अत्र हा इति मा इति सप्तममक्षरं कृष्यते

5. S[2] after मध्यमायां adds: स्तोत्रीयायां; B[4] after सप्तमम् adds: अक्षरं

8. KA[2]M[1-2]TS[1-2] om. ष्टुभि. The vivaraṇa Mss too delete ष्टुभि from this sūtra. It may be noted in this connection that the word ष्टुभि is found at the end of this sūtra as also in the beginning of the following. In such context a scribe often drop by oversight one of the two indentical words facing each other. The sūtras 25–33 point out the syllables that bear the karṣaṇa tone in stotriyas of bṛhat melody. From the first of these sūtras, i.e. from बृहत्यौहोहायाः परं षष्ठमक्षरं कृष्यते (5. 3. 26) all the words, except षष्ठ are drawn to the following sūtras upto sūtra 33. Among these words बृहति occupies the key position. After तवमध्यमायाम् (5. 3. 33) only the word कृष्यते follows, that too upto two subsequent sūtras. The sūtras गौशृङ्गेऽष्टा० and the following ष्टुभि ज्ञीये speak of karṣaṇa tone in the stotriyas of the melodies of गौशृङ्ग and यज्ञायज्ञीय respectively sung on the triplet of आजागृविः (सा 1357 - 359) composed in triṣṭup metre. The sūtras, however, instead of quoting the tṛca cites the name of the metre. In the entire collection of gānas of uttarārcika there is only one gāna by name गौशृङ्ग that too on आ जागृविः. Therefore ष्टुभि clearly means त्रिष्टुभि and not अनुष्टुभि. As far as यज्ञायज्ञीय is concerned there are as many as 25 melodies that go by this name

वि. गौशृङ्गे अष्टादशविंशे अक्षरे उद्गीथे कृष्येते ॥ ३४ ॥

भा. गौशृङ्गे त्रिष्टुभि आजागृविः (ऊ. क्षु. ९१९) इत्यत्र उद्गीथे अष्टादशविंशे अक्षरे कृष्येते ॥ ३४ ॥

दी. आजागृविर्विप्रः। ऋताऽ३म् (ऊ. क्षु. ९१९) इति गौशृङ्गे त्रिष्टुभि उद्गीथे अष्टादशविंशे अक्षरे कृष्येते। नोअसदच्चमूषुसपन्तियंमिथुनासोनिकामाऽ२ध्वर्याऽ२॥

ष्टुभि ज्ञीये तृतीयेऽन्त्यमाइन्द्रादिः ॥ ३५ ॥

वि. त्रिष्टुभि ज्ञीये तृतीये पादे अन्त्यम् आइन्द्रादिर्भवति। सपाऽ२न्तियम्मिथुनासोनि। कामाऽ२३आ (ऊ. स. ७५१)॥ ३५ ॥

भा. त्रिष्टुभि यज्ञायज्ञीये आजागृविरित्यत्र तृतीये पादे अन्त्यम् अक्षरम् आइन्द्रादिर् भवति। सपाऽ२न्तियम्मिथुनासोनि। कामाऽ२३आ। एवमाइन्द्रा कर्तव्या॥

दी. आजाऽ५गृ· (ऊ. स. ७५१) इति त्रिष्टुभि यज्ञायज्ञीये तृतीये पादे अन्त्यम् अक्षरम् आइन्द्रायाः आदिः प्रथमं भवति। कामाऽ२३आ। एवमुत्तरयोः स्तोत्रीययोः। आऽ३३इन्द्रा इत्याइन्द्रापर्व॥ ३५ ॥

---

sung in various metres including अनुष्टुप् and त्रिष्टुप्. Therefore ष्टुभि, if removed from the following sūtra it could mean अनुष्टुभि as well since in both metres यज्ञायज्ञीय melodies are found. Even if it meant only त्रिष्टुभि there are two यज्ञायज्ञीय's sung in this metre, viz. आ जागृविः and सोमः पवते respectively. Therefore, to be precise, and to leave no scope for ambiguity, the Puṣpasūtra must mention ष्टुभि in both sūtras thereby making it clear that it is the melodies based an आ जागृविः sung in त्रिष्टुप् to which this rule applies

3. PB[4] कृष्यते for कृष्येते

5. S[4] after °ध्वर्याऽ२ ॥ adds: अत्र मा इति अष्टादशाक्षरे यों इति विंशाक्षरे च कर्षणम्। एवमुत्तरयोरपि ॥

12. S[4] अत्र मा इति तृतीयपादान्त्यमक्षरम् आइन्द्रायाः आदिर्भवति। द्वितीयायाम् ऊतीऽ२३सा। अत्र ती इति तृतीयपादन्त्याक्षरम् आइन्द्राया आदिर्भवति। तृतीयायां दज्ञाऽ२सू। अत्र ज्ञा इति तृतीयपादान्त्याक्षरम् आइन्द्राया आदिर्भवति। for एवमुत्तरयोः स्तोत्रीययोः

13. L[1] om. स्तोत्रीययोः

सोमः प्राष्टमम् ॥ ३६ ॥

वि. & भा. सोमऽपवतायाम् (ऊ. क्षु. ८९९) ज्ञीये प्रथमायां स्तोत्रीयायां तृतीये पादे अष्टममक्षरम् आइन्द्राया आ दिर्भवति । **जनाऽ२ इताग्नेर्जनि** । **तासूऽ२३री** ॥

दी. सोमाऽ५ःप (ऊ. क्षु. ८९.९) इति यज्ञायज्ञीये प्रथमायां तृतीये पादे अष्टममक्षरम् आइन्द्राया आदिर्भवति । **जनाऽ२इताग्नेर्जनि** । **तासूऽ२३री** ॥ ३६ ॥

इवप्रीःच पञ्र-रन्ध-पूर्वस्नौग्मतेषु ॥ ३७ ॥

वि. पञ्रस्नौग्मतयोस्तृतीये पादे द्वितीये पर्वणि **औक्ष्णोरन्ध्रे** तृतीये पादे तृतीये पर्वणि **इवप्री** भवति । इवप्रीरूपेण योनिवद्धत्वाद् वृद्धिप्राप्तस्य पर्वणः अवृद्धिर्विधीयते । **प्रेष्ठंवायां** (ग्रा. गे. १. १. ५. २) **स्तुषाइमित्राऽ३म्** । **इवाऽ२प्राऽ२३४याम्** ॥ ३७ ॥

भा. पञ्रस्नौग्मतयोस्तृतीये पादे द्वितीये पर्वणि प्रथमे **औक्ष्णोरन्ध्रे** तृतीये एव पादे तृतीये पर्वणि । एतेषु सामसु **इवप्री** भवति । **प्रेष्ठंवो**-(ग्रा. गे १. १.५. २) द्वितीये इवप्रीरूपेण योनिवद्धावाद् आद्यस्याक्षरस्य वृद्धिप्राप्तस्य वृद्धिप्रतिवेधः ॥ ३८ ॥

दी. प्रसोऽ४म । **दाऽ६इववी** (ऊ. सं. २३५) इति **पञ्रे मृज्यमानाः** (ऊ. द. १०२) इति प्रथमे **औक्ष्णोरन्ध्रे आऽ२३४** । **तेअग्नइधी** (ऊ. अ. ६५८)

---

2. TA[1] om. स्तोत्रीयायां
3. KA[2]M[1-2]S[1-2]T om. तृतीये पादे; KA[2]M[1-2]TS[1-2] इद्रादिः for इन्द्राया आदिः
5. s[4] after तासूरी adds: अत्र सू इत्यष्ठममक्षरम् आइन्द्रादिर्भवीत
6. M[1-2] प्रिय, A[2] प्रिया, T प्रीये for प्रीच
10. KA[2]M[1-2]TS[1-2] om. प्रथमे
11. KA[2]M[1-2]TS[1-2] om एतेषु सामसु; KA[2]M[1-2]S[1-2]T om प्रेष्ठंवोद्वीतीये
12. PL[2]A[1]V[4]B[4] प्रीय for प्रीरूपेण KA[2]M[1-2]TS[1-2] om. अद्यस्याक्षरस्य; KA[2]M[1]TS[1-2] पर्वणः अवृद्धिर्विधीयते प्रेष्ठवायां स्तुषाइमित्राऽ२इवाऽप्राऽ२३४याम् for वृद्धिप्रतिषेधः; PA[1]LV[2] प्रतिषेधः for वृद्धिप्रतिषेधः
13. s[4] after पञ्रे adds: सामाऽ२दाऽ२३४राः द्वितीयायाम् । अर्जूऽ२नोऽ२३४आ तृतीयायाम् तियाऽ२पाऽ२३४साः ।
14. s[4] after औक्ष्णोरन्ध्रे adds: द्वितीयायां नोआऽ२व्याऽ२३४ याइ । तृतीयायां नानाऽ२इष्काऽ२३४-र्ताम् इति

इति **स्त्रौग्मते** च । एतेषु सामसु उद्गीथे **इवप्री** भवति । पञ्चे **सामाऽ२दाऽ२३४राः** । औक्ष्णोरन्ध्रे **नोआऽ२व्याऽ२३४याइ** । स्त्रौग्मते च **स्मवाऽ२इइपाऽ२३४ताइ** । **इवाऽ२-प्राऽ२३४या**मिति **प्रेष्ठंव** (ग्रा. गे. १. १. ५. २) इति द्वितीये इवप्रीपर्व । योनिवद्भा-वादाद्यस्याक्षरस्य वृद्धिप्राप्तस्य वृद्धिप्रतिषेधः ॥ ३७ ॥

न योनौ ॥ ३८ ॥

वि. **योनौ** इवप्री **न** भवति ॥ ३८ ॥

भा. **यौनौ** तु वर्धते एवाद्यमक्षरम् ॥ ३८ ॥

दी. **यदाऽ४क** (ग्रा. गे. ८. ६. २८८) इति **यौनौ** तु वर्धते एवाद्यमक्षरम् । न इवप्री भवति ॥ ३८ ॥

डव उतद्विषा ॥ ३९ ॥

वि. **माण्डवे** (ऊ. स. ७७५) तृतीये पादे **उतद्विषा** भवति । तृतीयाद्यस्या-वृद्धिरित्यर्थः । तृतीयाक्षरस्य वृद्धिरिति च । **उताद्वाऽ२इषाऽ२ः** । **मर्त्यस्य** । **इडाऽ२-३भाऽ३४३** ॥ ३९ ॥

भा. **माण्डवे तवाहँसोमायां** (ऊ. स. ७७५) **पुरूणिबभ्रविति उतद्विषा** भवति ॥

दी. **तवाहऽसोमराराणा** (ऊ. स. ७७५) इति **माण्डवे** ऊर्द्वीथे **उताद्वाऽ१-इषाऽ२ः** इति पर्व भवति । **पुरूणाऽ१इबाऽ२** ॥ ३९ ॥

---

1. S[4] after च adds: द्वितीयायां स्मवाऽ२इइपाऽ२३४ताइ तृतीयायां पूपूऽ२३४या; इतिः S[4] om. पञ्चे ... ०इइपाऽ२३४ताइ (l. 2)
3. M[4]L[1] om. प्रेष्ठं वः and द्वितीये
6. A[2]M[1-2]T trans. इवप्री after भवति
8. S[4] after योनौ तु adds: पञ्चे । तावाऽ२रूऽ२३णाम् । अत्र ता इति आद्याक्षरस्यावृद्धिः । मृज्य-माना: इति पूर्वमौक्ष्णोरन्ध्रे । पूरूऽ२स्पृऽ२३४हाः । अत्र पू इत्याद्याक्षरस्य वृद्धिः । आऽ२३४तेअमइधी इति स्त्रौग्मते । पानीऽ२याऽ२३४सी अत्र पा इत्याद्याक्षरस्य वृद्धिः । एवं
16. S[4] after भवति adds: प्रथमायां and after इबाऽ२ । adds: द्वितीयायां तवहाऽ२न्नाऽ२ । तृतीयायां घृणाताऽ१पाऽ२ । एवमुतद्विषा भवति

अयोनौ ॥ ४० ॥

वि. **योनौ** उतद्विषा न भवति ॥ ४० ॥

भा. योनौ तु प्रतिषेधः ॥ ४० ॥

दी. अग्नेविवस्वदुषासः (ग्र. गे. १. ४. ४०) इति योनौ तु प्रतिषेधः । आदाऽ१ शुषेऽ२ ॥ ४० ॥

हिन्वा-विशीयेऽताइत्थ्यामादिः ॥ ४१ ॥

वि. **हिन्विविशीये** (ऊ. द. १७०) अताइत्थ्यामादिर् वर्धते । प्रेष्ठंवः । ओहाइ । अताऽ२ ३इथीम् (ग्रा. गे. १. १. ५. १) स्वसारः । जामाऽ२ ३याः ॥

भा. **हिन्वन्तिविशीये** (ऊ. द. १७०) द्वितीये पादे द्वितीयं पर्व तस्यादिर्वर्धते । जामाऽ२ ३याः । प्रेष्ठंवः-(ग्रा. गे. १. १. ५. १)प्रथमे अताइथीम् ॥ ४१ ॥

दी. हिन्वाहिंताऽ३इम्र् (ऊ- द. १७०) इति **विशोविशीये** उद्गीथे अताऽ२ ३-इथीम् । तस्यादिर्वर्धते । जामाऽ२ ३याः । प्रेष्ठंवः- (ग्रा. गे. १. १. ५. १) प्रथमे अताऽ२ ३इथीम् इति अताइथीपर्व भवति ॥ ४१ ॥

योनौ च ॥ ४२ ॥

वि. & भा. **योनौ च** विशीये अताइथ्यामादिर्वर्धते । दूराऽ२ ३याम् । नान्यत्रेत्यर्थः ॥ ४२ ॥

दी. विशोविशोहिंवोऽ३अतिथाइम् (ग्रा. गे. २.९. ८७. १) इति **योनौ च** अताइथ्यामादिर्वर्धते । दूराऽ२ ३याम् ॥ ४२ ॥

---

3. V[2] after तु adds: उतद्विषायाः
4. M[4] om. अग्ने... शुषेऽ२ ॥
5. s[4] after °शुषेऽ२ adds: इति प्रथमाक्षरस्य वृद्धिः
13. M[4]L. इथ्याम् for इथीम् ; S[4] after वर्धते adds: प्रथमायां; S[4] after जामायाः adds: द्वितीयायां वाइभाऽ२ ३याः । तृतीयायां वाइभाऽ२ ३ याः । एवमाद्याक्षरस्य वृद्धिः ।
15. PL[1]A[1]V[2]B[4] अन्यत्र सर्वत्र प्रतिषेधः for नान्यत्रेत्यर्थः ।
16. L[1]My[4] om. विशो... दूरायाम्
17. s[4] after दूरायाम् । adds: अत्र दू इति वृद्धिः ।

स्वासु शने द्वितीयपादद्वितीयम् ॥ ४३ ॥

वि. **स्वासु औशने द्वितीयपादे द्वितीयमक्षरं** वर्धते । **नृभाइः पुना** । नान्यत्रेत्यर्थः ॥ ४३ ॥

भा. **स्वासु** तृचे **औशने** द्वितीयपादस्य द्वितीयमक्षरं वर्धते । अन्यत्र प्रतिषेधः ॥

दी. **प्रातू** (ऊ. द. ४) इति **स्वासु** तृचे **औशने द्वितीयस्य पादस्य द्वितीयम्** अक्षरं वर्धते । **नृभाइः पुना** । **अशास्तिहा** । **ऋभूर्धीगः** । अन्यत्र प्रतिषेधः ॥ ४३ ॥

अन्त्यायां चान्त्यस्य ॥ ४४ ॥

वि. & भा. स्वास्वेव **अन्त्यायां** स्तोत्रीयायाम् अन्त्यस्य पादस्य द्वितीयमक्षरं **वर्धते** । **अपाइचियाम्** ॥ ४४ ॥

दी. **स्वास्वौशने** (ऊ. द. ४) अन्त्यायां स्तोत्रीयायामन्त्यस्य पादस्य द्वितीयमक्षरं वर्धते । **अपाइचियाम्** ॥ ४४ ॥

गीथोपान्त्यं त्रीषु बोधीये ॥ ४५ ॥

वि. गायत्रीषु **नराबोधीये** उद्गीथोपान्त्यस्य वृद्धिः । **वकृष्टायाः** । **अमाइ** (ऊ. अ. ६२९) ॥ ४५ ॥

भा. **बोधीये** गायत्रीषु उच्चाता-(ऊ. ए. ४२८)दिषु **उद्गीथस्योपान्त्यम्** अक्षरं वर्धते ॥ ४५ ॥

---

2. A² द्वितीये for द्वितीय; S¹⁻² My¹ पाद० for पादे
4. V² द्वितीयस्य for द्वितीय०
6. S⁴ after पुना adds: द्वितीयायाम्; after ---- हा adds: तृतीयायाम् and after ०र्धीगः । adds: एतेषां द्वितीयपादस्य द्वितीयाक्षरवृद्धिः; S⁴ after अन्यत्र adds; सर्वत्र
8. KA²M¹⁻²S¹⁻²T trans. स्वास्वेव after वर्धते; B⁴A च for एव
9. PA²L²V²B⁴ om. अपाइचियाम्
11. S⁴ after चियाम् adds: अत्र पा इति द्वितीयाक्षरस्य वृद्धिः
13. KA² विकृष्टायाः, T प्रकृष्टायाः for वकृष्टायाः

२ र र १ २
दी. **उच्चातेजोवा** (ऊ. ए. ४२९) इति गायत्रीषु जराबोधीये उद्गीथस्योपान्त्य-
२ र १
मक्षरं वर्धते । **मियादादाइ** ॥ ४५ ॥

न योनौ ॥ ४६ ॥

२ १र
वि. **योनौ** उद्गीथोपान्त्यं **न** वर्धते । **यज्ञीयाया** ॥ ४६ ॥

भा. **योनौ** तु बोधीये उद्गीथोपान्त्यस्य वृद्धिप्रतिषेधः ॥ ४६ ॥

५ र र ४ ५
दी. **जराबोधोवा** (ग्रा. गे. १. १. १५. २) इति **योनौ जराबोधीये** उद्गीथ-
२ १र
स्योपान्त्यस्य वृद्धिप्रतिषेधः । **यज्ञियाया** ॥ ४६ ॥

प्रवाज्याद्यायां च ॥ ४७ ॥

वि. & भा. **प्रवाज्याद्यायां च** बोधीये (ऊ. क्षु. ९३०) उद्गीथस्योपान्त्यस्य
२र १
वृद्धिः । अक्षरपङ्क्तित्वादप्राप्तस्य **वृद्धिः** । **धारस्ताइराः** ॥ ४७ ॥

२ र १ २
दी. **प्रवाजियोवा** (ऊ. क्षु. ९३०) इति जराबोधीये **आद्यायां** स्तोत्रीयायाम्
२र १
उद्गीथोपान्त्यस्य वृद्धिः । **धारस्ताइराः** ॥ ४७ ॥

उपायद्वितीयं काण्वे योनौ ॥ ४८ ॥

वि. **काण्वे योनौ** प्रथमायां स्तोत्रीयायाम् **उपायद्वितीय**मक्षरं वर्धते । उपद्रवस्यो-
१
पायसंज्ञा । ऊ । **कथाइ** । नोत्तरयोरित्यर्थः ॥ ४८ ॥

भा. **काण्वे उपायद्वितीयम्** अक्षरं **योना**वेव वर्धते । **ऊ३कथा३ई** । **उत्तरयोः** प्रतिषेधः ॥ ४८ ॥

---

2. S^4 after दादाइ । adds; अत्र दा इति उद्गीथोपान्त्यस्य वृद्धिः ।

7. S^4 after यज्ञियाया adds: अत्र या इति तृतीयाक्षरस्य उद्गीथोपान्त्यस्य वृद्धिः

9. A^{2}M^{1}T om. प्रवाज्याद्यायां च; S^2 जराबोधीये for बोधीये

10. PL^{2}A^{1}V^{2}B^4 om. अक्षर.... धारस्ताइराः

11. M^{4}LMy^3 trans: आद्यायां after इति

12. S^4 after धारस्ताइराः; adds: अत्र स्ता इति वृद्धिः

दी. **वयमूऽ३त्वातदिदर्थाः** (ऊ. द. २०) इति **काण्वे उपायस्य द्वितीयम्** अक्षरं योनावेव वर्धते । ऊ । **कथाइ** । उत्तरयोः स्तोत्रीययोः प्रतिषेधः ॥ ४८ ॥

सिष्ठे च ॥ ४९ ॥

वि. **वासिष्ठे च** योनावेव उपायद्वितीयं वर्धते । **षताश्रूऽ२३४ताऽ६५६इ** ॥

भा. **वयमेनायां** (ऊ. अ. ६३७) **वासिष्ठे** च योनावेव उपायद्वितीयस्य वृद्धिः । **षताऽ३** ॥ ४९ ॥

दी. **वयमेनमिदा** (ऊ. अ. ६३७) इति **वासिष्ठे च योनावेव** उपायद्वितीयस्य वृद्धिः । **षताश्रूऽ२३४ताऽ६५६इ** । उत्तरयोः स्तोत्रीययोः प्रतिषेधः ॥ ४९ ॥

हाराद्वितीयं नदे पुरोजित्याम् ॥ ५० ॥

वि. **नानदे प्रतिहारे** द्वितीयं वर्धते । **पुरोजितीत्यत्र** तृचे । **साखायोदी** ॥

भा. **नानदे पुरोजित्यां** (ऊ. द. ७८) तृचे **प्रतिहारद्वितीयं** वर्धते ॥ ५० ॥

दी. **पुरोजितीवोअ** (ऊ. द. ७८) इति **नानदे** तृचे प्रतिहारस्य **द्वितीयं** वर्धते । **सास्वायोदी** ॥ ५० ॥

हविषे च सवाज्यक्षायाम् ॥ ५१ ॥

वि. & भा. **सवाज्यक्षायां सौहविषे च** प्रतिहारद्वितीयं वर्धते । **मृज्यमानाः गोमाइश्राऽ२३४इहाइ** ॥ ५१ ॥

---

2. S[4] after कथाइ adds: अत्र कथ इति उपायद्वितीयाक्षरस्य वृद्धिः; My[3]M[4]L[1] om. स्तोत्रीययो;

5. B[4]L[2]A[2] ०मेन for ०मेनायां

8. S[4] after ताऽ६५६इ । adds: अत्र ता इति उपायद्वितीयस्य वृद्धिः; M[4]L[1] om. स्तोत्रीययोः

11. A[2]M[1-2]T ०जिति for ०जित्यां

15. PL[2]A[1]V[2]B[4] trans. सवाज्यक्षायां after सौहविषे च; T ०हारे for हार०; PL[2]A[1]V[2]B[4] om. मृज्यमानाः ... इहाइ

दी. **प्रवाजियक्षाः** (ऊ. द. १३५) इति सौहविषे च प्रतिहारस्य द्वितीयमक्षरं वर्धते । **गोभाइश्राऽ२३४इहाइ** ॥ ५१ ॥

श्रुद्ध्ये च नौ ॥ ५२ ॥

वि. योनौ श्रुद्ध्ये प्रतिहारद्वितीयं वर्धते । **अस्माइ** (ऊ. ए. ४२१) ॥ ५२ ॥

भा. श्रुद्ध्ये च योनावेव प्रतिहारद्वितीयस्य वृद्धिः । **अस्मा३ई** । उत्तरयोरन्यत्र प्रतिषेधः ॥ ५२ ॥

दी. **अग्नेवाजाऽ२स्य** (ऊ. ए. ४२१) इति श्रुद्ध्ये च योनावेव प्रतिहारद्वितीयस्य वृद्धिः । **अस्माइदेहि** । उत्तरयोरन्यत्र च प्रतिषेधः ॥ ५२ ॥

रन्ध्रे चोत्तमायाम् ॥ ५३ ॥

वि. & भा. औक्ष्णोरन्ध्रे चैडे उत्तमायां स्तोत्रीयायां प्रतिहारद्वितीयं वर्धते ॥

दी. मृज्यमानस्सुहस्त्या (ऊ. द. १०३) इति द्वितीये **औक्ष्णोरन्ध्रे वृषोअचिक्रदद्वाने** इत्युत्तमायां स्तोत्रीयायां च प्रतिहारद्वितीयं वर्धते । **गोभाइरज्ञाऽ३** ॥ ५३ ॥

आद्यं ध्यमायाम् ॥ ५४ ॥

वि. & भा. मध्यमायां स्तोत्रीयायां **प्रतिहाराद्यम्** अक्षरं वर्धते ॥ ५४ ॥

---

1. M^4LMy^3 om. अक्षरं
2. s^4 after वर्धते adds: द्वितीयायां स्तोत्रीयायां सवाजियक्षाः इत्यस्यां; S^4 after इहाइ adds: अत्र भा इति वृद्धिः
4. A^2 after वर्धते adds: मध्यमायां प्रथमम्
5. S^4 ०द्वितीयाक्षरस्य for ०द्वितीयस्य
8. S^4 before अन्यत्र adds: स्तोत्रीययोः; S^4 after देहि । adds: अत्र स्मा इति प्रतिहारद्वितीयस्य वृद्धिः
10. A^2T before औक्ष्णो० add द्वितीयम् and $A^2PL^2V^2B^4$ द्वितीये and om. चैडे
11. $M^4L^1My^3$ om. मृज्यमानस्सुहस्त्या इति and trans. द्वितीये औक्ष्णोरन्ध्रे after स्तोत्रीयायां च
12. S^4 after रज्ञाऽ३ adds: अत्र भा इति वृद्धिः
13. $A^2TS^2L^1M^4S^4$ मध्यमायां प्रथमम् , $M^{-21}T$ ध्यमायां प्रथमम् for आद्यं ध्यमायां
14. $A^2M^{1-2}TS^{1-2}$ प्रथम(S^2 आद्य)मक्षरं प्रतिहारे वृद्धेः (T वृद्धिः) for प्रतिहाराद्यमक्षरं वर्धते

दी. **मृज्यमानस्सुहस्त्या** (ऊ. द. १०३) इत्युत्तरे औक्ष्णोरन्ध्रे **पवमानामियर्षसि** इति मध्यमायां स्तोत्रीयायां प्रतिहारस्य आद्यम् अक्षरं वर्धते । **वार्षाआचाऽ३इ** ॥ ५४ ॥

तृतीयमाद्यायाम् ॥ ५५ ॥

वि. & भा. **आद्यायां** स्तोत्रीयायां प्रतिहार**तृतीयं** वर्धते ॥ ५५ ॥

दी. **मृज्यमा-** (ऊ. द. १०३) इति द्वितीये औक्ष्णीरन्ध्रे **मृज्यमानस्सुहस्त्या** इत्याद्यायां प्रतिहारतृतीयं वर्धते । **पवमानाऽ३** ॥ ५५ ॥

बोधीये प्रवाज्याद्ययोर्गीथे तृतीयं द्विः कृष्टम् ॥ ५६ ॥

वि. **जराबोधीये प्रवाज्यायक्षाम्** (ऊ. क्षु. ९३०) **आद्ययोः** स्तोत्रीययोः **उद्गीथे तृतीयम्** अक्षरं **द्विः कृष्टं** भवति । **क्षाः** । **सहाऽ२३स्रा** ॥ ५६ ॥

भा. **जराबोधीये प्रवाज्याद्ययोरुद्गीथतृतीयम्** अक्षरं **द्विष्कृष्टं** भवति । **क्षाऽ३ः-सहाऽ३** ॥ ५६ ॥

दी. **प्रवाजियोवा** (ऊ. क्षु. ९३०) इति **जराबोधीये आद्ययोः** स्तोत्रीययोः **उद्गीथतृतीयम्** अक्षरं **द्विः कृष्टं** द्विः कर्षितं भवति । **क्षाः** । **सहाऽ२३स्रा** । **सवाजि-**

---

1. M[4]L[1]My[3] om. मृज्य.... ०रन्ध्रे इति
2. M[4]L[1]My[3] औक्ष्णोरन्ध्रे for स्तोत्रीयायां; S[4] after अचाइ । adds: अत्र वा इति प्रतिहारा-द्यस्य वृद्धिः
3. A[2]TM[1] मध्यमायां च तृतीयम्, A[2]M[2] प्रमथमायां तृतीयम् for तृतीयमाद्यायाम्
4. TA[2]M[1-2]S[1] तृतीयमक्षरं वृद्धम् for प्रतिहारतृतीयं वर्धते; TA[2]M[1-2]S[1-2] after वृद्धम् add: दाशस्पत्ये चाद्ये ॥ (S[1]om. दाश०.... चाद्य) दाशस्पत्ये चाद्ये (S[1]om. दाशस्पत्ये...चाद्ये) प्रतिहारे तृतीयाक्षरं वर्धते । इन्दूरइन्द्रा ॥ अयोनौ ॥ योनौ न वर्धते ॥ उत्तरे वासोराधोत्तरयोः स्तोत्रीययोरुत्तरे प्रतिहारे वसोराधा भवति । वासोराधासि चो । दाशाक्षाइपो
5. M[4]L[1]My[3]om. मृज्यमा० .... द्वितीये and trans.औक्ष्णोरन्ध्रे after आद्यायां
6. S[4] after ०तृतीयं adds: अक्षरं; S[4] after पावमानऽ३ । adds: अत्र मा इति प्रतिहारतृतीयस्य वृद्धिः
7. A[2]T. उद्गीथे for गीथे
9. M[1-2] after ०स्रा । adds: योनौ एककर्षणम्
13. M[4] कर्षणं for कर्षितं

योवा इति द्वितीयायां क्षाः । सहाऽ२३स्रा ॥ ५६ ॥

चतुर्थमन्त्यायाम् ॥ ५७ ॥

वि. & भा. अत्रैव अन्त्यायां स्तोत्रीयायाम् उद्गीथचतुर्थं द्विः क्रुष्टं भवति । हाइ । इन्द्रास्राऽ२३कू ॥ ५७ ॥

दी. अत्रव जराबोधीये अन्त्यायां स्तोत्रीयायाम् उद्गीथचतुर्थमक्षरं द्विः क्रुष्टं भवति । हाइ । इन्द्रास्याऽ२३कू ॥ ५७ ॥

वाशे ध्यमपादयोरन्त्यानि त्रीणि ॥ ५८ ॥

वि. वाशे मध्यमपादयोरन्त्यानि त्रीणि अक्षराणि वर्धन्ते ॥ ५८ ॥

भा. वाशे पुनानस्सो- (ऊ. स. ७०२) आदिषु मध्यमेषु पादेषु अन्त्यानि त्रीणि अक्षराणि वर्धन्ते पादान्तेषु ॥ ५८ ॥

दी. पुनानस्सो । मधाराऽ१याऽ२ (ऊ. स. ७०२) इत्यादि वाशे मध्यमयोः पादयोः अन्त्यानि त्रीणि अक्षराणि वर्धन्ते । अपोवसानो आर्षाऽ१साऽ२इ । आरत्नधा-योनिमृतस्यसाइदाऽ१साऽ२इ । एवमादिषु ॥ ५८ ॥

चत्वारि पिबन्तमयं तं हि ॥ ५९ ॥

वि. पिबन्तम् । अयम् (ऊ. अ. ६५२) तं हि (ऊ. स. ७०६) इत्येतेषु अन्ते चत्वार्यक्षराणि वर्धन्ते ॥ ५९ ॥

भा. पिबन्तं कद्वयोः । अयं यः पुरो (ऊ. अ. ६५२) तं हि स्वराजम् (ऊ. स. ७०६) एतेषु त्रिषु पादान्तेषु अन्त्यानि चत्वारि चत्वार्यक्षराणि वर्धन्ते ॥ ५९ ॥

---

1. s[4] after °स्रा । adds: अत्र हा इति उद्गीथे तृतीयमक्षरं द्विःक्रुष्टं भवति
3. M[1-2] om. अन्त्यायां .... इन्द्रास्याऽ२३कू (l. 4) s[1] om. अत्रैव ... इन्द्रस्याऽ२३कू (l. 4)
6. s[4] after °कू adds: अत्र स्या इति उद्गीथतुरीयं द्विःक्रुष्टं भवति
12. s[4] after साइ adds: अर्षसि इत्यन्त्यानि त्रीण्यक्षराणि वृद्धिः
13. s[4] after साइ adds: अत्र सीदसि इत्यन्त्यानि त्रीणि अक्षराणि वृद्धिः । एवमादिषु ॥

दी. **कईवेदा** (ऊ. अ. ६५२) इति **वाशे पिबन्तं कद्वयो । अयं यः पुरो । उभयꣳशा** (ऊ. स. ७०६) इति **वाशे तँहिस्वराजम् ।** एतेषु त्रिषु पादेषु अन्त्यानि चत्वारि चत्वार्यक्षराणि वर्धन्ते । **पिबन्तंकद्वायोऽ१दाधाऽ२इ । अयं यःपुरोविभिनत्ताओऽ१-जासाऽ२ । तꣳहिस्वराजंवृषभन्तमोऽ२जासाऽ२ ॥ ५९ ॥**

वैच्छन्दसे कमश्वे वीं-न-हो-जि-त-स्मै-हृ-शं-थीः स्य-ग्ने-भिः कृष्टानि ॥ ६० ॥

वि. **वैच्छन्दसे साकमश्वे आयꣳपुरम्-** (ऊ. प्रा. ८२५) **अग्नेतमद्ययोः** (ऊ. प्रा. ८२३) एतानि कृष्यन्ते । **दीदेदत्यः कविर्नभन्योनार्वाऽ२ह्व । रोनाऽ२ । होता यजिष्ठो । मर्तोयो अस्मै सु ॥ ऋतुन्नभद्रं हृदि स्पृशम् । रथीर्ऋतस्य । अग्ने-विश्वेभिः ॥ वीं । न । हो । जि । त । स्मै । हृ । ग । थीः । स्य । ग्ने । भिः** इत्येतानि कृष्टानि योनिवद्भावादप्राप्तानि कृष्यन्ते ॥ ६० ॥

भा. **वैच्छन्दसे साकमश्वे आयः पुरम्-**(ऊ. प्रा. ८२५) **अग्नेतमद्या-**(ऊ. प्रा. ८२६) तृचयोः- **वीं । न । हो । जि । त । स्मै । हृ । शम् । थीः । स्य । ग्ने । भिः ।** – एतानि द्वादशाक्षराणि कृष्टानि भवन्ति । **नभन्योनार्वाह्व । रोन । अस्याद्धो । यजि । मर्तोयो । अस्मै । भद्रंहृदि । स्पृशम् । साधोरथीः । तस्य । ज्योतिरग्ने । विश्वेभिः ॥ ६० ॥**

दी. **वैच्छन्दसे** गायत्रीछन्दसोऽन्यच्छन्दस्सु । **साकमश्वे आयः पुरं ना-** (ऊ. प्रा. ८२५) **अग्नेतमद्या-** (ऊ. प्रा. ८२६) तृचयोः **वीं । न । हो । जि । त । स्मै ।**

---

1. S[4] पिबन्तंकद्वायोऽ१दाधाऽ२इ । अत्र द्वयोदधे इति चत्वार्यक्षराणि वृद्धिः । अयंयः पुरोविभिनत्ताओऽ१ जासाऽ२ । अत्र त्त ओजसा इत्यन्त्यानि चत्वार्यक्षराणि वृद्धिः । उभयं शा इति वाशे द्वितीयायां तं हि राजंवृषयन्तामोऽ१जासाऽ२ । अत्र न्तमोजसा इत्यन्त्यानि चत्वार्यक्षराणि वृद्धिः । पिबन्तं कद्वा । अयंयः पुरो । तंहि स्वराजम् । एतेषु त्रिषु पादेषु अन्त्यानि चत्वार्यक्षराणि वर्धन्ते ॥ for पिबान्तं... जासाऽ२ ॥ ५९ ॥

4. M[1-2]TA[2]S[1-2] after जासाऽ२ ॥ add: मन्ते च त्रीणि तृतीये ॥ समन्ते तृतीये पादे अन्त्यानि त्रीण्यक्षराणि वर्धन्ते । स्याहाईदासा ॥ यौनौ मध्यमम् ॥ (S[2] ध्यमम्) योनौ समन्ते तृतीये पादे अन्त्येष्वक्षरेषु मध्यममक्षरं वर्धते ॥

17. M[4]L[1]My[3] ०छन्दसेषु, for ०छन्दस्सु

हृ। शम्। थीः। स्य। ग्ने। भिः। एतानि द्वादशाक्षराणि क्रुष्टानि भवन्ति। आयः पूऽ३रन्नार्भिणीऽ६मा (ऊ. प्रा. ८२५) इति साकमश्वे दीदेदत्यः कविर्नेमन्योनार्वोऽरस्य। रोनाऽ२रूरू। द्वितीयायां चनानि। इत्यादि स्याद्धोऽ२ता। यजाऽ२इष्टोआ। तृतीयायां न्माविश्वा इत्यादि मर्तोऽ२याः। अस्माऽ२इसूतू॥

अथ अग्नेताऽ३मग्राश्वाऽन्ना (ऊ. प्रा. ८२६) इति साकमश्वे स्तोमैः क्र- इत्यादि हाऽ२र्दाइ। स्पृशाऽ२मृध्या। द्वितीयायां द्रस्यदक्षस्य इत्यादि रथाऽ२इरा। तस्याऽ२बृहा। तृतीयायाम् अर्वाङ् इत्यादि ग्राऽ२इवाइ। इवेमाऽ२इस्सुमा॥६०॥

दैर्घे व्रात्याग्निष्टुतोर्गीथद्वितीयसप्तमे क्रुष्टे॥६१॥

वि. & भा. दैर्घश्रवसे व्रात्याग्निष्टुतोरुद्गीथद्वितीसप्तमे अक्षरे क्रुष्टे भवतः। त्वे सोमप्रथमा (ऊ. ए. ४०१) पाहिनो अग्ने (ऊ. ए. ४११) इति च॥६१॥

दी. व्रात्यस्तोमे अग्निष्टुति च यज्ञे त्वेसोमप्रथमावृदोहावृगोहाओहाऽ३ए (ऊ. ए. ४०१) इति पाहिनोअग्नएकया ओहाओहाऽ३ए (ऊ. ए. ४११) इति च दैर्घ- श्रवसयोः उद्गीथस्य द्वितीयसप्तमे अक्षरे क्रुष्टे भवतः। त्वे सोमेति दैर्घश्रवसे क्त्वाबाऽ२- हिंषो महेवाऽ२जा। पाहिन इति दैर्घश्रवसे पाहाऽ२उतद्वितीयाऽ२या॥६१॥

---

2. S⁴ after वाँसू। adds: अत्र वाँ इति क्रुष्टम्; S⁴ after रूरू adds: अत्र ना इति क्रुष्टम्
3. S⁴ after स्याद्धोता adds: अत्र हो इति क्रुष्टम्; S⁴ after इष्टोआ adds: अत्र जि इति क्रुष्टम्
4. S⁴ after र्तोयाः adds: अत्र तः इति क्रुष्टम्; S⁴ after सूतू adds: अत्र स्मै इति क्रुष्टम्
6. S⁴ after हार्दाइ adds: अत्र हृ इति क्रुष्टम्; S⁴ after मृध्या adds: अत्र शा इति क्रुष्टम्; S⁴ after इरा adds: अत्र थीरिति क्रुष्टम्
7. S⁴ after बृहा adds: अत्र स्य इति क्रुष्टम्; S⁴ after इवाइ adds: अत्र ग्ने इति क्रुष्टम्; S⁴ after सुमा adds: अत्र भिरिति क्रुष्टम्
9. KA²TS¹⁻²MV trans. दैर्घश्रवसे after ष्टुतोः
10. KA²TS¹⁻²M¹⁻³My¹ om. इति च
12. M⁴L¹My³ before °पाहि adds: दैर्घश्रवसे; M⁴L¹MV³ °श्रवसे for °श्रवसयोः
14. S⁴ after वाऽ२जा adds: अत्र बा इति द्वितीयस्य वः इति सप्तमस्य च वृद्धिः। द्वितीयायां तताऽ२दिंधोत्सन्नाऽ२का। अत्र दिथ-उ- इति विश्लिष्य। ता इति द्वितीयस्य न्ना इति सप्तमस्य च वृद्धिः। तृतीयायां तियाऽ२यक्रमृतस्यऽ२धा। अत्र या इति द्वितीयस्य स्या इति सप्तमस्य च वृद्धिः।; S⁴ after या adds: अत्र हा इति द्वितीयस्य या इति सप्तमस्य च वृद्धिः।

स्वासु द्वितीयषष्ठे ॥ ६२ ॥

वि. स्वासु दैर्घश्रवसे द्वितीयषष्ठे अक्षरे क्रुष्टे भवतः ॥ ६२ ॥

भा. स्वासु योविश्वायाम् (ऊ. ए. ४३९) उद्गीथद्वितीयषष्ठे क्रुष्टे भवतः ॥

दी. योविश्वादयतेवस्वोहाओहाऽ३ए (ऊ ए. ४३९) इति स्वासु दैर्घश्रवसे उद्गीथस्य द्वितीयषष्ठे अक्षरे क्रुष्टे भवतः । होताऽ२मन्द्रोजनाऽ२नाम् ॥ ६२ ॥

प्रस्तो तृतीयम् ॥ ६३ ॥

वि. प्रस्तोमा य- (ऊ. ए. ४३९) इत्यत्र उद्गीथतृतीयं क्रुष्यते ॥ ६३ ॥

भा. प्रस्तोमायां तु (ऊ. ए. ४३९) इति मध्यमायां उद्गीथे तृतीयं क्रुष्यते ॥

दी. प्रस्तोमायांत्वग्नयओहाओहाऽ३ए (ऊ. ए. ४३९) इति मध्यमायां दैर्घश्रवसे उद्गीथतृतीयम् अक्षरं क्रुष्यते । प्रस्तोमाऽ२यन्त्वग्नये ॥ ६३ ॥

मर्मृ चतुर्थम् ॥ ६४ ॥

वि. & भा. मर्मृज्यन्त (ऊ. ए. ४३९) इत्यत्र उद्गीथचतुर्थमक्षरं क्रुष्यते ॥

दी. मर्म्मृज्यन्ते देवयवओहाओहाऽ३ए (ऊ. ए. ४३९) इति तृतीयायां दैर्घश्रवसे उद्गीथचतुर्थमक्षरं क्रुष्यते । मर्म्मृज्यन्ताऽ२इदेवयवः ॥ ६४ ॥

थमोच्चाद्वितीयं ज्ञीये सर्वत्र ॥ ६५ ॥

वि. प्रथमोच्चस्य द्वितीयम् अक्षरं क्रुष्यते । पत्नीऽ२म् ॥ ६५ ॥

भा. प्रथमोच्चद्वितीयमक्षरं ज्ञीये सर्वत्र क्रुष्यते । तृतीयपादे प्रथमोच्चं भवति ॥

---

1. & 2. KA[2]M[1-3]T योनौ for स्वासु
5. S[4] after जनानाम् । adds: अत्र ता इति द्वितीयस्य ना इति षष्ठस्य च वृद्धिः
7. A[2] I. उद्गीथे for उद्गीथ
8. B[4]PL[2]A[1] om. प्रस्तोमायां तु इति
10. S[4] after ग्नये adds: अत्र मा इति उद्गीथतृतीयाक्षरस्य वृद्धिः ।
12. PV[2]B[4]L[2]A[1]My[1] om. अत्र; PV[4]B[2]L[2]A[1]My[1] om. अक्षरं
14. M[4]L[1] om. अक्षरं; S[4] after यव: adds: अत्र न्ता इति उद्गीथतुरीयमक्षरं क्रुष्यते

दी. **यज्ञाऽ५य** (ऊ. द. १४) इत्यादि **यज्ञायज्ञीये प्रथमे**ऽक्षरे **उच्चे** सति तृतीयपाद**द्वितीयम्** अक्षरं कृष्यते **सर्वत्र** । अत्र योनौ तृतीये पादे प्रथमोच्चं भवति । **पप्रीऽ२मृवयममृतम्** ॥ ६५ ॥

ककुभि चतुर्थम् ॥ ६६ ॥

वि. **ककुप्सु** स्वासु यज्ञायज्ञीये उत्तरयोः स्तोत्रीययोः प्रथमोच्चस्य **चतुर्थ**मक्षरं कृष्यते ॥ ६६ ॥

भा. स्वासु यज्ञायज्ञीये उत्तरयोः स्तोत्रीययोः ककुभौ भवतः । तयोः प्रथमोच्चचतुर्थं कृष्यते । **ऊर्जोनपाऽ३३** । **भुवद्वाजेऽ३३** ॥ ६६ ॥

दी. **ककुप्छन्दसि** प्रथमोच्चे द्वितीयपादात् **चतुर्थम्** अक्षरं कृष्यते । कर्षणं भवति । **ऊर्जोनपाऽ२तँसहि** ॥ तृतीयायां **भुवद्वाजेऽ२ष्ववि** ॥ ६६ ॥

योनौ वैयश्वे सप्तमम् ॥ ६७ ॥

वि. **योनौ वैयश्वे** प्रथमोच्चद्वितीये पर्वणि **सप्तमं** कृष्यते ॥ ६७ ॥

भा. **वैयश्वे योनौ** एव प्रथमोच्चे **सप्तमं** कृष्यते। अत्रापि तृतीये पादे प्रथमोच्चम् । **सत्राचियामघवाऽ२३नू** ॥ ६७ ॥

दी. **उभयँशृणवच्चनाऽ३ए** (ऊ. द. १५६) इति **वैयश्वे योना**वेव प्रथमोच्चे सति तृतीयपादस्य सप्तममक्षरं कृष्यते । **सत्राचियामघवाऽ२नू** । **सो** ॥ ६७ ॥

पञ्चममुत्तरयोः ॥ ६८ ॥

वि. **उत्तरयोः** स्तोत्रीययोः प्रथमोच्चद्वितीये पर्वणि **पञ्चमं** कृष्यते ॥ ६८ ॥

---

3. S[4] after °मृतम् adds: अत्र प्री इति द्वितीयमक्षरं कृष्यते । वयममृतमिति प्रथमोच्चं भवतीत्यर्थः

5. M[1] om. ककुप्सु··· स्तोत्रीययोः; M[2] ककुभि for ककुप्सु; M[2]A[2]TS[1] om. स्वासु यज्ञाय; A[2]TS[1]M[2] om. उत्तरयो; स्तोत्रीययो;

10. S[4] after सहि adds: अत्र या इति तुरीयमक्षरम् अप्रथमोच्चं प्रत्यये कृष्यते ।; S[4]om. तृतीयायां; S[4] after °ष्ववि adds: अत्र जे इति तुरीयमक्षरं प्रथमोच्चे कृष्यते

16. My[3] om. अक्षरं; S[4] after वाऽ२नूसो adds: अत्र वान् इति सप्तमाक्षरम् कृष्टम्

भा. उत्तरयोः स्तोत्रीययोः प्रथमोच्चे पञ्चमं कृष्यते । **तँहिस्वराजाऽ२३म्** । **उतोपमानाऽ२३म्** ॥ ६८ ॥

दी. **उभयँशृणव** (ऊ. द. १५६) इति वैयश्वे उत्तरयोः स्तोत्रीययोः पञ्चमोच्चे सति तृतीयपादस्य पञ्चममक्षरं कृष्यते । द्वितीयायां **तँहिस्वराजाऽ२म् वृषभाम्** । तृतीयायाम् **उतोपमानाऽ२म् प्रथमो** ॥ ६८ ॥

एकर्चेऽष्टमम् ॥ ६९ ॥

वि. **एकर्चे** वैयश्वे प्रथमोच्चद्वितीये पर्वणि अष्टममक्षरं कृष्यते ॥ ६९ ॥

भा. **एकर्चे** वैयश्वे प्रथमोच्चाष्टमं कृष्यते । **आरत्नधायोनिमृताऽ२** (ऊ. ए. ५२९)॥

दी. **पुनानस्सोमधारयाऽ३ए** (ऊ. ए. ५२९) इत्येकर्चे वैयश्वे प्रथमोच्चतृतीयपादस्याष्टममक्षरं कृष्यते । **आरत्नधायोनिमृताऽ२** ॥ ६९ ॥

गीथचतुर्थं च ॥ ७० ॥

वि. तस्मिन्नेकर्चे वैयश्वे उद्गीथचतुर्थं कृष्यते । **च-कारः** समुच्चयार्थः ॥ ७० ॥

इति फुल्लसूविवरणे प्रथमेऽध्याये वृद्धावृद्धे तृतीयः खण्डः ॥ ३ ॥

भा. तस्मिन्नेवैकर्चे वैयश्वे उद्गीथचतुर्थं कृष्यते । **च-कारः** समुच्चयार्थः । **अपोवासा** ॥

---

4. S⁴ after तृतीयायाम्
5. S⁴ after प्रथमो adds: अत्र नामिति पञ्चमं कृष्टम्
7. KM¹T ०द्वितीय for ०द्वितीये
9. S⁴ प्रथमोच्चे for प्रथमोच्च०
10. S⁴ after मृताऽ२ । adds: अत्र ता इत्यष्टममक्षरं कृष्टम्
11. A²M¹TS¹ combine गीथचतुर्थं च with previous sutra, एकर्चेऽष्टमम्, and in the commentary after अष्टममक्षरं add: उद्गीथचतुर्थाक्षरं च
13. My¹ इति प्रथमस्य तृतीयः for इति... खण्डः ॥

इति पुष्पसूत्रभाष्ये प्रथमस्य तृतीयः खण्डः ॥ ३ ॥

दी. पुनानः (ऊ. ए. ५२९) इत्येकर्चे वैयश्वे **उद्गीथचतुर्थमक्षरं च** कृष्यते । **च**-करः समुच्चयार्थः । **अपोवसा२नोअर्षसा२३इ** ॥ ७० ॥

इति फुल्लसूत्रदीपे पञ्चमप्रपाठकस्य वृद्धावृद्धे तृतीयः खण्डः ॥ ३ ॥

चतुर्थः खण्डः

तरे हारादिः ॥ १ ॥

वि. & भा. रथन्तरे प्रतिहारादिः सर्वत्र वर्धते ॥ १ ॥

दी. आभित्वाशूरनोनुमोवा (र. द. १) इत्यादिरथन्तरे प्रतिहारस्यादिः सर्वत्र वर्धते । **आइशानमा२३इन्द्रा३** ॥ १ ॥

अनुत्तरयोः स्वासु ॥ २ ॥

वि. & भा. स्वासु तृचे **उत्तरयोः** स्तोत्रीययोः प्रतिहारादिर्न वर्धते ॥ २ ॥

दी. आभित्वाशूर- (र. द. १) इति **स्वासु** रथन्तरे उत्तरयोः स्तोत्रीययोः प्रतिहारस्यादेर्वृद्धिप्रतिषेधः । द्वितीयायां **न जातोना२३जा३** । तृतीयायां **गव्यन्तस्त्वा२३-हा३** ॥ २ ॥

नवे गीथादिः ॥ ३ ॥

---

3. S[4]-after अर्षसा२३इ adds: अत्र सा इति चतुर्थमक्षरं सा इत्यन्त्यमष्टमाक्षरं च कृष्टं भवति
6. My[1] before तरे adds: श्रीगणेशाय नमः ॥
9. S[4] after इन्द्रा३ adds: अत्र आ इति प्रतिहारादेर्वृद्धिः
11. PL[2]A[1]V[2]B[4]My[1] °हारादेर्वृद्धिप्रतिषेधः; for °हारदिर्नविर्धते
13. M[4]L[1] om. द्वितीयायां & तृतीयायां
14. S[4] after हा३ । adds: अनयोः प्रतिहारादेर्न वृद्धिः

वि. & भा. उत्तरे **मानवे** उद्गीथादेर्वृद्धिः ॥ ३ ॥

दी. **होवाइ** । **सोमउष्वाणस्सोतृभिः** । **होवाइ** (ऊ. द. ८५) इत्युत्तरे **मानवे** उद्गीथस्यादेः वृद्धिः । **आधिष्णुभिरवीनाम्** ॥ ३ ॥

अयोनौ ॥ ४ ॥

वि. **योनौ** न वृद्धिः ॥ ४ ॥

भा. योनौ **नित्वामग्नायाम्** उद्गीथादेर्वृद्धिप्रतिषेधः ॥ ४ ॥

दी. **होवाइ** । **नित्वामग्नेमनुर्दधेहोवाइ** (ग्रा. गे. २. ५. ५४. २) इति **योनौ मानवोत्तरे** उद्गीथस्यादेर्वृद्धिप्रतिषेधः । **ज्योतिर्जनायशश्वते** ॥ ४ ॥

शोके मान्त्ययोः ॥ ५ ॥

वि. & भा. **त्रैशोके मध्यमान्त्ययोः** स्तोत्रीययोरुद्गीथादिर्वर्धते ॥ ५ ॥

दी. **विश्वोहाइ** (ऊ. द. ७३) इति **त्रैशोके मध्यमान्त्ययोः** स्तोत्रीययोरुद्गीथादिर्वर्धते । **नेमाहाइ** । इति मध्यमायां **नाम** । **समोहाइ** इति तृतीयायां **राइभा** ॥ ५ ॥

विच्छन्दःस्वाग्नेये ॥ ६ ॥

वि. & भा. **विच्छन्दस्सु बृहदाग्नेये** अग्निन्नरायाम् उद्गीथादेर्वृद्धिः । **आरण्योः** ॥

दी. **विच्छन्दस्सु** । अनुष्टुप्छन्दसोऽन्यच्छन्दस्सु । **अग्निन्नरोदीधितिभिः** । **ईयइयाहाइ** (ऊ. अ. ६४२) इति **बृहदाग्नेये** उद्गीथादेर्वृद्धिः । **आरण्योः** ॥ ६ ॥

---

1. P after मानवे adds: सोमउष्वाणादिषु
3. S[4] after रवीनाम् adds: अत्र आ इति उद्गीथादेर्वृद्धिः
8. S[4] उद्गीथादेः for उद्गीथस्यादेः; S[4] after शश्वते adds: अत्र ज्यो इति उद्गीथादेर्न वृद्धिः
12. S[4] after नाम adds: अत्र ना इति उद्गीथादेर्वृद्धिः; S[4] after राइभा adds: अत्र रा इति उद्गीथादेर्वृद्धिः
14. $A^2KM^1TS^{1-2}M^2My^1$ trans: अग्निन्नरायां after वृद्धिः । $PL^2A^1V^2B^4$ om. आरण्योः
16. S[4] after आरण्योः adds: द्वितीयायां नायर्ण्वम् । अत्र ना इति । तृतीयायां पूरोनः । अत्र पू इति सर्वत्र उद्गीथादेर्वृद्धिः

ककुभे च योनौ ॥ ७ ॥

वि. **त्रैककुभे च योनौ** प्रथमायामुद्गीथादिर्वर्धते । नान्यत्रेत्यर्थः ॥ ७ ॥

भा. **त्रैककुभे योनौ** एव, – प्रथमायामित्यर्थः –, उद्गीथादिर्वर्धते । उत्तरयोरन्यत्र च प्रतिषेधः ॥ ७ ॥

दी. **य एक इद्विदायाऽ३ताइ** (ऊ. द. २०७) इति **त्रैककुभे योनौ**, – प्रथमायामित्यर्थः –, उद्गीथादिर्वर्धते । **वासुमर्तायाऽ३दा** । अत्र उत्तरयोः स्तोत्रीययोरन्यत्र च वृद्धिप्रतिषेधः ॥ ७ ॥

सामराजे च ॥ ८ ॥

वि. **सामराजे च** योनावेवोद्गीथादिर्वर्धते । न पवित्रायाम् ॥ ८ ॥

भा. सामराजे च योनावेव उद्गीथादेर्वृद्धिः । पवित्रायां प्रतिषेधः ॥ ८ ॥

दी. **अचौहोवा** (आ. १६. ९. ५५५. ५) इति **सामराजे च** योनौ उद्गीथादेर्वृद्धिः । **दासोऽनोधनुवा** । अन्यत्र प्रतिषेधः । **पवौहोवा** (ऊ. सं. २६३) इति **सामराजे** **त्रन्तेविततंत्रा** ॥ ८ ॥

पदान्ते काम्पा पदादौ च दीर्घे ॥ ९ ॥

वि. पदान्ते ह्रस्वे दीर्घे च **काम्पा** भवति । **पदादौ च दीर्घे काम्पा** भवति ।

---

1. $M^1 TM^2 S^{1-2}$ before ककुभे च योनौ add: ॥ जास्वरोऽवृद्धो यः ॥ विच्छन्दस्सु बृहदाग्नेये आद्ये जास्वरः अवृद्धो भवति । हा उदुत्यम् । ओहाइ । जा । एष जास्वरः ॥ प्रहूयसयाश्चाद्यमाद्यायाः सर्वासु ॥ सर्वासु विच्छन्दःसु बृहदाग्नेये स्तोत्रीयासु आद्यायाः प्रहूयसायाः आद्यमक्षरम् अवृद्धं (TM^{1-2} वृद्धं) भवति । ह । स्तच्युताऽ२३ ञ्जा ॥ अनाद्यम् ॥ ताइमाथाऽ२३४व्यूम् ॥

6. S^4 after दा adds: अत्र वा इति उद्गीथादेर्वृद्धिः

13. S^4 after त्रा adds: अत्र त्र इति उद्गीतादेरवृद्धिः

14. $S^2 My^1 KAM^4 S^4 My^3$ पदान्त्ये, A^2 पादान्ते L^1 पादान्त्ये for पदान्ते

15. KMy^1 before पदान्ते adds: असंबद्धमिदं सूत्रम् । वक्ष्यत्युपरिष्टात् । इदंसंघतस्त्रिष्टुप्सु पार्थवाराहवासिष्ठकुत्सरथीयादिष्विति; KS^1 पदान्त्ये, A^2M^1 पादान्ते, My^1 पादान्त्ये for पदान्ते; $A^2M^{1-2}S^{1-2}T$. om. ह्रस्वे दीर्घे च; TA^2 पादान्त (T पादान्ते) पादादिदीर्घयोरेव for पदादौ च दीर्घे

नान्यत्र । पृथक्पदग्रहणम् । पृथग्भूतस्यैव ग्रहणात् । न समासस्य । काम्पावृधन्ते तमः– प्रकाशवद्भवतः । इदन्तए । काऽ३म्परः । अग्निवाऽ६ए । वृधन्ताम् इति । पदान्ते अक्षरे आदिभूते पदादौ दीर्घे अक्षरे आदिभूते च काम्पैव भवति । पर्जन्यः पिता (ऊ. द. १८८) नदयन्नेषि (ऊ. द. ४२) तिस्रो वाच ईरयति (ऊ. द. ५७) । एकाक्षराणि अन्तवदिति सामतन्त्रवचनाद् एकाक्षरपदस्यापि काम्पा भवति पूर्वोत्तरवासिष्ठपार्थेषु ॥ ९ ॥

भा. असंबद्धमिदम् । वक्ष्यत्युपरिष्टात् । इदंसंघातः त्रिष्टुप्सु भवति पार्थवाराह-वासिष्ठकुत्सरथीयादिषु । इदन्तए । काऽ३म्परः । ऊ३तए३का३म् । (ग्रा. २. ७. ६५ .१) अयं इदंसंघातः । अत्र यद् द्वितीयं पर्व सा कम्पा । तद्विशिष्यते । पदान्तमक्षरं ह्रस्वं

---

1. M^2 पदग्रहणं for पदग्रहणात ; M^1 वृधन्तौ मतः, M^2 वृधन्तौ मतौ मतः for वृधन्ते तमः;- S^1 मतः for तमः
2. A^2 प्रकाशाद् for प्रकाशवद्
3. My^1 पादादौ for पदादौ; S^2 काम्पास्वरो for काम्पैव; KMy^1 om. एव; $A^2M^{1-2}S^1T$ om. भवति
4. $A^2M^1TM^2S^1$ ऋषिमना य ऋषि for नदयन्नेषि; $S^1TM^{1-2}A^2$ स ईं रथो न भूरि । शुष्मीशर्धोन । संमातृमिर्न । आद्यन्तवदेकस्मिन् इति उभयधर्मत्वं यामपार्थादिषु for एकाक्षराणि.....०पार्थेषु
   The MSS. $TM^{1-2}S^1A^2$ after तिस्रो वाच ईरयति read: य ईं रथो नभुरि । शुष्मीशर्धोन । संमातृमिर्न । आद्यन्तवदेकस्मिन् इत्युभयधर्मत्वं यामपार्थादिषु । These passages, leaving आद्यन्तवद्··· धर्मत्वं are found in KS^2 but only after the sūtra अनजागृविर् ···· पीतिः (5. 4. 10). In the bhāṣya MSS too these passages are sighted but after the occurrence of the sūtra अनजागृविर् quoted as examples where atthe end of पद or parvan the kampa-svara does not occur. On the contrary the sūtra पदान्ते काम्पा···· दीर्घे tells us where kampa svara occurs. Therefore, these passages must find place only in the commentary on अनजागृविर्···· पीतिः in which अ, the negative particle, frobids the function of पदान्ते... दीर्घे and then नजागृविर् etc. are cited in the sūtra as examples which do not bear the kampa tone. Therefore, the right place for these passages ought to be in the commentary of अनजागृविर्... पीतिः and not here.
6. B^4 च for इदम्
8. P अवयवद्वितीयं पूर्वसाकाङ्क्षितं for अत्र यद्···· कम्पा । तद् ; A^1 च for यद् ; L पूर्वमा-का क्षितं for पर्व सा कम्पा तद्; A^1V^2 साकाङ्क्ष for सा काम्पा

दीर्घे च, – पदादौ दीर्घमेव, – काम्पा भवति। यथा **नदयन्नाइ**। **पीऽ३पृथि** (ऊ. द. ४२) तथा **तिस्रोवाचाः**। **ईऽ३रयति** (ऊ. द. ५७) ॥ ९ ॥

दी. **काऽ३मुपरः** इति इदन्तए-(ग्रा. २. ७. ६५. १)-साम्नि काम्पापर्व। अस्मिन् सूत्रे पदशब्देन सुबन्तं तिङन्तं च पदं ज्ञातव्यम्। पदस्यान्ते ह्रस्वे दीर्घे वा अक्षरे काम्पापर्व भवति। पदस्यादौ च दीर्घाक्षरे काम्पापर्व भवति। अस्य सूत्रस्य व्यवस्था। प्रकृतौ विद्यमानयोः काम्पावृधन्तयोः पर्वणोरादिवर्णः पदान्तश्चेत्तदा काम्पा भवति। पदादिभूतो वर्णो दीर्घश्चेत्तदापि काम्पा भवति। अन्यत्र वृधन्तैव। पदस्यान्ते ह्रस्वे उदाहरणम् – **नदयन्नाइषीऽ३पृथि** (ऊ. द. ४२)। पदस्यान्ते दीर्घाक्षरे उदाहरणम् – **देवोदेवा**। **नाऽ३ञ्जनि** (ग्रा. १५. ६. ५२४. ४)। पदयस्यादौ दीर्घे अक्षरे उदाहरणम् – **तिस्रोवाचाः**। **ईऽ३रय** (ऊ. द. ५७) ॥ ९ ॥

अ-न-जागृविर्-देव-स्य-क्रम्-चिद्-वावृ-मारु-सूरि-कारि-दाशु-पीतिः ॥ १० ॥

वि. [अकारः प्रतिषेधे। एतेषु पूर्वलक्षणप्राप्ता काम्पा प्रतिषिद्ध्यते।] **स ईं रथो**। **नभुरि**। **शुष्मीशमर्धो नमारु** (ऊ. सं. ३४७)। **सं मातृभिर्नशि** (ऊ. सं. २९०)। [अत्र न-कारः पार्थवासिष्ठाज्यदोहेषु। **जागृविः**। **विचक्षणो जागृविर्देव**-(ऊ. सं. २६८)-वासिष्ठे। **देवोदेवस्य मत्सरोम** (ऊ. सं. ३०७) इन्दुस्सम्पायाम्। **वृक्षंनपा**। **क्वन्धून**। **पुरु-**

---

3. M^4L^1. om. इदन्तए साम्नि
4. S^4 अन्त्ये for अन्ते; S^4 च for वा
5. M^4 after भवति adds: तदादिभूतो वर्णो दीर्घश्चेत् तदापि काम्पा भवति
7. S^4 वृधन्त एव for वृधन्तैव
8. S^4 after पृथि adds: अत्र षि इति पदान्तह्रस्वस्य काम्पा भवति; S^4 दीर्घेऽ for दीर्घा
9. S^4 after ०ञ्जनि adds: अत्र नामिति पदान्तदीर्घस्य काम्पा भवति।
10. S^4 after ईरय adds: अत्र ई इति पदादिदीर्घस्य काम्पा भवति। सोमं यन्ताइमतयः। अत्र म इति पदादिह्रस्वत्वात् वृधन्त एव। एवमादीनि
13. $A^3M^{1-2}TS^1$ .om स ईं रथो .... दोहेषु (l. 15)
15. S^2 after देव adds: वीतौ

मेधाः। चित्तक। अयापवा-(ऊ. सं. ३१२) वासिष्ठे। बृहत्सोमोवावृधे। मत्सिसशर्धो मारुतम्। अजनयत् सूर्यो ज्योतिः। –त्रीणि अक्रान्- (ऊ. अ. ६७३) वासिष्ठे। सतो धनं कारिणे न-(ऊ. . ६७७)। प्रत्यवर्तिदाशुषेशम्भवि। नेदानींपीतिरश्विनात (ऊ. स. ७२८)। एतान्यौशने। इत्येतेषु पूर्वसूत्रेण काम्पा प्राप्ते (प्राप्तापि?) बृधन्ता भवति॥

भा. अः प्रतिषेधे। न। जागृविः। देवस्य। क्वम्। चित्। वावृ। मारु। सुरि। कारि। दाशु। पीतिः। –एतेषु पूर्वलक्षणप्राप्तं काम्पापर्वं प्रतिषिध्यते। स ई रथोन। शुष्मी शर्धो न- (ऊ. सं. ३४७)। अत्र न-कारः पार्थवासिष्ठाज्यदोहेषु। विचक्षणोजागृविः (ऊ. सं. २६८) वासिष्ठे। देवोदेवस्य (ऊ. सं. ३०७) सम्पायाम्। वृक्षं न पक्वम् (ऊ. सं. ३१२) वासिष्ठे। पुरुमेधाश्चित्त। बृहत्सोमोवावृधे। मत्सिशर्धोमारु। नयत्सूर्ये (ऊ. अ. ६७३) [-वा]सिष्ठेषु। सतोधनम्। कारि। प्रत्यवर्ति दाशुषे। नेदानींपीतिः (ऊ. स. ७२८) त्रीणि औशने। [एतानि] यथासंख्ये-नोदाहरणानि॥ १०॥

दी. अकारः प्रतिषेधे। न। जागृविः। देवस्य। क्वम्। चित्। वावृ। मारु। सुरि। कारि। दाशु। पीतिः। एतेषु पदेषु पूर्वलक्षणप्राप्ता कम्पा प्रतिषिध्यते। उहुवाइ। अयं सोमाः (ऊ. सं. ३४७) इति पार्थे। सई रथो। न सुरि। शुष्मी-शर्धो। नमारु। अयंसोमाः (र. अ. ९५) इत्याज्यदोहे॥ एवम् उहुवाइ। अस्मा-ऽ३४औहोवा (ऊ. सं. २६८) इति वासिष्ठे द्वितीयायां क्षणो। जागृविः॥ ओऽ३हाइ। इत्यादि इन्दुर्वाजी (ऊ. सं. ३०७) इति सम्पावैयश्वे द्वितीयायां देवोदेव। स्यमत्स॥

---

4. A²S¹ वृद्धिर्न for वृधन्ता

5. PB⁴ नः for अः; B⁴PL²A¹ om. न। जागृविः। ....पीतिः।

6. B⁴ ०प्राप्ता काम्पा for ०प्राप्तं काम्पापर्वं

8. P. वासिष्ठे सफायाम् for सम्पायाम्

17. M⁴L¹ om. द्वितीयायां; S⁴ after जागृविः adds: अत्र जा इति पदादेर्दीर्घत्वेऽपि काम्पा न भवति।

18. S⁴ after मत्स adds: अत्र स्य इति पदान्तह्रस्वत्वेऽपि काम्पा न भवति

औहोवाहाऽ३होइ । इहा । अयापवा (ऊ. सं. ३१२) वासिष्ठे द्वितीयायां वृक्षन्नपाऽ । क्वन्धून । अत्रैव प्रथमायां पुरुमेधाः । चित्तकम् ॥ हाइउहुवाइ । अक्राऽ३४औहोवा- (ऊ. अ. ६७३) इति वासिष्ठे सोमो । वावृधे । अत्रैव द्वितीयायां शर्धो । मारुतम् । तृतीयायां नयात् । सूरिये ॥ आजा (ऊ. अ. ६७३) इत्यौशने द्वितीयायां सतोधनाम् । कारिणे ॥ आभा (ऊ. स. ७२८) इत्यौशने द्वितीयायां प्रत्यवताइम् । दाशुषे । तृतीयायां नेदानींपाइ । तिरश्चि ॥ १० ॥

राजने च ॥ ११ ॥

वि. **राजने च** काम्पा न भवति ॥ ११ ॥

भा. चकारेणापवादाधिकारोऽनुकृष्यते । **राजने च तदिदायां** (र. सं. ६७) काम्पा न भवति ॥ ११ ॥

दी. **राजने** चेति चकारेण अपदाधिकारोऽनुकृष्यते । **तदिदामा** (र. सं. ६७) इति राजने तिसृषु स्तोत्रीयासु काम्पापर्व न भवति । **अनुयंवाइ** । **श्वेम** । द्वितीयायां **शत्रुर्दासा** । **यभिय** ॥ ११ ॥

---

2. S[4] after धून adds: अत्र क्वमिति पदान्तहस्वत्वेऽपि काम्पा न भवति; S[4] after चित्तकम् adds: अत्र चिदिति पदान्तहस्वत्वेऽपि काम्पा न भवति ।
3. S[4] after वावृधे adds: अत्र वा इति पदादिदीर्घत्वेऽपि काम्पा न भवति; S[4] after मारुतम् adds: अत्र मा इति पदादिदीर्घत्वेऽपि काम्पा न भवति
4. S[4] after सूरिये adds: अत्र सू इति पदादिदीर्घत्वेऽपि काम्पा न भवति
5. S[4] after कारिणे adds: अत्र का इति पदादिदीर्घत्वेऽपि काम्पा न भवति; S[4] after दाशुषे adds: अत्र दा इति पादान्तहस्वत्वेऽपि काम्पा न भवति
6. S[4] after तिरश्चि adds: अत्र ति इति ह्रस्वत्वेऽपि काम्पा न भवति
7. PV[2]B[4] from the following sūtra trans. आद्ययोः after च
9. PV[2]B[4] आद्ययोः स्तोत्रीययोः for तदिदायां
11. S[4] पदाधिकारान्न, M[4] अपदाधिकारान्न for अपदाधिकारोऽनु
12. S[2] after श्वेम adds: अत्र श्वे इति पदान्तदीर्घत्वेऽपि काम्पा न भवति
13. S[4] after यभिय adds: अत्र य इति पदान्तहस्वत्वेऽपि काम्पा न भवति । एवमादीनि

आद्ययोरतृतीये ॥ १२ ॥

वि. **आद्ययोः** स्तोत्रीययोः तृतीयपादवर्जम् । **तृतीये** पादे काम्पा भवतीत्यर्थः ॥

भा. तृतीये पादे भवत्येव काम्पा **आद्ययोः** स्तोत्रीययोः ॥ १२ ॥

दी. **तदिदासा** (र. सं. ६७) इति राजने **आद्ययोः** स्तोत्रीययोः तृतीये पादे काम्पा भवत्येव । न निषेधः । **नोऽ३निरि** । द्वितीयायां **चाऽ३विय** ॥ १२ ॥

जगतीषु च वाराहे ॥ १३ ॥

वि. **जगतीषु च वाराहे** काम्पा न भवति **प्रोअयास्याम्** (ऊ. क्षु. ९२४) ॥

भा. **प्रोअयास्यां** (ऊ. क्षु. ९२४) **वाराहे** काम्पाप्रतिषेधः । चशब्दादपवादाधिकारः ॥ १३ ॥

२र र १
दी. **हाउहाउ** । **हुप्** । **प्रोअयासाइत्** (ऊ. क्षु. ९२४) इत्यादि **जगतीषु**
वाराहे काम्पाप्रतिषेधः । चशब्दादपवादाधिकारः । **सोमऽकला** । **शेशत** । द्वितीयायां
२ १ र २१ २१ २ १ ७र१र र २र१ २१
हरिंक्रीडा । **तमभ्य** । **अभिधेना** । **वऽपय** । तृतीयायां **यानोदोहा** । **तेत्रिर** । **क्षुम-**
र २ १
द्वाजा । **वन्मधु** ॥ १३ ॥

परयोश्चान्त्येषु ॥ १४ ॥

वि. वाराहात् **परयोर्धर्तासाविसोमवासिष्ठयोरन्त्येषु** पादेषु काम्पा न भवति ॥

1, PV^2B^4 trans. आद्ययोः to the previous sūtra after च

2, $A^2M^{1-2}TS^1$ om. °पाद°; $A^2M^{1-2}TS^1$ om. पादे

5. S^4 after निरि adds: अत्र नो इति [तृतीय]पादत्वात् काम्पा भवत्येव; S^4 after विय adds: अत्र चा इति तृतीयपादत्वात् काम्पा भवत्येव । न निषेध इत्यर्थः ।

7. A^2 om. जगतीषु च वाराहे; KTS^{1-2} अयास्यायाम् for अयास्याम्

11. L^1M^4 add: न before च; S^4 after शेशत adds: अत्र शे इति पदान्तदीर्घत्वात्

12. S^4 after तमभ्य adds: अत्र तमिति पदान्तह्रस्वत्वात् ; S^2 after पय adds: अत्र व इति पदान्तह्रस्वत्वात् ; S^4 after तेत्रिर adds: अत्र ते इति पदान्तदीर्घत्वात्

13. S^4 after मधु adds: अत्र वदिति पदान्तह्रस्वत्वात् । एतेषां काम्पाप्रतिषेधः

15. T. पदेषु for पादेषु

भा. वाराहात् **परयोर्वासिष्ठयोर्धर्तासाविसोमयोः** (ऊ. क्षु. ९२५-६) **अन्त्येषु** पादेषु काम्पा न भवति चशब्दादपवादः ॥ १४ ॥

दी. **प्रोअयासीत्** (ऊ. क्षु. ९२४) इति वाराहात् परयोः **उहुवाइ** । **धर्ताऽ३-४औहोवा** (ऊ. क्षु. ९२५) **हाइ** । **उहुवाइ** । **असाऽ३४औहोवा** (ऊ. क्षु. ९२६) इति वासिष्ठयोरन्त्येसु पादेषु काम्पा न भवति । **च**-शब्पादपवादः ॥ **धर्तेति** वासिष्ठे **पाजा** । **सिकृणु** । द्वितीयायां **हिन्वा** । **नोअज्य** । तृतीयायां **नोवा** । **जाऽउप** ॥ **असाविसो** इति वासिष्ठे **नयो** । **निंघृत** । द्वितीयायां **वभाइः** । **वसते** । तृतीयायां **वसा** । **नः परि** ॥

श्यैते गीथषष्ठम् ॥ १५ ॥

वि. & भा. **श्यैते उद्गीथषष्ठम्** अक्षरं वर्धते । **यथावि** ॥ १५ ॥

दी. **अभिप्रवस्सुरा** (ऊ. द. ४३) इत्यादि **श्यैते उद्गीथस्य षष्ठम्** अक्षरं वर्धते । **यथाविदाऽ२३४इ** ॥ १५ ॥

त्रिष्टुप्सु दशमम् ॥ १६ ॥

वि. **त्रिष्टुप्सु दशमम्** अक्षरं वर्धते **तदिदासादिषु** ॥ १६ ॥

भा. श्यैते **त्रिष्टुप्सु तदिदासा** (र. सं. ६५) इत्यत्र उद्गीथ**दशमम्** अक्षरं वर्धते ॥

दी. **तदिदासभुव** (ऊ. ए. ५२६) इति **त्रिटुष्प्सु** **श्यैते** उद्गीथस्य **दशमम्** अक्षरं वर्धते । **त्वेषानृम्णाऽ२३४ः** ॥ १६ ॥

---

3. M^4L^1 om. प्रो अयासीत् ... परयोः
6. s^4 after कृणु adds: अत्र सि इति अन्त्यपादपदान्तह्रस्वत्वात् ; s^4 after अज्य adds: अत्र नो इति अन्त्यपादपदान्तदीर्घत्वात् ; s^2 after उप adds: जा इति अन्त्यपादपदान्तदीर्घत्वात्
7. s^4 after घृत adds: अत्र निमिति अन्त्यपादपदान्तह्रस्वत्वात ; s^4 after वसते adds: अत्र व इति अन्त्यपादपदान्तह्रस्वत्वात् ; s^4 after परि adds: अत्र न इति अन्त्यपादपदान्तह्रस्वत्वात् । एतेषां काम्पाप्रतिषेध :
9. $KS^1A^2M^{1-2}My^1$ गीये for उद्गीथ; $PV^2B^4L^2A^1$ om. यथावि
11. s^4 after दाऽइ adds: अत्र था इति उद्गीथषष्ठस्य वृद्धिः । एवमादीनि ।
16. s^4 after नृम्णाः adds: अत्र षा इति उद्गीथदशमस्य वृद्धिः ।

मध्यमायां द्वादशम् ॥ १७ ॥

वि. त्रिष्टुप्सु **मध्यमायां** स्तोत्रीयायां **द्वादश**मक्षरं वर्धते ॥ १७ ॥

भा. अत्रैव **मध्यमायां द्वादशम्** अक्षरं वर्धते ॥ १७ ॥

दी. तदिदास (ऊ. ए. ५२६) इति त्रिष्टुप्सु श्यैते **मध्यमायाम्** उद्गीथस्य **द्वादशम्** अक्षरं वर्धते । **सन्दाधाऽ१ताऽ२३४इ** ॥ १७ ॥

निधने गीथषष्ठम् ॥ १८ ॥

वि. & भा. पूर्वे **जनित्रे उद्गीथषष्ठम्** अक्षरं वर्धते ॥ १८ ॥

दी. **इन्द्रक्राऽ३तुन्नआभरा** (ऊ. सं. ३६५) इति **पूर्वजनित्रे उद्गीथस्य** षष्ठमक्षरं वर्धते । **पितापुत्रेभियोयाऽ३थाऽ२** ॥ १८ ॥

रु पञ्चमम् ॥ १९ ॥

वि. पूर्वजनित्रे पञ्चमं **रु**-इत्येतदक्षरं वर्धते गीथे । **गिरिन्न पुरुभोजसम्** इत्यत्र ॥

भा. **रु**-शब्दः पञ्चमो वर्धते । **गिरिं न पुरु** (ऊ. ए. ५००) ॥ १९ ॥

दी. **तंवोदाऽ३स्ममृतीषहाम्** (ऊ. ए. ५००) इति पूर्वजनित्रे तृतीयायां **रु**-शब्दः पञ्चमो वर्धते । **गिरिन्नपुरूभोऽ१जासाऽ२म्** ॥ १९ ॥

ह्रस्वायां गीथादिर्वार्धा ॥ २० ॥

वि. **ह्रस्वावैरूपे उद्गीथादिर्वार्धा** भवति ॥ २० ॥

भा. **ह्रस्वायां** बृहदोपशायाम् **उद्गीथादिर्वार्धस्वतन्वा** (ग्रा. गे. १. ५. ५२. १) भवति । अत्र द्विपात् प्रस्तावः । उद्गीथादौ **मागायता** । सा ऊहगीतौ **वार्धस्वतन्वा** पञ्चाक्षरा भवति । **नात्त्वावज्रिन्त्सा** । एवं द्रष्टव्या ॥ २० ॥

---

5. after S^4 ताऽइ adds: अत्र न्दा इति उद्गीथद्वादशाक्षरस्य वृद्धिः

7. KM^{1-2} पूर्व° for पूर्वे

9. S^4 after थाऽ२ adds: अत्र यो इति उद्गीथषष्ठस्य वृद्धिः

11. M^{1-2} om. रु इत्येतदक्षरं; T. om. रु इत्येतद्

14. S^4 after जासाऽम् adds: अत्र रू इति उद्गीथपञ्चमस्य वृद्धिः

19. $B^4PL^2A^1$ एवं विधा for एवं; V^2 द्रष्टव्यम् for द्रष्टव्या

१र २ र १ र
दी. यद्यावइन्द्रते शतम् । ए (र. क्षु. १६३) इति ह्रस्वायां बृहदोपशायां
१८८२ र
द्वितीये वैरूपे उद्गीथस्यादिः वार्धस्वतन्वा इति पञ्चाक्षरं पर्व भवति। अत्र द्विपात् प्रस्तावः। उद्गीथस्यादौ मागायता चतुरक्षरा । सा ऊहगीतौ वार्धस्वतन्वा इति पञ्चाक्षरा भवति।
१ र २
नात्वावज्रिन्त्स । एवं द्रष्टव्या ॥ २० ॥

मागा सोमस्पतिः ॥ २१ ॥

वि. सोमस्पतिर् इत्यत्र मागायता भवति। वार्धस्वतन्वा मागायताया एकाक्षराधिका भवति ॥ २१ ॥

भा. सहस्रधारायां सोमस्पतिर् इत्यत्र मागायतैव भवति। न वार्धस्वतन्वा ॥ २१ ॥

२ १र२र१ २ र १र
दी. सुतासोमधुमत्तमाः । ए । (र. क्षु. १७५) इति ह्रस्वावैरूपे तृतीयायां
१
सहस्रधारायां सोमस्पतिरित्यत्र मागायता चतुरक्षरा भवति। न वार्धस्वतन्वा। सोम-
२ १ र२
स्पतिः । रा॑ऽ२ । मागायत (ग्रा. गे. १०. ४. ३८८. १) इति मागायतापर्व ॥ २१ ॥

सेधे हाद्वितीये यथर्चं भवति ॥ २२ ॥

वि. उत्सेधे। हाद्वितीये प्रत्यये पूर्वमक्षरं यथर्चं भवति। ऋचि दीर्घं ह्रस्वं वा साम्नि न विकारमापद्यते ॥ २२ ॥

भा. उत्सेधे हाद्वितीये स्तौभिके हा-शब्दे प्रत्यये पूर्वमक्षरं यथर्चं भवति। ऋचि दीर्घं ह्रस्वं वा साम्नि न विकारमापद्यते ॥ २२ ॥

४ र ३ ४र ३र४५र
दी. पुनानस्सोमधारया । पः (ऊ. द. २११) इति उत्सेधे द्वितीये स्तौभिके
२ र १ २
हा-शब्दे प्रत्यये पूर्वमक्षरं यथर्चं भवति। स्वसीदासि ॥ २२ ॥

---

3. M[4]L[1] om. इति; M[4] पञ्चम० for पञ्च०; S[4] या for सा
6. KM[1-3] ०धिकारा for ०धिका
8. V[2] after भवति। adds: तद्द्विमात्रे न भवति
10. M[4]L[2] after मागायता adds: एव भवति
15. PV[2]L[2]A[1]B[4] om. ऋचि .... आपद्यते;
16. A[2] दीर्घह्रस्वयोः for दीर्घं ह्रस्वं वा
18. M[4] यथार्थं for यथर्चं; S[4] after ०दासि adds: अत्र सि इति यथर्चं भवति। एवमादिषु

अषिणो दनः ॥ २३ ॥

वि. उत्सेधे **समुद्रस्याधिविष्टपे मनीषिणः** (ऊ. ए. ४५७) **परिस्वानश्चक्षसे देवमादनः** (ऊ. ए. ४९५) इत्यत्र यथर्च्चं न भवति। एते दीर्घे भवत इत्यर्थः ॥ २३ ॥

भा. [अ-कारः प्रतिषेधे।] **षिणः** । **दनः** । **समुद्रस्याधिविष्टपेमनीषिणः** (ऊ. ए. ४५७) । **परिस्वानश्चक्षसे देवमादनः** (ऊ. ए. ४९५) । एतयोर्न यथर्च्चं भवति। द्विमात्रमेव भवति ॥ २३ ॥

दी. अ-कारः प्रतिषेधे। **षिणः** । **दनः** । एतयोर्न यथर्च्चं भवति। **अभिसोमास** (४ ३३र४र ५) **आयवः** (र ४५) । **पव** (ऊ. ए. ४५७) इत्युत्सेधे **मनीषाइणाः** (२र १ २र) । **श्रीणन्तो गोभिरुत्तरम्** (४र ३४र ३र ४ ३ ५) (ऊ. ए. ४९५) इत्युत्सेधे अध्यास्यायां **वमादानाः** (२ र १ २र) ॥ २३ ॥

सर्वत्र पादतृतीयतुरीयं वृद्धम् ॥ २४ ॥

वि. & भा. **सर्वत्र** उत्सेधे **तृतीये** पादे **तुरीयम्** अक्षरं **वृद्धं** भवति ॥ २४ ॥

दी. सर्वत्र **पुनानस्सोम-** (ऊ. द. २११) इत्यादिसर्वोत्सेधेषु तृतीये पादे चतुर्थमक्षरं वर्धते। **आराऽ३त्वधा** (३र२ ४) । एवमादिषु ॥ २४ ॥

अन्त्यस्यावृद्धम् ॥ २५ ॥

---

4. B^4V^2 om. षिणः । दनः ।
6. $PL^2A^1B^4$ om. द्विमात्रमेव भवति
7. S^2 यथर्चौ भवतः, M^4 यथार्थं भवति, L^1 यथर्चे भवति for यथर्च्चं भवति
8. M^4 इणः for इणाः; S^4 after इणाः adds: अत्र णा इति अयथर्च्चं भवति
9. S^4 after दानाः adds: अत्र ना इति अयथर्च्चं भवति
10. S^4KS^2 तृतीये, $M^{1-2}B^4$ तृतीयं for तृतीय०; T तुर्यं for तुरीयं
11. A^1B^4 trans. सर्वत्र after उत्सेधे; A^2S^1 वृद्धमक्षरम्। पदानां मध्ये तृतीयं पादतृतीयम्, M^{1-2} वृद्धमक्षरं पादानां मध्ये तृतीयम्, T अक्षरं वृद्धं पादानां मध्ये तृतीयपादे तृतीयम् for अक्षरं वृद्धं भवति; $PA^1L^2B^4L^2$ चतुर्थम्, T तुर्यम् for तुरीयम्; B^4A^1 वर्धते for वृद्धं भवति
12. $M^4L^1My^3$ om. इति; M^4 सम० for सर्व०
13. S^4 before एवम् adds: अत्र धा इति तुरीयमक्षरं वृद्धम्।

वि. & भा. अन्त्यस्य पादस्य चतुर्थम् अक्षरं सर्वत्र **अवृद्धं** भवति ॥ २५ ॥

दी. **पुनानस्सोमे**त्यादिसर्वोत्सेधेषु अन्त्यस्य पादस्य चतुर्थमक्षरं सर्वत्रावृद्धं भवति । उत्सोऽ३देवः इत्यादिषु ॥ २५ ॥

वर्ते च ॥ २६ ॥

वि. & भा. **अभीवर्ते च** तृतीये पादे चतुर्थमक्षरं कृष्यते ॥ २६ ॥

दी. **पुनाऽ३नाऽ३स्सोमधारयोवा** (ऊ. सं. ३१५) इति **अभीवर्ते च** तृतीये पादे चतुर्थमक्षरं कृष्यते । **आरत्नधाऽ३१२३४ः** । एवमादिषु ॥ २६ ॥

तृतीयं विश्वासां विश्वास्ते ॥ २७ ॥

वि. & भा. अभीवर्त एव **विश्वासान्तरुता** (ऊ. सं. २६९) **विश्वास्तेस्पृधः**

---

1. $A^2M^{1-2}T$ add: च after अन्त्यस्य; $A^2KM^{1-2}S^{1-2}$ वृद्धं न for सर्वत्र अवृद्धं; $PA^1L^2B^4$ **om.** भवति
2. M^4L^1 **om.** इत्यादिसर्व०
3. s^4 after देवः adds: अत्र व इत्यवृद्धम्
4. वर्ते च ॥ The vivaraṇa version reads वर्ते च and तृतीयं विश्वासां विश्वास्ते as a single sūtra and comments: अभीवर्त एव विश्वासान्तरुता.... कृष्यते. It has lost the commentary on वर्ते च and what we have here is but the commentary on the latter sūtra. The sūtra वर्ते च says that in अभीवर्त,— referring to the melody of that name, based on पुनानः सोम(ऊ. सं. 315),— the fourth syllable in the third pāda thereof will have the karṣaṇa tone. The next sūtra again speaks of अभीवर्त but based on two different tṛcas, viz. यो राजाचर्षणीनाम् (ऊ. सं २६९) and त्वमिन्द्रप्रतूर्तिषु (ऊ. सं. ४९२). The commentary अभीवर्ते एव, 'again in अभीवर्त; implies that what has been said above holds good in case of other two more melodies of that name. We have, therefore, accepted the bhāṣya version, i. e. we have accepted वर्ते च and तृतीयं... विश्वास्ते as two separate sūtras. फुल्लसूत्र too, it may be noted, agrees with our explanation.
7. $M^4L^1MV^3$ after कृष्य कर्षणं क्रियते; s^4 after धाः adds: अत्र धा इति तुरीयाक्षरस्य कर्षणम्
9. P. पुन. $M^{1-2}V^2$ च for एव; A^2T om. अभीवर्त एव; M^{2-1} after एव add; तृतीयेऽनुपादे; M^{1-2} trans. विश्वासान्तरुता and विश्वास्ते स्पृधः after कृष्यते

(ऊ. ए. ४९२) एतयोः **तृतीयम्** अक्षरं कृष्यते । अन्यत्र चतुर्थम् ॥ २७ ॥

दी. अभीवर्ते **विश्वासाम्** । **विश्वास्ते** एतयोस्तृतीये पादे तृतीयमक्षरं कृष्यते । **योराऽ३ज़ाऽ३चर्षणीनोवा** (ऊ. सं. २६९) इत्यभीवर्ते **वाइश्वासाऽ३२१२३४म्** । **तुवाऽ३माऽ३इन्द्रप्रतूर्तिष्वोवा** (ऊ. ए. ४९२) । इत्यभीवर्ते तृतीयायां **वाइश्वास्ताऽ३१२३४इ** । अन्यत्र चतुर्थं कृष्यते ॥ २७ ॥

मराय आन्धानन्दे अनुपादम् ॥ २८ ॥

वि. मराये आन्धानन्दे एवानुपादं भवतः । **होवाइ मूर्धोहाइ** । **नन्दाइ** । नान्यद्भवति । **अनुपादं** प्रतिपादम् । **आग्नीम्** । **नराः** ॥ २८ ॥

भा. मराये आन्धा च नन्दा च **आन्धानन्दे** । ते **अनुपादं** भवतः । पादे पादे अनुपादम् । **आग्नीम्** । **नराः** । **हास्ता** । **च्युताम्** । एवमादिषु ॥ २८ ॥

दी. हाउहाउहाउ । **आग्नीम्** (ऊ. क्षु. ९००) इति **मराये आन्धा**-पर्व **नन्दा**-पर्व **अनुपादं** प्रतिपादं पादे पादे भवतः । **आग्नीम्** । **नराः** । **हास्ता** । **च्युताम्** । एवमादिषु । आन्धा च नान्दा च **आन्धानन्दे** । **असाविदेवम्** (ग्रा. ८. ९. ३१३. २) द्वितीये **आन्धा** इति मध्यमोऽभ्यास आन्धापर्व । **मूर्धानं दिवः** (ग्रा. २. ७. ६७. १) इत्यस्यां [द्वितीये] **नन्दाइ** इति । नन्दापर्व ॥ २८ ॥

नन्दायाः स्थाने मागायता परि-दुहा-
शकु-पुरः-सखा-तन्दु-दक्षादिषु च ॥ २९ ॥

---

1. M[1-2]TS[1] इत्यत्र for एतयोः; S[1]A[2] om. तृतीयमक्षरं कृष्यते; P after चतुर्थम् । adds; वर्ते चेत्यादिसूत्रद्वयं प्रकृशब्दरहितम् आम्नायानुसारेण व्याख्यातमिदं पुस्तकान्तरे तद्यथा वर्ते च
2. M[4] गृह्यते for कृष्यते
3. S[4] after °साऽम् adds: अत्र सा इति तृतीयाक्षरस्य कर्षणम्
4. M[4]L[2] °वर्त for °वर्ते; S[2] after स्ताऽइ adds: अत्र स्ता इति तृतीयाक्षरकर्षणम्
8. S[1]A[2] पादं प्रति पादं प्रति, K पादं प्रति for प्रतिपादं; M[1] om. अनुपादं; KS[2] नरायाम् for नराः
11. M[4] om. आग्नीम्···· च्युताम्

वि. नन्दायाः स्थाने मागायता भवति । परिधी॰रति । दुहानोबभ्रऊधनि । शकुना इव । पुरोजिती वो अन्धसः । सखायो दीर्घ- । तन्दुरोषम् । दक्षय्यो योदादिषु । प्रेद्धो अग्ने । पुरो नोअजस्रया । त्वांशश्वन्तः । मराये एतेषु पादेषु मागायता भवति ॥

भा. मराय एव नन्दायाः स्थाने मागायता परिदुहाशकुपुरःसखा भवति वक्ष्यमाणेषूदाहरणेषु । परिधी॰ऽ३ । दुहानः । शकुनाः । पुरोजिती । सखायः । तन्दुरोषाम् । दाक्षय्यः । प्रेद्धो । पुरो । त्वांशश्वन्तः ॥ २९ ॥

दी. मराये नन्दायाः स्थाने मागायतापर्व भवति । परि । दुहा । शकु । पुरः । सखा । तन्दु । दक्षा । आदिशब्दात् प्रेद्धो । पुरो नो । त्वां शश्वन्तः । एतेषु पादेषु । इन्द्राय साम गायत (ग्रा. १०. ४. ३८८. १) इत्यस्यां मागायत इति मागयतापर्व । हाउ-इत्यादि तावा । अहाम (ऊ. क्षु. ८८३) इति मराये द्वितीयायां पारी । धाइ॰रतिता॰इहि । इति परि । दूहा । नोबभ्रऊधनि । इति दुहा । शाकू । नाइवपप्तिम । इति शकु । पूराः । जाइतीवोअन्धसः (ऊ. क्षु. ८८४) इति पुरः । साखा । यो दीर्घजिह्वियम् इति सखा । तान्दू । रोषमभीनरः इति तन्दु । अग्निन्नर (ऊ. क्षु. ९००) इति मराये उत्तरयोः स्तोत्रीययोः दाक्षा । य्योयोदम आसनित्यः । इति दक्षा । प्रेद्धो । आग्नेदीदिहि । पुरो । नोअजस्रया । तूवाम् । शाश्वन्तउप ॥

नन्दापरमेकोच्चम् ३० ॥

वि. नन्दायाः परमेकोच्चं पर्व भवति । एकमुच्चमक्षरं यस्य तदेकोच्चम् ॥ ३० ॥

---

3. S[1]T om. मराये; A[2]M[1-2] trans. एतेषु before मराये

11. M[4]L[1] om. इति परि; M[4]L[1] om. इति दुहा

12. M[4]L[1] om. इति शकु & इति पुरः

13. M[4]L[1] om. इति सखा and om. इति तन्दु

14. M[4]L[1] om. उत्तरयोः

15. M[4]L[1] om. इति दक्षा

16. S[4] after उप adds: एतेषु नन्दायाः स्थाने मागायता भवन्ति

· K om. परमेकोच्चं····नन्दायाः (1. 7.); M[1-2] after एकोच्चं । adds: मदो युजि यच्च।रु

भा. नन्दापरं यत्पर्व तद् एकोच्चं भवति । तामा । ग्निमा । स्तेवसवः । एवं सर्वत्र ॥ ३० ॥

दी. अग्निनर (ऊ. क्षु. ९००) इत्यादिमराये नन्दायाः परं यत् पर्व तस्यैकमक्षरमुच्चं भवति । तामा । ग्निमा । स्तेवसवोऽयृण्वन् । एवं सर्वत्र ॥ ३० ॥

द्व्युच्चामिन्द्र ॥ ३१ ॥

वि. पिबा सोममिन्द्र (ऊ. क्षु. ८७२) इत्यत्र द्व्युच्चं पर्व भवति । नन्दायाः परमेव । पिबासोममिन्द्र (ऊ. क्षु. ८७२) इत्यत्र नन्दापरं द्व्युच्चं भवतीत्यर्थः ॥ ३१ ॥

भा. पिबासोममिन्द्र (ऊ. क्षु. ८७२) इत्यत्र नन्दापरं द्व्युच्चं भवति ॥ ३१ ॥

दी. हाउ इत्यादि पाइबा (ऊ. क्षु. ८७२) इति मराये नन्दायाः परं यत् पर्व तस्य द्व्युक्षरमुच्चं सोमाम् । इन्द्रमन्दतुत्वा ॥ ३१ ॥

नावेकं नीचम् ॥ ३२ ॥

वि. योनौ मराये नन्दापरमेवैकं नीचं पर्व भवति । दीऽ३धिति ॥ ३२ ॥

भा. योनौ अग्निनरायाम् एकं नीचं भवति नन्दापरम् ॥ ३२ ॥

दी. हाउ-इत्यादि आग्नीम् (ग्रा. २. ७. ७२. १) इति योनौ मराये नन्दायाः परं [यत्] पर्व तस्यैकमक्षरं नीचं भवति । नराः । दीऽ३धिति ॥ ३२ ॥

मासु-स-क्षं च ॥ ३३ ॥

वि. मराये बोधा सु मे म- (ऊ. क्षु. ८७२) न सुष्टुतिमसु (ऊ. क्षु. ८७३)

---

5. S[2] after न्यृण्वन् adds: अत्र स्ते इति नन्दायाः परमेकाक्षरमुच्चं भवति
8. A[2] प्रथमे for परमेवा; S[1]TK परमेवासौ for पिबासोमम्
9. P नन्दात् , L[1] नन्दायाः for नन्दा
10. S[4]L[1] om. यत्
11. S[4] after त्वा adds: अत्र इन्द्र इति नन्दायाः परं द्व्यक्षरोच्चं भवति
12. KA[2]M[1-2]TM[4]B[4]L[1] एक for एकं
15. S[4] after धिति adds: च्युतां । जनय । दशाम् । गृहय । अत्र नन्दायाः परमेकमक्षरं नीचं भवति ।

इमा ब्रह्मस (ऊ. क्षु. ८७२) **सुप्रतिचक्षम्** (ऊ. क्षु. ९००) एतेष्वेकं **नीचं** भवति ॥

भा. **म** । **असु** । **स** । **क्षम्** । एतेषु नन्दापरमेकं नीचं भवति । **बोधासुमेम** (ऊ. क्षु. ८७२) **न सुष्टुतिमसु** (ऊ. क्षु. ८७३) **इमा ब्रह्मस** (ऊ. क्षु. ८७२) सुप्रति-**चक्षम्** (ऊ. क्षु. ९००) ॥ ३३ ॥

दी. मराये **म** । **असु** । **क्षम्** । एतेषु च नन्दायाः परमेकमक्षरं नीचं भवति ।
२र   १   २ १   १ २
हाउ-इत्यादि **पाइबा** (ऊ. क्षु. ८७२) इति मरायें तृतीयायां **सुमाइ** । **मघवन्** ॥ **श्रुधाइ** ।
२२   २१   २ १   २ १
हवाम् (ऊ. क्षु. ८७३) अत्र मराये द्वितीयायां **ष्टुताइम्** । **असु** । तृतीयायां **हिताइ** ।
२१र   १ २   १   २ १   २ १
सवना ॥ **आग्नीम्** । **नराः** (ऊ. क्षु. ९००) इति मरायें द्वितीयायां **तिचा** । **क्षमव** ॥

रान्तं हितम् ॥ ३४ ॥

वि. एतान्यस्वाध्यायविषयाणि । संहिताध्ययनविषक्षाणीत्यर्थः । **स्वरान्तं संहितं** च यत्पर्व तदुत्तरपर्वणा स्थितं भवति । **हित-शब्दो** द्विरुच्यते । **सरूपाणाम्** (पा. १. २. ६४) इत्येकस्य हितशब्दस्य लोपः ।
                                    १ २
पारीधाइँरतिताऽइहिहिहि ॥ ३४ ॥

भा. स्वरान्तं यत् पर्व तत् स्थितं संहितं भवति । **परिधींरतिताँइहि** । **दुहानो बभ्रऊधनि** । **तवाहँसोमरारण** । एवमादीनि पदान्तावस्थितानि चैतानि ॥ ३४ ॥

दी. मराये नन्दायाः परं स्वरान्तं यद्यत् पर्व तत्तत्संहितं स्थितसंधितं भवति । **अग्निं**

---

1. K एक for एकं
4. PV^2 after चक्षम् adds: धीयति दुहानो धेच । अत्र नितवाहऽसोमरारण । एवमादीनि । एपावकास्थि-तानि चैतानि । अकारान्तपदान्तां स्थिरान्तम्
6. S^4 मघवन् adds: अत्र म इति
7. S^4 after असु adds: अत्र अ इति
8. S^4 after सवना adds: अत्र स इति; S^4 after मव adds: अत्र क्षमिति । एतेषां नन्दायाः परमेकाक्षरं नीचं भवति
10. A^{2}M$^{1-2}$TS^1 om. इत्यर्थः; A^{2}M$^{1-2}$TS^1 संहितान्तं for संहितं
11. A^{2}M^{1}TS^{1}M^2 तस्य for तद्; A^2 पर्वणां, T पर्वणि for पर्वणा
13. B^4 संस्थितं for तत् स्थितं; P om. तत् ; PV^2 after भवति adds: स्थितसंहितं भवतीत्यर्थः ।
14. PV^2 om. तवाहं...चैतानि
15. S^4 यत्पर्व तत्र, L^1 यत्पर्व त[त्] for यद्यत् पर्व तत्तत्

नर (ऊ. क्षु. ९००) इत्यादिमराये **आग्नेदीदिहि । हि ।** एवमादीनि ॥ ३४ ॥

अनाकारान्तम् ॥ ३५ ॥

वि. आकारान्तवर्जम् । **नार्वा । र्वा । र्वा ।** आकारान्ते स्थितं न भवति ॥

भा. पदान्तावस्थितमेव यत् पर्व आकारान्तं भवति तत् स्थितसंहितं न भवति । स्थितसंधिर्न भवतीत्यर्थः । **तवाहं** (ऊ. क्षु. ८८३)॥ **नक्तमुत सोम ते दिवा सोमं विश्वाच्या धिया** (ऊ. क्षु. ८८४) ॥ **पिबा सोममिन्द्र मन्दतु त्वा । नार्वा** (ऊ. क्षु. ८७२) । एवमादीनि ॥ १४ ॥

दी. **अन्** निषेधे । मराये नन्दायाः परं यत् पर्व आकारान्तं तत् न स्थितं संधितं भवति । स्थितसंधिर्न भवतीत्यर्थः । **पिबा सोमम्** (ऊ. क्षु. ८७२) इति मराये **इन्द्र-मन्दतु त्वा । त्वा । त्वा ।** एवमादीनि ॥ ३५ ॥

स्तव्युं चैके। स्तव्युं चैके ॥ ३६ ॥

वि. **जनयत प्रशस्तम्** इत्यत्र **गृहपतिमतव्युम्** इत्यत्र च (ऊ. क्षु. ९००) स्थितं भवतीत्येके मन्यन्ते । न तु ग्रन्थकारः । अभ्यासः प्रकरणसमास्यर्थः ॥ ३६ ॥

इति फुल्लसूत्रविवरणे प्रथमाध्याये वृद्धावृद्धे चतुर्थः खण्डः ॥ ४ ॥

भा. एतौ शब्दौ स्थितसंहितौ भवतः । एवमेके मन्यन्ते । न तु ग्रन्थकारः । एतानि निश्चितानि प्रयोगविषयाणि न स्वाध्याये ॥ ३६ ॥

इति पुष्पसूत्रभाष्ये प्रथमस्य चतुर्थी कण्डिका ॥ ४ ॥

---

9. M[4]S[2]L[1] स्थितं for स्थित०
10. S[4] after त्वा । adds: अत्र त्वा इति अकारान्तं न स्थितं सन्धिर्भवति
11. A[2]M[1-2]T do not repeat स्तव्युं चैके
12. M[1-2] om. गृह...इत्यत्र च
14. My[1] पुष्पभाष्ये for फुल्लसूत्रविवरणे

दी. **योनौ अग्निं नर** (ऊ. क्षु. ९००) इति मराये नन्दायाः परं यत् पर्व **स्तम्** । **व्युम्**-शब्दान्ते तत्र स्थितं संधितम् एके मन्यन्ते । न तु ग्रन्थकारः । **अग्निं नर** (ऊ. क्षु. ९००) इति मराये **तप्रशस्तम्** । **स्तम्** । **स्तम्** । **तिमथव्युम्** । **व्युम्** । **व्युम्** । इति ॥

इति फुल्लदीपे पञ्चमप्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

॥ वृद्धावृद्धं समाप्तम् ॥

पञ्चमः खण्डः

गतागतम्

अथ स्तोभगतागतम् ॥ १ ॥

वि. [अथ] वृद्धावृद्धादनन्तरं गतागतम् । गतश्चासावगतश्च गतागतः । गतागतश्चासौ स्तोभश्च । **राजदन्तादिषु परम्** (पा. २. २. ३१) इति परनिपातः । **स्तोभस्य गतागतं** वक्ष्यामः ॥ १ ॥

भा. वर्तिष्यते ॥ १ ॥

दी. प्रारभ्यते । हाइ-कारादिस्तोभस्य गतिरगतिः [च] प्रारभ्यते इत्यर्थः । तत्र गतिर्द्विविधा । इगतिरुगतिश्च कण्ठतालव्या कण्ठोष्ठ्या च । [इति ।] ॥ १ ॥

अगतिः स्तोभस्य स्वरे प्रत्यये संधौ ॥ २ ॥

---

1. M[4]L[1] om. योनौ अग्निं नर इति; M[4] परो L[1] परे for परम्
2. S[4] ins. इति after व्युम् : L[1] तं for तत्
3. S[4] स्तं स्थिस्तम् for स्नं स्तं ; S[4] स्थिव्युं स्थिव्युं for व्युम् । व्युम् ।
8. My[1] before अथ adds: श्रीगणेशायनमः; A[2]M[1-2]TMy[1] om. अथ वृद्धा... गतागतम्
10. A[2]M[2-1]T स्तोभ० for स्तोभस्य
11. A[2]M[1-2]TS[1] वक्ष्यामि for वक्ष्यामः
12. B[4] वतिष्येते for वर्तिष्येते
13. M[4] स्तोभं यस्य for स्तोभस्य

वि. **संधौ** विषये **स्तोभस्य स्वरे** प्रत्यये **अगतिः** भवति । संधिष्वगतिः । **औहो अग्ने विवस्वदुषसाऽ३ए** (र. प्रा. १४८) । **राजादेवौ होऽ२ऋतं बृहात्** (ऊ. द. १५१)॥

भा. यथा हारायणे **राजादेवौहोऽ३ ऋतं बृहात्** (ऊ. द. १५१) यथा **वार्कजम्भे हाउत्सोदेवोहिरण्याऽ३याः** (र. क्षु. १७२) एवमादीनि ॥ २ ॥

दी. **होइ**-कारादिस्तोभस्य अकारादि**स्वरे प्रत्यये** परे ऊहे **संधौ** सति **अगतिः** । गतिर्न भवति । गतिरुक्ता । उदाहरणम्– यथा हारायणे **राजादेवौहोऽ२ ऋतंबृहात्** (ऊ. द. १५१) । तथा वार्कजम्भे **हाउत्सोदेवोहिरण्यायाः** (र. क्षु. १७२) एवमादीनि संध्यक्षराणि । इति स्वराः ॥ २ ॥

गतिर्विरते ॥ ३ ॥

वि. स्तोभस्य स्वरे प्रत्यये **विरते गतिर्भवति** । विरामे पर्वणीत्यर्थः । साकमश्वे **अस्यप्रत्नायां** (अ. अ. ५५५) **हौऽ३होऽ३१इ** । एवमादीनि ॥ ३ ॥

भा. **विरते तु गतिर्भवति** हारायणादिषु ॥ ३ ॥

दी. **विरते** तु विरामे तु **गतिर्भवति** हारायणादिषु । **शग्ध्यूष्वौहोऽ२इशचीपताइ** (ऊ. ए. ४३२) अस्य **द्वितीयायां गवाऽ३१हाइ** । **आसाऽ३इ** ॥ ३ ॥

क्वचिद्विरतेऽप्यगतिः ॥ ४ ॥

वि. **क्वचित्** कुत्रचित् स्वरे प्रत्यये [**विरतेऽपि**] विरामविषयेऽपि **अगतिर्भवति** मधुश्चुन्निधने प्रागन्त्यात् स्तोभात् ॥ ४ ॥

भा. यथा मधुश्चुन्निधने प्रागन्त्यात् स्तोभात् ॥ ४ ॥

---

1. M[1-2] trans. अगतिः after स्तोभस्य and om. भवति··· ०दुषसाऽए
3. V[2]B[4]P तथा for यथा
4. V[2]P ०रण्या३पा३, A[1] ०रण्या३पा३याः for ०रण्या३याः
10. A[2] विरामविषयेऽप्यगतिः for विरते गतिः; M[1-7] द्विपर्वविषये, A[2] द्विपर्वणि for पर्वणि
11. TM[1-2] प्रत्नां for प्रत्नायां; T after होइ adds; अनुगुतां and trans. साकमश्वे after it.
12. B[4] after ०यणादिषु adds: एव

दी. **क्वचित्** साम्नि **विरतेऽपि** विरामेऽपि **अगतिः** । गतिर्न भवति । यथा मधुश्चुन्निधने **सोमाःपवन्त इन्दवाऽ३ए** (ऊ. द. ११५) । अत्र **हाऽ३हा** । **औऽ३होऽ३वा** प्रागन्त्यात् स्तोभात् ॥ ४ ॥

व्यञ्जने प्रत्यये गतिरगतिश्च ॥ ५ ॥

वि. **व्यञ्जने प्रत्यये** विरामविषये **गतिरगतिश्च** भवति । साकमश्वे अस्मद्रत्ना- (ऊ. अ. ५५५) दिषु ॥ ५ ॥

भा. यथा वाजजिति ॥ ५ ॥

दी. ककारादिव्यञ्जने प्रत्यये परे सति स्तोभस्य **गतिर्भवति** । **अगतिश्च** । न गतिर्भवति । **सूर्यस्येवा** (ऊ. द. २२१) इति वाजजिति **होवाऽ३होइ** । **मत्सरासाः** । **होवाऽ३होइ** । **वाऽ२३४औहोवा** । व्यञ्जनानि तु ऋक्तन्त्रे – **क ख ग घ ङ** इति **कवर्गः** । **च छ ज झ ञ** इति **चवर्गः** । **ट ठ ड ढ ण** इति **टवर्गः** । **त थ द ध न** इति **तवर्गः** । **प फ ब भ म** इति **पवर्गः** । **इति स्पर्शाः** । **य र ल व इत्यन्तस्थाः** । **श ष स ह इत्यूष्माणः** । **योगवाहाश्च** । इति व्यञ्जनानि ॥ ५ ॥

तत्र स्वरव्यञ्जनयोः प्रत्यययोरगतिमन्तः
स्तोभा ये तान् वक्ष्यामः ॥ ६ ॥

वि. **गतिर्विरत** (पु. सू. ५. ५. ४) इत्यादिभिः सूत्रैः स्वरव्यञ्जनयोः प्रत्यययोर्विरामविषये गतिश्चागतिश्च प्राप्नुतः । तयोः प्राप्तयोर्नियमार्थान्युत्तरत्र वचनानि । स्वरव्यञ्जनयोः **अगतिमन्तः स्तोभा ये तान् वक्ष्यामः** ॥ ६ ॥

भा. उपरिष्टादुदाहरिष्यामः ॥ ६ ॥

दी. तत्र गत्यगत्ययो-(गत्यो ?) र्मध्ये **स्वरे व्यञ्जने च प्रत्यये ये गतिमन्तः स्तोभाः**

---

5. A² प्राप्नुतः । तयोः प्राप्तयोर्नियमार्थान्युत्तरत्र वचनानि for भवति । ....०दिषु

14. A²M¹⁻²T अगताः. M⁴ न गीतिमन्तः for अगतिमन्तः

16. My¹ om. स्वर०....वचनानि

17. S¹⁻²T अगताः for अगतिमन्तः

तान् स्तोभान् **वक्ष्यामः** । कथयिष्यामः । वक्ष्यमाणेषु सामसु ॥ ६ ॥

कण्वबृहत्याद्यान्त्यावगतौ ॥ ७ ॥

वि. **कण्वबृहति** स्तोत्रीयासु **आद्यान्त्यौ** स्तोभौ **अगतौ** भवतः । **त्वामिद्धि**–(ऊ. क्षु. ८६६) आदिषु ॥ ७ ॥

भा. **कण्वबृहति** स्तोत्रीयाद्यान्त्यावगतौ स्तोभौ भवतः । त्वामिध्यादिषु ॥ ७ ॥

दी. **औहोतुवामिद्धाऽ३ए** (ऊ. क्षु. ८६६) इति **कण्वबृहति** **आद्यान्त्यौ** प्रथमान्त्यौ स्तोभौ **अगतौ** गतिरहितौ भवतः । आद्ये **औहोतुवामिद्धाऽ३ए** । **महास्ताऽ-१वाऽ२३४** । **हाहो** ॥ ७ ॥

पूर्वकल्पश्चोदिन्द्रेत्यन्त्यत्वात् ॥ ८ ॥

वि. & भा. **उदिन्द्राश्वमिष्टय** (ऊ. क्षु. ८६७) इत्यत्र **पूर्वकल्पश्चागतो भवति** । **अन्त्यत्वात्** । ऋचि अन्त्यत्वादित्यभिप्रायः । वैकल्पिकत्वादेतयोः ॥ ८ ॥

दी. **औहोतुवंहियाऽ३ए** (ऊ. क्षु. ८६७) इति कण्वबृहति **प्रथमान्त्यौ स्तोभावगतौ** भवतः । **औहोतुवꣳहियाऽ३ए** । **उदाइन्द्राऽ३आऽ२३४** । **हाहो** । अथवा **उदाआऽ१**

---

2. M^{1-2} before कण्वबृहत्या° add the summary of khaṇḍas 5-8 that deal with गतागत as follows: ऊर्ध्वं प्रपाठकेनैव व्याख्यातम् । कण्वबृहत्याद्यान्त्यावित्यादि प्रेमध्वराय प्रथमः ॥ अतः परमगताः स्तोभाः । विचे प्रत्यये । द्वितीयः ॥ प्रश्निनि ज्येष्ठ; (M^2 ज्येष्ठम्)। योनौ चान्ते । तृतीयः ॥ दक्षनिधने मैथे त्थाप्रत्यये । चतुर्थ: ॥ सामराजे । अच्छिद्राञ्जोवैरूपसन्तनि-गायत्रपार्श्वानामाउवा सर्वत्रागतिः । न तालव्यात् । (M^2 तालव्या न) । तलव्यात् परं गतिर्भवति । व्यात्परमतिहारमेकतालव्यात् परात् स्तोभात् परं तालव्यस्यातिहारमेके मन्यन्ते । तं न किम् । विरते गतिलोपः । अगतिस्तोभस्य स्वरे प्रत्यये संधाविति वचनादतिहाराभावपक्षे व्यञ्जने प्रत्यये संधौगतिः । संहिताध्ययने गतिः । तस्मादसंधौ गतिलोपः । अगतिः (M^2 om. अगतिः)। तस्मात् सा स्वाध्याये अगतिःप्राप्तः । तस्मादतिहारः । रुचा हरा ऊवा यणी या रुचा हरा उचा (M^2 वा) यणीया इति पञ्चमः ॥ रहस्ये कृतिनि परीतोत्तरयोः श्रायन्तः सर्वासु वत्सासु । न वशिप्रत्यये । न वशिप्रत्यये षष्ठः ॥ इति फुल्लसूत्रभाष्ये अजातशत्रुविरचिते गतागतः समाप्त; ॥
3. A^2 स्तोत्रीययो; for स्तोत्रीयासु; T आद्यन्तौ for आद्यान्तौ; T. after इद्धि adds: इति
5. V^2 स्तोत्रीयायां for स्तोत्रीया°; A^1 adds: अगतौ after स्तोभौ
9. LB^4 °न्तत्वात् for °न्त्यत्वात्
11. $A^1V^2B^4L^2$ om. ऋचि अन्त्यत्वादित्यभिप्रायः

इन्द्राऽ२३४ । हाहो । एतयोरुदिन्द्रयोर्मध्ये **पूर्वकल्पश्च** प्रथमपक्षश्च अगतो गतिरहितो भवति । अस्य पक्षस्य अन्त्यस्तोभोऽगतो भवति । कुतः ? अस्य विकल्पेनान्त्यभावात् ॥ ८ ॥

अत्रेकाराभ्यासस्य विकल्पो न गतागतस्य ॥ ९ ॥

वि. **अत्र इकाराभ्यासो** भवन् विकल्पते । न गतागतः ॥ ९ ॥

भा. **अत्र** इकाराभ्यासो **विकल्पते** । न गतागतः ॥ ९ ॥

दी. **अत्र** पूर्वकल्पे इकारस्य योऽभ्यासस्तस्य **विकल्पः** । **न गतागतस्य** । न गतेरगतेः ॥ ९ ॥

मध्यमश्चागतः सत्वंन-उद्वावृषस्व-पुनानद्वितीयायां धर्दिप्रत्ययेऽयंपूषायाᳬसर्वासु ॥ १० ॥

वि. **मध्यमश्चागतः** स्तोभो भवति सत्वन्नादिषु ॥ १० ॥

भा. स्तोत्रीयायाः **मध्यमश्चागतः** स्तोभो भवति सत्वन्नादिषु । **पुनानद्वितीयायां धर्दिप्रत्यये अयंपूषायां** सर्वासु ॥ १० ॥

दी. **त्वामिद्धि** (ऊ. क्षु ८६६) इति **कण्वबृहति** मध्यमायां मध्यमः स्तोभोऽगतो भवति । **सात्वन्नश्चि । त्रावाजाऽ३हाऽ२३४ । हाहो** ॥ **त्वं ह्येहि** (ऊ. क्षु. ८६७) इति कण्वबृहति मध्यमः स्तोभोऽगतो भवति । **उद्वावार्षाऽ२३४ । हाहो** ॥ **पुनानस्सो** (ऊ. क्षु. ८७७) कण्वबृहति द्वितीयायां **धर्दिप्रत्यये** मध्यमः स्तोभोऽगतो भवति । **दुहानाऽ१ऊ२३४ हाहो । धार्दिवियम्** ॥ **अयं पूषायां** (ऊ. क्षु. ८७८) कण्वबृहति सर्वासु स्तोत्रीयासु मध्यमः स्तोभोऽगतो भवति । प्रथमायां **पाताइर्वाऽ१इश्वाऽ२३४ । हाहो** । द्वितीयायां **सोमासाऽ१ᳬ-क्राऽ२३४ । हाहो** । तृतीयायां **यᳬपाश्वाऽ१चाऽ२३४ । हाहो** ॥ १० ॥

पूर्वे जानत्रेऽन्त्यस्य स्तोभस्यागतिः ॥ ११ ॥

---

4. K भवति, S^{1-2} भवत् for भवन् ; A^{2} om. भवन्
5. A^{1} विकल्पः for विकल्पते
10. $A^{2}TS^{1}$ after सत्वन्नादिषु add: इत्यादि पाठत एव वक्तव्यम्
11. V^{2} adds: सर्वासु before स्तोत्रीयायाः; $B^{2}VA^{1}$ स्तोत्रीयाया for स्तोत्रीयायाः ; $PB^{4}L^{2}A^{1}$ om. स्तोभः; $B^{1}L^{2}A^{1}$ पुनानायां for पुनानद्वितीयायां

वि. जनित्राद्येऽन्त्यस्य स्तोभस्यागतिर्भवति **तंवोदस्मा**-(ऊ. ए. ५००)-**दिषु** ॥ ११ ॥

दी. **तंवोदाऽ३स्ममृतीषहाम्** । **हूवेऽहोऽ२इ** (ऊ. ए. ५००) **इति जनित्राद्ये अन्त्यस्य स्तोभस्य अगतिर्भवति** । **गीर्भाऽ३इहों** ॥ ११ ॥

यस्य द्वितेत्यत्रान्त्यस्यापि गतिः ॥ १२ ॥

वि. **योराजा**- (ऊ. स. ७१२) द्वितीयायां जनित्राद्ये **अन्त्यस्यापि** स्तोभस्य **गति**-र्भवति। **यस्य द्विता** **इत्यत्र** ॥ १२ ॥

दी. **यो राजाऽ३चर्षणाइनाम्** (ऊ. स. ७१२) इति **पूर्वे** जनित्रे द्वितीयायाम् **अन्त्यस्यापि** स्तोभस्य **गतिः** । **यस्याऽ३होइ** । **द्विताऽ३होइ** इति ॥ १२ ॥

वाभ्रे होइस्तोभस्योत्तरस्यागतिः ॥ १३ ॥

वि. **वाभ्रे उत्तरस्य होइस्तोभस्य अगतिर्भवति** । **सोमउष्वा**- (ऊ. द. ८७) दिषु ॥ १३ ॥

दी. **सोमउष्वाणस्सो** । **हाऽ३हाऽ३इ** (ऊ. द. ८७) **इति वाभ्रे उत्तरस्य होइस्तोभस्य** गतिर्न भवति । **अधाहोर२ऽइ** । **ष्णुभाइहोंऽ२** ॥ १३ ॥

अभिसोमाद्यायामाद्यः स्तोभः सगतिः प्राप्तो लुप्तगतिर्भवति ॥ १४ ॥

वि. **अभिसोमाद्यायां** वाभ्रे **आद्यः स्तोभः सगतिः** गत्या सह **प्राप्त** ऊहे **लुप्त-गतिर्भवति**। **पवाहोऽ२** ॥ १४ ॥

दी. **अभिसोमासआ** (ऊ. सं. २७८) इति वाभ्रे **आद्यायामाद्यः स्तोभः सगतिः** गत्या सह **प्राप्तः** ऊहे **लुप्तगतिर्भवति** । **पवाऽहोऽ२** । **तेमाहोऽ२** ॥ १४ ॥

---

1. $A^2TS^1A^1PL^2V^2B^4$ om. जनित्राद्ये....०दस्मादिषु

5. S^2 trans. अपि after स्तोभस्य

18. M^4 om. सगतिः

19. L^1 om. गत्या सह प्राप्त ऊहे; M^4 न गतिः अगत्या for गत्या

क्रौञ्चयोः पर्याकूपारे चागताः स्तोभाः ॥ १५ ॥

वि. पूर्वोत्तरयोः **क्रौश्चयोः परि त्यं हर्यतम्** (ग्रा. गे. १६. ८. ५५२. १) इति यस्य योनिः तस्मिन्नाकूपारे च सर्वे **स्तोभा अगताः** भवन्ति ॥ १५ ॥

भा. **क्रौश्चयोरयंपूषाद्यात्परयोः परि त्यं हर्यतँहरिम्** (ग्रा. गे. १६. ८. ५५२. १) इति यस्य योनिस्तस्मिन् **आकूपारे** । एतेषु सर्वे **स्तोभा अगता** भवन्ति ॥ १५ ॥

दी. **अयंपूषौहो** (ऊ. द. ५९०) **अयं पूषा** । **हो** (ऊ. अ. ४९) इत्यादि-**क्रौश्चयोः** **अगतो** गतिरहितः स्तोभो भवति । उदाहरणमुक्तम् । **पर्याकूपारे च** । **परि त्यं हर्यतँहरिम् पा॒ऽ२३४** । **रित्यंहौवोऽ५** (ग्रा. गे. १६. ८. ५५२ १) इति यस्य योनिस्तस्मिन्नाकूपारे **अगतः स्तोभो** भवति । **इन्द्राय सोमपातवे** । **इन्द्रायसौहोऽ५** । **मपातवाइ** (ऊ. अ. ५७१) ॥ १५ ॥

पुरोजितीत्यस्मिन् शब्दे गतिर्भवति ॥ १६ ॥

वि. एतेष्वेव **पुरोजितीत्यत्र गतिर्भवति** ॥ १६ ॥

भा. एतेष्वेव क्रौश्चादिषु **पुरोजितीत्यत्र** गतिः ॥ १६ ॥

दी. पुरोजित्यां **क्रौश्चयोः पर्याकूपारे च पुरोजितीत्यस्मिन् शब्दे गतिर्भवति** । क्रौश्चयोरुदाहरणम् । **पुरोजितौहोइ** (ऊ. अ. ६५५) **पुरोजिता** । **होइ** (ऊ. सं. २३१) **पर्याकूपारे च** । **पुरोजितीवोअन्धसः** । **पूऽ२३४** । **रोजितौहोऽ५इवोअन्धसाः** (ऊ. क्षु. ८५५) ॥ १६ ॥

---

1. $PV^2B^4B^1V^3V^1L^1M^4$ च गतः स्तोभः for चागता स्तोभाः A^2T परित्या॰ for पर्या; My^1A^2TK S^2 combine the sūtras 15 and 16 and read them as a single sūtra;
2. A^2 om. क्रौञ्चयोः
4. $PL^2B^2A^1$ after a break from पूर्वं जनित्रेऽ—(सू. 5. 5. 11) the commntary is available on this sūtra alone; P पूषाद्ययोः, B^4 पूषाद्यान्तयो, V^2 पूषाद्यन्त्ययोः for पूषाद्यात् परयोः B^4 अस्य for यस्य
7. My^4 क्रौञ्चोत्तरे for क्रौञ्चयोः; L^1 after उक्तम् adds: पर्याकूपारे च
12. TA^2S^{1-2} om. भवति

गतिमान् पूर्वः स्तोभः सौभरे सनोयुवा-तव त्यदिन्द्रियायां
सर्वासु तंवोदस्माद्यायां च ॥ १७ ॥

वि. & भा. एतेषु **पूर्वः स्तोभो गतिमान्** भवति ॥ १७ ॥

दी. **वायाऽ३मूऽ३ त्वामपूर्विंयोवा** (ऊ. द. १६) इति **सौभरे** द्वितीयायां **पूर्वः स्तोभो गतिमान्** भवति । **उपत्वाकर्मन्नूताऽ२याइसानाऽ२३ः** । **होइ** । **यूऽ२३-४वा** ॥ **तावाऽ३ त्याऽ३दिन्द्रियं बृहोवा** (ऊ. ए. ५१९) इति **सौभरे सर्वासु** स्तोत्रीयासु **पूर्वः स्तोभो गतिमान्** भवति । **तवदक्षमुतक्राऽ१तूंवाज्राऽ२३४म्** । **होइ** । द्वितीयायां **पृथिवीवर्धतिश्राऽ२वास्तुवाऽ२३४म्** । **होइ** । तृतीयायां **मित्रोगृणातिवरूऽ२णास्तुवा-ऽ२३म्** । **होइ** ॥ **तंवोऽ३दाऽ२स्मामृतीषाहोवा** (ऊ. प्रा. ८०३) इति **सौभरे** आद्यायां **वसोर्मन्दानमन्धसोऽभिवत्सन्नस्वसाऽ२राइषूधाऽ२३** । **होइ** ॥ १७ ॥

उत्तरस्त्वगतिमान् भद्रा इन्द्रस्य मदत्यनुमा देवत्रा
हव्यं प्रेमध्वराय ॥ १८ ॥

वि. एतेषु **उत्तरः** स्तोभस्त्**वगतिमान्** भवति ॥ १८ ॥

इति पुष्पसूत्रविवरणे प्रथमस्य पञ्चमः खण्डः ॥ ५ ॥

भा. एतेषु **उत्तरः अगतिमान्** भवति ॥ १८ ॥

इति पुष्पसूत्रभाष्ये प्रथमस्य पञ्चमी कण्डिका ॥ ५ ॥

दी. **अयाऽ३न्ताऽ३इवसूरियोवा** (ऊ. द. ३८८) इति सौभरे द्वितीयायाम्

---

3. PL[2]B[4]V[2] trans. एतेषु after भवति
11. AT[2] °गतो for °गतिमान्
13. A[3] अगतः for अगतिमान्; T स्तोभा अगता भवन्ति, S[1] स्तोभास्त्वगतिमन्तो भवन्ति for स्तोभस्त्वगतिमान् भवति
15. L[2]A[1]B[4] इति for भवति

उत्तरस्तु स्तोभोऽगतिमान् भवति । **भद्रा इन्द्र । स्यराऽ३ हाऽ३ ॥ तवाऽ३त्याऽ३दिन्द्रियं बृहोवा** (ऊ. ए. ५१९) इति सौभरे तृतीयायाम् उत्तरः स्तोभोऽगतिमान् भवति । **मदत्य । नुमाऽ३ हाऽ३ ॥ तंगूऽ३ धोऽ३ यासुवर्णरोवा** (ऊ. अ. ६३१) इति सौभरे प्रथमायां तृतीयायां चोत्तरः स्तोभोऽगतिमान् भवति । **देवत्राह । व्यमूऽ३ हाऽ३ ।** तृतीयायां **प्रेमध्वरा । यपूऽ३ हाऽ३** ॥ १८ ॥

इति फुल्लदीपे पञ्चमप्रपाठकस्य गतागते पञ्चमः खण्डः ॥ ५ ॥

षष्ठः खण्डः

अतः परमगतिमन्तः स्तोभा ये तान् वक्ष्यामो
व्यञ्जने प्रत्यये। स्वरे तु गतिर्भवति ॥ १ ॥

वि. **अतः परं** गतिरहिता ये **स्तोभाः तान्** कथयिष्यामः **व्यञ्जने प्रत्यये** । स्तोभस्य **स्वरे** प्रत्यये तु गतिरेव भवति विरामे विषये ॥ १ ॥

भा. स्वरे तु प्रत्यये गतिर्भवति । उदाहरणानि यथा वाजजिति– **वृषोऽ२होइ अचाऽ२इहोऽ३इ** (ऊ. द. १०४) ॥ १ ॥

दी. **अतः परम्** अग्रे **अगतिमन्तः स्तोभाः** गतिरहिता **ये** स्तोभाः **तान् वक्ष्यामः** कथयिष्यामः । ककरादिव्यञ्जने प्रत्यये परे सति वक्ष्यमाणेषु सामसु । स्तोभस्याकारादिस्वरे प्रत्यये तु गतिर्भवति विरामे ॥ १ ॥

---

8. A^2T अगता for अगतिमन्तः

10. T व्यञ्जने प्रत्यये एतान् वक्ष्यामः । व्यञ्जने प्रत्यये स्वरे तु गतिर्भवति स्वप्रतिहारे वसुशब्दस्य विकल्पो न त्वगतिः A^2S^1 स्वप्रतिहारे वसुशब्दस्य विकल्पो न त्वगतिः for अतः परं . विरामे विषये

11. KMy^1 विराम° for विरामे

12. B^4 om. यथा वाजजिति; L^2PA^1 om. वाजजिति; A^1 तथा for यथा

15. L^1 om. परे...प्रत्यये.

शाक्त्ये प्रथमायां सर्वे ॥ २ ॥

वि. **शाक्त्ये प्रथमायां** स्तोत्रीयायां सर्वे स्तोभा अगता भवन्ति ॥ २ ॥

दी. प्रवइन्द्राऽ२ (ऊ. द. १९) इति **शाक्त्ये प्रथमायां सर्वे** स्तोभा अगता भवन्ति । प्रवाऽ२इन्द्रा । औऽ३हो । हराऽ२ अश्वा । औऽ३हो । सखाऽ२यास्तो । औऽ३होऽ३ ॥ २ ॥

उत्तरयोश्चकृमासत्य-त्वꣳहिरण्ययुश्च ॥ ३ ॥

वि. एतौ स्तोभावगतौ भवतः ॥ ३ ॥

भा. **उत्तरयोश्चकृमासत्यत्वꣳहिरण्ययुश्चा**गतौ ॥ ३ ॥

दी. **पव इन्द्राऽ३** (ऊ. द. १९) इति शाक्त्ये **उत्तरयोः** स्तोत्रीययोः अगतः स्तोभो भवति । **चकृमा** । **त्वꣳहिर** इत्यत्र **चकृऽ२मासा** । **औऽ३-होऽ३** । तृतीयायां **तुवाऽ२ꣳहिरा** । **औऽ३होऽ३** ॥ ३ ॥

कक्षे सर्वे ॥ ४ ॥

वि. **श्रौतकक्षे सर्वे** स्तोभा अगता भवन्ति ॥ ४ ॥

भा. अगता भवन्ति ॥ ४ ॥

दी. **इन्द्राय मद्वनेसुतं** (ऊ. द. २१) इत्यादि **श्रौतकक्षे सर्वे** स्तोभा अगता भवन्ति। **परिष्टो** । **भाऽ२३** । **हाऽ३ हाऽ३** ॥ **आर्कमर्चाऽ३** । **हाऽ३हा** । द्वितीयायां **रणन्ति** । **साऽ२३** । **हाऽ३ हाऽ३** ॥ तृतीयायां **देघासः** । **याऽ२३** । **हाऽ३हाऽ३** । **तामिद्वर्धाऽ३** । **हाऽ३हा** । इति ॥ ४ ॥

---

1. V[1] PL[2] A[1]B[2]B[1] treat this and the following sūtras as a single one and om. the commentary on. शाक्त्ये...सर्वे; M[4] L[1]My[3] also combine these two sūtras, but explain them separately.
2. A[2] TS[1] om शाक्त्ये....भवन्ति ;
8. P. उदाहरणानि यथा राजन्निति वृषोऽऽहो ३२ अवायिहोयि२ । गतौ for उत्तरयोः...चागतौ ; V[2] om उत्तरयो...चागतौ
11. L[1] द्वितीयायां for तृतीयायां

नेन्द्र॰सुत इन्द्रं गीर्भिराघागमान्नियमते ॥ ५ ॥

वि. न-कारः प्रतिषेधे । एते स्तोभा अगता [न] भवन्ति ॥ ५ ॥

भा. एतेषु गतिर्भवति ॥ ५ ॥

दी. **इन्द्रायमद्वने** (ऊ. द. २१) इति **श्रौतकक्षे इन्द्र॰सुते** ॥ **पन्यं पन्यम्** (ऊ. अ. ५३३) इति **श्रौतकक्षे इन्द्रंगीर्भिः** । **आ-घा-गमत्** । **नि-यमते** । एतेषु अगता स्तोभा **न** भवन्ति । गतिर्भवतीत्यर्थः ॥ **आ इन्द्र॰सुतेऽ३** । **हाऽ३ हाइ** ॥ **पन्यंपन्य-मिति श्रौतकक्षे आइन्द्रं गीर्भाऽ३इः** । **हाऽ३ हाइ** । **आघाग** । **माऽ२३त्** । **हाऽ३हाऽ३इ** । **नाइयमताऽ३इ** । **हाऽ३ हाइ** ॥ ५ ॥

घृतनिधनेऽन्त्यः सर्वासु ॥ ६ ॥

वि. **घृतनिधने सर्वासु** स्तोत्रीयासु **अन्त्यः** स्तोभोऽगतो भवति ॥ ६ ॥

दी. **इदं ह्यनूऽ३ओजसा** (ऊ. द. २७) इत्यादि **घृतश्चुन्निधने सर्वासु** स्तोत्रीयासु **अन्त्यः** स्तोभोऽगतो भवति । **पीबातूवौ** । **होवाऽ३हा** । द्वितीयायां **सत्वाममौ** । **होवा३ऽहा** । तृतीयायां **प्रावाहूशौ** । **होवाऽ३हा** । इति ॥ ६ ॥

मधुनिधनेऽन्त्यवर्जम् ॥ ७ ॥

वि. **मधुश्चुन्निधने** सर्वासु स्तोत्रीयासु अन्त्यस्तोभं विना अन्ये स्तोभा अगता भवन्तीत्यर्थः ॥ ७ ॥

दी. **सोमाऽपवन्त इन्दवाऽ३ए** (ऊ. द. ११५) इत्यादि **मधुश्चुन्निधने** अन्त्य-

---

2. S[1] अनगता : S[2] अगतिमन्तो, My गतिमन्तो for अगताः ; KA ०षेधः for ०षेधे

3. After भवति । P adds: हरिश्रीनिधने सर्वा गतिर्भवति and V[2]. सर्वा गतिर्भवति

6. L[1] om पन्यं....कक्षे

10. T. om. घृतनिधने सर्वासु ; PL[2] A[1] V[2] B[4] om. commentary hereafter upto the end of this khaṇḍa.; T. om. अन्त्यः स्तोभः ; T. अगता भवन्ति for अगतो भवति

15. A[2] TS[1] मधुनिधने for मधुश्चुन्निधने ; T after निधने adds: अन्ते स्तोभा; A[2] ०स्तोभौ, T ०स्तोभेन for ०स्तोभं ; T अनेके, T सर्वे for अन्ये

स्तोभवर्जे सर्वे स्तोभा अगता भवन्ति । हाऽ३हा । एवं सर्वासु स्तोत्रीयासु । अन्त्ये तु हाऽ३हाइ । एवम् ॥ ७ ॥

दैवोदाक्षारयोः ॥ ८ ॥

वि. **दैवोदासे आक्षारे** च सर्वे स्तोभा अगता भवन्ति ॥ ८ ॥

दी. **प्राऽ४सुन्वाना । हो** (ऊ. अ. ६२७) इति **दैवोदासे । पव । तेहाऽ२३४ । औहोऽ५र्यतोहराइः** (ऊ. द. ३६) इति **आक्षारे** । अगतिमान् स्तोभो भवति । उदाहरण-मुक्तम् ॥ ८ ॥

यौक्तयोः स्वधाप्रत्यये ॥ ९ ॥

वि. **यौक्तयोः स्वाधाप्रत्यये** परतः अगतो भवति ॥ ९ ॥

दी. **औहोहोहा । इवृषा** (ऊ. द. ३९) इति **पूर्वयौक्ताश्वे । वृषा औहोहोहोहाइ** (ऊ. सं. २४४) **इत्युत्तरयौक्ताश्वे** च **स्वधाशब्दे प्रत्यये** स्तोभस्यागतिर्भवति ॥ **वृषापवस्वेति** इति यौक्ताश्वयोस्तृतीयायाम् **ओ । स्वधाऽ२३ । स्वधाऽ२ राऽ२३४या ॥ स्वधाऽ३ओ । स्वाधाऽ२रा२३४या** ॥ ९ ॥

माधुच्छन्दस उपस्वसरं त्वया भूषन्ति । सुषावसो । पुनानस्सो ॥ १० ॥

वि. **माधुच्छन्दसे** एते स्तोभा अगता भवन्ति ॥ १० ॥

दी. माधुच्छन्दस **उपस्वसरं त्वया भूषन्ति** ॥ **त्वामिदा । होइ** (ऊ. द. ४४) इति माधुच्छन्दसे **उपस्वसा । हो । त्वयाभूषा । हो** अत्र चागतिः ॥ १० ॥

---

9. A² T om. यौक्तयोः स्वधाप्रत्यये; S². after यौक्तयोः adds: सान्तोः

16. T. एतेषु for एते

17. फुल्लदीप split this sūtra into three as: (1) माधुच्छन्दस उपस्वसरं त्वया भूषन्ति ॥ (2) सुषावसो ॥ and (3) पुनानस्सो ॥ and comments them separately. But in the **vivaraṇa** they are treated as a single sutra only.

18. M⁴ तु for च

सुषाव्सो ॥ ११ ॥

दी. **परीतोषा**। **होइ** (ऊ. सं. २४५) इति माधुच्छन्दसे **सुषावासो**। **औहोऽ२३४वाहा**। अत्रागतिः ॥ ११ ॥

पुनानस्सो ॥ १२ ॥

दी. **पुनानस्सो** (ऊ. स. ७३८) इति माधुच्छन्दसे **पुनानस्सो**। **हो**। अत्रागतिः ॥ १२ ॥

क्षुष्टम्भे स्वादिष्ठाद्ययोरन्त्यः ॥ १३ ॥

वि. **क्षुल्लकवैष्टम्भे स्वादिष्ठायामाद्ययोः** स्तोत्रीययोः **अन्त्यः** स्तोभोऽगतो भवति ॥

दी. **स्वादाऽ५इष्ठा** (ऊ. सं. ३२२) इति **क्षुल्लकवैष्टम्भे** आद्ययोः स्तोत्रीययोः अन्त्यः स्तोभोऽगतिमान् भवति। **इन्द्रायाऽ१ पाऽ२३**। **होवाऽ३हा**। द्वितीयायां **द्रोणेसा-ऽ१धाऽ२३**। **होवाऽ३वा** ॥ १३ ॥

मद्रे प्रत्नम् ॥ १४ ॥

वि. **पौरुमद्रे** एष स्तोभोऽगतो भवति ॥ १४ ॥

दी. **पुनानस्सोमधारया**। **औहोवा** (ऊ. अ. ६६२) इति **पौरुमद्रे** द्वितीयायां **प्रत्नाम्**। **साधौवाओऽ२३४वा**। **हाऽ३हा**। अत्रागतिः ॥ १४ ॥

गौतमेऽन्त्यः ॥ १५ ॥

वि. **गौतमे** सर्वासु स्तोत्रीयासु **अन्त्यः** स्तोभोऽगतो भवति ॥ १५ ॥

दी. **हाउभिसोमासआयवोहाउ** (ऊ. द. ५५) इति **उभयतस्तोभे गौतमे** प्रथमाया**मन्त्यः** स्तोभोऽगतिमान् भवति। **मात्सरासाऽ३४ः**। **हाहोऽ३** ॥ १५ ॥

वैष्टम्भे वयमन्त्यः सर्वासु ॥ १६ ॥

---

8. A² T. अन्त्यस्तोभावगतौ भवतः for अन्त्यः स्तोभोऽगतो भवति

14. M⁴ om. पुनानः... प्रत्नाम्

वि. वयंघत्वा- (ऊ. द. ५८) वैष्टम्भे सर्वासु स्तोत्रीयासु अन्त्यः स्तोभः अगतो भवति । अस्मिन्नेव साम्नि अगतान् स्तोभानुदाहरन्ति ॥ १६ ॥

दी. वयंघत्वोहाइ (ऊ. द. ५८) इति वैष्टम्भे सर्वासु स्तोत्रीयासु अन्त्यः स्तोमोऽगतिमान् भवति । पराइस्तोऽ१ताऽ२३ । होवाऽ३हा । द्वितीयायाम् इन्द्रास्वाऽ१-ब्दीऽ२३ । होवाऽ३हा । तृतीयायां मक्षूगोऽ१माऽ२३ । होवाऽ३हा । इत्यादि ॥ १६ ॥

कण्वेभिः ॥ १७ ॥

---

1. S[7] त्वायां महावैष्टम्भे for त्वा वैष्टम्भे; T अन्त्यस्तोभा अगताः भवन्ति for अन्त्यः.... भवति

5. L[1] om. इत्यादि

6. KA[2] TS[1-2] read sūtras कण्वेभिः ॥ 17 ॥ to देवान्....सहस्रधा ॥ 21 ॥ continuously and add at the end a brief note: एते स्तोभाः सर्वत्र अगता भवन्ति. It may be noted in this connection that on majority of sūtras of this and the following khaṇḍas, which treat गतागत, no bhāṣya of Ajātashatru is available. His vivaraṇa, however, groups such sūtras that speak of rules binding the gaṇas identical in names, and adds a brief note at the end of each group of sūtras so grouped. It must be mentiond here that the ganas referred to in these sūtras belong to far removed different Parvans of books of Sāmagānas and are originated on yonis,—basic verses or primary gānas–, altogether different. Hence they differ with each other in formation and structure. Therefore, these names are homonymic designating different gānas in different sūtras.

The MSs M[1-2], however, add a summary in the beginning introducing the contents of the whole prapāṭhaka in a nut-shell,—vide foot-note under कण्वबृहत्या (5.5.7)—, and then left the sūtras altogether un-explained for obvious reason that they are too plain to be explained, प्रपाठकत्वेनैव व्याख्यातम्. In his vivaraṇa Ajātashatru, therefore, after plugging together several sūtras that are bound by a common rule applicable to the gānas of identical nomenclatures, but different in from and substance, gave only a brief note and no interpretation. It is admittedly wrong on this account to treat the sūtras dealing with gānas of different kind

दी. कण्वेभिर्धोहा (ऊ. द. ५८) अत्रागतिः ॥ १७ ॥

प्रत्नꣳसध-स्तोत्रीयान्ते ॥ १८ ॥

दी. पुनानस्सोहाइ (ऊ. ए. ३८६) इति वैष्टम्भे द्वितीयायां स्तोत्रीयान्ते प्रत्नासाऽधाऽ२३ । होवाऽ३हा । अत्रागतिः ॥ १८ ॥

नजातमवि-श्वाशवि-स्तोत्रीयान्ते ॥ १९ ॥

दी. यद्याव ओहाइ (ऊ. क्षु. ८६८) इति वैष्टम्भे नजाताऽ१माऽ२३ । होवाऽ३हा । द्वितीयायां विश्वाशाऽ१ वाऽ२३ । होवाऽ३हा । अत्रागतिः ॥ १९ ॥

यदिन्द्राय नपापत्वा ॥ २० ॥

दी. वैष्टम्भे यदिन्द्रयोहा (ऊ. क्षु. ८६९) अत्रागतिः । स्तोत्रीयान्ते च । नपापाऽ१त्वाऽ२३ । होवाऽ२ह । नपापत्वोहा । अत्रागतिः ॥ २० ॥

देवान् गच्छेन्दुरिन्द्राय-विश्वस्येशा-सहस्रधा ॥ २१ ॥

वि. (सू. कण्वेभिः । प्रत्नं सधस्तोत्रीयान्ते । न जातमविश्वाशविस्तोत्रीयान्ते । यदिन्द्रायनपापत्वा । देवानूगच्छेन्दुरिन्द्राय विश्वस्येशा सहस्रधा ॥) एते स्तोभाः सर्वत्र न गता भवन्ति ॥ २१ ॥

दी. सुतासोमोहाइ (ऊ. क्षु. ८८०) इति वैष्टम्भे देवानूगाऽ१च्छाऽ२३ होवाऽ३हा । अत्रागतिः । इन्दुरिन्द्रोहा । अत्रागतिः । विश्वास्येऽ१ शाऽ२३ । होवाऽ३हा । अत्रागतिः । सहस्रधोहा । अत्रागतिः ॥ २१ ॥

वाचस्साम्न्यासो प्रियं देवाय ॥ २२ ॥

---

as a single sutra. Only the Phulladipa of Diksita is systematic in this respect. It comments each sūtra individually and separately.

14. T. एतेषु for एते ; A[2] TS[1] om. स्तोभाः; A[2] TS[1] अगताः for न गताः ; My[1] om. सर्वत्र

दी. वाचःसाम्नि आसोतापा। हो (ऊ. सं. २५९) अत्रागतिः। प्रियंदेवा। हो। अत्रागतिः॥ २२॥

विकोशम्॥ २३॥

वि. (सू. वाचस्साम्न्यासो प्रियं देवाय। विकोशम्॥) वाचस्साम्नि एते स्तोभा अगता भवन्ति॥ २३॥

दी. अभिद्युम्नाम् (ऊ. अ. ५६६) इति वाचस्साम्नि विकोशंमा। हो। अत्रागतिः॥ २३॥

हारिवर्णे उलोकक्रुमन्दानः॥ २४॥

वि. इत्येतौ स्तोभावगतौ भवतः॥ २४॥

दी. तन्तेमदाऽ२मृगृणीमसाइ (ऊ. द. ६६) इति हारिवण उलोकाऽ३क्रुऽ३। होवाऽ३हा। अत्रागतिः। द्वितीयायां मन्दानोऽ३आऽ२३। होवाऽ३हा॥ २४॥

तैरश्च्ये प्रत्नामृतस्य॥ २५॥

वि. एष स्तोभोऽगतो भवति॥ २५॥

दी. श्रुधीहाऽ३वन्तिरश्चियाः (ऊ. द. ६७) इति तैरश्च्ये द्वितीयायां प्रत्नामर्ताऽ३। हाऽ२हा। अत्रागतिः॥ २५॥

आभीशवे पुरूणि-घृणा॥ २६॥

दी. तग्राहँसोमरारणए। ए। (ऊ. द. ७०) इति आभीशवे पूऽ२३४रू। हाऽ३हा। अत्रागतिः। तृतीयायां घाऽ३४र्णा। हाऽ३हा। अत्रागतिः॥ २६॥

श्रीणन्तः॥ २७॥

दी. परीतोषिश्चतासुतम्। ए। ए (ऊ. सं. २६६) इत्याभीशवे तृतीयायां

---

12. A² TT¹ तैरश्चे for तैरश्च्ये

13. A² after स्तोभः adds :- तु

16. KA² TS¹ S² combine sutras 26, 27 and 28 and treat them as a single sutra.

आऽ२३४इणा । हाऽ३हा । अत्रागतिः । आद्यामीशवे त्वेवम् ॥ २७ ॥

समुद्रस्य ॥ २८ ॥

वि. (सू. आमीशवे पुरूणि घृणा ॥ श्रीणन्तः ॥ समुद्रस्य ॥) **आमीशवे** एते स्तोभा अगता भवन्ति ॥ २८ ॥

दी. अभिसोमासआयवए । ए । (ऊ. अ. ६३५) इति आमीशवे साऽ२-३४मू । हाऽ३हा । अत्रागतिः ॥ २८ ॥

पुनानायामाद्यः सर्वासु ॥ २९ ॥

वि. **पुनानायां** तु **सर्वासु** स्तोत्रीयासु **आद्यः** स्तोभोऽगतो भवति ॥ २९ ॥

दी. पुनानस्सोमधारया ए । ए (ऊ. अ. ५९६) इत्यामीशवे **सर्वासु** स्तोत्रीयासु आद्यः स्तोभोऽगतिमान् भवति । आऽ२३४रा । हाऽ३हा । द्वितीयायां दूऽ२३४हा । हाऽ३हा । तृतीयायां आऽ२३४ पा । हाऽ३हा ॥ २९ ॥

स्वःपृष्ठे सर्वे ॥ ३० ॥

वि. **स्वःपृष्ठे सर्वे** स्तोभा अगता भवन्ति ॥ ३० ॥

दी. तवाऽ२हँसोऽ३४ (ऊ. द. ७१) इति **स्वःपृष्ठे सर्वे** स्तोभा अगता भवन्ति । ओनिचरा । ओ ॥ क्तमुतसो । ओ ॥ न्तमतिद्ध । ओ ॥ ३० ॥

नाभिसोमाध्यास्यायां विचे प्रत्यये ॥ ३१ ॥

वि. **न**-कारः प्रतिषेधे । **अभिसोमाध्यास्यायां विचे प्रत्यये** परतः गतिर्भवति ॥

दी. प्रहाऽ२इन्वानाऽ३४ः (ऊ. अ. ६३६) इति **स्वःपृष्ठे विचे प्रत्यये परे** सति अगतिर्न भवति । गतिर्भवतीत्यर्थः । **णोहर्यताः** । **ओइ** ॥ ३१ ॥

---

1. L[1] च for तु.

3. A[2]TS[1] S[2] om. आमीशवे.

8. T. om. पुनानायां तु सर्वासु

17. A[2] T न for नकारः; KS[1] S[2] My[1] om. प्रत्यये

18. M[4]. before प्रहाऽ adds : अभिसोमायाम् अध्यास्यायां

पृश्निनि ज्येष्ठंय-इन्द्रं तँ१शु-हस्तेन ॥ ३२ ।

दी. यो राजाऽ२३चर्षणीन१हाउ (ऊ. द. ७४) इति पृश्निनि ज्येष्ठायोऽ१-बाऽ२३ । होवाऽ३हा । अत्रागतिः । द्वितीयायाम् इन्द्रान्ताऽ११शूऽ२३ । होवाऽ३हा । अत्रागतिः । तृतीयायां हस्ताइनाऽ१ वाऽ२३ । होवाऽ३हा । अत्रागतिः ॥ ३२ ॥

सुषादब्धःसु ॥ ३३ ॥

दी. पराइतोऽ२३षिंचतासुता१हाउ (ऊ. अ. ५७९) इति पृश्निनि सुषावाऽ१ सोऽ२३ । होवाऽ३हा । अत्रागतिः । द्वितीयायाम् अदाब्धाऽ१स्सूऽ२३ । होवाऽ३हा । अत्रागतिः ॥ ३३ ॥

घृणा ॥ ३४ ॥

दी. दुहानोऽ२३ बभ्रऊधनिहाउ (ऊ. सं. ३३३) इति पृश्निनि घृणाताऽ१ पाऽ२३ । होवाऽ३हा । अत्रागतिः ॥ ३४ ॥

प्रत्नम् ॥ ३५ ॥

दी. पुनानाऽ२३स्सोमधारया हाउ (ऊ. अ. ५९५) इति पृश्निनि । द्वितीयायां प्रत्ना१साऽ१धाऽ२३ । होवाऽ३हा । अत्रागतिः ॥ ३५ ॥

पुरूणि ॥ ३६ ॥

वि. (सू. पृश्निनि ज्येष्ठं य इन्द्रं तँशुहस्तेन ॥ सुषादब्धस्सु ॥ घृणा ॥ प्रत्नम् ॥ पुरूणि ॥) पृश्निनि एते स्तोभा अगता भवन्ति ॥ ३६ ॥

दी. तवाहाऽ२३१सोमरारण हाउ (ऊ. सं. ७३९) इति पृश्निनि पुरूणाऽ-१इवाऽ२३ । होवाऽ३हा । अत्रागतिः ॥ ३६ ॥

---

1. KA[2] TS[1] S[2] take the sutras 32, 33, 34, 35 and 36 for a single sūtra and treat them accordingly.

17. T पृश्निज्येष्ठमित्यादीनामुत्तरा for पृश्निनि एते; S[2] before पृश्निनि adds: भद्राजस्य A[2] om. स्तोभा अगता भवन्ति

आतीषादीये सर्वे ॥ ३७ ॥

वि. **आतीषादीये** सर्वे स्तोभा अगता भवन्ति ॥ ३७ ॥

दी. **सोमᳲपूना । हो ।** (ऊ. द. ७७) इत्यातीषादीये सर्वे स्तोभा अगता भवन्ति । **धीभिमृजा । हो । असर्जिका । हो ।** अत्रागतिः ॥ ३७ ॥

रन्ध्रयोश्च सर्वे ॥ ३८ ॥

वि. **औक्ष्णोरन्ध्रयोश्च** सर्वे स्तोभाः अगता भवन्ति ॥ ३८ ॥

दी. **मृज्यमानाः** (ऊ. द. १०२) इति **प्रथमौक्ष्णोरन्ध्रे** **मृज्यमानस्सुहस्त्या** (ऊ. द. १०३) इति **द्वितीयौक्ष्णोरन्ध्रे** च सर्वे स्तोभा अगता भवन्ति । **प्रथमौक्ष्णोरन्ध्रे** **पवमा । ना । औऽ३हो ।** द्वितीयायां **वृषोअ । चा । औऽ३हो ।** तृतीयायां **गोभिरा । जा । औऽ३हो ॥**

द्वितीयौक्ष्णोरध्रे रयिं पिशाऽ३ । हाऽ३हा ॥ पवमाना३ । हाऽ३हा । द्वितीयायां **पूनानोवाऽ३ । हाऽ३हा ।** तृतीयायां **दाइत्वानाᳲसोऽ३ । हाऽ३हा । गोभाइरञ्जाऽ३ । हाऽ३हा** ॥ ३८ ॥

नोत्तरे वृषो अचि ॥ ३९ ॥

वि. न-कारः प्रतिषेधे । अनयोरुत्तरे साम्नि **वृषोअचिक्रदद्वन** इत्येष स्तोभो गतिमान् भवतीत्युक्तं भवति ॥ ३९ ॥

दी. उत्तरे औक्ष्णोरन्ध्रे **वार्षो अचाऽ३इ । हाऽ३हाइ** (ऊ. द. १०३) । अत्रागतिर्न भवति । गतिमान् स्तोभो भवतीत्यर्थः ॥ ३९ ॥

वाजजिति सर्वे ॥ ४० ॥

---

2. A² TS¹ S¹⁻² om. आतीषादीये
6. T. after भवन्ति adds : प्रतिषेधोक्तं भवति
15. KA² S¹ My¹ ०षेधः for ०षेधे; T om. नकारः प्रतिषेधे ; KS¹⁻³ उत्तर० for उत्तरे
16. A² S² My¹ om. इत्युक्तं भवति

वि. वाजजिति **सर्वे** स्तोभा अगता भवन्ति ॥ ४० ॥

दी. **मृज्यमानस्सुहा** (ऊ. द. १०४) इति वाजजिति औक्ष्णोरन्ध्रे सर्वे स्तोभा अगता भवन्ति । **समूऽ२हो** । **द्रेवाऽ२हो** । **पिशाऽ२हो** । **पवाऽ३हो** । **मानाऽ२हो** । द्वितीयायां **पत्राऽ२हो** । **मानाऽ२हो** । **पुनाऽ२हो** । **नोवाऽ२हो** । तृतीयायां **देवाऽ३हो** । **नाऽसोऽ२हो** । **अज्ञाऽ२हो** ॥ ४० ॥

न रयिमचिक्र ॥ ४१ ॥

वि. न प्रतिषेधे । **रयिमचक्र** इत्येतौ स्तोभौ गतिमन्तौ भवतः ॥ २४ ॥

दी. **मृज्यमानः** (ऊ. द. १०४) इति वाजजिति औक्ष्णोरन्ध्रे **रयाऽ२इँहोइ** । अत्रागतिमान् स्तोभो न भवति । **वृषोऽ२होइ** । अत्र तु स्वरे परे गतिर्भवति । **अचाऽ२इ** । **होइ** । अत्रागतिमान् स्तोभो न भवति । गतिमान् भवतीत्यर्थः । **गोभाऽ२इहोंइ** । अत्रापि स्वरे परे गतिर्भवति ॥ ४१ ॥

वरुणसाम्नि नर्योप्सुमदा ॥ ४२ ॥

दी. **परीतोषिञ्चतासुतोवा** । **ओवा** । (ऊ. ए. ४८२) इति **वरुणसाम्नि नर्योअ।प्सुवाऽ२३हा** । अत्रागतिः । द्वितीयायां **पराऽ२३हाइ** । अत्र योनिवद्भावः । तृतीयायाम् **अप्सुमदा** । **मोआऽ२३हा** ॥ ४२ ॥

1: A[2] S[1-2] My[1] om. वाजजिति

2. वाजजिति औक्ष्णोरन्ध्रे. The फुल्लदीप seems to have taken वाजजित् as a form of औक्ष्णोरन्ध्र by mistake even though the Ṛṣi of वाजजित् is प्रजापति and not औक्ष्णोरन्ध्र. It brings down औक्ष्णोरन्ध्र from the previous sūtra and takes वाजजिति as its adjective. The examples cited, however, are all from the melody of वाजजित्. Therefore, वाजजित् based on मृज्यमानः (सा. 1079-80) appcars to have wrongly been known as वाजजित् औक्ष्णोरन्ध्र in some sāman tradition.

7. S[2] नकारः for न

6 & 7. TK रहम् for रयिम्.

12. KA[2] TS[2] s. treat sutras 41 and 42 as a single one.

धरुणम् ॥ ४३ ॥

वि. (द्व. वरुणसाम्नि नर्योप्सुमदा ॥ धरुणम् ॥) आस्मिन् साम्नि एते स्तोभा अगता भवन्ति ॥ ४२–४३ ॥

दी. **पुनानस्सोमधारयोवा** (ऊ. ए. ५१४) इति **वरुणसाम्नि** तृतीयायां **धरुणं वा । जिया ऽ२३ हा ।** अत्रागतिः ॥ ४३ ॥

वन्तीय इन्द्रे सन्तु ॥ ४४ ॥

दी. **रेवतीर्नाओहोहाइ** (ऊ. द. १०८) इति **वारवन्तीये** **इन्द्राइसाऽ२३४-हा ।** अत्रागतिः ॥ ४४ ॥

देदिशतीरनाधृष्टाभिः ॥ ४५ ॥

दी. **उपत्वाजाओहोहाइ** (ऊ. ए. ४२७) इति वारवन्तीये **देदाइशाऽ२३४-हा ।** अत्रागतिः । तृतीयायाम् **अनाधाऽ२३४हा ।** अत्रागतिः ॥ ४५ ॥

मधु ॥ ४६ ॥

दी. **परिसुवाओहोहाइ** (. ए. ४५८) इति वारवन्तीये द्वितीयायां **मधूप्राऽ-२३४हा ।** अत्रागतिः ॥ ४६ ॥

पर्षि ॥ ४७ ॥

दी. **तुवन्नश्वाओहोहाइ** (ऊ. ए. ४८०) इति वारवन्तीये द्वितीयायां **पर्षाइतो-ऽ२३४हा ।** अत्रागतिः ॥ ४७ ॥

पृथुप्रगामा ॥ ४८ ॥

दी. **अश्वन्नत्वाओहोहाइ** (ऊ. ए. ४९१) इति वारवन्तीये द्वितीयायां **पृथूप्राऽ-२३४हा ।** अत्रागतिः ॥ ४८ ॥

---

6. KA[2] TS[1-2] combine sutras 44–61. & treat them all as a single sutra.
8. M[4] om. अत्रागतिः

ऊर्जोन-भुवद्दा ॥ ४९ ॥

दी. यज्ञायज्ञाऔहोहाइ (ऊ. ए. ५०६) इति वारवन्तीये द्वितीयायाम् **ऊर्जोनाऽ२३४हा**। तृतीयायां **भुवाद्वाऽ२३४हा**। अत्रागतिः ॥ ४९ ॥

दक्षंदध ॥ ५० ॥

दी. एहियूषाऔहोहाइ (ऊ. ए. ५०७) इति वारवन्तीये द्वितीयायां **दक्षान्दाऽ२३४हा**। अत्रागतिः ॥ ५० ॥

अनुष्टु ॥ ५१ ॥

दी. तन्तेमदाऔहोहाइ (ऊ. ए. ५०८) इति वारवन्तीये तृतीयायाम् **अनूष्टूऽ२३४हा**। अत्रागतिः ॥ ५१ ॥

इमौ[भ-] मध्यआ ॥ ५२ ॥

दी. साऔहोहाइ (ऊ. ए. ५२८) इति वारवन्तीये द्वितीयायाम् [**इमौभाऽ२३४हा**। तृतीयायां] **मध्याऽ२३४हा**। अत्रागतिः ॥ ५२ ॥

विष्णुर्गो-यतोव्रतानि ॥ ५३ ॥

दी. इदंविष्णाऔहोहाइ (ऊ. आ. ५३९) इति वारवन्तीये द्वितीयायां **विष्णुर्गोऽ२३४हा**। आलागतिः। तृतीयायां **यतोव्राऽ२३४हा**। अत्रागतिः ॥ ५३ ॥

हिन्वन्नृताभक्तयत् ॥ ५४ ॥

दी. प्राणाशिशाऔहोहाइ (ऊ. अ. ६००) इति वारवन्तीये **हिन्वानाऽ२३४हा**। अलागतिः। द्वितीयायाम् **अभाक्ताऽ२३४हा**। अत्रागतिः ॥ ५४ ॥

सयोजते ॥ ५५ ॥

दी. एनावोऔहाहाइ। (ऊ. प्रा. ८२७) इति वारवन्तीये द्वितीयायां **सायोजाऽ२३४हा**। अत्रागतिः ॥ ५५ ॥

उदुस्रिया ॥ ५६ ॥

दी. **प्रत्युवदाऔहोहाइ** (ऊ. प्रा. ८२८) इति वारवन्तीयें द्वितीयायाम् **उदूस्रीऽ२३४हा** । अत्रागतिः ॥ ५६ ॥

अर्वाग्रथम् ॥ ५७ ॥

दी. **इमाउवाऔहोहाइ** (ऊ. प्रा. ८२९) इति वारवन्तीये तृतीयायाम् **अर्वाग्राऽ-२३४हा** । अत्रागतिः ॥ ५७ ॥

सजूः ॥ ५८ ॥

दी. **अग्नेविवाऔहोहाइ** (ऊ. प्रा. ८३६) इति वारवन्तीये तृतीयायां **सजूरा-ऽ२३४हा** । अत्रागतिः ॥ ५८ ॥

अश्वायन्तो ॥ ५९ ॥

दी. **अभित्वाशाऔहोहाइ** (ऊ.क्षु. ८६१) इति वारवन्तीये तृतीयायाम् **अश्वायाऽ-२३४हा** । अत्रागतिः ॥ ५९ ॥

नागोरयिर्माशर्धा ॥ ६० ॥

दी. **रेवाऽ३इन्द्राऔहोहाई** (ऊ. क्षु. ८७४) इति वारवन्तीये द्वितीयायां **नागोराऽ२३४हा** । अत्रागतिः । तृतीयायां **माशार्धाऽ२३४हा** । अत्रागतिः ॥ ६० ॥

परिष्कृण्वन्ति ॥ ६१ ॥

वि. (सू. **वन्तीय इन्द्रे सन्तु**'.... **परिष्कृण्वन्ति** ॥ ४३–६० ॥) वारवन्तीयेषु एते स्तोभा अगता भवन्ति ॥ ६१ ॥

दी. **इन्द्रायेन्दाऔहोहाइ** (अ. क्षु. ८८५) इति वारवन्तीये द्वितीयायां **पराइष्काऽ२३४हा** । अत्रागतिः ॥ ६१ ॥

---

17. T. वारवन्तीयेषु for वारवन्तीये
19. M[4] इन्द्रायोदा for इन्द्रायेन्दा

गूर्दपूर्वयोर्हुम्मा ॥ ६२ ॥

वि. अस्मिन् **पूर्वयोः** स्तोत्रीययोः **हुम्मा** इत्येष स्तोभोऽगतिमान् भवति ॥ ६२ ॥

दी. **ओभाइ** (ऊ. द. ११६) इति **गूर्दे पूर्वयोः** स्तोत्रीययोः **हुम्माऽ२३।** **ताऽ२३४माः** । द्वितीयायां **हुम्माऽ२३** । **श्राऽ२३४वाः** । अत्रागतिः ॥ ६२ ॥

हिन्वविशीयोत्तरयोरन्त्यः ॥ ६३ ॥

वि. **हिन्ब-**(ऊ. द. १७०) **विशोविशीये उत्तरयोः** स्तोत्रीययोः **अन्त्यः** स्तोभः अगतो भवति ॥ ६३ ॥

दी. **हिन्वाहुम्** (ऊ. द. १७०) इति **विशोविशीये उत्तरयोः** स्तोत्रीययोः अन्त्यो **हुम्मा-**स्तोभः अगतिमान् भवति। द्वितीयायां **वाऽ२३४म्र्** । **हुम्मा** । तृतीयायां **षाऽ२३४-वा** । **हुम्मा** । ॥ ६३ ॥

योनौ चान्त्यः ॥ ६४ ॥

वि. **योनावन्त्यः** स्तोभोऽगतो भवति ॥ ६४ ॥

इति पुल्लसूत्रविवरणे गतागते प्रथमस्य षष्ठः खण्डः ॥ ६ ॥

भा. इति पुष्पसूत्रभाष्ये प्रथमस्य षष्ठी खण्डिका समाप्ता ॥ ६ ॥

दी. **विशोविशोहुम्** (ग्रा. गे. २-६-८६-१) इति **योनौ** विशोविशीये **शूऽ२३४षा** । **हुम्मा** । इत्यन्त्यः स्तोभः अगतिमान् भवति ॥ ६४ ॥

---

1. A² TS¹ हिम्मा for हुम्मा
2. A²- अगतः for अगतिमान्
4. L¹ om. द्वितीयायां...वाः
5. My¹ takes हिन्व...°योरन्त्यः। & योनौ चान्त्यः for a single sūtra.
6. A². हिन्वन्ति for हिन्व ; T. om. हिन्व....भवति A² om. स्तोभः
12. S¹. om. स्तोभः ; KA² My¹ om. अगतो भवति
13. My¹. इति प्रथमस्य षष्ठः। for इति...षष्ठः खण्डः

इति फुल्लदीपे पञ्चमप्रपाठकस्य गतागते षष्ठः खण्डः ॥ ६ ॥

सप्तमः खण्डः

दक्षणिधने गोषातिरिन्द्राय द्रोणे ॥ १ ॥

वि. **दक्षणिधने** एते स्तोभा अगता भवन्ति ॥ १ ॥

दी. **यस्तेमदोवरेणियः । औहोहा** (ऊ. द. १३०) इति **दक्षणिधनमौक्षे** द्वितीयायां **गोषाताऽ२३४ इराऽ३ । होवाऽहा** । अत्रागतिः । **स्वादिष्ठायामदिष्ठया । औहोवा** (ऊ. ए. ४७८) इति **दक्षणिधने इन्द्रायाऽ२३पाऽ३ । होवाऽ२हा** ॥ अत्रागतिः । द्वितीयायां **द्रोणेसाऽ२३धाऽ३ । होवाऽ३हा** । अत्रागतिः ॥१॥

कार्तयशे सर्वे ॥ २ ॥

वि. **कार्तयशे सर्वे** स्तोभा अगता भवन्ति ॥ २ ॥

भा. स्तोभा अगता भवन्ति ॥ २ ॥

दी. **पुरोहाहाउ** (ऊ. द. १३४) इति **कार्तयशे सर्वे स्तोभा अगता भवन्ति । वोआऔऽ३होऽ३** । इत्यादीनि ॥ २ ॥

---

1. My[4] for फुल्लसूत्रदीपिकायां for फुल्लदीपे
3. My[1] before दक्ष० adds : श्रीगणेशाय नमः : PL[2]A[1] B[4]V[2]My[3] combine sūtras 1 & 2 and comment : एते स्तोभा अगता भवन्ति. The phulladipa too seems to treat them as a single sūtra only even though it explains them individually and separataly. It must be noted that these are two independent sūtras written by the author with two distinct objectives in view. While the first enumerates stobhas of **agata-type**, i.e. the stobhas with no diphthongs found in दक्षणिधनमौक्ष, the seeond says that the entire stock of stobhas met with in कार्तयश, without exception, are devoid of **gati**, diphthongs आइ and आउ.
4. A[2] before स्तोभाः ins. अन्त्य०
10. A[2] TS[1] om. कार्तयशे ; T. om. सर्वे

न तुवि-वसोः स्याम सुम्ने ॥ ३ ॥

वि. **नः** प्रतिषेधे। एते स्तोभा गतिमन्तो भवन्ति ॥ ३ ॥

भा. **तुविद्युम्नम्।** **वसोर्वसो।** **स्याम स्युम्ने।** इत्यपवादः ॥ ३ ॥

दी. **अमीहाहाउ** (ऊ. स. ६८८) इति **कार्तयशे तुवाऔऽ३होऽ३इ।** अत्रागतिः न भवति। द्वितीयायां **वासाऔऽ२होऽ३इ।** अत्रागतिर्न भवति। **स्यामाऔऽ३होऽ३इ।** अत्रागतिर्न भवति। तृतीयायाम् **इन्दूरौऽ३होऽ३इ।** अत्र स्वरे परे गतिः ॥ ३ ॥

साकमश्व उच्चायामाद्यः सर्वासु ॥ ४ ॥

वि. **धुरासाकमश्वे उच्चायां** (ऊ. स. ७६७) **सर्वासु** स्तोत्रीयासु **आद्यः** स्तोभः अगतो भवति ॥ ४ ॥

दी. **उच्चायां धुरासाकमश्वे सर्वासु** स्तोत्रीयासु **आद्यः** स्तोभोऽगतो भवति। **उच्चातेजाऽ३। हौऽ३होऽ३१।** (ऊ. सं. ७६७) द्वितीयायां **सनइन्द्राऽ३। हौऽ३होऽ३।** तृतीयायाम् **एनाविश्वाऽ३। हौऽ३होऽ१** ॥ ४ ॥

अन्यत्र प्रथमतृतीयपञ्चमाः ॥ ५ ॥

वि. **अन्यत्र** धुरासाकमश्वे **प्रथमतृतीयपञ्चमाः** स्तोभा अगता भवन्ति ॥ ५ ॥

भा. उच्चाया अन्यत्र प्रथमादयः स्तोभा अगता भवन्ति ॥ ५ ॥

दी. उच्चायाः **अन्यत्र** अन्यासु स्तोत्रीयासु धुरासाकमश्वे **प्रथमतृतीयपञ्चमाः** स्तोभाः अगताः भवन्ति। **अध्वर्यो। आऽ३। हौऽ३होऽ३१** (ऊ. द. १४५)। **सोमम्पवाऽ३इ। हौऽ३होऽ३१। पुनाहीन्द्राऽ३। हौऽ३होऽ३।** एवमादीनि ॥ ५ ॥

---

3. PV[2] °ज्ञुम्न for °द्युम्न

7. A[2]TS[1] read साकमश्व...न मधो; and K साकमश्व...पञ्चमाः ॥ न मधोस्तृतीयः as a single sūtra ; PA[1] V[2] B[4] L[2] have no commentary on साकमश्व... सर्वासु

8. KA[3] TS[1] om. धुरा

14. KA[3] TS[1] om. धुरासाकमश्वे

न मधोस्तृतीयः ॥ ६ ॥

वि. **नः** प्रतिषेधे। **देवमधोर्** (ऊ. द. १४५) इत्यत्र तृतीयः स्तोभो गतिमान् भवति ॥ ६ ॥

दी. **अध्वर्योऽआऽ३। हौऽ३होऽ३१** (ऊ. द. १४५) इति **घुरासाकमश्वे** द्वितीयायां तृतीयः स्तोभोऽगतो **न** भवति। **देवामधोऽ३ः। हौऽ३होऽ३१** ॥ ६ ॥

लम्बे सोममिन्द्राय ॥ ७ ॥

दी. **अध्वर्योअद्रिभिःसुतम्। ईयाइयाहाइ** (ऊ. द. १४६) इति **विलम्ब-सौपर्णे** तृतीयायां **सोममिन्द्रायवा**। हाऽ३हाऽ३। अत्रागतिः ॥ ७ ॥

शुक्रं दुदुहे ॥ ८ ॥

वि. **(लम्बे सोममिन्द्राय ॥ शुक्रंदुदुहे ॥ ७–८ ॥) विलम्बसौपर्णे सोममिन्द्राय** ऊ. द. १४७) **शुक्रंदुदुहे** (ऊ. अ. ५५६)। **एतौ स्तोमौ** अगतौ भवतः ॥ ७–८ ॥

दी. **अस्यप्रत्नामनुद्युतम्। ईयइयाहाइ** (ऊ. अ. ५५६) इति **विलम्ब-सौपर्णे शुक्रंदुदुहंआ**। हाऽ३हाऽ३। अत्रागतिः ॥ ८ ॥

हारायणे द्रम्पवमान स्यवरुण ॥ ९ ॥

दी. **अभिसोमौहोऽ२सआयवाः** (ऊ. द. १५१) इति **हारायणे** द्वितीयायां **द्रम्पवमा**। नऊऽ३हा। तृतीयायां **स्यवरुणा**। **स्यधाऽ३हा**। अत्रागतिः ॥ ९ ॥

सामादिरोऽर्जुनो ॥ १० ॥

वि. (सू. हारायणे द्रंपवमान स्यवरुण ॥ सामादिरोऽर्जुनो ॥ ९–१० ॥)

---

4. PA[1] L[2] V[2] B[4] om. commentary on sutras: 6—14. A[2] S[2] तृतीये for तृतीयः; S[1] om. तृतीयः

2. A[2] S[1] T एषः for अत्र; SA[2] om. तृतीयः

6. A[2] T add तृतीये before लम्बे.

10. S[1] om. विलम्ब°....दुदुहे; KT. om. सोम....दुदुहे

14. PA[1] V[2] B[4] V[1] V[3] वरुणा for वरुण; KA[2] TS[1-3] combine sutras 9 & 10

हारायणे एते स्तोभा अगता भवन्ति ॥ ९–१० ॥

दी. **प्रसोमादौहोऽ२इववीतयाइ** (ऊ. स. ६९२) इति **हारायणे सामदिरो**। **नजाऽ३हा**। द्वितीयायाम् **अर्जुनोआ**। **त्केआऽ३हा**। अत्रागतिः ॥ १० ॥

वैयश्वे पुनानायामन्त्यः ॥ ११ ॥

वि. **वैयश्वे पुनानायाम् अन्त्यः** स्तोभः अगतो भवति ॥ ११ ॥

दी. **पुनानःसोमधारयाऽ३ए** (ऊ. ए. ५२९) इति **वैयश्वे** अन्त्यः स्तोभोऽगतो भवति। **उत्सोदेवोहिराऽ२३हो** ॥ ११ ॥

भासे क्रतुवित् ॥ १२ ॥

दी. **पव**। **स्वाऽ३दाइ**। **वाः**। **ईया** (ऊ. द. १५८) इति **भासे** तृतीयायां **क्रतुवित्सो**। **म**। **मौऽ६हो**। **वाहा**। अत्रागतिः ॥ १२ ॥

तेनापवस्व ॥ १३ ॥

दी. **यस्ते**। **माऽ३दो**। **वा**। **ईया** (ऊ. अ. ५६४) इति **भासे ताइनापव**। **स्व**। **औऽ३हो**। **वाहा**। अत्रागतिः ॥ १३ ॥

मꣳहिष्ठः ॥ १४ ॥

वि. (सू. **भासे क्रतुवित्**। **तेनापवस्व**। **मꣳहिष्ठः** ॥ १२–१४ ॥) **भासे** एते स्तोभा अगता भवन्ति ॥ १२–१४ ॥

दी. **स्वादि**। **ष्ठाऽ३या**। **एम**। **ईया**। (ऊ. स. ६९४) इति भासे तृतीयायां **माꣳहिष्ठोग्र**। **त्र**। **हौऽ३हो**। **वाहा**। अत्रागतिः ॥ १४ ॥

सितेऽन्त्यः ॥ १५ ॥

वि. & भा. गायत्रीसामासितेऽन्त्यः स्तोभोऽगतो भवति ॥ १५ ॥

---

8. KA[2] s[1] s[2] take sūtras 12, 13 and 14 as a single one.

18. L[1] om. मंहिष्ठोः...अत्रागतिः

दी- **यस्तेमदोवरे।** **इयाऽ३४३ईऽ३४या** (ऊ. अ. ५६५) इति गायत्री-सामासिते अन्त्यः स्तोभोऽगतो भवति । **वीराऽ३हो** ॥ १५ ॥

कौत्सेऽभितृतीयायामुभौ स्तोभौ ॥ १६ ॥

दी. **अभीहीनोऽ२३ ।** **वाजसातममीया** (ऊ. द. १६४) इति **ऐडकौत्से तृतीयायां** स्तोत्रीयायाम् **उभौ स्तोभौ** अगतौ भवतः । **आजाऽ३हा** । **नायाऽ३हा** ॥ १६ ॥

इन्द्रायपूषाद्ययोः ॥ १७ ॥

वि. (कौत्सेऽभितृतीयायामुभौ स्तोभौ ॥ इन्द्राय पूषाद्ययोः ॥ १६-१७ ॥) **कौत्सेऽभितृतीयायामुभौ स्तोभावगतौ** भवतः । **इन्द्राय सोमपातवे** (ऊ. अ. ५६९) इत्याद्यायाम् **अयंपूषाद्ययोश्च** (ऊ. सु. ७६४) उभौ स्तोभौ अगतौ भवतः ॥ १७ ॥

दी. **इन्द्राहीयाऽ२३** (ऊ. द. ५६९) इति ऐडकौत्से आद्यायां स्तोत्रीयायम् उभौ स्तोभावगतौ भवतः । **वाइराऽ३हा** । **यासाऽ३हा** । **अयँहीपूऽ२३** (ऊ. स. ७६४) इति ऐडकौत्से आद्यायां स्तोत्रीयायाम् उभौ स्तोभावगतौ भवतः । **वायाऽ३हा** । **रय्याद्रोऽ३हा** । द्वितीयायां **पावाऽ३हा** । **मानाऽ३हा** ॥ १७ ॥

स्वादिप्रथमायां च ॥ १८ ॥

वि. **स्वादि**-(ऊ. प्रा. ८१९) **-प्रथमायां च** । ऐडकौत्से उभौ स्तोभौ अगतौ भवतः ॥ १८ ॥

दी. **स्वादीहिष्ठाऽ२३** (ऊ. प्रा. ८१९) इति ऐडकौत्से **प्रथमायां** स्तोत्रीयायां चकारादुभौ स्तोभावगतौ भवतः । **आइन्द्राऽ३हा** । **यापाऽ३हा** । इति ॥ १८ ॥

---

3. PA[1]L[2]V[2]B[4] om. commentary on sūtras 16th onward till the end of this प्रपाठक; My[3] combines sūtras 16 and 17

7. A[2] S[1] कौत्सेऽभीन, S[2] कोत्सेऽभीनो for कौत्सेऽभि

12. My[3] आद्ययोः स्तोत्रीययोः for आद्यायां स्तोत्रीयायां

15. A[2] स्वादिष्ठायां for स्वादि- ; A[2]KTS[1] om. ऐडकौत्से

उत्तरस्तंꣳसखायः परित्यं रक्षः ॥ १९ ॥

वि. एतासु स्तोत्रीयासु तयोरुत्तरस्यागतिर्भवति। **तँसखायः। परित्यम्। रक्षः।** (ऊ. अ. ५६९) ॥ १९ ॥

दी. **तंꣳसहीखा॒२३।** (ऊ. अ. ५६९) इति **स्तोत्रीयायामुत्तरः** स्तोभोऽगतो भवति। **मावाऽ३हा॥ परीहित्याऽ२इम्** (ऊ. अ. ५६९) इति **स्तोत्रीयायामुत्तरः** स्तोभोऽगतो भवति। **नासाऽ३हा। रक्षोहीहाऽ२३** (ऊ. प्रा. ८१९) इति स्तोत्रीयायामुत्तरः स्तोभोऽगतो भवति। **साधाऽ३हा** ॥ १९ ॥

सैन्धुक्षिते तिस्रोवाचोत्तमायामन्त्यः ॥ २० ॥

वि. **सैन्धुक्षिते तिस्रोवाच**-तृतीयायाम् (ऊ. अ. ५९२) **अन्त्यः** स्तोभो **न** गतो भवति ॥ २० ॥

दी. **तिस्रोवाचो। हाइ** (ऊ. अ. ५९२) इति **सैन्धुक्षिते उत्तमायां** स्तोत्रीयायाम् **अन्त्यः** स्तोभोऽगतो भवति। **साहाऽ३हा** ॥ २० ॥

पवस्वाद्यायां च ॥ २१ ॥

वि. **पवस्वदो** (ऊ. अ. ६५३) **प्रथमायां च** ऐडसैन्धुक्षितेऽन्त्यः **स्तोभो** न गतो भवति ॥ २१ ॥

दी. **पवस्वदो। हाइ** (ऊ. अ. ६५३) इति सैन्धुक्षिते आद्यायां **च**-कारात् अन्त्यः स्तोभः अगतः भवति। **हाधाऽ३हा** ॥ २१ ॥

मन्ते प्रत्नं पवमानगोभिस्सुषादब्धो दुहानः ॥ २२ ॥

वि. **समन्ते** एते स्तोभा अगता भवन्ति ॥ २२ ॥

---

5. L[1]. सावाऽ३ for मावाऽ३.

8. KA[2] TS[1] My[1] combines sūtras 20 and 21 into one and comment: सैन्धुक्षिते तिस्रोवाच तृतीयायां (A[2] ०वाचोत्तमायामन्त्यः; S[1] T तृतीयायाः) पवस्वदेप्रथमायां च अनयोः (T. om. अनयोः) अन्त्यः स्तोभो न गतो भवति

19. A[2] om. समन्ते; T. om. एते

दी. **पुनानःसोमधारया** (ऊ. सं २२४) इति समन्ते द्वितीयायां **प्र । त्वाꣳसाऽ२३धाऽ३ । होवाऽ३हा** । अत्रागतो भवति । **मृज्यमानस्सुहस्तिया** (ऊ. सं. २८८) इति समन्ते **प । वम्‍ाऽ२३नाऽ३ । होवाऽ३हा** । तृतीयायां **गो । माइराऽ२३ज्ञाऽ३ । होवाऽ३हा** । अत्रागतिः । **परीतोपिञ्चतासुताम्** (ऊ. सं. ३२५) इति समन्ते **सु । षावाऽ२३सोऽ३ । होवाऽ३हा** । द्वितीयायाम् **अ । दाब्धाऽ२३ःसूऽ३ । होवाऽ३हा** । अत्रागतिः । **तवाहँसोमरारणा** (ऊ. ए. ५१५) इति समन्ते द्वितीयायां **दु । हानोऽ२३बाऽ३ । होवाऽ३हा** । अत्रागतिः ॥ २२ ॥

दावसुनिधने त्वꣳसोमान्त्यस्सर्वासु मदेषु गोषातिः ॥ २३ ॥

वि. **दावसुनिधने त्वꣳसोमायां सर्वासु** स्तोत्रीयासु **अन्त्यः** स्तोभोऽगतो भवति । अन्यत्र **मदेषु गोषातिरि**त्येतौ स्तोभावगतौ भवतः ॥ २३ ॥

दी. **तुवꣳसोऽ२३मासिधारयुहाउ** (ऊ. द. १९३) इति **दावसुनिधने** सर्वासु स्तोत्रीयासु अन्त्यः स्तोभोऽगतो भवति । **पवास्वाऽ१माऽ२३ । होवाऽ३हा** । द्वितीयायाम् **इन्द्रस्साऽ१त्राऽ२३ । होवाऽ३हा** । तृतीयायां **द्युमान्ताऽ१ꣳशूऽ२३ । होवाऽ३हा । परिसुवाऽ२३नोगिरिष्ठाहाउ** (ऊ. अ. ५८३) इति दावसुनिधने तृतीयायां **मदाइषूऽ१साऽ२३ । होवाऽ३हा** । अत्रागतिः । **यस्तेमाऽ२३दोवरेणियोहाउ** (ऊ. स. ७६२) इति दावसुनिधने द्वितीयायां **गोषाताऽ१इराऽ२३ । होवाऽ३हा** । अत्रागतिः ॥ २३ ॥

हाविष्कृते त्वꣳसोमाद्यान्त्ययोः ॥ २४ ॥

वि. **हाविष्कृते त्वँसोमा**-(ऊ. द. १९५) **-द्यान्त्ययोः** स्तोत्रीययोः स्तोभोऽगतो भवति ॥ २४ ॥

---

3. M[4]. om. तृतीयायां... होवाऽ३हा (l. 4)
7. M[4] after (अ)गति; adds: गतिर्न भवति
9. A[2]. सोमान्त्यः T. सोमायाः for सोमायां; T. अन्त्याः स्तोभा न गता भवन्ति for अन्त्यः... भवति
17. My[1] combines sūtras 24 and 25 into one
18. T. om. हाविष्कृते...अगतो S[1]A[2] सर्वे स्तोभा अगता भवन्ति for स्तोभोऽगतो भवति

दी. **त्वँसोमासिधाहाउरायुः** (ऊ. द. १९५) इति हाविष्कृते **आद्यान्त्ययोः** स्तोत्रीययोरन्त्यः स्तोभोऽगतो भवति । **पवाऽरहोऽ१** । तृतीयायां **द्युमाऽरहोऽ१** ॥ २४ ॥

स्वादिप्रथमायां च ॥ २५ ॥

वि. **स्वादिप्रथमायां** च हाविष्कृते न गतः ॥ २५ ॥

दी. **स्वादिष्ठयामदाहाउष्ठाया** (ऊ. ए. ४४१) इति हाविष्कृते प्रथमायां स्तोत्रीयायाम् अन्त्यः स्तोभोऽगतो भवति । **इन्द्राऽरहोऽ१** ॥ २४ ॥

उद्वंशीय इन्द्रसुतायामुत्तरयोः ॥ २३ ॥

वि. **उत्तरयोः** स्तोत्रीययोः स्तोभावगतौ भवतः ॥ २६ ॥

दी. **इन्द्रसूतेषुसोमेष्वा** (ऊ. स. ७२०) इति **उद्वंशीये उत्तरयोः स्तोत्रीययोः हों** इति स्तोभोऽगतो भवति । **सुपाऽरहोऽ१** । तृतीयायां **भवाऽरहोऽ१** ॥ २६ ॥

मैधे क्थाप्रत्यये ॥ २७ ॥

वि. **मैधातिथे क्था-प्रत्यये** परतः पूर्वः स्तोभो न गतो भवति ॥ २७ ॥

इति फुल्लसूत्रविवरणे प्रथमाध्याये गतागते सप्तमः खण्डः ॥ ७ ॥

भा. इति पुष्पसूत्रभाष्ये प्रथमस्य सप्तमी खण्डिका समाप्ता ॥ ७ ॥

दी. **माचिदन्यदोहाइ** (ऊ. द. २१५) इति **मैधातिथे** द्वितीयायां **क्था-प्रत्यये** परे सति **होइ**-स्तोभोऽगतो भवति । **मुहुरूऽर होऽ१ऽ** । इति ॥ २७ ॥

इति फुल्लदीपे पञ्चमप्रपाठकस्य गतागते सप्तमः खण्डः ॥ ७ ॥

---

4. K. अगतः for न गतः; As[1] om. न गतः; MY[1] om. हाविष्कृते.

8. T. om. स्तोत्रीययोः; A[2]S[1] स्तोभा अगता भवन्ति for स्तोभावगतौ भवतः

12. A[2]S[1] om. प्रत्यये.

13. My[1] इति प्रथमस्य सप्तमः for इति....खण्डः

17. MY[4] कृतायां फुल्लदीपिकायां for फुल्लदीपे

अष्टमः खण्डः

सामराजे पवित्रायामनाकृष्टः ॥ १ ॥

वि. **सामराजे पवित्रायामनाकृष्टः** स्तोभः समस्तो न गतो भवति ॥ १ ॥

दी. **पवौहोवा** (ऊ. सं. २६३) इति सामराजे **अनाकृष्टः** कर्षणरहितो होइ-स्तोमोऽ-गतो भवति । **नूर्नाताऽ२३४दा** । **हों** । इत्यादीनि ॥ १ ॥

गौषूक्ते यैआ ॥ २ ॥

वि. **गौषूक्ते यैआ**-प्रत्यये परतः पूर्वः स्तोभो न गतो भवति ॥ २ ॥

दी. **उच्चातेजातमौ** (ऊ. ए. ४५६) इति **गौषूक्ते** तृतीयायां **यैआ-शब्दे** प्रत्यये **हाई**-स्तोभोऽगतो भवति । **हौहोवाहा** । **यैआ** ॥ २ ॥

मरुतां धेनौ सर्वे ॥ ३ ॥

वि. **मरुतां धेनौ सर्वे** स्तोभा अगता भवन्ति ॥ ३ ॥

दी. **त्राऽ२३४इः** । **असैसप्तधेनवोदुदौ** (ऊ. सं. २९५) इत्यादि **मरुतां धेनौ सर्वे होइ**-स्तोभा अगता भवन्ति । **होह्वाइराइ** । द्वितीयायां **होरूणाः** । तृतीयायां **होत्यावाः** ॥ ३ ॥

त्वाष्ट्रीसाम्नोश्च सर्वे ॥ ४ ॥

वि. **त्वष्ट्रीसाम्नोश्च सर्वे** स्तोभा न गता भवन्ति ॥ ४ ॥

भा. स्वारयोः **त्वाष्ट्रीसाम्नोः सर्वे** स्तोभा अगता भवन्ति ॥ ४ ॥

दी. **सुतासोमाऽ३हा** । इति **स्वारंत्वाष्ट्रीसाम्नि** सर्वे स्तोभा अगता भवन्ति । **सुतासोमाऽ३हा** (ऊ. अ. ५९३) । इत्यादीनि । **सुता** । **सोमाऽ३** । **हाऽ३हा** (ऊ. अ.

---

2. PV²B⁴L²A¹. have no commentary on sutras 1–3
3. T om समस्त:
7. KS¹S² om प्रत्यये.
10. A² धेनु:, T धेनुनि for धेनौ.
17. V²B⁴ om. स्वारयोः त्वाष्ट्रीसाम्नोः

५९४) इति द्वितीयस्वारत्वाष्ट्रीसाम्नि सर्वे स्तोभा अगता भवन्ति । सुता । सोमाऽ३ । हाऽ३हा इत्यादीनि ॥ ४ ॥

न हरिं वत्सं पवमान वाचस्पतिः सोमस्पतिः
सखेन्द्रस्य पुरस्सखायोऽर्वाचीनं यज्ञं च
ब्रह्मोद्वंशं युङ्क्ष्वा ह्यथा गिराम् ॥ ५ ॥

वि. नः प्रतिषेधे । उक्तेभ्य उदाहरणेभ्यो विनेत्यर्थः ॥ ५ ॥

भा. हरिं वत्सं पवमान- एतदादिष्वपवादः ॥ ५ ॥

दी. पव । स्ववाऽ३ । हाऽ३हा (ऊ. सं. ३०८) इति त्वाष्ट्रीसाम्नि द्वितीयायां हरिम् । पवाऽ३इ । हाऽ३हाइ । अत्र न गतिप्रतिषेधः । वत्सम् । जाताऽ३म् । हाऽ३हाइ ॥ पव । मानाऽ३ । हाऽ३हाइ । अत्र न गतिप्रषेधः । तृतीयायां पव । माना-ऽ३ । हाऽ३हाइ । अत्र न गतिप्रतिषेधः ॥ सुता । सोमाऽ३ । हाऽ३हा (ऊ. अ. ५९४) इति त्वाष्ट्रीसाम्नि द्वितीयायां वाचः । पताऽ३इः । हाऽ३हाइ । अत्र न गतिप्रतिषेधः । तृतीयायां सोमः । पताऽ३इः । सखे । द्रस्याऽ३ । हाऽ३हाइ । अत्र न गतिप्रतिषेधः ॥ पुरः । जिताऽ३इ । हाऽ३हाइ । (ऊ. स. ७९१) इति त्वाष्ट्रीसाम्नि पुरः । जिताऽ३इ । हाऽ३हाइ । अत्र न गतिप्रतिषेधः । द्वितीयायां सखा । योदाऽ३ । हाऽ३हाइ । अत्र न गतिप्रतिषेधः । [तृतीयायां तन्दु । रोषाऽ३म् । हाऽ३हाइ । अत्र न गतिप्रतिषेधः ॥] असाविसोऽ३हा (ऊ. क्षु. ८८७) इति त्वाष्ट्रीसाम्नि द्वितीयायाम् अर्वाचीनाऽ२ हाइ । तृतीयायां यज्ञंचाऽ३हाइ । अत्र न गतिप्रतिषेधः ॥ गाय । तित्वाऽ३ । हाऽ३हा (ऊ. क्षु. ८९०) इति त्वाष्ट्रीसाम्नि ब्रह्मा । णस्त्वाऽ । हाऽ३हाइ । उद्व । शामाऽ३इ । हाऽ३हाइ । अत्र न गतिप्रतिषेधः । तृतीयायां युङ्क्ष्वा । हिकाऽ३ । हाऽ३हाइ । अथा । न आऽ३ । हाऽ३हाइ । गिराम् । उपाऽ३ । हाऽ३हाइ । अत्र न गति-

7. PV[2]B[4]A[1]L[2] trans. हरिं....०वादः after अगता भवन्ति (p 277, l. 17)
9. L[1] om. वत्सं ... ०प्रतिषेधः
14. L[2] om. पुरः जिताऽइ...गतिप्रतिषेधः (l. 21)

प्रतिषेधः ॥ ५ ॥

बृहदाग्नेयेऽन्त्यः ॥ ६ ॥

वि. **बृहदाग्नेये अन्त्यः** स्तोभो न गतो भवति ॥ ६ ॥

दी. **पुरोजितीवोऽन्धसः ।** **ईयइयाहाइ** (ऊ. सं ३१९) इति बृहदाग्नेये अन्त्यः स्तोभोऽगतो भवति । **इयाऽ३हाइ** । एवं द्वितीयतृतीययोः ॥ ६ ॥

यस्ते सोमसाम्नि गोषातिः ॥ ७ ॥

वि. एतस्मिन् साम्नि एषः स्तोभो न गतो भवति ॥ ७ ॥

दी. **यस्तेमदोवरेणियाऽ३ए** (ऊ. सं. ३७०) इति **अध्यर्धेडसोमसाम्नि** द्वितीयायां **गोषातिराऽ२३ । हा** । अत्रागतिः ॥ ७ ॥

उत्तरे जनित्रे पुर उत्तरयोरन्त्यः ॥ ८ ॥

वि. **पुरोजित्याम्** (ऊ. ए. ५०१) **उत्तरयोः** स्तोत्रीययोरन्त्यः स्तोभो न गतो भवति ॥ ८ ॥

दी. **पुरोजितीवोअ । धसाऽ३ः । सुताया** (ऊ. ए. ५०१) इत्युत्तरे **जनित्रे उत्तरयोः** स्तोत्रीययोः अन्त्यः स्तोभोऽगतो भवति । **आइन्दुरश्वोनकौऽ३ । होऽ३१ ।** तृतीयायां **याज्ञायसन्तुवौऽ३ । होऽ३१** ॥ ८ ॥

स्वर्वन्निधन इन्द्राय स शुक्र इन्द्रस्ते सुतस्य ॥ ९ ॥

वि. **स्वर्वन्निधने सौहविषे** (ऊ. अ. ५३६) एते स्तोभा अगता भवन्ति ॥ ८ ॥

दी. **परीऽ३होइ । प्राधाऽ२३४ऽबा** (ऊ. अ. ५३६) इति **स्वर्वन्निधने इन्द्राऽ३हो** । द्वितीयायां **सशूऽ३हा** । तृतीयायाम् **इन्द्राऽ३हो । सुताऽ३हो** । अत्रागतः

1. PA¹B⁴V²L². ‹ m· commentary on ‹urtas 6–22

17. A²T. add· सौहविषे after ०धन

19. M⁴· गतिः for ०गतः

स्तोभो भवति ॥ ९ ॥

इन्द्रस्य यशस्यनुत्तः ॥ १० ॥

वि. **इन्द्रस्य यशसि अनुत्त**श्चैष स्तोभो न गतो भवति ॥ १० ॥

दी. **त्वमिन्द्रा । याशाः** (ऊ. स. ७१३) इति **इन्द्रस्य यशसि अनूरहोऽ१** । अत्रागतः स्तोभो भवति ॥ १० ॥

वैश्वामित्रे सरज्जारः ॥ ११ ॥

वि. **वैश्वामित्र** एष स्तोभो न गतो भवति ॥ ११ ॥

दी. **प्रसुन्वानाय अन्धसः** (ऊ. स. ७५७) इति **वैश्वामित्रे** द्वितीयायां **सारज्जाराऽ२३ हाऽ३** । अत्रागतिः ॥ ११ ॥

आनिधने तु-प्रत्यये ॥ १२ ॥

वि. **आनिधने** त्वाष्ट्रीसाम्नि **तु-प्रत्यये** परतः पूर्वः स्तोभो न गतो भवति ॥ १२ ॥

दी. **पुरोजितीवोअन्धसः । सुताहाउ** (ऊ. स. ७९२) इति **आकारणिधने** त्वाष्ट्रीसाम्नि तृतीयायां **तु**-शब्दे प्रत्यये परे पूर्वस्तोभोऽगतो भवति । **यसोऽ२३४हा** । **तूऽ२र्वा** ॥ १२ ॥

पूर्वयोश्चाभिगीते प्रत्यये ॥ १३ ॥

वि. **पूर्वयोः** स्तोत्रीययोर**भिगीते प्रत्यये** परतः पूर्वस्तोभो न गतो भवति ॥ १३ ॥

दी. पूर्वयोः स्तोत्रीययोर**भिगीते**ऽक्षरे **प्रत्यये** । **च**-शब्दात् पूर्वः स्तोभोऽगतो भवति । प्रथमायां यमाऽ३होऽ३ । श्वानाऽ३४हो । द्वितीयायां **रयाऽ३हो** । **प्रस्याऽ३हो** ॥ १३ ॥

उद्वत्प्राजापत्ये सर्वे ॥ १४ ॥

वि. **उद्वत्प्राजापत्ये सर्वे** स्तोभा अगता भवन्ति ॥ १४ ॥

---

2. T. om. इन्द्रस्य यशसि; S¹ om. अनुत्तः; T. इन्द्रः for एषः

13. L¹. om. परे

दी. प्रलँसधस्थमा । होऽ२सादात् (ऊ. प्रा. ८००) इति उद्धृतप्राजापत्ये सर्वे स्तोभा अगता भवन्ति । होऽ२सादात् ॥ १४ ॥

न नृभिः ॥ १५ ॥

वि. नः प्रतिषेधे । नृभिरित्येष स्तोभो गतिमान् भवति ॥ १५ ॥

दी. प्रल२सधस्थमा होऽ२सादात् (ऊ. प्रा. ८००) आपृच्छयंधरुणंवाजीया-होऽ२ । नृभाऽ२इहोंऽ१इ । अत्रागतिर्न भवति ॥ १५ ॥

शैखण्डिने सर्वे ॥ १६ ॥

वि. शैखण्डिने सर्वे स्तोभा न गता भवन्ति ॥ १६ ॥

दी. प्रताऽ३होइ (ऊ. क्षु. ९०६) इति शैखण्डिने सर्वे स्तोभा अगता भवन्ति । आश्वीऽ३होऽ२३४ । असाऽ३होऽ२३४ । प्रान्ताऽ३हो । रिक्षाऽ३द्धोऽ२३४ । द्वितीयायाम् उभाऽ३हो । यताऽ३होऽ२३४ । ध्रुवाऽ३हो । स्यासाऽ३होऽ२३४ । सत्ताऽ३हो । नियोऽ३होऽ२३४ । तृतीयायां विश्वाऽ३हो । धामाऽ३होऽ२३४ । प्रभो-ऽ३हो । तेसाऽ३होऽ२३४ । वियाऽ३हो । विश्वाऽ३होऽ२३४ ॥ १६ ॥

न येत्वा-यदी-पवि-नशी-पतिः ॥ १७ ॥

वि. नः प्रतिषेधे । एते स्तोभा गतिमन्तो भवन्ति ॥ १७ ॥

दी. अत्रैव शैखण्डिने येत्वाऽ३होइ । यदीऽ३होइ । पवाऽ२इ होऽ२३४इ । नशाऽ३इ होऽ२३४इ । पाताऽ३इहोंइ । एतेषु न गतिप्रतिषेधः ॥ १७ ॥

क्रन्दे शूर इन्द्रस्य ॥ १८ ॥

वि. वायोरभिक्रन्दे शूरो न धत्त । इन्द्रस्य सोम । एतौ स्तोभावगतौ भवतः ॥

---

4. T om. नः प्रति० ... भवति
7. My[3]. combines sutras 16 and 17
8. T om. शैखण्डिने
12. L[1] om. तृतीयायां ... विश्वाहोऽ२३४

दी. धर्तादिवऽपवतेकृत्वियौ (ऊ. क्षु. ९२८) इति वायोरभिक्रन्दे द्वितीयायां शूरोनधत्तआयुधागभौ । होस्तायोः । अत्रागतिः । तृतीयायाम् इन्द्रस्यसोमपवमानऔ । होर्माइणा । अत्रागतिः ॥ १८ ॥

आउवाभीके सर्वत्र ॥ १९ ॥

वि. आभीके सर्वत्र आउवा [-स्तोभस्य] न गतिर्भवति ॥ १९ ॥

दी. प्राऽ२३४ सोमासोऽ५ (ऊ. स. ७५३) इत्याद्याभीके आउवा-स्तोभस्य सर्वत्र सर्वासु स्तोत्रीयासु अगतिर्भवति । हाइषा३२ उद्दाऽ३४३ । द्वितीयायां तामाऽ३-२उवाऽ३४३ । [तृतीयायां सूऽ२३४ताइन्दाऽ५ ।] ॥ १९ ॥

न सुता इन्द्रायाम् ॥ २० ॥

वि. नः प्रतिषेधे । सुताइन्द्रायाम् (ऊ. स. ७५३) आउवा [-स्तोभस्य] गतिरेव भवति ॥ २० ॥

दी. सूऽ२३४ताइन्द्राऽ५ इति तृतीयायां तु तुवाऽ२३ उवाऽ२४३३ । अत्रा-गतिर्न भवति ॥ २० ॥

अच्छिद्राङ्जोरूपसन्तानिपार्श्वानाम् आउवा सर्वत्र ॥ २१ ॥

वि. एतेषु सर्वत्र आउवा भवति ॥ २१ ॥

दी. अभिसोमा । सआऽउवाऽ२३ (ऊ. द. १५२) इत्याद्यच्छिद्रे; अभि-सोमा । सआऽ३१उवाऽ२३ (र. सं. ३१) इत्याद्यङ्जोवैरूपे; असाउहाउ । वायऽ-ग्नुर्माऽ३१ उवाऽ२३ (ऊ. द. ९०) इत्यादि संतनिनि; आभी । सोमासआऽ३१-उवाऽ२३ (ऊ. द. १४८) इत्यादि गायत्रपार्श्वे च आउवा-स्तोभस्य सर्वत्र सर्वासु स्तोत्रीयासु

4. MY[3]. combines sutras 19 & 20

5. S[2]A[2] गता भवन्ति for गतिर्भवति

10. T आउवा न सुता इन्द्राया आउवायमनगतो भवति for नः प्रति°...भवति; A[2]S[1]T अनगतः for गतिरेव

15. My[1] om. एतेषु ...भवति; A[2]T भवन्ति for भवति

अगतिर्भवति । उदाहरणान्युक्तानि ॥ २१ ॥

न तालव्यात् ॥ २२ ॥

वि. & भा. तालव्यात् परम् आउवा [-स्तोभस्य] गतिरेव भवति । अच्छिद्रादिषु **पेमनीषिण** इति । अत्र **नी**-शब्दे तालव्ये इ-कारादिलोपो द्रष्टव्यः ॥ २२ ॥

दी. अच्छिद्रादिषु सामसु **तालव्यात्** परस्य **आउवा-स्तोभस्य** अगतिर्न भवति । गतिरेव भवतीत्यर्थः । अच्छिद्रे **ष्टापेमनाऽ३१** उवाऽ२३इ । अङ्गोवैरूपे **मनाऽ३१** उवाऽ२३इ । **अर्षाहाउ** (ऊ. सं. २७५) इति संतनिनि **योनौवनाऽ३१** उवाऽ२३इ । **आया** (ऊ. ए. ३९७) इति गायत्रपार्श्वे **रूचाहराऽ३१** उवाऽ२३इ । एतेषु गतिरेव भवति ॥

व्यात्परमतिहारमेके ॥ २३ ॥

वि. तालव्यात् परं गते**रहितारमेके** मन्यन्ते । **न** तु ग्रन्थकारः ॥ २३ ॥

विरते गतिलोपः । न संधौ ॥ २४ ॥

वि. **विरते गतिलोपो** भवति । **न संधौ** । संधौ [तु] गतिरेव भवति ॥ २४ ॥

दी. (**व्यात्परमतिहारमेके** ॥ **विरते गतिलोपः** । **न संधौ** ॥) **तालव्यात्** परस्य **आउवा**-स्तोभस्य गतेः **अतिहारमेके** मन्यन्ते । तत्र च विरते गतिलोपः । संधाव-लोपः । तत्र अच्छिद्रादीन्येवोदाहरणानि ॥

अच्छिद्रे **ष्टा** । **पेमनाऽ३१उवाऽ२३** । **पीऽ२३४णाः** (ऊ. द. १५२) । अत्र विरते गतिलोपः । **ष्टापे मनाऽ३१ उवाऽ२३ इषीऽ२३४णाः** । अत्र संधौ न गतिलोपः । इत्येकेषां मतम् । सूत्रकारस्य तु पूर्वोक्तमेव ॥

---

2. A^{2}T after तालव्यात् add: परम्
3. PA^{1}V^{2}B^{4}L^2 add: एव after अच्छिद्रादिषु
4. S$^{1-2}$ My^{1}PA^{1}V^{2}B^{4}L^2 om. नीशब्दे तालव्ये इकारादिलोपो द्रष्टव्यः
6. S^1. om. अङ्गो० ....वानाऽ३१उवाऽ२३इ
9. PA^{1}V^{2}B^{4}L^{2}KMy^1 treat sūtras 23 — 25 and M^{4}L^2 sūtras 23—24 as a single one
10. S^{1}A^{2}T. om. न तु ग्रन्थकारः
12. A^{2}KMy^1 om. न संधौ; TS$^{1-2}$ om. second संधौ

अङ्गोवैरूपे **ष्टापे मनाऽ३१ उवाऽ२३ । षीऽ२३४णाः** (र. सं. ३१) अत्र विरते गतिलोपः । **ष्टापे मनाऽ३१उवाऽ२३४इषीऽ२३४णाः** । अत्र संधौ न गतिलोपः ॥

संतनिनि **योनौ वनऽ३१उवाऽ२३ । षूऽ३२४वा** (ऊ. सं २७५) । अत्र विरते गतिलोपः । **योनौवनाऽ३उवाऽ२३इषूऽ२३४वा** । अत्र संधौ न गतिलोपः ॥ २४ ॥

रूचाहाराऽ३१उवाऽ२३इ । णीऽ२४या ।

रूचाहराऽ३१ उवाऽ२३इणीऽ२३४ या ॥ २५ ॥

वि. तालव्यात् परं **गतेरतिहारमेके** मन्यन्ते । [इति पूर्वमुक्तम् ।] अतिहारपक्षे **रूचाहराऽ३३१ उवाऽ२३इ । णीऽ२३४या** स्वाध्याये त्वतिहाररूपं संपद्यते । तेन **विरते गतिलोप** इति । तदुदाहृतं गायत्रपार्श्वे । अच्छिद्रादिषूदाहरणानि **मनीषिण** इत्यादि ॥

भा. (**व्यात्परम् . . . . . एके** ॥ २३ ॥ **विरते . . . . न संधौ** ॥ २४ ॥ **रूचा . . . . णीया** ॥ २५ ॥) **तालव्यात् परं गतेरतिहारम् एके** मन्यन्ते । तत्र च **विरते गतिलोपः** । संधावलोपः । तत्रोदाहरणमुक्तमेव । अच्छिद्रादिषु एवोदाहरणानि **मनीषिण** इति [आदि] ॥ २५ ॥

दी. गायत्रपार्श्वे उदाहरणम्– **रूचाहराऽ३१ उवाऽ२३४ । णीऽ२३या** । अत्र विरते गतिलोपः । **रूचाहराऽ३१ उवाऽ२३इ णीऽ२३४या** । अत्र संधौ न गतिलोपः ॥

---

3. My[4] उवाऽ२३इ for उवाऽ२३

5. A^1L^2 रू३चा२हार३३३ इणी३३३३या३रू३चा२रू३चा२हरा३३३उवा३३३णी३३३३या३ ॥ V^1 रूचा ॥ हरा३३३इ यिणी३३३३ यारू । चाहरा उवा३३णी३३३या ॥ V^3 चाहरा333उवा23-यिणी2333या।रूचाहरा333उवा33णी233या ॥ K रूचाहराऽ231उवाऽ23णीऽ234यारूचाहाराऽ-35उवाऽ23इणीऽ234या ॥ for रूचा...णीऽ23या ॥

7. S^2 om. तालव्यात ... णीया । (l. 8); K. om. तालव्यात् .... गतिलोप इति (l. 9); S^1A^2T after मन्यन्ते add: न तु ग्रन्थकारः

8. T. त्वतिहार उपस्थिते for त्वतिहाररूपं संपद्यते

9. T. om. इति; KS^1 after उदाहृतम् add: गायत्रपार्श्वे ; S^1A^2T अच्छिद्रादीनि for अच्छिद्रा-दिषु; S^1A^2 repeat मनीषिण इति twice

12. $B^4L^2A^1$ अच्छिद्रादीनि for अच्छिद्रादिषु

कृतिनि परीतोत्तरयोः ॥ २६ ॥

वि. ऊहरहस्ये **संकृतिनि परीतोष्याम्** (र. द. १२४) **उत्तरयोः** स्तोत्रीययोः अगतौ स्तोभौ भवतः ॥ २६ ॥

दी. **एपारी** (र. द. २४) इति **संकृतिनि उत्तरयोः** स्तोत्रीययोः **होइ**-स्तोभोऽगतो भवति । द्वितीयायां **वसोममाऽ२३होऽ२३** । तृतीयायां **ब्धस्सुरभाऽ२३इहोऽ२३** ॥ २६ ॥

श्रायन्तः सर्वासु ॥ २७ ॥

वि. **श्रायन्तायां सर्वासु** स्तोत्रीयासु स्तोभा अगता भवन्ति ॥ २७ ॥

दी. **एश्राया** (र. अ. ९७) इति संकृतिनि **सर्वासु** स्तोत्रीयासु **होइ**-स्तोभोऽगतो भवति । प्रथमायां **तइवद्यूऽ२३होऽ२३** । द्वितीयायां **भागंनदाऽ२३होऽ२३** । तृतीयायाम् **इन्द्रस्यराऽ२३होऽ२३** ॥ २७ ॥

वत्सासु सप्तास्येभिर्ज्याकाः पवस्वाद्ययो-
राजुह्वानस्य ॥ २८ ॥

वि. **नित्यवत्सासु** एते स्तोभा अगता भवन्ति ॥ २८ ॥

दी. **एआया** (र. ए. ८२) इति **नित्यवत्सासु सप्तास्येभिराऽ२३हो** । अत्रागतिः । **एप्रोषू** (र. क्षु. १७०) इति नित्यवत्सातृतीयायां **ज्याकाधिधाऽ२३हो** । अत्रागतिः । **एपावा** (र. क्षु. १८०) इति **नित्यवत्सासु** । प्रथमायां **देवेभ्यो मधुमाऽ२३हो** । द्वितीयायां **पवमानविधाऽ२३हो** । अत्रागतिः ॥ **एआग्नीम्** (र. क्षु. २०२) इति **नित्यवत्सासु आजुह्वानस्यसाऽ२३हो** । अत्रागतिः ॥ २८ ॥

अतोषड्गे पवस्वाद्ययोः ॥ २९ ॥

---

1. A^2 before कृतिनि add: ऊहरहस्ये; A^2T कृतौ for कृतिनि; KA^2TS^1 My^1 treat sutras 26-27 as a single one and further till the end of this प्रपाठक no Bhasya is available.
2. K My^1 om. ऊहरहस्ये; A^2 रहस्य for ऊहरहस्ये; A^2TS^1 संकृतौ for संकृतिनि
3. A^2TS^1 अगता स्तोभा भवन्ति for अगतौ स्तोभौ भवतः
14. T. आजुह्वानस्य for नित्य०

वि. **अतीषङ्गे पवस्वायाम् आद्ययोः** स्तोत्रीययोः अगतौ स्तोभौ भवतः ॥ २९ ॥

दी. **एपवस्ववा-** (र. क्षु. १८२) इति **अतीषङ्गे** प्रथमायां **देवेभ्योमधुमाऽ२-३हो** । द्वितीयायां **पवमानविधाऽ२३हो** । अत्रागतिः ॥ २९ ॥

सिमासु च ॥ ३० ॥

वि. **सिमास्वपि पवस्वायामाद्ययोः** स्तोत्रीययोरगतौ स्तोभौ भवतः ॥ ३० ॥

दी. एऽ२ । **पवस्वग्राजासातायाइ** (र. क्षु. २०५) इति **सिमासु** प्रथमायां **देवेभ्यो मधुमाऽ२३हो** । द्वितीयायां **पवमानविधाऽ२३हो** । अत्रागतिः ॥ ३० ॥

छान्दसीष्वाद्यायाम् ॥ ३१ ॥

वि. प्रसङ्गादभिधीयते । **महानाम्नीषु आद्यायां** स्तोत्रीयायां स्तोभो न गतो भवति ॥ ३१ ॥

दी. छन्दस्सु भवाः छान्दस्यः । तासु **छान्दसीषु** । **एऽ२विदामघवन्विदाः** (अ. गा. ६. २. २९१) इति सिमासु आद्यायां **होइ**-स्तोभोऽगतो भवति । **मँहिष्ठवज्रिन्नाऽ२३हो** ॥ ३१ ॥

यस्ते हरे संयोगे प्रत्यये ॥ ३२ ॥

वि. **यस्तेमदायां** (र. ए. ७४) **वार्षाहरे संयोगे प्रत्यये** परतः पूर्वः स्तोभो न गतो भवति ॥ ३२ ॥

दी. **यस्तेमदोहोहाइ** (र. ए. ७४) इत्युत्तरे **वार्षाहरे संयोगे**ऽक्षरे **प्रत्यये** परे सति **होइ**-स्तोभोऽगतो भवति । **हो** । **स्वाअन्धासाऽ२** । द्वितीयायां **हो** । **श्वसाः** ॥ ३२ ॥

वृष्णि सर्वे ॥ ३३ ॥

1. TS[1] अगताः भवन्ति, A[2] अगताः स्तोभा भवन्ति for अगतौ स्तोभौ भवत; KS[2] om. स्तोभौ
4. AM[4] सीमासु for सिमासु
5. A[2]TS[1] अगता भवन्ति for अगतौ भवतः
9. A[2]T स्तोभा न गता भवन्ति for स्तोभो न गतो भवति
16. M[2]L[1]KA[2]TS[1] treat sūtras 33-34 as a single one

वि. वृष्णिसाम्नि सर्वे स्तोभा अगता भवन्ति ॥ ३३ ॥

दी. अभाओवा (र. प्रा. १३७) इति वृष्णि सर्वे स्तोभा अगता भवन्ति । धाऽ३ । ओ । साऽ३ । ओइ । स्वरे परे गतिः । याऽ३ः । ओ । एवमादीनि ॥ ३३ ॥

न वशिप्रत्यये न वशिप्रत्यये ॥ ३४ ॥

वि. नः प्रतिषेधे । वशिप्रत्यये परतः पूर्वः स्तोभो गतिमान् भवति । अभ्यासः प्रकरणसमाप्त्यर्थः ॥ ३४ ॥

इति फुल्लसूत्रविवरणे प्रथमाध्याये गतागते अष्टमः खण्डः ॥ ८ ॥

भा. इति पुष्पसूत्रभाष्ये प्रथमस्य अष्टमी कण्डिका समाप्ता ॥ ८ ॥

दी. वशि-शब्दे प्रत्यये परे सति ओइ-स्तोभस्य न गतिलोपः । ओइ । वशाऽ३ ॥ अभ्यासः प्रकरणसमाप्त्यर्थः ॥ ३४ ॥

इति फुल्लदीपे गतागते पञ्चमप्रपाठकस्य सप्तमः खण्डः ॥ ७ ॥

॥ गतागतं समाप्तम् ॥

---

5. T. ०स्तोभा न गता भवन्ति for स्तोभो गतिमान् भवति
7. K My[1] इति प्रथमस्याष्टमः समाप्तः । इत्यजातशत्रुभट्टोपाध्यायविरचिते पुष्पभाष्ये गतागतं समाप्तम् ॥ A[2] इत्यजातशत्रुविरचिते फुल्लभाष्ये गतागतं समाप्तम् ॥ TS[1] गतागतं समाप्तम् S[8] for the colophon.
8. B[4] प्रथमस्याष्टमी कण्डिका ॥ V[3] गताणतं समाप्तम् for the colophon.
9. M[4] om. न.
11. M[4] om. इति फुल्लदीपे

नवमः खण्डः

[अथ उच्चनीचे प्रस्तावाधिकारः]

वादौ मन्ते नीचैः पुना प्रत्नं मृज्य सुषा
पाहि परिधीं दुहेमꣳशके ॥ १ ॥

वि. & भा. समन्ते प्रस्तावादिर्नीचैर्भवति । **पुनानस्सो** । **प्रत्नंसधस्थ** । **मृज्यमानः** । **सुषावसो** । **पाहिवि** । **परिधीꣳरति** । **दुहानो बभ्र** । **इमंस्तोमम्** । **शके मत्वा समिधिम्** । इत्येतेषु ॥ १ ॥

२ र१ १र
दी. **समन्ते** प्रस्तावस्यादौ **नीचैः** । नीचो भवति । उदाहरणानि— **पुनानस्सोम-**
१र२ १ २१ २ १र२ १ २ १ र २ १ २ १
धारया । **प्रत्नंसधस्थमासदात्** (ऊ. सं. २२४) । **मृज्यमानस्सुहस्तिया** (ऊ. सं. २८८) ।
२१र२१र२ १ २ १ २र १ २ र१२ १
सुषावसोममद्रिभाइः (ऊ. सं. ३२५) । **पाहि विश्वस्माद्रक्षसाः** (ऊ. ए. ४१२) ।
२ १र २ १र २१ २ र १र२ १र २ १ २१ र २ १ २र
परिधीꣳरतिताꣳईहाइ । **दुहानोबभ्रऊधनाइ** (ऊ. ए. ५१५) । **इमꣳस्तोममर्हते-**
र १ र२ १ २१र २र १ २र१ १ २ १
जातवेदसाइ । **शकेमत्वासमिधꣳसाधयाधियाः** (ऊ. अ. ६६७) ॥ १ ॥

थे पुनानायां प्रान्त्ययोः ॥ २ ॥

वि. **पुनानस्सोमायां** (ऊ. सं. २२४) **प्रथमान्त्ययोः** स्तोत्रीययोरुद्गीथादिर्नीचैः । प्राक्थेर्वादावित्यधिकृत्य ॥ २ ॥

भा. **उद्गीथे पुनानायां** (ऊ. सं. २२४) **प्रथमान्त्ययोः** स्तोत्रीययोः समन्ते नीचीभावः । प्रसङ्गादेतदुक्तम् ॥ २ ॥

२ र १ २र १र२१
दी. **पुनानस्सोमधारया** (ऊ. सं. २२४) इति समन्ते **प्रथमान्त्ययोः** स्तोत्री-
२१र २१
ययोः उद्गीथे आदिर्नीचो भवति । **अपोवसा** । तृतीयायां **प्रत्नꣳसधा** । प्रस्तावाधिकारे प्रसङ्गादेतदुक्तम् ॥ २ ॥

---

5. PV^{2}BL^{2}A^{1} नीचो for नीचैर्
6. PB^{4}V^{2}L^{2}A^{1} विश्वस्माद्रक्षसः for वि.
7. PB^{4}A^{2}1^{2}A^{1} om. इत्येतेषु.
11. L^{2} रामिताꣳ M^{2} रमिताम् for राततिाम् L^{1}. इहाइ; for इहा३ः L^{2}. उद्रानो बल for दुहानेबभ्र

ष्टम्भे वयं-प्रत्नम्-रायआ-सुता ॥ ३ ॥

वि. **महावैष्टम्भे** वादिर्नीचैर्भवति । **वयंघत्वा** (ऊ. द. ५८) । **प्रत्नँसधस्थ-** (ऊ. ए. ३८६) । **रायआकूह** (ऊ. क्षु. ८६९) । **सुतासोम** (ऊ. क्षु. ८८०) । इत्येतेषु ॥ ३ ॥

भा. **महावैष्टम्भे** **वयंघत्वा** (ऊ. द. ५८) । **प्रत्नँसध** (ऊ. ए. ३८६) । **रायआकूह** (ऊ. क्षु. ८६९) । **सुतासोम** (ऊ. क्षु. ८८०) । एतेषु प्रस्तावादिर्नीचैः ॥

दी. **महावैष्टम्भे** **वयम्** (ऊ. द. ५८) । **प्रत्नम्** (ऊ. ए. ३८६) । **रायआ** (ऊ. क्षु. ८६९) । **सुता** (ऊ. क्षु. ८८०) । एतेषु प्रस्तावादिर्नीचो भवति । **वयंघत्वोहाइ** । **प्रत्नँसधोहाइ** । **रायआकोहाइ** । **सुतासोमोहाइ** ॥ ३ ॥

दंष्ट्रे च ॥ ४ ॥

वि. **आष्टादंष्ट्रयोर्वादेर्नीचीभावः** ॥ ४ ॥

भा. **दंष्ट्रे चेति** जातिग्रहणम् । आष्टादंष्ट्रयोः प्रस्तावादिर्नीचो भवति । एष उत्सर्गः ॥ ४ ॥

दी. **दंष्ट्रे चेति** जातिग्रहणम् । आष्टादंष्ट्रयोः प्रस्तावादिर्नीचो भवति । **इद्रंविश्वेति** द्वितीयायां **सख्येतइन्द्रवाजिनः** (ऊ. द. ५२) । **सख्येतइन्द्रवाजिनःऐयादौ** (ऊ. सं. २५३) । एवमादीनि ॥ ४ ॥

अनिन्द्रं तवा त्वारं पर्या प्रान्त्ययोः ॥ ५ ॥

वि. **इन्द्रंविश्वा** (ऊ. द. ५२) । **तवाहँसो** (ऊ. द. ६९) । **आत्वाविश** ।

---

2. $KA^{2}M^{1-2}Ts^{1}My^{1}$ वैष्टम्भे for महावैष्टम्भे वादि
3. $KA^{2}M^{2}$ आकुह for आकूह
4. $KM^{1}TM^{2}$ om. इति
6. $A^{1}L^{2}B^{4}$ प्रस्तावादिषु for प्रस्तावादिर्.
11. A^{3} प्रस्तावादौ नीचैर्भावः T प्रस्तावादौ नीचौ भवतः for वादेर्नीचीभावः
15. L^{1} एयादौ for ऐयादौ

अरन्तइन्द्र (ऊ. अ. ५३४)। **परीतोष्याम्** (ऊ. ए. ४७२)। प्रथमान्त्ययोरेतेषु वादे-नींचीभावप्रतिषेधः ॥ ५ ॥

भा. **अन्** प्रतिषेधे। **इन्द्रंविश्वा** (ऊ. द. ५२; ऊ. सं. २५३)। **तवाहँसो** (ऊ. द. ६९)। **आत्वाविशन्तु**। **अरंतइन्द्रकुक्षये** (ऊ. अ. ५३४)। **परीतोष्याम्** (ऊ. ए. ४७२)। प्रथमान्त्ययोरेतेषु प्रतिषेधः ॥ ५ ॥

दी. **अन्** प्रतिषेधे। **इन्द्रंविश्वाअवीवृधन्** (ऊ. द. ५२)। इत्याद्ये आष्टादंष्ट्रे।
१ २ १२र र १२र१र १ २र१२र र १२र१र
इन्द्रंविश्वाअवीवृधन्नैयादौ (ऊ. सं. २५३)। इत्युत्तरे आष्टादंष्ट्रे। **तवाहँसोमरारणऽयादौ** (ऊ. द. ६९)। इत्युत्तरे आष्टादंष्ट्रे। **आत्वाविशन्त्विन्दवः**। **अरंतइन्द्रकुक्षये**
१२र१र २ र १र२र१र
(ऊ. अ. ५३४)। इत्याद्ये आष्टादंष्ट्रे। **परीतोषिश्चतासुतमैयादौ** (ऊ. ए. ४८२)।
१ २ १ २१र२र१र
तृतीयायां **अदब्धः सुरभिन्तरऐयादौ** इत्युत्तरे आष्टादंष्ट्रे। एतेषु प्रस्तावादिर्नीचो भवति ॥

शीये विव्य युङ्क्ष्व ॥ ६ ॥

वि. **उद्वंशीये विव्यक्थमहिना**। **युङ्क्ष्वाहिकेशि**। अनयोर्नीचीभावः ॥ ६ ॥

भा. **उद्वंशीये विव्यक्थ**। **युङ्क्ष्वाहिकेशिना**। प्रस्तावादिर्नीचैः ॥ ६ ॥

१र र २ १ २ १ २ १
दी. **आत्वाविशन्त्विन्दवआ** (ऊ. स. ७१९) इत्युद्वंशीये द्वितीयायां **विव्यक्थ-**
२ १र २ १ १र २ र २ १र १र ५२र
महिनावृषन्ना। **गायन्तित्वा** (ऊ. द. २०८) इत्युद्वंशीये तृतीयायां **युङ्क्ष्वाहिकेशिना-**
१२र१
हरीआ। एतयोः प्रस्तावादिर्नीचो भवति ॥ ६ ॥

क्षिते शुभ्रऽरायस्सम् ॥ ७ ॥

वि. & भा. **सन्धुक्षिते शुभ्रमन्धो**। **रायस्समुद्रान्**। इत्यनयोर्नीचीभावः ॥

१ र २ १
दी. **असाव्यँशो**। **हाइ** (ऊ. अ. ६१७) इत्यैडसैन्धुक्षिते द्वितीयायां प्रस्तावादि-
२ १ १ र २र १
र्नीचो भवति। **शुभ्रमन्धो**। **हाइ**। **तिस्रोवाचो**। **हाइ** (ऊ. अ. ५९२)। इत्यैडसैन्धुक्षिते
२र१
तृतीयायां प्रस्तावादिर्नीचो भवति। **रायस्समो**। **हाइ** ॥ ७ ॥

---

7. M[4] om. तवाहऽसोमरारणैयादौ इत्युत्तरे आष्टादंष्ट्रे

14. M[4] विशंत्वादावआ for विशन्त्विन्दवआ

18. V[2] इति च for इत्यनयोः; B[4] एतौ नीचौ भवतः, PS[2]A[1] च नीचैर्भवति for अनयोर्नीचीभावः

हिष्ठीयासितयोरयम् ॥ ८ ॥

वि. **यद्वाहिष्ठीयासितयोरयं पूषा रयिर्भगः** (ऊ. अ. ५८७; ऊ. ए. ४५४) इत्यस्य वादेर्नीचीभावः ॥ ८ ॥

भा. **यद्वाहिष्ठीयासितयोरयंपूषा** (ऊ. अ. ५८७; ऊ. ए. ४५४) इति नीचीभावः ॥ ८ ॥

२१२२१२२१ ॰२ २ १२
दी. **अयंपूषारयिर्भगः** । **अयंपूषोवा** (ऊ. अ. ५८७) इत्युत्तरे यद्वाहिष्ठीये
२१२२२२ १
अयंपूषारयाइः (ऊ. ए. ४५४) इत्याद्ये **आसिते** च प्रस्तावादिर्नीचः । उदाहरणे उक्ते॥

अया हरिश्री ॥ ९ ॥

वि. **हरिश्रीनिधने अयाचित्तायाम्** (ऊ. स. ७६०) नीचीभावः ॥ ९ ॥

भा. **हरिश्रीनिधने अयाचित्त** (ऊ. स. ७६०) इति नीचैः ॥ ९ ॥

१२२ १ ॰१२ . २२ १२२ १
दी. **वृषापवस्वधारया** । **वृषापावा** (ऊ. स. ७६०) इति **हरिश्रीनिधने**
२ १२ २ १२ २१२ २२
तृतीयायां प्रस्तावादिर्नीचः । **अयाचित्तोविपानया** ॥ ९ ॥

लीये याभि सुतादिवः पी ॥ १० ॥

वि. **रोहितकूलीये अयाचित्तोविपा** (ऊ. द. १२३)। **अभिद्रोणानिबभ्रवः**। **सुताइन्द्रायवा** (ऊ. अ. ५४६)। **दिवऽपीयूषम्** (ऊ. अ. ६४६)। एतेषु वादेर्नीचीभावः॥

भा. रोहितकूलीये **अयाचित्तः** (ऊ. द. १२३) **अभिद्रोणानि** । **सुता इन्द्राय वा** (ऊ. अ. ५४३) **दिवऽपीयूषम्** (ऊ. अ. ६४६) एतेषु प्रस्तावादिर्नीचीभवति ॥ १० ॥

१२२ १ २ २ २ २ १२
दी. **वृषापवस्वधारयाऽ२** (ऊ. द. १२३) इति **रोहितकूलीये** तृतीयायाम् **अया-**
॰ १२ २ १ १ २ २२ २ १
चित्तोविपा । अत्र प्रस्तावादिर्नीचः । **प्रसोमासोविपाः** (ऊ. अ. ५४६) इति रोहित-
२ १ २ २२ १
कूलीये द्वितीयायाम् **अभिद्रोणानिबा** । तृतीयायां **सुता इन्द्रायबा** । अत्र प्रस्तावादिर्नीचः।

---

3. A^2 अत्र for अस्य ; A^{2}KS^{1}M$^{1-2}$T om. वादेर्

15. KS^{1}A^{2}TM$^{1-2}$ om. वादेर् ; A^{2}M$^{1-2}$T नीचैः for नीचीभावः

अध्वर्यो अद्रिभाइः (ऊ. अ. ६४६) इति रोहितकूलीये तृतीयायां **दिवऽपीयूषम्** । अत्र प्रस्तावादिर्नीचः ॥ १० ॥

विघ्ना कू ॥ ११ ॥

वि. & भा. **राज्याकूपारे विघ्नाहित्वा** (ऊ. द. २४) इति प्रस्तावादिर्नीचैः ॥

दी. **आतूनइ** (ऊ. द.२४) इति राज्याकूपारे द्वितीयायां **विघ्नाहित्वातुवि** । अत्र प्रस्तावादिर्नीचः॥ ११ ॥

शुद्धीयेऽभि द्वे गिरिम्-पुरोजि-प्र ॥ १२ ॥

वि. **शुद्धाशुद्धीये अभीनोवाजसाऽतमाम्** (ऊ. द. १६५) इत्याद्ययोः स्तोत्रीययोः । **गिरिंनपुरु** (ऊ. ए. ५०३) । **पुरोजि**-(ऊ. अ. ६१६)-प्रथमायाम् । एतेषु प्रस्तावादिर्नीचैः ॥ १२ ॥

भा. **शुद्धाशुद्धीये अभीनोवाजसातमाम्** (ऊ. द. १६५) इति **द्वे** आद्ये स्तोत्रीये । **गिरिंनपुरु** (ऊ. ए. ५०३) **पुरोजिती**-(ऊ.अ.६१६)-प्रथमायां च प्रस्तावादिर्नीचैः ॥

दी. **अभीनोवाजसातमाम्** (ऊ. द. १६५) इति **शुद्धाशुद्धीये** आद्ये **द्वे** स्तोत्रीये । द्वितीयायां **वयंतेअस्यराधसाः** । **तंवोदस्ममृतीषहाम्** । (ऊ. द. ५०३) इति **शुद्धाशुद्धीये** तृतीयायां **गिरिन्नपुरुभोजसाम्** । अत्र प्रस्तावादिर्नीचः । **पुरोजितीवोअन्धाऽ३साः** (ऊ. स. ७७७) इति शुद्धाशुद्धीये प्रथमायां प्रस्तावादिर्नीचः ॥ १२ ॥

त्वाष्ट्र्योश्च ॥ १३ ॥

वि. & भा. ऊर्ध्वेडेत्वाष्ट्रीसाम्नि आकारणिधने च **पुरोजि**- (ऊ. सं. २७२) -प्रथमायां प्रस्तावादिर्नीचैः ॥ १३ ॥

दी. च-कारात् पुरोजितीप्रथमायाम् । **पुरोजितीवोअन्धसाः** । **सुताऽ२यमाऽ२**

---

4. B[4] नीचः, PS[2]V[2]A[1] नीचीभवति for नीचैः, S[3] प्रस्तावादिर्नीचीभावः for प्रस्तावादिर्नीचैः

6. PL[2]V[2]A[1] नीचो भवति for नीचः

8. A[2] अत्र for आद्ययोः

(ऊ. सं. २७२) इति ऊर्ध्वेडत्वाष्ट्रीसाम्नि । **पुरोजितीवोअन्धसः । सुताहाउ** (ऊ. स. ७९२) इत्याष्कारणिधने त्वाष्ट्रीसाम्नि प्रस्तावादिर्नीचः ॥ १३ ॥

सुता च प्रान्त्ययोः ॥ १४ ॥

वि. & भा. **सुताऽसोमासो** (ऊ. अ. ६१५) **प्रथमान्त्ययोः** स्तोत्रीययोः ऊर्ध्वेड-त्वाष्ट्रीसाम्नि प्रस्तावादिर्नीचैः ॥ १४ ॥

दी. **सुतासोमधुमत्तमाः । सोमाऽ२इन्द्राऽ२** (ऊ. अ. ६१५) इति ऊर्ध्वेड-त्वाष्ट्रीसाम्नि प्रथमायाम् । तृतीयायां च **सहस्रधारऽपवताइ** । अत्र प्रस्तावादिर्नीचः ॥ १४ ॥

आग्नेये पुरोज्यग्निम् ॥ १५ ॥

वि. **बृहदाग्नेये पुरोजि-** (ऊ. सं. ३१९) **अग्निन्नरो** (ऊ. अ. ६४२)। **एतयोर्वादिर्नीचैः** ॥ १५ ॥

भा. **बृहदाग्नेये पुरोजि-** (ऊ. सं. ३१९) **अग्निनरः** (ऊ. अ. ६४२) इति च नीचीभवति ॥ १५ ॥

दी. **पुरोजितीवोअन्धसः । ईयइयाहाइ** (ऊ. सं. ३१९) इति बृहदाग्नेये **अग्निन्नरोदीधितिभिः । ईयइयाहाइ** (ऊ. अ. ६२४) इति बृहदाग्नेये च प्रस्तावादिर्नीचः ॥

आशु च ॥ १६ ॥

Continued from previous page. l. 18 PA[1]L[2]B[4]V[2]S[1-2] ऊर्ध्वेड° for ऊर्ध्वेडे, L[2] before ऊर्ध्वेडे adds: द्वे त्वाष्ट्र्यौ । त्वाष्ट्रिये, A[1]B[4] द्वयोः त्वाष्ट्र्योः; M[1] आकार° for आष्कार°

4. B[4]L[2]A[1] om. स्तोत्रीययोः

10. नीचीभावः for नीचै ; वादी for वादिर्

12. नीचीभवतः for नीचीभवति

15. P om. च. The MSS KA[2]M[1-2] and PS[1]A[1]B[4]V[2-3]B[1] read आशु च and नाश्व-तव-प्रसो-सनः as two separate sūtras whereas M[4]L[1], and R. Simon take these two sūtras as a single one but drop च after आशु. The V[1] and B[3] do not mark punctuation after आशु, which indicates that the sutra does not end there. The bhāṣya and vivaraṇa take आशु च as a vidhi-sūtra and the next one as an apa-

वि. आशुभार्गवे च प्रस्तावादिर्नीचैर्भवति ॥ १६ ॥

भा. आशुभार्गवे च उद्घातादिषु प्रस्तावादि नीचम् ॥ १६ ॥

नाध्व-तव-प्रसो-सनः ॥ १७ ॥

वि. अध्वर्योअद्रि (ऊ. द. १४१) तवत्यइ (ऊ. द. १४१) प्रसोमासोविपश्चितः (ऊ. ए. ४४५) प्रसोमासोमदच्युतः (ऊ. ए. ४३४) सनइन्द्राय (ऊ. स. ७२९) एतेषु वादेर्नीचीभावप्रतिषेधः ॥ १७ ॥

भा. नः प्रतिषेधे । अध्वर्यो (ऊ. द. १४१) तवत्यइन्दो (ऊ. द. १४१) प्रसोमासोवि (ऊ. ए. ४४५) स न इन्द्राय (ऊ. स. ७२९) । एतेष्वपवादः ॥ १७ ॥

१ २र १ २ २
दी. (आशु नाध्व-तव-प्रसो-सनः ॥) अध्वर्योअद्रि । भिस्सइऽ३ताम् (ऊ. द.
१ र २र१र २ २
१४१) द्वितीयायां तवत्यइन्दो इत्याशुभार्गवे । प्रसोमासोवि । पश्चाऽ३इताः (ऊ. ए.
२१र र २र २
४४५) इत्याशुभार्गवे । उद्घाते । जातमन्धाऽ३सा: (ऊ. स. ७२९) इत्याशुभार्गवे
१२१
द्वितीयायां सनइ । एतेषु प्रस्तावादिर्न नीचः ॥ १६-१७ ॥

पर्णे च ॥ १८ ॥

वि. विलम्बसौपर्णे चाशुभार्गववदुत्सर्गापवादौ ॥ १८ ॥

---

vāda sūtra. The former says that the initial syllable of prastāva of āshubhārgava will have **nicibhāva**, low tone. The next succeeding sūtra cites the exceptions to this gneral rule giving instances where all this general rule does not work. Since the function of these two sūtras are altogether different and contradictory, we have accepted them as two indipendent sutras for which we have support of bhāṣya and vivaraṇa of Ajātashatru. Richard Simon, however, seems to have followed phulladipa in this respect.

1. A[2] om. भवति ; M[1-2] नीची० for नीचैर्
2. B[4] om. च; A[1] प्रस्तावादिर्नीचः for प्रस्तावदि नीचम्
3. A[2]M[1-2]T प्रसोमा for प्रसो
5. KM[1-2]TS[1] मदच्युत (M[1-2] ०च्युतश्च) for ०विपश्चितः -प्रसोमासोमदच्युतः
12. नीचो न भवति for न नीचः

भा. **विलम्बसौपर्णे च** आशुभार्गववदुत्सर्गापवादौ द्रष्टव्यौ । एतान्येव प्रत्युदाहरणानि ॥ १८ ॥

१ २र १ २ १ २१ २
दी. **अध्वर्यो अद्रिभिस्सुतम्** । **ईयइयाहाइ** (ऊ. द. १४६) इत्यादि **विलम्बसौपर्णे** च न प्रस्तावादिर्नीचः । अत्र चकारादध्वर्यो ।
१ ३ १ २र१ २
तवत्यइन्दोअन्धसः (ऊ. द. १४६) ।
१२१२र १
सनइन्द्राय यज्यवे (ऊ. स. ७६८) एतेषु विलम्बसौपर्णे न प्रस्तावादिर्नीचः ॥ १८ ॥

अप्रसो ॥ १९ ॥

वि. **प्रसोमासोविपश्चितः**-(सा. ७६४)-**प्रसोमासोमदच्युतयोः** (सा. ७६९) योः [विलम्बसौपर्णस्य] अभावान्न भवत उत्सर्गापवादौ ॥ १९ ॥

भा. **प्रसोमासोविपश्चित** (सा. ७६४) इत्यस्यापवादः ॥ १९ ॥

दी. **प्रसोमासोविपश्चितः** (सा. ७६४) इत्यत्र विलम्बसौपर्णस्याभावात् नीचस्य निषेधः ॥ १९ ॥

षूक्ते शुभ्रमुच्चैनाया ॥ २० ॥

वि. & भा. **गौषूक्ते शुभ्रमन्धो** (ऊ. सं. २८१) **उच्चाते जातम्** (ऊ. ए. ४५६) **एनाविश्वा** (ऊ. ए. ४५६) **अयाचित्तो** (ऊ. स. ७८८) एतेषु वादिर्नीचैः ॥ २० ॥

१ र २ १ र र २ र १
दी. **असाव्यंशुर्मौ** । **हौहोवाहाइ** । **दाया** (ऊ. सं. २८१) इति गौषूक्ते
२ १ र २र१र
द्वितीयायां **शुभ्रमन्धोदेवौ** । अत्र प्रस्तावादिर्नीचः ॥

२ १र र२र र
उच्चातेजातमौ (ऊ. ए. ४५६) इति गौषूक्ते प्रथमायां तृतीयायां च प्रस्तावादिर्नीचः ।
२र१र २र १ र
एनाविश्वानियौ ॥

१२र १ २१र
वृषापवस्वधौ (ऊ. स. ७८८) इति गौषूक्ते तृतीयायां प्रस्तावादिर्नीचः ।
११र
अया-

---

7. $My^1KM^{1-2}IS^1A^2$ प्रसोमासो वि (A^2 om. वि) मदच्युतयोर् for प्रसोमासोविपश्चितः .... मदच्युतयोः

13. $PV^2B^4L^2A^1$ om. जातम्

14. $PV^2B^4L^2A^1$ इति नीचीभावः for एतेषु वादिर्नीचैः

15. L^1 गौषूक्त for गौषूक्ते

चित्तोविप्रौ ॥ २० ॥

दक्षसंहितयोः स्वादिमान्त्ये ॥ २१ ॥

वि- दक्षणिधनसंहितयोः स्वादिष्ठायां मध्यमान्त्ययोः स्तोत्रीययोः वादेर्नीचीभावः ॥ २० ॥

भा. दक्षणिधनसंहितयोः स्वादिष्ठयेति मध्यमान्त्ये स्तोत्रीये नीचप्रस्तावे भवतः ॥

दी. **स्वादिष्ठयामदिष्ठया** । **औहोवा** (ऊ. ए. ४७८) इति **दक्षणिधने मौक्षे** । **स्वादिष्ठयाम** । **दाऽ२इष्ठया** (ऊ. द. ८) इति **संहिते** च **मध्यमान्त्ये** स्तोत्रीये नीचप्रस्तावे भवतः । दक्षणिधने द्वितीयायां **रक्षोहाविश्वचर्षणिः** । अन्त्यायां **वरिवोधातमोभुवः** । संहिते द्वितीयायां **रक्षोहाविश्व** । अन्त्यायां **वरिवोधात** ॥ २१ ॥

संह्यदाभ्यस्तिस्रश्च ॥ २२ ॥

वि- **संहिते अदाभ्यः** (ऊ. ए. ४१८) **तिस्रोवाचउत्** (ऊ. सं. ३२९) एतयोस्तृचयोर्मध्यमान्त्ययोर्वादिर्नीचैः ॥ २२ ॥

भा. संहिते विशेषः । **अदाभ्यःपुरः** (ऊ. ए. ४१८) **तिस्रोवाच उदीरित** (ऊ. सं. ३२९) इति च तृचयोर्मध्यमान्त्ये स्तोत्रीये नीचप्रस्तावे ॥ २२ ॥

दी. **अदाभ्यःपुरः** (ऊ. ए. ४१८) इति **संहिते तिस्रो वाच उत्** (ऊ. सं. ३२९) इति **संहिते च** । च-कारान्मध्यमान्त्ये स्तोत्रीये नीचप्रस्तावे भवतः । **अदाभ्यःपुरः** इति संहिते द्वितीयायाम् **अभिप्रयांसि** । अन्त्यायां साह्वान्विश्वाअ । **तिस्रोवाचउत्** । इति संहिते द्वितीयायाम् **अभिब्रह्मीर** । अन्त्यायां **रायस्समुद्रान्** ॥ २२ ॥

षडन्ते तृचयोर्द्वे ॥ २३ ॥

---

2. A^2M^{1-2} T °मान्त्यः L^1 °मान्ते for °मान्त्ये

3. KMy^1 स्वादिमध्यमान्त्ये स्तोत्रीये for स्वादि ... स्तोत्रीययोः; $A^2M^{1-2}TS^1$ स्वादि for स्वदिष्ठायां; $A^2M^{1-2}TS^1$ om. स्तोत्रीययोः; M^{1-2} वादिर्नीचैः; KMy^1 नीचादी भवतः for वादेर्नीचीभावः

5 V^2P मध्यमान्ते for मध्यमान्त्ये; PV^2 नीचे for नीचं; V^2 प्रस्तावौ for प्रस्तावे

12. T स्तावादिर् for वादिर्; K^1My^1 मध्यमान्ते स्तोत्रीये नीचादी भवतः for मध्यमान्त्ययोर्वादिर्नीचैः

19. A^2M^{1-2} T add: च after षडन्ते and द्वे after द्वे

वि. **वषडन्ते तृचयोर् अभित्वा पू-** (ऊ. ए. ४३०) **विधुन्दद्राणयोर्** (ऊ. प्रा. ८४४) द्वे द्वे स्तोत्रीये नीचादी भवतः ॥ २३ ॥

४ ३ ४२२३ ४२५ २
भा. **वषट्कारणिधने अभित्वापूर्वपीतये** (ऊ. ए. ४३०) **विधुन्दद्राणम्** (ऊ.
प्रा. ८४४) इति च तृचयोर्द्वे द्वे आद्ये स्तोत्रीये नीचप्रस्तावे भवतः ॥ २३ ॥

४ ३ ४२२३ ४२५२ ... ४ ३ ४२ ४५२
दी. **अभित्वापूर्वपीतये** (ऊ. ए. ४३०) इति वषट्कारणिधने **विधुन्दद्राणꣳसमने**
(ऊ. प्रा. ८४४) इति वषट्कारणिधने च तृचयोराद्ये द्वे द्वे स्तोत्रीये नीचप्रस्तावे भवतः ।
४३२४ ३ ४२५ ... ४२ ३२
अभित्वापूर्वेति द्वितीयायां **रुद्रागृणन्तपूर्वियम्** । विधुन्दद्राणम् इति द्वितीयायां **शाक्मना-**
४२ ३२ ४५
शाकाअरुणः ॥ २३ ॥

पुना च ॥ २४ ॥

वि. **पुनानस्सोमायां** (ऊ. ए. ३९४) वषडन्ते वादिर्नीचैर्भवति ॥ २४ ॥

भा. पुनानस्सोमायां वषडन्ते प्रस्तावादिर्नीचैः ॥ २४ ॥

४ २३ ४२ ३२२५२
दी. **पुनानस्सोमधारया** (ऊ. ए. ३९४) इति **वषट्कारणिधने** प्रस्तावादिर्नीचः ॥

सेधे पुना-परी-तवा मन्तवत् ॥ २५ ॥

वि. उत्सेधे **पुनानस्सो** (ऊ. द. २११) **प्रत्नं सध** ॥ **सुषावसो** (ऊ. ए. ४९४) ॥ **परिधींरति** । **दुहानोबभ्र** (ऊ. सं. ३३२) एतेषु **समन्तवत्** प्रस्तावादिर्नीचैः ॥ २५ ॥

भा. **उत्सेधे पुनानस्सो** (ऊ. द. २११) **परीतोषि** (ऊ. ए. ४९४) **तवा-**
हꣳसो (ऊ. सं. ३३२) त्रिष्वेतेषु समन्तवत् प्रस्तावादेर्नीचीभावः ॥ २५ ॥

४ २ ३ ४२ ३२४५२ ... ३४२३२४ ३२
दी. **पुनानस्सोमधारया** । पः (ऊ. द. २११) इति **उत्सेधे** । **परीतोषिश्वता-**

---

1. $A^2M^{1-2}T$ षडन्ते for वषडन्ते; M^{1-2} T add: च after वषडन्ते
2. K देव for द्वे
10. M^{1-2} °सोमवषडन्ते for सोमायां वषडन्ते; KS^1A^2T षडन्ते for वषडन्ते; $KA^2M^{1-2}TS^1$ om. वादिर् ; $KA^2M^{1-2}S^1T$ नीचादिर् for नीचैर्
13. L^1 त्सेधे for सेधे
15. $KA^2M^{1-2}ST^1$ om. समन्तवत्
17. V^2P °वादि B^4 °वादिर् for °वादेर्

सुतम् । **सोमः** (ऊ. ए. ४९४) इत्युत्सेधे । **तवाहँसोमरारण** । **सख्ये** (ऊ. सं. ३३२) इत्युत्सेधे च समन्तवत् प्रस्तावादिर्नीचः । **पुनानस्सोमे**त्युत्सेधे प्रथमायां तृतीयायां च प्रस्तावादिर्नीचः । **प्रत्नᳲसधस्थमासदत्** । **प्रत्नम्** ।। **परीत** (ऊ. ए. ४९४) इत्युत्सेधे द्वितीयायां प्रस्तावादिर्नीचः । **सुषावसोममद्रिभिः** ।। **तवाहᳲसोम**-[इत्युत्सेधे] द्वितीयायां तृतीयायां च प्रस्तावादिर्नीच । **परिधीᳲरतिताᳲइहि** । **दुहानोबभ्रऊधनि** । समन्ते एतेषां नीचीभावः ।। २५ ।।

प्रत्नं प्र ।। २६ ।।

वि. **प्रत्नं पीयूषायां** (ऊ. ए. ५२५) उत्सेधे प्रथमायां वादेर्नीचीभावः ।। २६ ।।

पिबाभिसो द्वे श्री ।। २७ ।।

वि. **पिबासुतस्यरसिनः** (ऊ. ए. ५१०) **अभिसोमासयोर्** (ऊ. ए. ४५६) द्वे द्वे नीचीभवतः । **श्रीणन्तश्च** (ऊ. ए. ४९५) नीचादिः ।। २७ ।।

भा. उत्सेधे एव **प्रत्नं पीयूषम्** (ऊ. ए. ५२५) प्रथमायां **पिबासुतस्य** (ऊ. ए. ५१०) **अभिसोमास** (ऊ. ए. ४५७) इति च तृचयोर्द्वे द्वे आद्ये स्तोत्रीये [नीचीभवतः।] **श्रीणन्त** (ऊ. ए. ४९५) इति [अत्र] च नीचीभावः ।। २६-२७ ।।

दी. **प्रत्नं पीयूषंपूर्व्यंयदु** (ऊ. ए. ५२५) इति प्रथमायाम् । **पिबासुतस्य रसिनः** (ऊ. ए. ५१०) इत्युत्सेधे । **अभिसोमासआयवः** (ऊ. ए. ४५६) इत्युत्सेधे च आद्ये द्वे स्तोत्रीये नीचप्रस्तावे । **पिबासुतस्ये**ति द्वितियायाम् । **अस्माᳲअवन्तुते धियो** । **स्मान्** ।। **अभिसोमास** इति द्वितीयायां **मत्सरासो मदच्युतः** । **मत्स** ।। **श्रीणन्तोगोभिरुत्तरम्**

---

7. The bhasya and फुल्लदीप combine sūtras 26 and 27 and comment accordingly

10. K सोमायायोर् for सोमासयोर्

12. PB[4]L[2] om. एव

13. L[2]B[4] om. द्वे आद्ये

(ऊ. द. ४९५) इत्युत्सेधे च प्रस्तावादेर्नीचीभावः ॥ २६-२७ ॥

सद्मनेऽयम् ॥ २८ ॥

वि. & भा. और्ध्वसद्मने अयंतइन्द्रसोम (अ. द. २३) इति नीचादिः ॥ २८ ॥

दी. अयंतइन्द्रसोमः (२१ २ १२२) । उवाहाइ (२ २) (ऊ. द. २३) इत्यौर्ध्वसद्मने प्रस्तावादेर्नीचीभावः ॥ २८ ॥

दासे च ॥ २९ ॥

वि. दैवोदासे च अयंतइन्द्र (ऊ. द. २२) एव वादिर्नीचैः ॥ २९ ॥

भा. रात्रिदैवोदासे अयंतइन्द्र (ऊ. द. २२) इति नीचैः ॥ २९ ॥

दी. अयंतइन्द्रसोऽ४मः (४३४ ३ ५) (ऊ. द. २२) इति **रात्रिदैवोदासे** च प्रस्तावादेर्नीचीभावः ॥ २९ ॥

आसितेऽपघ्नन् ॥ ३० ॥

वि. गायत्र्यासिते अपघ्नन् पवसे (ऊ. द. १६०) इत्यत्र वादिर्नीचैः ॥ ३० ॥

भा. गायत्रीसामासिते अपघ्नन् पवसे (ऊ. द. १६०) इति नीचैः ॥ ३० ॥

दी. पवस्वदेवआ (३४ ५२४ ५२) (ऊ. द. १६०) इति **गात्रीसामासिते** तृतीयायाम् । अपघ्नन् पवस इति प्रस्तावादिर्नीचः ॥ ३० ॥

स्रुचे मन्द्र ॥ ३१ ॥

---

1 & 5. $L^{1}M^{4}$ प्रस्तावादिर् for प्रस्तावादेर्; M^{4} नीच॰, L^{2} नीचो for नीची॰

3. $PL^{2}B^{4}V^{2}A^{1}$ om. इन्द्रसोम; $PL^{2}B^{4}V^{2}A^{1}$ नीचीभावः for नीचादिः

6. L^{1} om. दासे च and the commentary thereon.;

7. S^{2} adds: इहवद् before दैवो; $KS^{1}A^{2}M^{12}T$ नीचादिः for वादिर्नीचैः

8. $V^{2}PL^{2}A^{1}$ नीचीभावः for नीचैः

9. M^{4} प्रस्तावादिर्नीचभावः for प्रस्तावादेर्नीचीभावः

12. $M^{1}M^{2}$ गायत्र्यामासिते, T गायत्रीसामासिते for गायत्र्यासिते; $KA^{2}M^{12}TS^{1}My^{1}$ नीचादिः for इत्यत्र वादिर्नीचैः

वि. यौक्तस्रुचे मन्द्रयाया (ऊ. स. ७८०) इत्यत्र वादिर्नीचैः ॥ ३१ ॥

भा. यौक्तस्रुचे मन्द्रयाया (ऊ. द. ७८०) इति नीचैः ॥ ३१ ॥

दी. सोमउष्वाणस्सो। तृभाइः (ऊ. स. ७८०) इति यौक्तस्रुचे द्वितीयायां मन्द्रयायातिधा इति प्रस्तावादेर्नीचभावः ॥ ३१ ॥

मन्तवदुक्थे ॥ ३२ ॥

वि. बार्हदुक्थे समन्तवदुच्चनीचे भवतः। पुना-प्रत्नं-सुषा-परिधीं-दुहेति। एतेषु वादेर्नीचीभावः ॥ ३२ ॥

भा. बार्हदुक्थे पुनानस्सो-परीतोषिञ्च-तवाहंसो-तृचेषु समन्तवदुच्चनीचत्वम् ॥

दी. पुनानस्सोम। धाऽ२रया (ऊ. स. ६८५) इति बार्हदुक्थे परीतोषिञ्च। ताऽ२सुताम् (ऊ. सं. ३६९) इति बार्हदुक्थे तवाहँसोमाराऽ२रणा (ऊ. सं. ७७४) इति बार्हदुक्थे च समन्तवदेतेषां प्रस्तावादिर्नीचः। पुनान इति प्रथमान्त्ययोः प्रत्नᳶसधस्थ। परीत इति द्वितीयायां सुषावसोमम्। तवाहम् इति द्वितीयतृतीययोः परीधीᳶरति। दुहानो बभ्रों ॥ ३२ ॥

प्राहिन्वोच्चैः ॥ ३३ ॥

वि. & भा. प्रहिन्वान (ऊ. द. १५३) इति बार्हदुक्थे प्रस्तावादिरुच्चैः ॥ ३३ ॥

दी. प्रहिन्वानऋ। ताऽ२म् बृहात् (ऊ. द. १५३) इति बार्हदुक्थे प्रस्तावादिरुच्चैः ॥ ३३ ॥

---

1. KA²M¹M²TS¹ om. इत्यत्र; KA²M¹M² IS¹My¹ नीचादिः for वादिर्नीचैः
2. A¹L² नीचम्, for नीचैः
4. M⁴ प्रस्तावे for प्रस्तावादेर्; L¹ नीचः for नीचभावः
6. A²T दुहेमं शके, M¹M² दुहानो for दुहेति
7. T. वादिर्नीचैः भवति for वादेर्नीचीभावः
16. S² वादिः for प्रस्तावादिः, KA²M¹M²TS¹ om. प्रस्तावादिः
17 KM¹M²S¹ उच्चैर्भावः, A²T उच्चभवति for उच्चैः

शङ्कुन्यस्यप्येष सर्वः ॥ ३४ ॥

वि. **शङ्कुनि अस्य पीत्वा** (ऊ. सं. २५०b) **एष स्य धारया** (ऊ. स. ७००) सर्वासु स्तोतीयासु वादिर्नीचैः ॥ ३४ ॥

भा. शङ्कुनि **अस्य पीत्वा** (ऊ. सं. २५०b) **एष स्य धारया** (ऊ. स. ६००) इति **सर्वस्तृचो** नीचप्रस्तावादिः ॥ ३४ ॥

दी. **पवस्वामा । एऽ२ । धुमा । त्तमाः** (ऊ. सं. २५०) इति शङ्कुनि तृतीयायाम् **अस्यपीत्वा** अत्र प्रस्तावादिर्नीचः । **एषस्यधा । एऽ३२रया ॥ सुताः** । (ऊ. स. ७००) इतिं शङ्कुनि सर्वत्र च प्रस्तावादिर्नीचः । द्वितीयायां **क्रीडन्नुर्मिरा** । तृतीयायां **निर्गाअका** ॥

स्वय वाश्वे ॥ ३५ ॥

वि. **श्यावाश्वे द्वियँ पश्वस्वय** (ऊ. ए. ४६५) इति **स्वयशब्दो** नीचो भवति मन्द्रे ॥ ३५ ॥

भा. **श्यावाश्वे द्वियँ पश्वस्वय** इति **स्वयशब्दो** मन्द्रे नीचो भवति ॥ ३५ ॥

दी. **पराऽ३१इ । त्याऽ३ ह । यँतम्** (ऊ. ए. ४७५) इति श्यावाश्वे द्वितीयायां **द्वियाऽ३१म् । पाऽ३श्व । स्वय** । अत्र स्वयशब्दो मन्द्रे स्वरे भवति ॥ ३५ ॥

पन काण्वे ॥ ३६ ॥

वि. भा. **काण्वे पन**-शब्दो नीचो भवति मन्द्रे । **नघेमन्यदा पपन** (ऊ.द. २०) इति ॥ ३६ ॥

---

3. $KA^2M^{1-2}TS^1$ om. स्तोत्रीयासु वादिर्

10. $A^2M^{1-2}T$. मन्द्रो for नीचो

14. M^4 मन्द्रस्वरो for मन्द्रे स्वरे.

15. s^1 adds; मन्द्रे to the sūtra पन काण्वे.

16. M^{1-3} trans. मन्द्रे after काण्वे; KA^2T adds; मन्द्रे काण्वे and s^3 मन्द्रे काण्वे साम्नि after भवति and delete काण्वे from the beginning; P. मन्द्रे स्वरे for मन्द्रे. $PV^2B^4A^1L^2$ om. नघेमन्यदापपन इति.

दी. वयामूऽ३त्वातदिदर्थाः (ऊ. द. २०) इति काण्वे द्वितीयायां नघेमाऽ३-न्यदापपना। अत्र पन-शब्दो मन्द्रे स्वरे भवति ॥ ३६ ॥

श्येते द्वे योनाविन्द्रक्रत्वायां च ॥ ३७ ॥

परमज्याः स्वादोर्-वांवृ-पुरोजि ॥ ३८ ॥

मा उ त्वेति सर्वः ॥ ३९ ॥

वि. श्यैते योनौ द्वे स्तोत्रीये नीचादी भवतः। इन्द्रक्रत्वायां च द्वे॥ परमाज्याः। स्वादोर् [इति प्रथमा]। वावृधानः। पुरोजीति प्रथमा ॥ इमाउत्वापुरू-सर्वस्तृचः। एतेषु वादेर्नीचीभावः ॥ ३७-३९ ॥

भा. श्यैते योनाविन्द्रक्रत्वायां च द्वे द्वे आद्ये स्तोत्रीये। परमज्याः। स्वादो-रित्थेति प्रथमा। वावृधानः। पुरोजि-प्रथमा। इमा उ त्वेति सर्वस्तृचः। एतेषु प्र-स्तावादिर्नीचैः ॥ ३७–३९॥

(श्यैते द्वे योनाविन्द्रक्रत्वायां च ॥)

दी. अभिप्रवस्सुरा (ऊ.द. ४३) इति श्यैते। इन्द्रक्रतुन्नआ (ऊ. सं. ३४१) इति श्यैते च आद्ये द्वे द्वे स्तोत्रीये नीचप्रस्तावे भवतः। अभिप्रव इति द्वितीयायां सहस्रेणवशि। इद्रक्रतुभिति द्विर्तीयायां जीवाज्योतिरशी ॥ ३७ ॥

(परमज्याः स्वादोर्वावृ-पुरोजि ॥)

आनोविश्वासु (ऊ. ए. २७३) इति श्यैते द्वितीयायां परमज्याऋची। स्वादो-रित्थाविषू (ऊ. ए. २७८) इति श्यैते प्रथमायाम्। तदिदासभुव (ऊ. ए. ५२६)

2. M[1] मन्द्रस्वरो for मन्द्रे स्वरे.
6. S[2] after च द्वे adds : स्तोत्रीये
7. KA[2]S[1-2] प्रथमायाम् for प्रथमा
8. A[2]M[1]M[2]TS[1] सर्वासु for सर्वस्तृचः.
17. M[1]. om. द्वितीयायां

इति श्यैते द्वितीयायां वावृधानःशव। पुरोजितीवोअ (ऊ. क्षु. ८५७) इति श्यैते प्रथमायाम्। एतेषु प्रस्तावादिर्नीचैः ॥ ३८॥

(इमा उ त्वेति सर्वः॥)

इमा उत्वा पुरू (ऊ. ए. ४६४) इति श्यैते सर्वस्तृचः प्रस्तावादिर्नीचः। अभिस्तोभैराऽ३नू इति द्वितीयायाम्। समुद्रइवप इति तृतीयायाम् ॥ ३९॥

पुरोजि गिरिं जानित्रे ॥ ४० ॥

वि. उत्तरे जनित्रे पुरोजिती। गिरिन्नपुरुभो। एतयोर्वादिर्नीचैः ॥ ४०॥

भा. उत्तरे जनित्रे पुरोजिती - गिरिंन पुरू - नीचप्रस्तावादी ॥ ४०॥

दी. पुरोजितीवोअ। घसाऽ३ः। सुताया (ऊ. ए. ५०१) इत्युत्तरे जनित्रे प्रस्तावादिर्नीचः। तंवोदस्ममृती। षहाऽ३म्। वसोर्मा (ऊ. अ. ५४२) इत्युत्तरे जनित्रे तृतीयायां गिरिन्नपुरुभो। जसाऽ३म्। अत्र प्रस्तावादिर्नीचः ॥ ४०॥

आर्षभश्येनयोः प्रान्त्ये ॥ ४१ ॥

वि. आर्षभश्येनयोः प्रथमान्त्ययोः स्तोत्रीययोः प्रस्तावादेर्नीचीभावः ॥ ४१॥

भा. आर्षभे गोविच्छ्येने च प्रथमान्त्ये स्तोत्रीये नीचप्रस्तावे भवतः ॥ ४१॥

दी. अभित्वावृषभासुते। सुतꣳसृजोवा (ऊ. द. २५) इत्यार्षभे। गोवित्पवस्ववसुवाइत् (ऊ. क्षु. ९०७) इति श्येने च प्रथमान्त्ये स्तोत्रीये नीचप्रस्तावे भवतः। अभित्वेति-तृतीयायाम् इहत्वागोपरीणसम। गोवित्पवस्वेति तृतीयायाम् ईशानइमा भुवना ॥ ४१॥

---

6. L^1. om. पुरोजि....०जनित्रे.

7. $KA^2M^{1-2}S^1My^1$ नीचादिर्भवति for वादिर्नीचैः.

13. KS^2My^1 प्रथमान्त्ये स्तोत्रीये नीचादी भवतः for प्रथमान्त्ययोः.... ०भावः.

14. PL^2 नीचे for नीच०.

वायोर्धर्तेति ॥ ४२ ॥

वि. **वायोरभिक्रन्दे धर्तादिवः पवते**-(ऊ. क्षु. ९२८) इत्यत्र वादिर्नीचैः ॥ ४२ ॥

भा. **वायोरभिक्रन्दे धर्त्ता** (ऊ. क्षु. ९२८) इति नीचैः ॥ ४२ ॥

२१र२१ २र १ २र
दी. **धर्तादिवःᳵपवतेकृत्वियो** (ऊ. क्षु. ९२८) इति **वायोरभिक्रन्दे** प्रस्तावादिर्नीचः ॥ ४२ ॥

वाम्रेऽभिसो द्वे ॥ ४३ ॥

वि. वाम्रे **अभिसोमा**-(ऊ. सं. २७८) इति द्वे स्तोत्रीये नीचादी भवतः ॥४३॥

भा. वाम्रे **अभिसोमायां** (ऊ. सं. २७८) द्वे स्तोत्रीये नीचप्रस्तावे भवतः ॥४३॥

४ ३ र४र५र २ . २
दी. **अभिसोमासआ। हाऽ३हाऽ३इ** (ऊ. सं. २७८) इति **वाम्रे** आद्ये द्वे स्तोत्रीये नीचप्रस्तावे भवतः। द्वितीयायां **मत्सरासोमदा** ॥ ४३ ॥
४ ३र४र ५र

मान्यत्र ॥ ४४ ॥

वि. **अन्यत्र** मध्यमायां नीचैः ॥ ४४ ॥

भा. **अन्यत्र** मध्यमा नीचप्रस्तावा ॥ ४४ ॥

दि. अभिसोमासतोऽन्यत्र अन्यासु स्तोत्रीयासु वाम्रे मध्यमा नीचप्रस्तावादिः।
४ ३४र५र र
मन्द्रयायातिधा (ऊ. द. ८७) एवमादिषु ॥ ४४ ॥

लौशे गोविच्छ्येनवत् ॥ ४५ ॥

---

2. KA[2]M[1-2]TS[1] om. वादिर्.
8. PV[2] °सोमाद्ये for °सोमायां.
10. M[4]. om. मदा ; L[1] after मदा adds :- मान्यवसू.
11. M[4] मध्यमादन्यत्र for मान्यत्र ; L[1]. om. मान्यत्र.
12. S[2] after अन्यत्र adds : वाम्रे ; S[4] before नीचैः adds: स्तोत्रीयाया वादिर्.
13. L[2]. om. अन्यत्र ; B[4] मध्यमायां for मध्यमा.

वि. **लौशे** द्व्यभ्यासे **गोवित्पवस्व** (ऊ. सं ३०९) इति **श्येनवत्** प्रथमान्त्ययोर्नीचैः ॥ ४५ ॥

भा. द्व्यभ्याघातलौशे **गोविच्छ्येनवत्** प्रथमान्त्ययोः ॥ ४५ ॥

४र ३ ४   ३ ४ ५

दी. **गोवित्पवस्ववसुविद्विर** (ऊ. सं- ३०९) इत्युत्तरे **लौशे श्येनवत्** प्रथमान्त्ये स्तोलीये नीचप्रस्तावे भवतः। अन्त्यायाम् **ईशानइमाभुवनानिई** ॥ ४५ ॥

असाविमान्त्ये ॥ ४६ ॥

वि. **असाविसोमोअरुषायां** (ऊ. सं. २८५) **मध्यमान्त्ये** स्तोलीये नीचादी भवतः ॥ ४६ ॥

भा. **असाविसोमायां लौशे मध्यमान्त्ये** नीचप्रस्तावादी ॥ ४६ ॥

३ ४र   ३र ४र   ३र ४५र

दी. **असाविसोमोअरुषोवृषा** (ऊ. सं. २८५) इति लौशोत्तरे मध्यमान्त्ये स्तोलीये नीचप्रस्तावे भवतः। मध्यमायां **पर्जन्यःपितामहिषस्यप**। अन्त्यायां **कविर्वेधस्यापरियेषिमा** ॥ ४६ ॥

(४३ ४   ३र४   ३ ४५ … ४ ३र ४ ३र … ४५र र)

अस्य पीत्वा काशीते ॥ ४७ ॥

वि. **प्रतीचीनेडे काशीते अस्यपीत्वास्वर्** (ऊ. ए. ५३२b) इति नीचादिः ॥ ४७ ॥

भा. **अस्यपीत्वा** (ऊ. ए. ५३२b) इति नीचैः ॥ ४७ ॥

---

1. KM[1-3]S[1] om. श्येनवत्
2. S[2] before नीचैः adds: स्तोलीययोः
3. LB[4] om. ०घात.
7. S[2] after अरुषायां adds: द्व्यभ्यासे लौशे ; S[4] वादिर्नीचौ for नीचादी
9. B[4]L[2] मध्यमान्त्ययोः for मध्यमान्त्ये ; PB[4]L[2]A[1] ०प्रस्तावादिः for ०प्रस्तावादी
14. KA[2]S[1]T om. काशीते
15. S[2] वादिर्नीचैः for नीचादिः

दी. **पवस्वमधु।** **माऽ२त्तमाः** (ऊ. ए. ५३२) **इति** **प्रतीचीनेडे** **काशीते** तृतीयायाम् **भस्यपीत्वासु।** अत्र प्रस्तावादिर्नीचः ॥ ४७ ॥

नवे मन्द्राभि-मत्स-सुषा ॥ ४८ ॥

वि. उत्तरे मानवे वक्ष्यमाणेषूदाहरणेषु वादिर्नीचैः। **मन्द्रया।** **अभिसो।** **मत्सरासो।** **सुषावसो।** एतेषु ॥ ४८ ॥

भा. उत्तरे **मानवे** **मन्द्रयाया।** **अभिसोमा।** **मत्सरासः।** **सुषावसो।** इति नीचैः ॥ ४८ ॥

दी. **होवाइ।** **सोमउष्वाणःसोतृभिः।** **होवाइ** (ऊ. द. ८५) **इत्युत्तरे** मानवे द्वितीयायां **होवाइ।** **मन्द्रयायातिधारया।** **होवाइ।** इति प्रस्तावादिर्नीचः ॥

होवाइ। **अभिसोमासआयवः।** **होवाइ।** (ऊ. सं. २७६) [इत्युत्तरे **मानवे** प्रथमायां] होवाइ **मत्सरासोमदच्युतः।** होवाइ। अत्र प्रस्तावादिर्नीचः ॥

होवाइ। **परितोषिंचतासुतम्** (ऊ. अ. ६०५) इति **मानवे** द्वितीयायां **होवाइ।** **सुषावसोममद्रिभिः।** होवाइ अत्र प्रस्तवादिर्नीचः ॥ ४८ ॥

मद्रे च ॥ ४९ ॥

वि. पौरुमद्रे च एतान्येवोदाहरणानि ॥ ४९ ॥

भा. **पौरुमद्रे** च प्रस्तावादिः सर्वत्र नीचैः। एतान्येवोदाहरणानि ॥४९॥

दी. **पुनानःसोमधारया।** **औहोवा** (ऊ. अ. ६६२) इति **पौरुमद्रे च** प्रथमायाम्। तृतीयायां **प्रत्नंसधस्थमासदत्।** **औहोवा।** अत्र प्रस्तावादिर्नीचः ॥

अभिसोमासआयवः। **औहोवा** (ऊ. द. ५४) **इति** **पौरुमद्रे** प्रथमायाम्। द्वितीयायां च मत्सरासोमदच्युतः। **औहोवा।** अत्र प्रास्तावादिर्नीचः ॥ ४९ ॥

---

3. A[2]M[1-2]T मन्द्रामिसो (M[2] ०सोः) for मन्द्राभि

4. A[2]M[1],[2]TS[1] om. उदाहरणेषु ; KM[1-1] after मन्द्रया add: या

18. L[1] after तृतीयायां adds: च

20. 17 18&19L[1] ऊहोवा for औहोवा

अनुत्सो राजा ॥ ५० ॥

वि. उत्सो-राजा-देवौ न नीचैः ॥ ४० ॥

भा. अन् प्रतिषेधे। उत्सो देवः (ऊ. अ. ६६२) राजा देव (ऊ. द. ५४) इति चात्रापवादः ॥ ५० ॥

२र १ २र १ र
दी. अन्–प्रतिषेधे। **पुनानः सोम** (ऊ. अ. ६६२) इति द्वितीयायाम् **उत्सो**
२र१र २ १ २ र १ २ १ र र
देवोहिरण्ययः। **औहोवा**। अत्र न प्रस्तावादिर्नीचः। **अभिसोमा** (ऊ. द. ५४) इति
१र र २र१२१२१
तृतियायां **राजादेवऋतंबृहत्**। **औहोवा**। अत्र न प्रस्तावादिर्नीचः ॥ ५० ॥

रन्ध्रोत्तरवाजजितोर्योनौ ॥ ५१ ॥

वि. रन्ध्रोत्तरवाजजितोर्योनावेव वादिर्नीचैः। **मृज्यमानःसुहस्त्या** ॥ १ ॥

भा. उत्तरे औक्ष्णोरन्ध्रे **वाजजिति** च योनावेव प्रस्तावादिर्नीचैः ॥ ४१ ॥

२ १ र २ १ र १ र
दी. मृज्यमानस्सुहस्त्या। **समुद्रेवोवा** (ऊ. द. १०३) इत्युत्तरे **औक्ष्णो-**
२ १ र २ १
रन्ध्रे। **मृज्यमानस्सुहा** (ऊ. द. १०४) इति **वाजजिति**। औक्ष्णोरन्ध्रे [वाजचिति] च योनौ प्रस्तावादिर्नीचः। नोहे उत्तरयोः। ॥ ५१ ॥

एतं हवद्देव्ये ॥ ५२ ॥

वि&भा. इहवद्वामदेव्ये एतमुत्यम् इति नीचैः ॥ ५२ ॥

२र१२ १ २ १ २
दी. एतमुत्यंदशक्षिपः। **इहा** (ऊ. द. १०७) इति **इहवद्वामदेव्ये** प्रस्तावादिर्नीचः। नोहे उत्तरयोः ॥ ५२ ॥

पुरो नदे ॥ ५४ ॥

---

2. M[1-2] उत्सो दोवो राजा देवो for उत्सो राजादेवौ; KA[2]TMy[1] नीचादिः, S[2] नीचादी for नीचैः

6. B[4]L[2]A[1] om. अत्र

7. M[4] om. औहोवा। अत्र

15. S[2] after इति adds; वादिः

वि&भा. **नानदे पुरोजिती** (ऊ. द.७८) इति वादि नींचैः ॥ ५.३ ॥

४३र४ ५र र
दी. **पुरोजितीवोअ** (ऊ. द. ७८) इति **नानदे** प्रथमायां प्रस्तावादिर्नीचः ॥ ५ ३ ॥

पुना यामे ॥ ५४॥

वि&भा. उत्तरे **यामे पुनानो अक्र** (ऊ. क्षु ९२१) इति नीचैः ॥ ५.४॥

४र ३र ४ ३र४ ५ ३र२ ४ ५
दी. **पुनानोअक्रमीदभि । ओहा॒ऽ३ओहा** (अ. क्षु. ९२१) इत्युत्तरे **यामे** प्रथमायां प्रस्तावादिर्नीचः ॥ ५४॥

पुरो यज्ञा वृत्र वीरा पारे ॥ ५५॥

वि&भा. **पर्याकूपारे पुरोजिती** (ऊ. क्षु. ९५५) **यज्ञायसन्तु । वृत्रघ्नेपरि । वीरायसदा** । (ऊ. द. २०३) इत्येतेषु प्रस्तावादिर्नीचैः ॥ ५ ५॥

४३र ४रर ५ १
दी. **पुरोजितीवोअन्धस । षूऽर३४** (ऊ. क्षु. ८५५) इति **पर्याकूपारे** प्रथमायां प्रस्तावादिर्नीचः । तृतीयायां **यज्ञायसन्त्वद्रयः** । अत्रादिर्नीचः । **परित्यंऽहर्यतंऽहरिम्** (ऊ. द. २०३) इति **पर्याकूपारे** तृतीयायां **वृत्रघ्ने परिषिच्यसे । वीराया सदनासदे** । एतयोरादिर्नीचः ॥ ५५ ॥

ष्ठे प्र योनौ ॥ ५६॥

वि. **वासिष्ठे योनौ वयमेनमिदाह्य** (ऊ. अ. ६३७) इति नीचैः । प्रथमायामेव ॥ ५६ ॥

भा. **वयमेन-**(ऊ. अ. ६३७) **वासिष्ठे** योनावेव प्रथमायां नीचीभावः ॥ ५६ ॥

---

4. KA²M¹⁻²TS¹My¹ यामे स्वारे for उत्तरे यामे ; S² after इति adds: वादिः
5. L¹ ऊहाऊहा for ओहा ओहा.
8. KA²M¹⁻²TS¹⁻²My¹ द्रुघ्न्यासा० for पर्या
9. KM¹⁻²TS¹⁻² एते नीचादय : A² एतेषु नीचीभावः for एतेषु प्रस्तावादिर्नीचैः ; P om प्रस्तावादिः
12. M⁴ after पर्याकूपारे adds; यज्ञाय सन्त्वद्रयः

४३४र५ र
दी. वयमेनमिदा (ऊ. अ. ६३७) इति वासिष्ठे प्रथमायां योनावेव प्रस्तावादिर्नीचः ॥ ५ ६॥

अयंपू-पुरः क्रौञ्चे ॥ ५ ७॥

वि. मध्यनिधने **क्रौञ्चे अयं पूषा** (ऊ.अ. ५९०) **पुरोजिती** (ऊ. अ. ६५५) इत्येतौ नीचैः ॥ ५ ७॥

भा. **आयं पूषा–पुरोजिती**–इति नीचैः ॥ ५ ७ ॥

२१ र र　　२ र　　१ र
दी. **अयं पूषौ हो** (ऊ. अ. ५९०) इति मध्ये निधने **क्रौञ्चे प्रथमायाम्** । **पुरोजितौ** । **होइ** (ऊ. अ. ६५५) इति मध्ये निधने **क्रौञ्चे** च प्रथमायां प्रस्तावादिर्नीचः ॥५७॥

साप्तमिक आयास्ये ॥ ५ ८ ॥

वि. **साप्तमिक आयास्ये** नीचादयः सर्वे ॥ ५ ८॥

भा. **साप्तमिक आयास्ये** सर्वः प्रस्तावादिर्नीचैः ॥ ५ ८॥

४ र ३ ४र ३र४५र २ २ ४
दी. **पुनानस्सोमधारया । एऽ३ । औऽ३हो ऽ५वा** (ऊ. द. १२६) इति **साप्तमिके** सप्तमे अहनि भवे आयास्ये प्रथमायां तृतीयायां च प्रस्तावादिर्नीचः ॥ ५ ८॥

अनुत्सस्तव ॥ ५९ ॥

वि. **उत्सोदेवः**- (ऊ. द. १२६) **तवाहꣳसोमयोः** (ऊ. अ. ६५०) प्रतिषेधः ॥ ५९ ॥

भा. अन् प्रतिषेधे । **उत्सस्** (ऊ द. १२६) **तवाहꣳसोम** (ऊ. द. ६५०) इति च प्रतिषिध्यते ॥ ५९ ॥

---

4. M^{1-2} मध्यमे for मध्या०
5. S^2 एतयोर्वादिर्नीचीभवतः for एतौ नीचैः ; $PV^2B^4S^7A^1$ om. एतौ
10. S^2 वादयो नीचाः for नीचादयः
15. $A^2M^{1-2}T$ ०देवो for देवः
17. B^4 om. अन् प्रतिषेधे

दी. अन् प्रतिषेधे । **पुनानः सोम** (ऊ. द. १२६) **इत्यायास्ये** द्वितीयायाम् । **उत्सोदेवोहिरण्ययः** । एऽ३ । अत्र न प्रस्तावादिर्नीचः । **तवाहꣳसोमरारण** । एऽ३ (ऊ. अ. ६५०) इत्यायास्ये प्रथमायां न प्रस्तावादिर्नीचः ॥ ५९ ॥

कावरथन्तरयोः सर्वत्र ॥ ६० ॥

वि. **कावरथन्तरयोः** सर्वाः स्तोत्रीया नीचादयः ॥ ६० ॥

भा. **कावे रथन्तरे** च **सर्वत्र** प्रस्तावादिर्नीचैः ॥ ६० ॥

दी. **अभ्योवा** (ऊ. द. १३) इत्यादि **कावे आभित्वाशूरनोनुमोवा** (र. द. १) इत्यादि **रथन्तरे** च **सर्वत्र** सर्वासु स्तोत्रीयासु प्रस्तावादिर्नीचः ॥ ६० ॥

अप्रोस्वो ॥ ६१ ॥

वि. **प्रोस्वयोः** प्रतिषेधः । प्रोवा । **अयासीदिन्दुरिन्द्रा** (ऊ. सं. २३२) **स्वोवा** । **भीषुणस्सखीनामविताज** (र. द. २९) ॥ ६१ ॥

इति फुल्लसूत्रविवरणे उच्चनीचे प्रस्तावाधिकारे प्रथमस्य नवमः खण्डः ॥ ९ ॥

भा. **प्रोअयासीद्** (ऊ. सं २३२) इति कावे **स्वोवा** (र. द. २९) रथन्तरे [च] प्रतिषेधः ॥ ६१ ॥

इति पुष्पसूत्रभाष्ये प्रथमस्य **नवमी** कण्डिका समाप्ता ॥ ९ ॥

दी. अ प्रतिषधे । **प्रोवा** (ऊ. सं. २३२) इति कावे प्रथमायाम् । **कयानश्चित्रआभुवोव** (र. द. २९) इति **रथन्तरे** च तृतीयायां **स्वोवा** । अत्र न प्रस्तावादिर्नीचः ॥ ६१ ॥

इति फुल्लदीपे उच्चनीचे पञ्चमप्रपाठकस्य नवमः खण्डः ॥ ९ ॥

उच्चनीचे प्रस्तावाधिकारः समाप्तः ॥

5· T सर्वत्र for सर्वाः; A^{2} स्तोत्रियोः for स्तोत्रीयाः

9. M$^{1-2}$T स्वोः for स्वो

10 K.T स्वो M$^{1-2}$ स्वोः for ०स्वयोः

दशमः खण्डः

उद्गीथाधिकारः

थेषूक्ते द्वेऽसाव्याम् ॥ १ ॥

वि. **गौषूक्ते असाव्यंशुर्मदायां** द्वे स्तोत्रीये नीचोद्गीथादी भवतः ॥ १ ॥

भा अतः परमुद्गीथाधिकारः । **उद्गीथे** असाव्यंशुर्मदायामाद्ययोः स्तोत्रीययोः उद्गीथादिर्नीचैः ॥ १ ॥

दी. उद्गीथे अधिकारः । **असाव्यंशुमौं** । हौहोवाहाइ । **दाया** (ऊ. सं २८१) इति **गौषूक्ते** आद्ययोरुद्गीथादिर्नीचः । प्रथमायाम् **अप्सु दक्षों गिरौऽ२** । द्वितीयायाम् **अप्सुधौतंनृभौऽ२** ॥ १ ॥

अपो वैयश्वे ॥ २ ॥

वि&मा. **वैयश्वे पुनानायां** (ऊ. ए. ५२९) **अपोवासानो** नीचैः ॥ २ ॥

दी. **पुनातस्सोमधारयाऽ३ए** (ऊ. ए. ५२९) इति **वैयश्वे अपोवसाऽ२नो अर्षसाऽ२३इ** । इत्युद्गीथादिर्नीचः ॥ २ ॥

जय उतोनः ॥ ३ ॥

वि. **संजये उतोनउत्पुपू** नीचोद्गाथादिः । ॥ ३ ॥

भ. **संजये उतनोउत्पुपूर्या** (ऊ. द. ९६) इति नीचैः । अतः परं सर्वत्रोद्गीथाधिकारोऽनुवर्तनीयः ॥ ३ ॥

दी. **आतेअग्नइधी** । **माऽ३हाइ** (ऊ. द. ९६) इति **संजये** तृतीयायाम् **उतोनउत्पुपूर्य उक्थेषुशवसा** । अत्रोद्गीथादिर्नीचः ॥ ३ ॥

शवे ॥ ४ ॥

---

4. M[1-2] T मदायाः for मदायां; M[1-2] (उ)द्गीथाद्ये for (उ)द्गीथादी.

11. S[2] इत्यत्र नीचोद्गीथादिः for नीचैः.

17. B[4] °वर्तते नीचः for °वर्तनीयः

20. K om. शवे . . . . नीचोद्गीथादिः ॥ ५ ॥ (p. 312, L. 7.)

वि. शैशवे गीथादयो नीचैः ॥ ४ ॥

भा. शैशवे उद्गीथादिर्नीचैः ॥ ४ ॥

दी. यत्सोमचित्रमुक्थ्याम् (ऊ. द. ८९) इत्यादिशैशवे उद्गिथादिर्नीचः । दिव्यं पार्थिवंवसु । एवमादीनि ॥ ४ ॥

नेन्द्रः ॥ ५ ॥

वि. मुव॰हेत्थःस्वःपद्याम् (ऊ. द. ८९०) इन्द्रश्चसोमगो इति न नीचो-द्गीथादिः ॥ ५ ॥

भा. न । इन्द्रः । इन्द्रश्चसोम ॥ ५ ॥

दी. न प्रतिषेधे । यत्सोमचित्रम् (ऊ. न. ८९) इति तृतीयायां इन्द्रश्च सोम गोपताइ । अत्र नोद्गीथादिर्नीचः ॥ ५ ॥

कलेर्षा प्रान्त्ययोः ॥ ६ ॥

वि&भा. शाकले अर्षासोमायां (ऊ. द. ८३) प्रथमान्त्ययोः स्तोत्रीययोरुद्गीथा-दिर्नीचैः ॥ ६ ॥

दी. अर्षासोमाऽ२द्युमत्तमाः (ऊ. द. ८३) इति शाकले प्रथमान्त्ययोः स्तोत्रीययोः उद्गीथादिर्नीचः । प्रथमायाम् अभिद्रोणानिरोरुऽ२वातू । अन्त्यायाम् अस्मभ्य॰ सोम विश्वाऽ२३ताः ॥ ६ ॥

आकू-हविष-घृतानिधनाश्वसाध्यानां द्वे ॥ ७ ॥

वि. अकूपार-सौहविष-घृतनिधन-अश्वसाध्यानां द्वे स्तोत्रीये नीचगीथादी । आतू न इन्द्र (ऊ. द. २४) प्रवाज्यक्षाः (ऊ. द. १३५) इदं ह्यन्वो (ऊ. द. २७) प्रसोमासोवि (ऊ. सं. २३४) यजिष्ठं त्वा (ऊ. सं. २८६) इति ॥ ७ ॥

---

6. S² after यत्याम् adds: शैशवे.

8. PV² सन for न

13. PV²B⁴L²A¹ after नीचैः add: भवति

18. S¹T गीथादिः, K उद्गीथादिः, M¹⁻² उद्गीथे भवतः for गीथादी; T नीचैः for नीच.

भा. आकूपारे सौहविषे घृतनिधने आश्वे साध्ये च द्वे द्वे आद्ये नीचोद्गीथे भवतः ॥ ७ ॥

दी. **आतूनइ । द्रक्षुमाऽ३न्ताम्** (ऊ. द. २४) इति **रात्र्याकूपारे** [ये] आद्ये द्वे स्तोत्रीये [तयोः] उद्गीथादिर्नीचः । प्रथमायां **चित्रं ग्राभꣳसंगृभाऽ२या** । द्वितीयायां **तुविदेष्णंतुवीमाऽ२घाम्** ॥

प्रवाजियक्षाः (ऊ. द. १३५) इति **सौहविषे** [ये] आद्ये द्वे स्तोत्रीये [तयोः] उद्गीथस्यादिर्नीचः । प्रथमायां **सहस्रधारस्ताऽ१इराऽ२३४ः** । द्वितीयायां **सहस्ररेताअद्भाऽ-२३४इः** ॥

इदꣳह्यनूऽ३ओजसा (ऊ. द. २७) इति **घृतश्चुन्निधने** [ये] आद्ये द्वे स्तोत्रीये [तयोः] उद्गीथस्यादिर्नीचः । प्रथमायां **सुतꣳराधा** । द्वितीयायां **सुताइनिय** ॥

वि.&भा. सौभरे भद्राइन्द्रायां **यो अस्य कामं विधत** इति उद्गीथमध्ये पदगीतः ॥ २७ ॥

दी. श्रायाऽ२न्ताऽ३इवसूरियोवा (ऊ. ए. ३८८) इति **सौभरे भद्राऽ३आऽ३इन्द्रस्यरातयोवा** इति तृतीयायां **कामंविधाऽ२तानरोऽ२३ ।** अत्रोद्गीथमध्ये तकारः पदगीतः ॥ २७ ॥

भरमाणोभ्याभिहि यौधे ॥ २८ ॥

वि. अभ्यभिहिश्रवस (ऊ. ए. ४००) **इत्यत्र यौधाजये शर्याभिर्न भरमाण** इति पदगीतो गीथमध्ये ॥ २८ ॥

भा. यौधाजये अभ्यभिहिश्रवसायां (ऊ. ए. ४००) **शर्याभिर्नरमाण** इति उपद्रवमध्ये पदगीतः ॥ २८ ॥

---

2. My[3] उद्गीथे for उद्गीथमध्ये

8. KA[2]M[1-2]TS[1-2] trans. सौभरे after इन्द्राया; KA[2]M[1-2]TS[1-2] trans. यो अस्य कामं विधतः यो after ०मध्ये and om. इति; KS[1-2] गीथ for उद्गीथ०

11. RL[1] नकारः for तकार;

14. KTS[1-2] यौधे for यौधाजये;

15. According to Northern MSS. and also दीप; The commentary पदगीत takes place not in उद्गीथ but in उपद्रव (उपद्रवमध्ये)

दी. **तुवेऽ३१ । सोऽ३म । प्र** (ऊ. ए. ४००) इति **यौधाजये अभाऽ३२-इ । आऽ३भि । हि** । इति द्वितीयायां **भराऽ२ । माणाऽ२ः** इत्युपद्रवमध्ये पद-गीतः ॥ २८ ॥

मृजानः सवाज्यक्षायां बोधीये बोधीये ॥ २९ ॥

वि. **सवाज्यक्षायां** (ऊ. क्षु. ९३०) **जराबोधीये अद्भिर्मृजानः** प्रतिहारमध्ये पदगीतः । अभ्यासः प्रकरणसमाप्त्यर्थः ॥ २९ ॥

॥ संध्यगीतपदगीतं समाप्तम् ॥

इति फुल्लसूत्रविवरणे द्वितीयस्य चतुर्थः खण्डः ॥ ४ ॥

भा. **जराबोधीये सवाज्यक्षायाम् अद्भिर्मृजान** इति प्रतिहारमध्ये पदगीतः ॥२९॥

॥ संध्यगीतपदगीतं समाप्तम् ॥

इति पुष्पसूत्रभाष्ये द्वितीयस्य चतुर्थी कण्डिका समाप्ता ॥ ४ ॥

दी. **प्रवाजियोवा** (ऊ. क्षु. ९३०) इति **जराबोधीये सवाजियोवा** इति द्वि-तीयायां **मृजानोऽ१गोऽ२३भाइः** । अत्र प्रतिहारमध्ये नकारः पदगीतः । अभ्यासः प्रकरणसमाप्त्यर्थः ॥ २९ ॥

॥ संध्यगीतं पदगीतं समाप्तम् ॥

इति फुल्लदीपे षष्ठाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

---

2. M[4] संध्यगीतः, L[1] संधिगीतः for पदगीतः
6. A[2]M[1-2]TS[1] om. अभ्यासः प्रकरणसमाप्त्यर्थः; K after समाप्त्यर्थः adds: इति द्वितीयस्य चतुर्थः and M[1-2] इति तृतीयखण्डः.
7. M[1-2]T संधिवत्पादगाने for संध्यगीतपदगीतम्
8. KA[2] पुष्प० for फुल्ल०
11. B[4] om. इति...द्वितीयस्य; V[2] om. colophon.
16. ME. om. षष्ठाध्यायस्य.

पञ्चमः खण्डः

अथ अत्वम्

आकारोऽत्वम् ॥ १ ॥

वि.&भा. अतः परमत्वं वर्तिष्यते । आकारो येषु सामसु अकारो भवति तान्युदाहरिष्यामः । आकारस्य अकारो भवति वक्ष्यमाणेषूदाहरणेषु आदेशः ॥ १ ॥

दी. इदानीमत्वमुच्यते **आकारोऽत्वमिति** । वक्ष्यमाणेषु सामसु **आकारः अत्वम्** आपद्यते ॥ १ ॥

पा-शब्दः प्रकाव्यायां पार्थवाराहकुत्सरथीयेषु ॥ २ ॥

वि. **प्रकाव्यायां पार्थवाराहकुत्सरथीयेषु शुचिबन्धुः पा** इति **पा-शब्दः पशब्दो** भवति ॥ २ ॥

भा. **शुचिबन्धुः पावक** इति **पाशब्दः** पशब्दमापद्यते एतेषु सामसु ॥ २ ॥

दी. तानि सामान्याह- । **ओऽ३होऽ३होइ प्रकावियाम्** (ऊ. सं. २२७) इति **पार्थे शुचिब** । **धुꣳपवाकाः** । अत्र **पाशब्दः** पशब्दमापद्यते । **हाउहाउ हुप्** । **प्रकावियाम्** । **उशने** (ऊ. अ. ६५१) इति **वाराहे शुचिबाऽ३** । **धुꣳपवाकाः** । अत्र **पाशब्दः** पशब्दमापद्यते । **होऽ४वा** । **उहुवाऽ३** । **होवा** । **प्रकावियाम्** (ऊ. क्षु. ९१५) इति **कुत्सरथीये शुचिब** । **धुꣳपवाकाः** । अत्र **पाशब्दः** पशब्दमापद्यते ॥ २ ॥

---

5. KA^2M^{1}-$^2TS^{1-2}$ तानि for तद्; $PA^1V^2B^4$ उच्चारयिष्यामः for उदाहरिष्यामः; $A^1V^2B^4$ om. P आकारस्य…आदेशः; S^2 om. आदेशः.

8. A^2T ०कुत्सस्याधि० for ०कुत्स०.

9. A^2M^{1-2} om. प्रकाव्यायां….०रथीयेषु

15. L^1 om. होऽ४वा…आपाद्यते; M^4 होऽ३वा for होऽ४वा.

इन्द्रायेन्दविति क्रौञ्चे पूर्वयोः स्तोत्रीययोः वाहाइ-स्तोभे प्रत्यये ॥ ३ ॥

वि.&भा. इन्द्रायेन्दायां क्रौञ्चे पूर्वयोः स्तोत्रीययोर्वाहा इस्तोभे प्रत्यये आकारोऽकारो भवति। **अर्कस्ययोनाऽ२३म्। अ। वाहाइ। सन्त्वामृजन्ताऽ२३इ। अ। वाहाइ॥ ३ ॥**

दी. **इन्द्रायेन्दाऽ१औहो** (ऊ. द. १००) इति **गायत्रीक्रौञ्चे** प्रथमायां स्तोत्रियायाम् **अर्कस्य योनाऽ२३इम्। अ। वाहाइ।** अत्र **वाहाइस्तोभे प्रत्यये** परे सति आकारः अकारमापद्यते। द्वितीयायां **सन्त्वामृतजन्ताऽ२३इ। अ। वाहाइ।** अत्र **वाहाइस्तोभे** प्रत्यये आकारः अकारमापद्यते॥ ३ ॥

जसा वैश्वमनसे ॥ ४ ॥

वि.&भा. वैश्वमनसे इन्दो धाराभिरोजसा [इत्यत्र] आकारः अकारमापद्यते ॥४॥

दी. **पवस्वदेववीताऽ३याइ** (ऊ. द. १९७) इति **वैश्वमनसे जसआकलशम्म धुमान्त्सोऽ२३४५।** अत्र जसामध्ये आकारः अकारमापद्यते॥ ४ ॥

वृधा बृहद्भारे ॥ ५ ॥

वि.&भा. बृहद्भारद्वाजे परिप्रियायां (ऊ. अ. ६०२) **महान्महीऋतावृधा** इत्यत्र आकारस्य अत्वं भवति॥ ५ ॥

---

4. $PV^2B^4A^1$ अत्वम् (B^4 अकारम्)आपद्यते for (अ)कारो भवति.
7. E. om. परे सति.
11. $M^{1-2}PV^2B^4A^1$ om. वैश्वमनसे; $PV^2B^4A^1$ अत्वम् for अकारम्
15. T om. बृहद्भारद्वाजे; $PA^1V^2B^4$ om. बृहद्भारद्वाजे परिप्रियायाम्
16. $PA^1B^4V^2A^2M^{1-2}$ om. इत्यत्र; M^{1-2} अकारः for अत्वम्; $PV^2B^4A^1$ अत्वापत्ति for अत्वंभवति.

दी. परिप्रिया । दिवःकवाइः (ऊ. अ. ६०२) इति बृहद्भारद्वाजे द्वितीयायाम् आर्तावृध । अत्र धामध्ये आकार अकारमापद्यते ॥ ५ ॥

पूर्वथा कण्वतरे ॥ ६ ॥

वि.&भा. कण्वरथन्तरे अनुष्टुबन्ति पूर्वथा इत्यत्र आकारस्य अत्वापत्तिः । अभित्वापूर्वायाम् ॥ ६ ॥

दी. आभित्वापूर्वपीतायाइ (ऊ. क्षु. ८६५) इति कण्वरथन्तरे तृतीयायाम् एऽ३ । वंथआ । अत्र थामध्ये आकारः अकारमापद्यते ॥ ६ ॥

द्विता सुज्ञाने ॥ ७ ॥

वि.&भा सुज्ञाने विश्वा परि प्रिया भुवदध द्वितेति अत्वं प्राणायाम् । अधद्वितएऽ३ ॥ ७ ॥

दी. प्राणाशिशूः । महीनाम् (ऊ. सं. २८२) इति सुज्ञाने अधद्वितएऽ३ । अत्र तामध्ये आकारः अकारमापद्यते ॥ ७ ॥

दिव आ प्रत्नं पीयूषमित्यत्र जयामहीयत्रोत्सेधेषु ॥ ८ ॥

वि. प्रत्नं पीयूषम् (सा. १४९४-६) इत्यत्र यौधाजयामहीयत्रोत्सेधेषु महोगाहाद्दिव आनिर् इत्यत्र आकारस्य अत्वम् ॥ ८ ॥

---

1. E om. द्वितीयायां;
2. E महान्महीवृधा for आर्तावृध E. आकारस्य अत्वम् for आकारः अकारम्.
4. V²B⁴A¹P om. अत्रः; V²B⁴A¹P om. अत्र आकारस्य
5. V²B⁴A¹P om. अभित्वापूर्वायाम्
9. PB⁴AV² om. प्राणायाम् । अधद्वितएऽ३.
12. E द्विता इत्यत्र for तामध्ये.
14. A²T om. प्रत्नं....(उ)त्सेधेषु; KS¹ पीयूषायाम् for पीयूषम् .

भा. प्रत्नं पीयूषमित्यत्र महोगाद्दाद्दिवआ । [अत्र] आकारस्य अत्वापत्तिः यौधाजयामहीयवोत्सेधेषु ॥ ८ ॥

दी. प्रत्नाऽ३१म् । पीऽ३यू । षम् (ऊ. प. ३८०) इति यौधाजये दिवा अनाइः । अत्र आकारः अकारमापद्यते । प्रत्नंपीऽ३यूषंपूर्वियाम् (ऊ. ए. ५२१) इति आमहीयवे दिवाअनाइः । अत्र आकारः अकारमापद्यते । प्रत्नंपीयूषंपूर्व्यंयदु (ऊ. ए. ५२५) इति उत्सेधे दिवाऽ३अना । अत्र आकारः अकारमापद्यते ॥ ८ ॥

उच्चैनैटत एकारे प्रत्यये ॥ ९ ॥

वि. ऐटते उच्चा एना एतयोराकारस्य अत्वं भवति एकारे प्रत्यये ॥ ९ ॥

भा. ऐटते उच्चा एना एकारे प्रत्यये अत्वापत्तिः ॥ ९ ॥

दी. उच्चा । एऊच्चा (ऊ. स. ७६६) इति ऐटते । अत्र एकारे प्रत्यये चामध्ये आकारः अकारमापद्यते । तृतीयायाम् एन । एआइना । अत्र एकारे प्रत्यये नामध्ये आकारः अकारमापद्यते ॥ ९ ॥

आर्यः कालेये ॥ १० ॥

वि.&भा. कालेये यस्यायं विश्व आर्यः (ऊ. ए. ४६५) इत्यत्र आकारस्य अत्वं भवति ॥ १० ॥

दी. यस्यायाऽ३म्विश्वाअर्योः (ऊ. ए. ४६५) इति कालेये आर्यो । अत्र आकारः अकारमापद्यते ॥ १० ॥

---

5. M^4 अत्रापि for अत्र...आपद्यते.

6. M^4 अत्राप्येवमेव for अत्र....आपद्यते.

8. M^{1-2} om. ऐटते.

14. KS^2T om. कालेये; $A^2M^{1-2}Ts^{1-2}$ om. इत्यत्र; $Pv^2B^4A^1$ om. अत्र;

15. Pv^2BA^1 om. भवति.

16. M^4 after आर्यो adds: इति

आसाद्वन्तीयोत्तमे ॥ ११ ॥

वि. **वारवन्तीयोत्तमे स नो दूरायामासाच्च** इति आकारस्य अत्वम् । **दूराच्च** [साच्च] इत्यत्र **चाअसाऽ२३४च्चा** ॥ ११ ॥

भा. **स नो दूराच्चासाच्च** । अत्र अत्वम् असाच्चेति ॥ ११ ॥

दी. **अश्वंनत्वाऔहोहाइ** (ऊ. ए. ४९१) इति **वारवन्तीये उत्तमे चाअसा-ऽ२३४च्चा** । अत्राकारोऽकारमापद्यते ॥ ११ ॥

जेता नार्मेधे ॥ १२ ॥

वि.&भा. **नार्मेधे जेतारमपराजितम्** (ऊ. प्रा. ८२२) इत्यत्र अत्वं भवति **ता**-शब्दस्य ॥ १२ ॥

दी. **इन्द्रंविश्वाअवीवृधाऽ३ने** (ऊ. प्रा. ८२२) इति **नार्मेधे** द्वितीयायां **जा-ऽ२३४इतहाइ** । अत्र तामध्ये आकार अकारमापद्यते ॥ १२ ॥

हव्या विशीये ॥ १३ ॥

वि.&भा. **स्वासु विशीये हव्यान्यैर यद्दिविइत्यत्र** व्याशब्दस्य **अत्वं** भवति ॥ १३ ॥

दी. **विशोविशोहुंवोऽ३अतिथाइम्** (ऊ. अ. ५७५) इति **विशोविशीये** तृतीयायां **हाऽ२३४व्यहाइ** । अत्र व्या-मध्ये आकारः अकारमापद्यते ॥ १३ ॥

इन्द्रा-तोका वार्षाहरे गीथेऽभ्यासे प्रत्यये ॥ १४ ॥

वि. **वार्षाहरे उद्गीथे अभ्यासे प्रत्यये इन्द्रा-तोका** । एतयोराकारस्य अत्वम् । **अप्सा इन्द्राय** । **इषन्तोकाय** । इति ॥ १४ ॥

---

8. PV[2]B[4]A[1] आकारः for अत्र and om. भवति ताशब्दस्य.

13. PV[2]B[4]A[1] हव्यान्यैरिति for हव्यान्यैरयद्दिवीत्यत्र; A[2] om. अत्र; PA[1]V[2]B[4] आकारोऽत्वम् for व्याशब्दस्य अत्वं भवति.

17. M[1-2]T om. वार्षाहारे...प्रत्यये; T om. एतयोः

भा. **वार्षाहरे अप्सा इन्द्राय । इषन्तोकाय । उद्गीथे अभ्यासे प्रत्यये** आकारस्य अत्वम् ॥ १४ ॥

दी. **हावर्षासोमा** (र. ए. ७३) इति **वार्षाहरे** आद्ये द्वितीयायाम् **इन्द्रइन्द्रा** । अत्र न्द्रामध्ये आकारः अत्वम् । **उद्गीथे** इन्द्रेत्यभ्यासे **परे** सति । तृतीयायां **तोकतोका** । अत्र कामध्ये आकारः अत्वम् । उद्गीथे तोकेति अभ्यासे **परे** सति ॥ १४ ॥

दुहा-सखा मत्स्वे प्रत्यये वैराजे ॥ १५ ॥

वि. **महावैराजे दुहा-सखा** एतयोराकारस्य अत्वं भवति **मत्स्वे प्रत्यये** । इयदुहमत्स्वाऽ३ । इयसखमत्स्वाऽ३ ॥ १५ ॥

भा. **महावैराजे दुहासखा मत्स्व-शब्दे प्रत्यये** अत्वम् । **इयदुहमत्स्वाऽ२३** । **इयसखमत्स्वाऽ२३** ॥ १५ ॥

दी. **होइयाहोइयाहोइयाऽ३४३तव** (र. क्षु. १८९) इति **वैराजे** तृतीयायाम् **इयदुहमत्स्वाऽ३** । अत्र मत्स्व-शब्दे **परे** सति हामध्ये आकारः अत्वम् । **होइया-होइयाहोइयाऽ३४३पुरः** (र. क्षु. १९०) इति **वैराजे** द्वितीयायाम **इयसखमत्स्वाऽ३** । अत्र मत्स्व-शब्दे परे सति खामध्ये आकारः अत्वम् ॥ १५ ॥

आःकारोऽत्वम् ॥ १६ ॥

वि. **आःकारो**ऽकारमापद्यते यत्र तदुदाहरिष्यामः ॥ १६ ॥

भा. इदानीम् **आःकारस्य** अत्वमुच्यते ॥ १६ ॥

दी. इदानीम् **आःकारस्य** विसर्गान्तस्य आकारस्य **अत्वम्** अकारो भवति ॥ १६ ॥

---

3. R °हाराद्ये for °हरे आद्ये.

7. M[1-2] om. महावैराजे; A[2]M[1-2] om. भवति.

मदाः सुतासोमायां बृहद्रथन्तरयोः स्तावे ॥ १७ ॥

वि. बृहद्रथन्तरयोः सुतासोमायां (र. अ. ११३; क्षु. १९३) प्रस्तावे देवान् गच्छन्तु वो मदा इत्याःकारस्य अत्वम् । औहोइदाआऽ३ए । दओवा ॥ १७ ॥

भा. बृहद्रथन्तरयोः देवान्गच्छन्तु वो मदा इति प्रस्तावे अत्वम् । ओहोइद आऽ२३ए ऽ२ । बृहति । द ओवा । वारथन्तरे ॥ १७ ॥

दी. औहोइ सुतासोमधुमत्तमाऽ३ए (र. अ. ११३) इति बृहति द्वितीयायाम् औहोइदआऽ३ए इति प्रस्तावे दाःकारस्य आकारे अत्वम् । सुतासोमधुमत्तमोवा (र. क्षु. १९३) इति रथन्तरे द्वितीयायां दओवा इति प्रस्तावे दाःकारस्याकारे अत्वम् ॥ १७ ॥

तमाः श्यावे ॥ १८ ॥

वि. श्यावाश्वे सुतासोमायां प्रस्तावे मधुमत्तमा इत्याःकारस्य अत्वम् ॥ १८ ॥

भा. श्यावाश्वे सुतासो मधुमत्तमा इति प्रस्तावे आःकारः अत्वम् ॥ १८ ॥

दी. सुताऽ३१ । सोऽ३मा । धुम । ताऽ३म (ऊ. स. ७७२) इति श्यावाश्वे प्रस्तावे माःकारस्य आकारः अत्वम् ॥ १८ ॥

क्षाश्वाउवायां प्रत्यये नित्यवत्सातीषङ्गसिमासु ॥ १९ ॥

---

3. $A^2M^{1-2}T$ इत्यत्राः for इत्याः

7. E. आकारः for आकारे.

11. K om. श्यावाश्वे ....मधुमत्त; $A^2M^{1-2}T$ after इति add: अत्र

12. B^4 om. प्रस्तावे.

15. A^2 after सिमासु adds: च

वि. **नित्यवत्सातीषङ्गसिमासु सोमो दुग्धाभिरक्षाः** इत्यत्र आःकारस्यात्वम् **आउवायां प्रत्यये** ॥ १९ ॥

भा. **सोमो दुग्धाभिरक्षा** इत्यत्र **आउवायां** प्रत्ययभूतायाम् आःकारः अत्वं **नित्यवत्सातीषङ्गसिमासु** ॥ १९ ॥

दी. **एसोमाः** । **उष्वाणस्सोऽ३तृभाइः** (र. क्षु. १७९) इति **नित्यवत्सासु** द्वितीयायाम् **आक्षआऽ३१उवाऽ२३** । अत्र **उवायां प्रत्यये** क्षाःशब्दस्य आकारः अत्वम् । **एसोमाउष्वा** (र. क्षु. १८१) इति **अतीषङ्गे** द्वितीयायाम् **आक्षआऽ३१उवाऽ२३** । अत्र **उवायां प्रत्यये** क्षाःशब्दस्य आकारः अत्वम् । **एऽ२** । **सोमउष्वाणस्सोतृभाइः** (र. क्षु. २०४) इति **सिमासु** द्वितीयायाम् **आक्षआऽ३१उवाऽ२३** । अत्र **उवायां प्रत्यये** क्षाःशब्दस्य आकारः अत्वम् ॥ १९ ॥

इकारोऽत्वम् ॥ २० ॥

वि. **इकारस्य** स्थाने यत्र **अत्वं** भवति तदुच्यते ॥ २० ॥

भा. अतः परम् **इकारस्य अत्वं** वर्तिष्यते ॥ २० ॥

दी. इदानीम् **इकारस्य** अत्वम् **अकारो** भवति ॥ २० ॥

इवोत्सेधे दुहानायाम् ॥ २१ ॥

वि. **दुहानायामुत्सेधे** शकुनाइव इत्यत्र इकारस्य अत्वं भवति ॥ २१ ॥

भा. **उत्सेधे दुहानायां शकुनाइवेति** इकारस्यात्वम् ॥ २१ ॥

दी. **तत्राहःसोमरारण** । **सख्ये** (ऊ. सं. ३३२) इति **उत्सेधे दुहानोबभ्रऊधनि** इति तृतीयायां **शकूऽ३नाअ** । अत्र इकारस्यात्वम् ॥ २१ ॥

---

1. Ks[1] add: च after ०सिमासु; A[2]M[1-2]T om. इत्यत्र; A[2]M[1-2]T add: भवति after अत्वं

11. M[1-2] om. इकारोऽत्वम्…(इ)कारस्यात्वं भवति (L. 16)

12. Ks[1]My[1] after भवति add: अकारो भवति

प्रतीनि द्विहिंकादेव्ये ॥ २२ ॥

वि. **द्विहिंकारे वामदेव्ये त्वमिन्द्रयशेति त्वं वृत्राणि हंस्यप्रतीनीत्यत्र** नकारात् परस्येकारस्य अत्वम् ॥ २२ ॥

भा. **द्विहिंकारे वामदेव्ये त्वं वृत्राणि हꣳस्यप्रतीनि** [इति] इकारः अत्वम् ॥ २२ ॥

२१ ४ ५र
दी. **तुवामाऽ२३ इन्द्रयशाअसाइ** (ऊ. अ. ६३९) इति **द्विहिंकारे वामदेव्ये**
१ र र २३र२
त्वंवृत्राणिहꣳस्यप्रतीनआइकऔहोऽ३ । अत्र निकारस्य इकारोऽत्वम् ॥ २२ ॥

अर्षसि कण्वतरे ॥ २३ ॥

वि. मृज्यमानायां **कण्वरथन्तरे पवमानाभ्यर्षसि** इत्यत्र इकारस्य अत्वम् ॥ २३ ॥

भा. **कण्वरथन्तरे** मृज्यमानायाम् **अभ्यर्षसि** इति इकारः अत्वम् ॥ २३ ॥

२२ १र२ १ २ १ २ २३२
दी. **माज्यमानस्सुहस्तिया** (ऊ. स. ७८६) इति **कण्वरथन्तरे एऽ३ । षसआ** । अत्र सिकारस्य इकारः अत्वम् ॥ २३ ॥

डिन उत्तरयोरास्तोभे प्रत्यये ॥ २४ ॥

वि. **शैखण्डिन उत्तरयोः** स्तोत्रीययोरास्तोभे **प्रत्यये** पूर्वस्य इकारस्य अत्वम् । दतआ । जसआ ॥ २४ ॥

भा. **शैखण्डिने उत्तरयोः** स्तोत्रीययोः आकारे स्तोभे प्रत्यये इकारः अत्वम् । **सत्ता नि योनौ कलशेषु सीदति । पतिर्विश्वस्य भुवनस्य राजसि** ॥ २४ ॥

३२ १ ३र २ १
दी. **प्रताऽ३होइ । आश्वीऽ३होऽ२३४** (ऊ. क्षु. ९०६) इति **शैखण्डिने**

---

2. A[2] om. द्विहिंकारे वामदेव्ये

4. B[1] इकारस्य for इकारः

7. A[2] ज्यर्षसि for अर्षसि; M[1-2] om. अर्षसि कण्वतरे.

8. A[2] पुनानस्सोमायां कण्वरथन्तरे धरुणं वाज्यर्षसीति for मृज्यमानायां...इत्यत्र.

द्वितीयायां **दतआ** । अत्र आस्तोभे प्रत्यये तिकारस्य इकारः अत्वम् । तृतीयायां **जसआ** । अत्रास्तोभे प्रत्यये सिकारस्येकारः अत्वम् ॥ २४ ॥

ओकारोऽत्वम् ॥ २५ ॥

वि.&भा. अतः **परमोकारस्य अत्वम्** उच्यते ॥ २५ ॥

दी. इदानीम् **ओकारस्य अत्वम्** अकारो भवति ॥ २५ ॥

नदंवओ संस्तोभे ॥ २६ ॥

वि. **संस्तोभे नदं व** ओ-शब्दस्य अत्वम् । **नदंवोअदतीनाम्** ॥ २६ ॥

भा. **संस्तोभे नदं व ओदतीनाम्** इति ओकारः अत्वम् । **नदंवोअदती-ऽ३नाऽ३म्** ॥ २६ ॥

दी. **नदंवोअदतीमाम्** (र. ए. ७८) इति स॑स्तोभे **नदंवओ** । अत्र ओ-कारस्य अत्वम् । उदाहरणम् । **नदंवोअदतीनाम्** ॥ २६ ॥

ओस्तोभे च महामिन्दो [सत्रासाहीये] ॥ २७ ॥

वि. **नू नो रयिंमहामिन्दो** (ऊ. क्षु. ९२१) इत्यत्र ओकारे स्तोभे प्रत्यये ओकारस्य अत्वम् । उदाहरणम् । **सत्रासाहीये रयिंमहामिन्द । ओऽ३वा** ॥ २७ ॥

[यामे च] ॥ २८ ॥

---

4. $KA^2M^{1-2}TS^{1-2}$ om. उच्यते
5. E after अत्वं adds: विधीयते.
6. M^{1-2} om. नदंव...०साहीये (L. 13)
12. $EM^4L^1KPA^1V^2B^4R$ om. सत्रासाहीये
13. A^7S^1 add: सत्रासाहीये before नूनो; T trans. स्तोभे प्रत्यये before नूनो; K रै; T व for रयिं; A^2S^1T om. ओकारे स्तोभे प्रत्यये.
14. A^2TS^1 om. उदाहरणम् सत्रासहीये; My^1KS^2 after ओऽ६वा add: यामोत्तरे च
15. $KA^1M^4LP^1EV^2B^4B^2B^1My^1$ om. यामे च.

वि. **यामे च नूनोरयिम्महामिन्दो** इति ओस्तोभे प्रत्यये ओकारः अत्वम् ॥२८॥

भा. **नूनोरयिंमहामिन्दो** इति ओकारे स्तोभे प्रत्यये ओकारोऽत्वम् यामोत्तरे **नूनोरयिंमहामिन्द** । **ओहाऽ३३ ओ२हा२** । **सत्रासाहीये च** ॥ २७–२८ ॥

दी. **पुनानोअक्रमीदभि** । **ओहाऽ३ओहा** (ऊ क्षु. ९२१) इति **यामोत्तरे** तृतीयायां **नूनोरयिम्महामिन्द** । **ओहाऽ३ओहा** । अत्र ओकारस्य अत्वम् ओस्तोभे प्रत्यये । **पुनाऽ३४** । **नोअक्रमीदभि** (ऊ. द. ७२) इति **सत्रासाहीये** च तृतीयायां **नूनो-ऽ३४** । **रयिंमहामिन्द** । **ओऽ६वा** । अत्र ओकारस्य अत्वम् ॥ २७–२८ ॥

एकारौकारयोरत्वमोष्ठ्ये ॥ २९ ॥

वि. **एकारौकायोरत्वं** भवति **ओष्ठ्ये** परतः । उदाहरणानि । **अर्जुनो अत्के** द्विहिंकारवामदेव्ये । **अध्वर्यो** ऐडसौपर्णे । एवमादीनि ॥ २९ ॥

भा. **एकारौकारयोः अत्वम् ओष्ठ्ये** प्रत्यये । उदाहरणानि-आहर्यतो **अर्जुनो अत्के** द्विहिंकारे वामदेव्ये । **अध्वर्यो** ऐडसौपर्णे । **धारा य ऊर्ध्वो** रयिष्ठे । एव-मादीनि ॥ २९ ॥

दी. एकारस्य ओकारस्य च अत्वम् अकारो भवति **ओष्ठ्ये** वर्णे प्रत्यये । **प्रसोमाऽ२ ३देववीतयाइ** (ऊ. स. ७५५) इति द्विहिंकारे वामदेव्ये द्वितीयायाम् **आहर्यतो अर्जुनोअत्कऔहोऽ३** । अत्र **त्के** इत्येकारस्य औकार ओष्ठ्ये प्रत्यये अत्वम् । **अध्वर्य ओवा** (ऊ. अ. ६४५) इत्यैडसौपर्णे **अध्वर्यो** इत्योकारस्य ओकारे ओष्ठ्ये प्रत्यये अत्वम् । एवमादीनि । ओष्ठ्यास्तु ऋक्तन्त्रे **ओष्ठ्ये वोः पू** । **वकार ओकार उप-**

---

2. P. om. नूनो रयिं०...यामोत्तरे.

8. A^{2} om. एकारौकारयोरत्वम्.

9. M^{1-2} om. एकारौकारयोः ···· ओष्ठ्ये; A^{2}T om. भवति; $A^{2}M^{1-2}TS^{1}$ om. उदाहरणानि···· एवमादीनि.

12. P ऊर्द्ध्वा, A^{1} ऊर्द्धे for ऊर्ध्वो.

16. M^{4} om. त्के इति; M^{1} ओकारे $L^{1}R$ अकारे for औकारे.

ध्मानीयः पवर्ग उकारः । एते ओष्ठ्याः । शिक्षायाम् ओ औ कण्ठोष्ठजौ स्मृतौ ॥ २९ ॥

महे ज्ञीये ॥ ३० ॥

वि. ज्ञीये एकारस्य अत्वम् । यत्ते धीतिं सुमतिमावृणीमहे इत्यत्र हाआ-ऽ२३धा ॥ ३० ॥

भा. यज्ञायज्ञीये यत्ते धीर्तिं सुमतिमावृणीमहे एकारोऽत्वम् ॥ ३० ॥

दी. स[४]मा[३]ऽ५इद्धम् (ऊ. ए. ४२४) इति यज्ञायज्ञीये तृतीयायां य[१]त्तेऽ२धी[र]-ति[१]ꣳसु[र]म[र]तिमावृ[२]णीम । हआऽ२३धा । अत्र हकारमध्ये एकारस्य अत्वम् ॥ ३० ॥

अःकारोऽत्वम् ॥ ३१ ॥

वि. अःकारः अत्वम् आपद्यते ॥ ३१ ॥

भा. अतः परम् अःकारस्य अत्वम् आपद्यते इत्यधिकारार्थम् ॥ ३१ ॥

दी. इदानीम् अःकारस्य अत्वम् अकारो भवति ॥ ३१ ॥

नो अर्षसि पुनानायां साप्तमिकत्रिणिधनायास्ययोः ॥ ३२ ॥

वि. अपो वासनो अर्षसि इत्यत्र अःकारः अत्वमापद्यते ॥ ३२ ॥

भा. अपोवसनः—साप्तमिके आयास्ये त्रिणिधनायास्ये च अःकारः सविसर्गः अत्वमापद्यते ॥ ३२ ॥

दी. साप्तमिके सप्तमेऽहनि भवे । पु[४]ना[र]न[३]स्सो[४र]मधा[३र२५र]रया । एऽ३ । औ[२]ऽ३हो[४]वा (ऊ. द. १२६) इति आयास्ये न[३र]आऽ३४५ इति नकारस्य अःकारः अत्वमापद्यते ।

3. S[1] om. ०हे इत्यत्र; A[2]M[1-2]T om. अत्र.

5. P om. एकारोऽत्वम्.

पुनानस्सोमधाहाउहोवा (ऊ. द. ४१) इति **त्रिणिधने आयास्ये** च **नआऽ३४५** इति नकारस्य अःकारः अत्वमापद्यते ॥ ३२ ॥

यौधाजये च ॥ ३३ ॥

वि. यौधाजये च अःकारः अत्वमापद्यते ॥ ३३ ॥

भा. अपो वसानः अत्वमापद्यते ॥ ३३ ॥

दी. पुनाऽ३१ । नाऽ३स्सो । म (ऊ. द. ३) इति **यौधाजये च नआऽ३-४५** इति नकारस्य अःकारः अत्वमापद्यते ॥ ॥ ३३ ॥

वृषोअचिक्रायां च त्रिणिधने ॥ ३४ ॥

वि. वृषोअचिक्रायां (ऊ. सं. २८९) **त्रिणिधने** अःकारः अत्वमापद्यते । **गोभिरञ्जान** इत्यत्र अञ्जाऽ२ । **नआऽ३४५षाऽ२३४सी** । ॥ ३४ ॥

भा. त्रिणिधनायास्ये वृषो अचिक्रायां (ऊ. सं. २८९) च **गोभिरञ्जान** इति अःकारः अत्वम् ॥ ३४ ॥

दी. मृज्यमानस्सुहाहाउहोवा (ऊ. सं. २८९) इति **त्रिणिधने आयास्ये वृषो अचिक्रादद्धाउहोवा** इति तृतीयायाम् **आञ्जाऽ२** । **नआऽ२३४** । अत्र नकारस्य अःकारः अत्वम् ॥ ३४ ॥

अयंपूषायां च क्रौञ्चे ॥ ३५ ॥

वि. अयंपूषायां (ऊ. द. ४९) **क्रौञ्चे** च मध्येनिधने अःकारः अत्वम् । **सोमः पुनान** इत्यत्र ॥ ३५ ॥

---

4. T om. यौधाजये च.

8. A²T om. वृषो अचिक्रायां च त्रिणिधने.

17. A²M¹⁻²T om. अयं पूषायां क्रौञ्चे च; A²T अःकारस्य for अःकारः

भा. **अयंपूपायां च** मध्येनिधने **क्रौञ्चे सोमः पुनानो अर्षसि** इति अःकारः अत्वम् ॥ ३५ ॥

दी. **अयंपूषा । हो । रयिर्भगाऽ३ए** (ऊ. द. ४९) इति **मध्येनिधने क्रौञ्चे नश्चाऽ२३४** । अत्र नकारस्य अःकारः अत्वम् ॥ ३५ ॥

वश्च बृहति स्तावे ॥ ३६ ॥

वि. **अयंपूषायां** (र. क्षु. १८६) **बृहति प्रस्तावे** अःकारः अत्वम् । **पवमानास इन्दव** इत्यत्र **औहोइवयाऽ३ए** ॥ ३६ ॥

भा. **बृहति प्रस्तावे** अक्षरसंसर्गे **अयंपूषा-** (र. क्षु. १८६) तृतीयायां **एकारे** प्रत्यये अःकारः अत्वम् ॥ ३६ ॥

दी. **औहोअयंपूषारयिर्भगाऽ३ए** (र. क्षु. १८६) इति **बृहति** तृतीयायाम् **औहोइवयाऽ३ए** । अत्र प्रस्तावे **वकारस्य** अःकारः अत्वम् ॥ ३६ ॥

पर उत्सेधे दुहानायाम् ॥ ३७ ॥

वि. **दुहानायाम्** (ऊ. सं. ३३२) **उत्सेधे घृणातपन्तमतिसूर्यंपर** इत्यत्र अःकारोऽत्वम् ॥ ३७ ॥

भा. **घृणातपन्तमतिसूर्यंपर** (ऊ. सं. ३३२) **इति** अःकारः अत्वम् ॥ ३७ ॥

दी. **तवाहाऽसोमरारण । सख्ये** (ऊ. सं. ३६२) इति **उत्सेधे दुहानो-**

4. A²T अःकारस्य for अःकारः

8. B⁴ om. अक्षर...तृतीयायां; V²om. पकारे प्रत्यये

9. B⁴ after अत्वम् adds: आपद्यते;

13. A²T अःकारस्य for अःकारः.

४ ३२४ ५   २ १ २
बभ्रऊधनि इति तृतीयायां रिंयंपार । अत्र रकारस्य अःकारः अत्वम् ॥ ३७ ॥

पुरो मत्स्वे प्रत्यये वैराजे ॥ ३८ ॥

वि॰ वैराजे पुरःशब्दे अःकारस्य अत्वं मत्स्वे प्रत्यये पुरोजितीति । इयपुरमत्स्वाऽ३ ॥ ३८ ॥

भा. पुरःशब्दस्य अःकारः मत्स्वे प्रत्यये अत्वमापद्यते ॥ ३८ ॥

२र र र र र   १
दी. होइयाहोइयाहोइयाऽ३४३पुरः (र. क्षु. १९०) इति वैराजे इयपुरमत्स्वाऽ३ । अत्र पुरःशब्दे अःकारो मत्स्वे प्रत्यये अत्वमापद्यते ॥ ३८ ॥

पुरुषशब्दः प्रथमस्वरो व्याहृतिषु ॥ ३९ ॥

वि. पुरुषशब्दः प्रथमस्वरस्थो यदा तदा अःकारस्य अत्वं व्याहृतिसामसु ॥ ३९ ॥

भा. व्याहृतिसामसु पुरुषशब्दः प्रथमस्वरः अःकारोऽत्वम् । भूर्भुवः स्वः सत्यं पुरुष इति पञ्च व्याहृतयः ॥ ३९ ॥

दी. भूर्भुवः स्वः सत्यं पुरुष इति पञ्च व्याहृतयः । एतासु व्याहृतिषु (र. अ. १००) पुरुष । होइ । पुरुष । अत्र प्रथमस्वरे पुरुषशब्दस्य अःकारः अत्वम् ॥ ३९ ॥

कामे च सर्वासु मद-भिय-रुह.शब्दा मध्यमे विकल्पे ॥ ४० ॥

---

3. $M^{1-2}T$ om. वैराजे; $M^{1-2}r$ om. पुरोजितीति.

8. E °स्वरे for °स्वरो.

9. $A^{2}T$ om. व्याहृतिसामसु.

11. $V^{2}PA^{1}$ व्याहृतिषु for व्याहृतिसमासु; P °स्वरे, V^{3} स्वरस्थे for °स्वरः.

वि. **निधनकामे सर्वासु** स्तोत्रीयासु **मद्भियरुह**-शब्देषु मध्यमविकल्पविषये अ:कारोऽत्वम् ॥ ४० ॥

इति फुल्लसूत्रविवरणे अत्वे द्वितीयस्य पञ्चमः खण्डः ॥ ५ ॥

॥ अत्वं समाप्तम् ॥

भा. **निधनकामे च मद्भियरुह** एतेषु अ:कारः अत्वमापद्यते ॥ ४० ॥

इति पुष्पसूत्रभाष्ये द्वितीयस्य पञ्चमी कण्डिका ॥ ५ ॥

॥ अत्वं परिसमाप्तम् ॥

दी. **पवस्वदारक्षसाधनाः** (ऊ. द. ६८) इति **निधनकामे च** प्रथमायां स्तोत्रीयायां **मद्** इति **मध्यमे विकल्पे** दकारस्य अ:कारोऽत्वम् । द्वितीयायां **भिय** इति मध्यमे विकल्पे कारस्य अ:कारोऽत्वम् । तृतीयायां **रुह** इति मध्यमे विकल्पे हकारस्य अ:कारः अत्वम् ॥ ४० ॥

इति फुल्लदीपे षष्ठप्रपाठकस्य पञ्चमः खण्डः ॥ ५ ॥

॥ अत्वं परिसमाप्तम् ॥

---

1. T om. निधन... अ:कारोऽत्वम्; A^2 om. स्तोत्रीयासु मदभिरुह°; A^2M^{1-2} मध्यमे विकल्पे for मध्यमविकल्पविषये

4. S^1 परिसमाप्तम् for समाप्तम्; T after समाप्तं adds: त्रयोविंशः

6. B^4V^2 om. colophon.

12. फुल्लसूत्रदीपिकायां for फुल्लदीपे.

षष्ठः खण्डः

अथ आर्भावानार्भावौ

वृद्धमृत्वर्णं सर्वमार्भवति षकारस्पर्शयोः प्रत्यययोः ॥ १ ॥

घ्नन्ताःकाऽ२३ष्णाम्। काऽ२३र्द्रीऽ३ । एवंजातीयानि ॥ २ ॥

वि. आर्भावो वक्ष्यते । ऋत्वर्णं वृद्धं सर्वम् आर्भवति षकारस्पर्शयोः प्रत्यययोः । उदाहरणानि । घ्नन्ताःकाऽ२३ष्णाम् (ग्रा. गे. ९०९) । काऽ२३र्द्रीऽ३ (ग्रा. गे. १६५) । एवंजातीयानि ॥ १–२ ॥

भा. घ्नन्ताः का३३३ष्णाम् ॥ का३३३र्द्रीऽ३ ॥ एवंजातीयानि । इदानीम् आर्भावो वर्तिष्यते । ऋत्वर्णं वृद्धं षाकारस्पर्शयोः प्रत्यययोः । ककारादिमकारान्ताः स्पर्शाः । तेषु प्रत्ययेषु सर्वमार्भवति । यथोदाहृतम् ॥ १–२ ॥

दी. इदानीमार्भाव उच्यते । वृद्धमिति । वृद्धं त्रिमात्रम् ऋत्वर्णं सर्वं ककारादि-सर्वव्यञ्जनावस्थितम् आर्भवति षकारे प्रत्यये स्पर्शवर्णे प्रत्यये वा । स्वयमेवोदाहृतम् घ्नन्ताःकाऽ२३ष्णाम् । अत्र षकारे प्रत्यये क्रमध्ये ऋकारस्य आर्भावः । काऽ२३र्द्रीऽ३ । अत्र स्पर्शे प्रत्यये क्रमध्ये ऋकारस्य आर्भावः । प्रयद्गाउ (ग्रा. गे. ९०९) इति कार्ष्णे घ्नन्ताःकाऽ२३ष्णाम् ॥ अपत्यंवृजिनम् (ग्रा. गे. १६५) इति सौमक्रतवे । काऽ२३र्द्रीऽ३ । स्पर्शास्तु इति कार्ष्णे । कखगघङ- चछजझञ- टठडढण-तथदधनपफबभमाः । एवं जातीयानि । सामसु एवंजातीयानि उदाहरणानि द्रष्टव्यानि ॥ १–२॥-

तृकारस्तु न सर्वेषु स्पर्शेष्वार्भवति ॥ ३ ॥

यथा योजाऽ३४रितृभ्यो मघवा । ओइतुऽ२६४म्पात् ॥ ४ ॥

---

5. T ऋत्वर्णः वृद्धः for ऋत्वर्णं वृद्धं; A[2]M[1-2]T सर्वत्र for सर्वम्.
6. A[2] om. उदाहरणानि.
10. V[2] om. प्रत्ययेषु.
11. M[4] सवर्णं for सर्वम्
14. E om. कार्ष्णे.
17. E विज्ञातव्यानि for द्रष्टव्यानि.

वि. ऋकारस्तु सर्वेषु स्पर्शेषु न आर्भवति । यथा योजाऽ२३४रितृभ्योमघवा (ग्रा. ६. १. २३५.१) [इति] साम्नते । ओइतृऽ२३४म्पात् (ग्रा. १२. १२. ४२.१ [इति वाजजिति] । एवंजतीयानि। पूर्वलक्षणेन सर्वव्यञ्जनावस्थितस्य ऋकारस्य वृद्धस्य अर्भावे प्राप्ते तकारावस्थितस्य प्रतिषेधः । उक्तस्यापवादः ॥ ३–४ ॥

भा. पूर्वलक्षणेन सर्वव्यञ्जनावस्थितस्य ऋकारस्य वृद्धस्य आर्भावप्राप्तस्य) तकारावस्थितस्य प्रतिषेधः ॥

दी. पूर्वलक्षणेन सर्वव्यञ्जनावस्थितस्य वृद्धस्य ऋकारस्य आर्भावे प्राप्ते तकारावस्थितस्य ऋकारस्य न आर्भवति । सर्वेषु स्पर्शेषु प्रत्ययेषु । तत्र स्वयमेवोदाहृतम् । यथा योजाऽ३४रितृ । भ्योमघवा । ओइतृऽ२३४म्पात् [इति] ॥

अभिप्रवाः (ग्रा. ६. १. २३५. १)इति साम्नते योजाऽ३४ रितृभ्यो मघवापुरूऽ१ वाद्वृऽ२ः । ओइत्रिक (ग्र. १२. ४५७. १) इति वाजजिति ओइतृऽ२३४म्पात् ॥३–४॥

तृकारस्तषयोः प्रत्यययोरार्भवति ॥ ५ ॥

ताऽ३र्त्ता । यामाधिरो । तार्षाणाऽ२३४ओ ॥ ६ ॥

वि. तृकारस्तकारषकारयोः प्रत्यययोः आर्भवति । नान्येषु । ताऽ३र्त्ता । यामधिरो । तार्षाणाऽ२३४ओ ॥ ५–६ ॥

भा. किं सर्वत्रैव तृकारस्य अनार्भावः । न । किं तर्हि ? तकारषकारयोः प्रत्यययोरार्भावः । यथोदाहृतम् ॥ ५–६ ॥

---

1. K om. ऋकारस्तु....मघवा; My[1]A[2]T तृकारस्य for ऋकारस्तु; My[1] trans. योजाऽ.... साम्नते after म्पात्.

2. M[1-2]TS[1-2] trans. ओइतृऽ२३४म्पात् after मघवा (L. 1). The vivarana MSS. have wrongly exchanged the citations from साम्नत and वाजजित, which we have set right.

4. A[2] om. प्राप्ते तकारवस्थि०.

8. M[4] अत्र for तत्र.

14. M[1-2] om. तृकार०....नान्येषु; S[1-2] तषयोः for तकारषकारयोः;

15. A[2]S[1]T यामधिरो चनां दिवा ओ for यामधिरो.

दी. तकारे स्थितस्य ऋकारस्य तकारे प्रत्यये षकारे वा प्रत्यये आर्भवति। तत्र स्वयमेवोदाहृतम्। ताऽ३र्ता। यामधिरो। तार्षाणाऽ२३४ औ॥ अभाऽ३इग्रि (ऊ. अ. ६२८) इति यज्ञायज्ञीये द्वितीयायां ताऽ३र्ता। यामधिरोचनाऽ२३न्दिवाउ। औहोहाइ। आइही। वायाम्। (ऊ. द. १२८) इत्यभिनिधने काण्वे द्वितीयायां तार्षणाऽ२३४ओ॥ ५–६॥

गृकारो हकारे। पृकारः श्निकारे॥ ७॥

शङ्गाऽ२३र्हपा। रुचदुषसः पार्श्निरग्रायाऽ२ः॥ ८॥

वि. गृकारो हकारे प्रत्यये एवार्भवति। शङ्गाऽ२३र्हपा। पृकारः श्निकारे प्रत्यय एवार्भवति। रुचदुषसःपा। र्श्निरग्रायाऽ२ः॥ ७–८॥

दी. गृकारः गकारवस्थित ऋकारः आर्भवति हकारे प्रत्यये। पृकारः पकारावस्थित ऋकारः आर्भवति हकारे प्रत्यये। पृकारः पकारावस्थित ऋकारः आर्भवति श्निकारे प्रत्यये। तत्र स्वयमेवोदाहृतम्। शङ्गाऽ२३र्हपा। रुचदुषसःपार्श्निरग्राया-ऽ२ः [इति]॥ आऽ५ग्निम् (ऊ. द. २२२) इति वामदेव्ये शङ्गाऽ२३र्हपा॥ पवौहोवा (ऊ. सं. २६३) इति सामराजे तृतीयायां रुचदुषसःपार्श्निरग्रायाऽ२ः॥ ७–८॥

यामे चायं गौरिति॥ ९॥

वि. यामे च गौःपाऽ२र्श्निरक्राऽ२३४मीत्॥ ९॥

दी. आयं गौःपाऽ२र्श्निरक्राऽ२३४मीत् (र. प्रा. १५३) इति यामे पृकार-मध्ये ऋकारस्य आर्भावः श्निप्रत्यये॥ ९॥

---

6. A^{2}T om. पृकारः श्निकारे....अग्रयाऽ२; M$^{1-2}$ om. गृकारः...अग्रायऽ२; no भाष्य on sūtras 7 & 8 is available.

8. K च for एव; A^{2}M$^{1-2}$ om. एवार्भवति; A^{2}M$^{1-2}$T प्रकारः for पृकारः

9. K च for एव.

15. Deepika combines sūtras 9 and 10.

18. M^{4} श्निकारे प्रत्यये for श्निप्रत्यये.

नक्ृ श्वोने प्रत्यये ॥ १० ॥

वि. **नक्ृशब्दः श्वोने** च **प्रत्यये** आर्भवति । सहोदैर्घतमसद्वितीयायामुदाहरणम् ॥ १० ॥

भा. सहोदैर्घतमसे नक्ृकारः **श्वोने प्रत्यये** आर्भवति ॥ १० ॥

१ २ १ २र १
दी. हाउपुराः। जाइतीव्रो। (ऊ. क्षु. ८८२) इति सहोदैर्घतमसे [द्वितीययां]
१र १र
श्वोनकाऽ३ । श्वोनकाऽ३ । अत्र कृमध्ये ऋकारस्यार्भावः । **श्वोने प्रत्यये** ॥ १० ॥

उत्तरस्त्वभ्यासादौ व्यञ्जनलोपः। श्वोनकाऽ३ श्वोनकाऽ३ ॥ ११ ॥

वि. **अभ्यासादौ व्यञ्जनलोपः उक्तः** उत्तरत्र । **व्यञ्जनमपराङ्गं विरामे लुप्यते ॥ अभ्यासे च** (पु. सू. ७.५. ३२-३३) इति । **श्वोनकाऽ३ । श्वोनकाऽ३** ॥११॥

भा. प्रसङ्गादिदमुच्यते । वक्ष्यत्युपरिष्टात् **व्यञ्जनमपराङ्गं विरामे लुप्यते ॥ अभ्यासे च** (पु. सु. ७. ५. ३२–३३) इति । तदत्राभ्यासप्रत्ययस्य रेफस्य लोपः ॥ ११ ॥

दी. अभ्यासे प्रत्यये आदौ **व्यञ्जनलोप उक्तः** । **व्यञ्जनमपराङ्गं विरामे लुप्यते ॥ अभ्यासे** च (पु. सू. ७. ५. ३२-३३) इति **सूत्रेण** । तेन **श्वोनकाऽ३** (१र) । **श्वोनकाऽ३** (१र) । अत्राभ्यासे प्रत्यये रेफस्य लोपः ॥ ११ ॥

यदुक्तं पुरस्तात् षकारस्पर्शयोः प्रत्यययोरार्भवतीति
तत्रापवादाः ॥ १२ ॥

---

2. A^2 एव for च; $M^{1-2}TS^1$ आर्भवति । श्वोन एव प्रत्यये for श्वोने च प्रत्यये आर्भति and M^1 after प्रत्यये adds: नकृश्वोन एवेत्यर्थः, M^2 नकृारिश्वोन एवेत्यर्थः, T न कारे त्वानवेत्यर्थः and S^1 नत्वाकारे । श्वोन एवेत्यर्थः.

8. $A^2M^{1-2}TS^1$ om. व्यञ्जनम्...अभ्यासे चेति.

11. V^2 om. तदत्र

15. on यदुक्तं···पवादाः no bhāṣya is available. Phulladīpa combines this and the following sūtra into one single sūtra; $A^2M^{1-2}T^1$ om. प्रत्यययोः

वि. पुरस्तात् षकारस्पर्शयोरार्भवतीति यदुक्तं तत्रापवादाः ॥ १२ ॥

ससृग्म वावृध्वा च नार्मेधे ॥ १३ ॥

वि.&भा. उप त्वा काम ईमाहे ससृग्महे । वावृध्या२ऽसम् । नार्मेधे एतयोरनार्भावः ॥ १३ ॥

दी. षकारस्पर्शयोः प्रत्यययोर्वृद्धस्य ऋवर्णस्य आर्भवतीति यत् पुरस्तात् पूर्वमुक्तं तत्र तस्मिन् अपवादा उच्यन्ते । अधाहीन्द्रगिर्वणाऽ६ए (ऊ. द. १७) इति नार्मेधे ससृग्महा । द्वितीयायां वावृध्वा२ऽसा । अत्र स्पर्शे प्रत्यये सासृ वावृ इति वृद्धस्य ऋवर्णस्य न आर्भावः ॥ १२–१३ ॥

चकृमा शाकृत्ये ॥ १४ ॥

वि. शाकृत्ये चकृमा नार्भवति ॥ १४ ॥

भा. शाकृत्ये गौरीविते चकृमा सत्यराधस इत्यनार्भावः ॥ १४ ॥

दी. प्रवइन्द्राऽ२ । यमादाऽ२३४नाम् (ऊ. द. १९) इति शाकृत्ये द्वितीयायां चकृऽ२मासा । अस्य वृद्धस्य ऋवर्णस्य न आर्भावः ॥ १४ ॥

एतदेवोदाहरणं यूथादानायां कौल्मलकण्वबृहतोः ॥ १५ ॥

वि. एतदेवोदाहरणं यूथादानायां कौल्मलकण्वबृहतोश्चकृमा नार्भवति ॥१५॥

भा. आपुरन्दरं चकृमेति अनार्भावः ॥ १५ ॥

---

1. A[2]M[1-2] T om. पुरस्तात्…तत्रापवादाः

3. KA[2]M[1-2]TS[1-2] इत्येतयोर्नार्मेधेऽनार्भावः for नार्मेधे एतयोरनार्भावः

5. E om. यत्

7. E स्पर्शो॰ for स्पर्शे.

14. M[1-2] om. एतदेवो॰…॰दाहरणम् (L. 15)

15. A[2] om. एतदेवोदाहरणं; T om. एतद्…बृहतोश्

दी. तुवऽ३ऽहोऽ३एहिचेरवाइ (ऊ. ए. ४३३) इति **कौल्मलबर्हिषे यूथाऽ३दाऽ३नायमऽहसाइ** । इति तृतीयायाम् **आपुरंदरंचकृमा** । **एतदेवोदाहरणम्** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **औहोतुवऽहियाऽ३ए** (ऊ. क्षु. ८६७) इति **कण्वबृहति** तृतीयायाम् **औहोयूथादानाऽ३ए** इत्यस्यां **चकृमाऽ२वाऽ२३४** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ १५ ॥

संगृभातूने इत्यत्राकूपारे ॥ १२ ॥

वि. आतून (ऊ. द. २४) इत्यत्राकूपारे **चित्रं ग्राभं संगृभा** नाभवति ॥१६॥

भा. **राज्याकूपारे चित्रं ग्राभऽसंगृभा** अनार्भावः ॥ १६ ॥

दी. **आतूनाइ** । **दृक्षुमाऽ३न्ताम्** (ऊ. द. २४) इति **राज्याकूपारे** अस्यां **चित्रं ग्राभऽ सम्** । **गृ** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ १६ ॥

मर्मृ स्वासु दैर्घे ॥ १७ ॥

वि.&भा. **स्वासु दैर्घश्रवसे मर्मृज्यन्त** इत्यत्र नार्भावः ॥ १७ ॥

दी. **योविश्वादयतेवस्वोहाओहाऽ३ए** (ऊ. ए. ४३९) इति **स्वासु** तृचे **दैर्घश्रवसे मर्मृऽ२४ज्यन्ताऽ३इ** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ १७ ॥

एतदेवोदाहरणमभिक्रन्दायां धेनुवरुणयोः ॥ १८ ॥

वि. अभिक्रन्दन्कलशायां **मरुतांधेनुवरुणासाम्नोर्मर्मृ** नाभवति ॥ १८ ॥

भा. **अभिक्रन्दायां मर्मृजानोऽविभिः सिन्धुभिर्वृषा** इति **मरुतांधेनुवरुणसाम्नो**रनार्भावः ॥ १८ ॥

---

7. A[2] om. आतून·

12. A[2]TB[4] दैर्घे for दैर्घश्रवसे; PB[4]V[2]A[1] मर्मृज्यन्ते देवयव इति प्रतिहारे अनार्भावः for मर्मृज्यन्त इत्यत्र नार्भावः

13. E om. तृचे

दी. ज्योऽ२३४ । तिर्यङ्गस्यपवतेमधौ (ऊ. सं. ३१३) इति मरुतांधेनौ । आऽ२३४ । भिक्रन्दन्कलशंवाजियौ । अस्यां मर्मृजाऽ२३४नाः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । ज्योतिर्ये । ज्ञाऽ३स्य पवते (ऊ. क्षु. ९११) इति वरुणसाम्नि द्वितीयायां मर्मृजाऽ२३४नाः । एतदेवोदाहरणम् । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ १८ ॥

गिरस्त इन्दायां च संहिते ॥ १९ ॥

वि. **गिरस्त इन्दायां** (ऊ. प्रा. ८४१) **संहिते** **मर्मृ** नार्भवति ॥ १५ ॥

भा. **गिरस्त इन्दायां** (ऊ. प्रा. ८४१) **संहिते** **मर्मृज्यन्ते** **अपस्युव** इति अनार्भावः ॥ १९ ॥

दी. अचिक्रदद्वृ । षाऽ२हराइः (ऊ. प्रा. ८४१) इति **संहिते** **गिरस्त** **इन्दो** । ओऽ२जसा इति द्वितीयायां **मर्मृ**ऽ२ । ज्याऽ२३न्ताइ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ १९ ॥

नभृ प्रसुन्वानायां गौतमसाध्रश्यावाश्वौदलाकूपारदास-वैश्वामित्रस्वारकौत्सण्वतरदोहतरेषु ॥ २० ॥

वि. **प्रसुन्वानायां** **गौतमसाध्रश्यावाश्वौदलाकूपारदैवोदासवैश्वामित्रस्वारकौत्सकण्वरथन्तराज्यदोहरथन्तरेषु** **भृ**-शब्दो नार्भवति । अधिकारात् ॥ २० ॥

भा. **प्रसुन्वानायां** **हतामखं न भृगव** इति **गौतमसाध्रश्यावाश्वौदलाकूपारदैवोदासवैश्वामित्रस्वारकौत्सकण्वतराज्यदोहरथन्तरेषु** अनार्भावः ॥ २० ॥

दी. प्रसुन्वानायान्धसः (सा. १३८६-८) इत्यस्यां **गौतमसाध्रश्यावाश्वौदलाकूपारदैवोदासवैश्वामित्रस्वारकौत्सकण्वरथन्तराज्यदोहरथन्तरेषु** **नभृ** इत्यत्र न आर्भावः ।

---

3. E adds: जागतं before वरुण०.

5. M^{1-2} om. गिरस्त...संहिते.

14. T om. प्रसुन्वानायां...रथन्तरेषु

16. V^2 om. गौतम...रथन्तरेषु.

प्रसुन्वनायअन्धसाः (ऊ. द. ३८) इति गौतमे नभृऽ५गवाः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रसुन्वाऽ३नाय अन्धसाः (ऊ. सं. २४२) इति साध्रे नभृऽ५गवाः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रसूऽ३१ । न्वाऽ३ना । यअ (ऊ. ए. ४३६) इति श्यावाश्वे हतामखान्नाऽ३भृऽ३ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रसुन्वा-ना । याआऽ२न्धसाः (ऊ. ए. ४३७) इत्यौदले नाऽ५२भृऽ३ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रसुन्वाऽ२३नाय । अन्धाऽ२३४साः (ऊ. अ. ५८९) इत्याकूपारे नाऽ२३भृऽ३ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्राऽ४सुन्वाना । हो (ऊ. अ. ६२७) इति दैवोदासे नाऽ२३४भृ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रसु-न्वाय अन्धसः । मर्तोनाऽ२३४वा (ऊ. स. ७५७) इति वैश्वामित्रे नभृऽ५गवाः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रसुन्वानायाऽ३अन्धसाः (ऊ. अ. ७५८) इति स्वारकौत्से नभृऽ३गाऽ५वाऽ६५६ः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रसुन्वा-नायअन्धसाः (ऊ. क्षु. ८७६) इति कण्वरथन्तरे नभृऽ३आउवाऽ२३ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । च्योहम् । प्रसुन्वानाऽ२ । यअन्धाऽ२३४साः (र. अ. ९४) इत्याज्यदोहे नभृगाऽ२३४वाः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रसुन्वानाय अन्धसोवा (र. क्षु. १८४) इति रथन्तरे भृगाऽ२३४वा । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ २० ॥

नृभिः प्रत्नं सधस्थमित्यत्रैडयास्यगौङ्गज्ञीयषेधा-भीशाष्कारसोमवरुणतमतरजम्भेषु ॥ २१ ॥

वि. प्रत्न॰ सधस्थायाम् ऐडायास्यगौङ्गवयज्ञायज्ञीयनिषेधाभीशवाष्कारणिधन-सोमसामगौतमरथन्तरबृहन्निधनत्रार्कजम्भेषु नृ-शब्दो न आर्भवति । नृभिर्धौत इत्यत्र ॥ २१ ॥

4. M[4] om. वृद्धस्य ऋवर्णस्य
10. E. om. अत्र वृद्धस्य ऋवर्णस्य न आर्भावः
18. A[2]T सामगौ for वरुण.
19. T om. प्रत्नं...जम्भेषु

भा. **नृभिर्धौतो विचक्षणः** इत्येतेषु सामसु आनार्भावः ॥ २१ ॥

दी. **प्रत्नस्सधस्थम्** (ऊ. द. ४०) इत्यस्याम् ऐडायास्यगौङ्गवयज्ञायज्ञीयनिषेधाभीशवाष्कारणिधनसोमसामवरुणसामगौतमरथन्तरवार्कजम्भेषु **नृभि**रित्यत्र न आर्भावः । **आइपुना** (ऊ. द. ४०) इत्यैडायास्ये तृतीयायां **नृभिर्धौताऽ३१ः** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **पुनाऽ५नाऽ३ःसोमधारया** । **आपोऽ२** (ऊ. द. १२५) इति गौङ्गवे तृतीयायां **नृभिर्धौ** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **पुनाऽ५नः** (ऊ. द. २१३) इति यज्ञायज्ञीये तृतीयायां **नृभिर्धौतोविचाऽ२क्षणाउ** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **पुनानःऽ२सोमधारया** (ऊ. द. २१३) इति निषेधे तृतीयायां **नृभिऽ३इर्धौताः** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **पुनानस्सोमधारयाए । ए** (ऊ. ए. ८९६) इत्याभीशवोत्तरे तृतीयायां **नृऽ२३४भीः** । अत्र वृद्धस्य न आर्भावः । **पुनानाऽस्सोमधारया** (ऊ. अ. ६६३) इत्याष्कारणिधने तृतीयायां **नृऽ३भीः** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **पुनानस्सोऽ२मधारया** (ऊ. अ. ६६८) इति सोमसाम्नि तृतीयायां **नृभाऽ२इर्धौताऽ२ः** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **पुनानस्सोमधारयोवा** । **ओवा** (ऊ. ए. ५१४) इति वरुणसाम्नि तृतीयायां **नृऽ२३भीः** अत्र वृद्धस्य ऋकारस्य न आर्भावः । **हाउपुनानस्सोमधारयाहाउ** (ऊ. ए. ७९०) इति उभयतस्तोभे गौतमे तृतीयायां **नृभिर्धौताऽ३४ः** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **पुनानस्सोमधाराया** (र. क्षु. १५८) इति रथन्तरे तृतीयायां **नृभिर्धौतोऽ२३वाऽ३इ** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । **हाउपुनानस्सोमधारया** (र. क्षु. १७२) इति बृहन्निधने वार्कजम्भे तृतीयायां **नृभिर्धौतो** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ २१ ॥

एतदेवोदाहरणमभिसोमाध्यास्यायां हदुकृथाग्नेस्त्रिणिधनहन्मनेषु ॥ २२ ॥

वि. **अभिसोमाध्यास्यायां बार्हदुकृथाग्नेस्त्रिणिधनपौरुहन्मनेषु** नृभिश्शब्दो नार्भवति । **नृभिर्येमाण** इत्यत्र ॥ २२ ॥

भा. **नृभिर्येमाणो हर्यतो विचक्षण** इति **बार्हदुकृथादि**ष्वनार्भावः ॥ २२ ॥

दी. अभिसोमेत्यस्या अध्यासायां प्रहिन्वान इत्यस्यां बार्हदुक्थाग्नेस्त्रिणिधनपौरुहन्मनेषु नृभिरित्येतदेवोदाहरणम् । प्रहिन्वानऋ । ताऽरम् । बृहत् (ऊ. द. १५३) इति बार्हदुक्थे नृभिर्येमाऽर । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रहिन्वानाः । आर्तबृऽर३४हात् (ऊ. सं. २५६) इत्यग्नेस्त्रिणिधने नृभिर्येऽर३४मा । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । प्रहिन्वाऽ३नऋतंबृहत् (ऊ. अ. ५६०) इति पौरुहन्मने नृभिर्येमा । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ २२ ॥

धर्तायां ज्ञीयकावाभिक्रन्देषु ॥ २३ ॥

वि. धर्तायां यज्ञायज्ञीयकावाभिक्रन्देषु दक्षो देवानामनुमाद्यो नृभिर्नार्भावः ॥२३॥

भा. धर्तायां दक्षो देवानामनुमाद्यो नृभिर् इति ज्ञीयकावाभिक्रन्देषु आनार्भावः ॥ २३ ॥

दी. धर्ता दिव (सा. १२२८–३०) इत्यस्यां यज्ञायज्ञीयकावाभिक्रन्देषु नृभिरित्येतदेवोदाहरणम् । धर्ताऽ५दि (ऊ. अ. ५८८) इति यज्ञायज्ञीये दीऽ३योनृऽ३भाइः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । धर्तोवा (ऊ. सं. ३३८) इति कावे दीयोनृभाऽ२इः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । धर्तादिवःपवते कृत्वियो (ऊ. क्षु. ९२८) इति वायोरभिक्रन्दे दक्षोदेवानामनुमादियोऽ१नृऽ३भाइः । अत्र वृद्धस्य ऋकारस्य न आर्भावः ॥ २३ ॥

अवद्युतानायां च तमसोऽर्के ॥ २४ ॥

---

8. $A^2M^{1-2}T$ om. धर्तायां....०क्रन्देषु.

9. PV^2 after ०काव० adds: ०वसिष्ठ०

11. V^1E after ०काव० ins द्वयोर

17. $A^2M^{-2}TS^1$ before अवद्युतानायां add: अतः परं पाठेनैव (M^{1-2} प्रपाठकेनैव, A^2T पाठकेनैव) व्याख्यातम् । यावदवृद्धस्य (S^1 यावदवृद्धस्य) ऋकारस्य (A^2 ऋकाराक्षरस्य) आर्भावं (M^{1-2} यावदवृद्धिः स्यात्तां) वक्ष्यति– 'अवृद्धमपि यदार्भवति' इति. (M^{1-2} om. अवृद्धमपि...इति) and these MSS. om. the commentary on sutras अवश्रुतायां च तमसोऽर्के ॥ २० ॥ to अवृद्धमप्यार्भवति ॥ ६.७.१६ ॥

वि. अवद्युतानायां दीर्घतमसोऽर्के नृभिर्येमाण इत्यत्र नृशब्दो नार्भवति ॥२४॥

भा. दीर्घतमसोऽर्के अवद्युतानायां नृभिर्येमाणः कोश आ हिरण्यय इत्यनार्भावः ॥ २४ ॥

दी. आभी । प्रियाणिपवतेचनः (र. स. १२५) इति दीर्घतमसोऽर्के आवा इति तृतीयायां नृभीः । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ २४ ॥

कक्ृ तन्तेमदायां हारिभरवारेषु ॥ २५ ॥

वि. तन्तेमदायां (सा. ८८०–२) हारिवर्णसौभरवारवन्तीयेषु उलोककृत्नुम् इति कृ नार्भावः ॥ २५ ॥

भा. उलोककृत्नुमद्रिव इति हारिवर्णसौभरवारवन्तीयेषु अनार्भावः ॥ २५ ॥

दी. तन्तेमदम् (सा- ८८०–२) इत्यस्यां हारिवर्णसौभरवारवन्तीयेषु कक्ृदित्यत्र न आर्भावः । तन्तेमदाऽ२ इगृणीमसाइ (ऊ. द. ६६) इति हारिवर्णे उलोकाऽ३-कृऽ३ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । तन्ताऽ३इमाऽ२दंगृणीमसोवा (ऊ. स. ७३७) इति सौभरे काऽ२३४कृ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । तन्तेमदा-औहोहाउ (ऊ. ए. ५०९) इति वारवन्तीये उहुवाऽ२३४कृ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ २५ ॥

एतदेवोदाहरणमयंपुनानायां ज्ञीये ॥ २६ ॥

वि.&भा. अयंपुनानायां (ऊ. अ. ६३०) यज्ञायज्ञीये अभवदुलोककृत् इत्यनार्भावः ॥ २६ ॥

दी. वृषाऽ५म । ताऽ३इनाम्पवताइ (ऊ. अ. ६३०) इति यज्ञायज्ञीये तृतीयायां याना । यंपुनान इत्यस्याम् ऊऽ३लोकाऽ३कृत् । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ २६ ॥

---

19. L[1]M[4] om. तृतीयायां.

तन्त्वामदायां च संहिते ॥ २७ ॥

वि.&भा. **तन्त्वामदायां संहिते** (ऊ. प्रा. ८४१) **उलोककृत्नुमीमह** इत्यलानार्भावः ॥ २७ ॥

दी. अचिक्रदद्वृ । षाऽरहाराइः (ऊ. प्रा. ८४१) इति स२हिते तन्त्वामदाय इति तृतीयायां काऽ२३कृ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ २७ ॥

प्रोषु वत्सासु च ॥ २८ ॥

वि. **प्रोष्वस्मै नित्यवत्सासु अभि केचिदुलोककृ**दिति नार्भावः ॥ २८ ॥

इति पुष्पसूत्रविवरणे आर्भावे द्वितीयस्य षष्ठः खण्डः ॥ ६ ॥

भा. **प्रोषु** (र. क्षु. १७०) **नित्यवत्सासु अभि केचिदुलोककृ**दित्यनार्भावः ॥२८॥

इति पुष्पसूत्रभाष्ये द्वितीयस्य षष्ठी कण्डिका समाप्ता ॥ ६ ॥

दी. एप्रोषु (र. क्षु. १७०) इति **नित्यवत्सासु अभीकेचिदुलोऽ१काऽ३कृत्** । अत्र वृद्धष्य ऋवर्णस्य न आर्भावः ॥ २८ ॥

इति फुल्लदीपे षष्ठप्रपाठकस्य षष्ठः खण्डः ॥ ६ ॥

---

2. KS[2] कृ नार्भावः । उलोककृत्नुमित्यत्र for उलोक....०नार्भावः; V[2]PB[4]A[1] om. अत्र.
7. V[2]PB[4]A[4] अनार्भावः for नार्भावः
8. KS[2] इति द्वितीयस्य षष्ठः for colophon.
9. V[2] trans. नित्यवत्सासु before प्रोषु and after प्रोषु adds: अस्मै इति.
12. V[2] om. colophon.; B[4] इति षष्ठी कण्डिका for colophon.
13. M[4] दीपिकायां for ०दीपे

सप्तमः खण्डः

समृ त्रैशोके ॥ १ ॥

वि. त्रैशोके समृक्कभिरित्यत्र मृ नार्भावः ॥ १ ॥

भा. त्रैशोके अपि कर्णे तरस्विनः समृक्कभिरित्यनार्भावः ॥ १ ॥

२ १ ३२
दी. विश्वोहाइ (ऊ. द. ७३) इति त्रैशोके द्वितीयायां समृऽ३४। अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ १ ॥

वृक्त वयंघत्वायामभिनिधने काण्वे ॥ २ ॥

वि.&भा. आपो न वृक्तबर्हिष इत्यत्राभिनिधने काण्वे वृ नार्भावः ॥ २ ॥

२र १ २ १ २ १ २
दी. औहोहोहाइ । आइही । वायाम् (ऊ. द. १२८) इत्यभिनिधने काण्वे
२ ३ ५
आपोनाऽ२३४वृ । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ २ ॥

वृष्णिर्यत्सानोर्वंशीये ॥ ३ ॥

वि.&भा. उद्वंशीये यूथेन वृष्णिः (ऊ. द. २०८) इति नार्भावः ॥ ३ ॥

१र २ र र १ २ १ १ र २र
दी. गायन्तित्वागायत्रिणआ (ऊ. द. २०८) इत्युद्वंशीये यत्सानोरिति द्वितीयायां
२रर३ ५
यूथेनाऽ२३४वृ । अत्र वृद्धस्य ऋकारस्य न आर्भावः ॥ ३ ॥

इवोपदृगुपत्वाजा वार तृतीयायाम् ॥ ४ ॥

वि.&भा. भद्रासूर्यइवोपदृग् (ऊ. ए. ४२७) इति वारवन्तीये नार्भावः ॥ ४ ॥

२ र र र १ २
दी. उपत्वाजाऔहोहाइ (ऊ. ए. ४२७) इति वारवन्तीये तृतीयायां दृक् । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ ४ ॥

---

5. M[4] ओइसाऽ२३४म्र for समृ३४.

8. V[2]B[4]PA[1] om. त्र; V[2]B[4]PA[1] अनार्भावः for नार्भावः

एतदेवोदाहरणमयंसूर्यायामामहीयवबोधीयर्षभपवमाना-
शुमार्गीसौम्यैटतसाकेषु ॥ ५ ॥

वि॰ अयंसूर्यायाम् (सा. ७५६) आमहीयवजराबोधीयऋषभपवमानाशुभार्गवमार्गीयवसौमित्रैटतसाकमश्वेषु इवोपदृगिति न आर्भावः ॥ ५ ॥

भा. अयं सूर्य इवोपदृग् इत्येतेषु सामसु आनार्भावः ॥ ५ ॥

दी. अस्य प्रत्ना (सा. ७५५–७५७) इत्येतासु आमाहीयवजराबोधीयर्षभपवमानाशुभार्गवमार्गीयवसौमित्रैटतसाकमश्वेषु अयंसूर्यायाम् (सा. ७५६) ऋचि दृक् । एतदेवोदाहरणम् । अस्य प्राऽ३त्नामनुद्युताम् (ऊ. सं. ३७२) इत्यामहीयवे द्वितीयायाम् अयᳲसूऽ३र्यइवोपदृक् अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ अस्यप्रत्नोवा (ऊ. सं. ३७२) इति जराबोधीये द्वितीयायाम् आइवोपदृक् । अत्र वृद्धस्य ऋवर्णस्य नार्भावः ॥ हाहावस्य प्रत्नाम् (ऊ. ए. ४९३) इति ऋषभे पावमाने द्वितीयायाम् आइवोऽ२पाऽ२३४दृक् । अत्र वृद्धस्य ऋनर्णस्य न आर्भावः ॥ अस्य प्रत्नाम् । नुद्युऽ२ताम् (ऊ. अ. ५५१) इत्याशुभार्गवे द्वितीयायाम् इवोपाऽ३दृ । अत्र वृद्धस्य ऋर्णवस्य न आर्भावः ॥ अस्यौहोवा (ऊ. अ. ५५२) इति मार्गीयवे द्वितीयायाम् इवोपाऽ३दृक् । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ अस्यप्रत्नामनुद्युताऽ३मे (ऊ. अ. ५५३) इति सौमित्रे द्वितीयायाम् अयंसूर्यइवोपदृऽ३गे । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ आस्य । एअस्या (ऊ. अ. ५५४) इत्यैटते द्वितीयायां पाऽ२३४दृक् । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः । अस्यप्रत्नाऽ३म । हौऽ३होऽ३१इ (ऊ. अ. ५५५) इति धुरांसाकमश्वे द्वितीयायाम् इवोपदृऽ३क् । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ ५ ॥

1, R °पवमान° for °पावमान°

4. My[3] om. इवोपदृगिति

10. M[4]L[1]My[3] om. द्वितीयायाम्

11. M[4]L[1] ऋषभ for ऋषभे; M[4] om. द्वितीयायाम्

ऋषिकृच्छिशुं देव्योद्ध्रज्ज्योतिषेषु[६] ॥

वि.&भा. **ऋषिमनाय ऋषिकृत्** इति **वामदेव्योद्धद्धार्गववैश्वज्योतिषेषु** न आर्भावः ॥ ६ ॥

दी. **शिशुंजज्ञानम्** (सा. ११७५–७) इत्येतासु **वामदेव्योद्धद्भार्गववैश्वज्योतिषेषु ऋषिकृत्**। अत्र ऋवर्णस्य न आर्भावः। **शाऽ५इशुम्** (ऊ. ए. ३८१) इति **वामदेव्ये** द्वितीयायां **मनाऽ२याऽ२ऋषिकृत्**। अत्र वृद्धस्य ऋवर्णस्य न आर्भावः। **शिशुञ्जाज्ञाऽ२३** (ऊ. क्षु. ९१३) **इत्युद्धद्भार्गवे** द्वितीयायां **यऋषीकृऽ२३त्**। अत्र वृद्धस्य ऋवर्णस्य न आर्भावः। **हाउहोवऽ३हाइ। शिंशुजज्ञानंऽहर्याऽ३तांमृजन्ताऽ२३४५इ** (ऊ. क्षु. ९१६) इति **वैश्वज्योतिषे** आद्ये द्वितीयायाम् **ऋषिमनायऋषीऽ३कृत्सुवर्षाऽ२३४५ः**। अत्र कृमध्ये ऋकारस्य न आर्भावः ॥ ६ ॥

तसृभिः पाहि रौरवे ॥ ७ ॥

वि.&भा .पाहि चतसृभिः इति **रौरवे**ऽनार्भावः ॥ ७ ॥

दी. **पाहिनोअग्नाऽ६आइकाऽ२३४या** (ऊ. ए. ५९०) इति **रौरवे** द्वितीयायां **पाहिचतसृऽ३भिर्वाऽ२३४साउ**। अत्र सृमध्ये ऋकारस्य नार्भावः ॥ ७ ॥

स्यपुरुकृच्छाध्यू हारमानवयोः ॥ ८ ॥

वि.&भा. **पौरो अश्वस्य पुरुकृत्** (ऊ. ए. ४३२ & स. ७१०) इति **हारायण-**

---

1. My[1] om. ऋषिकृच्...ऋकारस्य न अर्भावः॥ ६ ॥ (L. 10)
2. V[2]B[4]PA[1] अनार्भावः for न आर्भावः
5. EL[4] after अत्र add: om. वृद्धस्य ऋवर्णस्य
9. E om. आद्ये
10. E वृद्धस्य for कृमध्येध्ये; M[4] E ऋवर्णस्य for ऋकारस्य.

पूर्वमानवयोरनार्भावः ॥ ८ ॥

दी. शग्ध्यूषु (सा. १५७९–८०) इत्येतासु **हारायणमानवयोः स्यपुरुकृत्** । अत्र नार्भावः । **शग्ध्यूष्वौहोऽ२इशचीपताइ** (ऊ. ए. ४३२) इति **हारायणे** द्वितीयायां **स्यपुरुकृत्** । अत्र वृद्धस्य ऋकारस्य नार्भावः । **शग्ध्यूषू । शचीवाऽ२३४ ताइ** (ऊ. स. ७१०) इति **पूर्वमानवे** द्वितीयायां **स्यापुरुकृऽ३त्** । अत्र वृद्धस्य ऋवर्णस्य न आर्भावः ॥ ८ ॥

उरुकृदुकुवित्सुनायां बोधीये ॥ ९ ॥

वि. **उरुकृदुरु ण** (ऊ. अ. ६२९) इति **जराबोधीये** नार्भावः ॥ ९ ॥

भा. **कुवित्सुनायां जराबोधीये उरुकृदुरु णस्कृधि** इत्यनार्भावः ॥ ९ ॥

दी. **नमस्तओवा** (ऊ. अ. ६२९) इति **जराबोधीये कुवित्सुनोवा** इति द्वितीयायाम् **उरुकृऽ१दुऽ१२३रु** । अत्र वृद्धस्य ऋकारस्य नार्भावः ॥ ९ ॥

पृथिवीं प्रदै भ्यन्ते ॥ १० ॥

वि.&भा. अभिनिधने काण्वे **अनुमातरं पृथिवीम्** (ऊ. क्षु. ९३१) इति नार्भावः ॥ १० ॥

दी. **औहोहोहाइ । आइही । आदा** (ऊ. क्षु. ९३१) इति **अभ्यन्ते अभिनिधने काण्वे औहोहोहाइ । आइही । प्रादै** इति तृतीयायां **राम्पृथीऽ१३४वीम्** । अत्र प्रमध्ये ऋवर्णस्य नार्भावः ॥ १० ॥

---

13. K· अग्नि० for अभि०; A[1] after काण्वे adds: प्रादैवोदासयाम्

14. PV[2]B[4]A[1] आनार्भावः for नार्भावः

16. E om. औहोहोहाइ । आइही·

17. E om. प्रमध्ये ऋवर्णस्य.

बृहाति च यज्ञायथायाम् ॥ ११ ॥

वि.&भा. **यज्ञायथायां** (र. अ. १०६) **बुहति तत्पृथिवीमिति** नार्भावः ॥११॥

दी. **औहोइयज्ञायथाअपूर्वियाऽ३ए** (र. अ. १०६) इति **बृहति** तत्पृऽ-३४ । अत्र वृद्धस्य ऋवर्णस्य नार्भावः ॥ ११ ॥

ऋधक्सोम दविद्युतीये ॥ १२ ॥

वि. & भा. **दविद्युतत्यायां** (ऊ. प्रा. ८११) **यज्ञयज्ञीये** तृतीयायामक्षरसंसर्ग-प्रस्तावे ऋकारस्यानार्भावः ॥ १२ ॥

दी. दवाऽ५इद्यु । ताऽ३तीऽ३यारुचा (ऊ. प्रा. ८११) इति **यज्ञायज्ञीये** तृतीयायां प्रस्तावे थात्रृ । अत्र वृद्धस्य ऋवर्णस्य नार्भावः ॥ १२ ॥

अवृद्धमप्यार्भवति ॥ १३ ॥

वि. यत् **अवृद्धमपि आर्भवति** तदुच्यते इति । प्रागिव गतार्थः ॥ १३ ॥

भा. अवृद्धस्याप्यार्भाव उपदिश्यते ॥ १३ ॥

दी. अवृद्धस्यापि ऋकारस्य आर्भवति वक्ष्यमाणेषु सामसु ॥ १३ ॥

षभे पृथिवीम् ॥ १४ ॥

वि. **शाकरऋषभे पृथिवीं चाति** (र. द. १५) इत्यत्र अवृद्धमाप्यार्भवति ॥१४॥

---

2. $PV^2B^4A^1$ अनार्भाव; for नार्भावः

4. E om. वृद्धस्य ऋवर्णस्य

5. KA^7 द्वि for दवि.

10. A^2 om. अवृद्धमप्यार्भवति.

11. S^1 trans. यत् after अपि; S^2 वृद्धम् for अवृद्धम्; A^2 om. इति; A^2 एव for इव.

14. A^2T ऋषभे for षभे.

15. M^{1-2} after चाति add: जभृ.

भा. **शाक्वरर्षभे पृथिवीं चाति जभ्रिष** इति आर्भावः ॥ १४ ॥

२ २२ २ २ २२ २१
दी. **ओऽ३म्** । **पवाएस्वात्राएजसाएतयआ** (र. द. १५) इति शाक्वरऋषभे
१२२ २ २२ २ २
तृतीयायां **पाएर्थाएवाएश्वाऽ१** । अत्र अवृद्धस्य पृशब्दस्य आर् भवति ॥ १४ ॥

धृष्णु वृष्णि ॥ १५ ॥

३२२
वि. **वृष्णि शतानीकेव प्र जिगाति धृष्णुया** इतीदमवृद्धमप्यार्भवति । **तिधा-**
३२
ओवा ॥ १५ ॥

भा. शतानीकेव **प्र जिगाति धृष्णुया** । अवृद्धस्यार्भावः ॥ १५ ॥

३२२ ३२ २
दी. **अभाओवा** । **प्रवाओवा** (र. प्रा. १३७) इति **वृष्णि** द्वितीयायां
३२२३२
तिधाओवा । अत्रावृद्धस्य धृशब्दस्य आर्भावः । **व्यञ्जनमपराङ्गं विरामे लुप्यते** । (पु. सू. ७. ५. ३२) इति व्यञ्जनलोपः ॥ १५ ॥

वृषन्वारे ॥ १६ ॥

वि. **वारवन्तीये सरूपवृषन्नेति वृ**-शब्दोऽवृद्धम् (?द्धः) अपि आर्भवति ॥ १६ ॥

भा. **सरूपवृषन्** (ऊ. ए. ५२८) इति **वारवन्तीये** आर्भावः ॥ १६ ॥

२२ २ १ ३ ५
दी. **साओहोहाइ** । **माऽ२३४न्मा** (ऊ. ए. ५२८) इति **वारवन्तीये** द्वि-
२२ २ २ १ २
तीयायां प्रस्तावे **सरूपवाओहोहाइ** । अत्रावृद्धस्य वृशब्दस्यार्भावः । विरामे व्यञ्जनलोपः ॥ १६ ॥

मृत्यधेनौ ॥ १७ ॥

---

3. E after अवृद्धस्य; adds: अपि; R. ०भाव for भवति

5. A[2] om. इति; M[1-2] om. इतीदम०

7. A[1] after शतानीके add: च; PV[2] वृद्धस्य for अवृद्धस्य; A[1] after अवृद्धस्य adds: अपि

17. M[1-2]T trans. मृत्य धेनौ....आर्भवति ॥ after कृण्वत इति. (p. 461 l. 8)

वि. मरुतांधेनौ केतवो मृत्यवो[इतीदम्]अवृद्धमप्यार्भवति ॥ १७ ॥

भा. मरुतांधेनौ ते अस्य सन्तु केतवो मृत्यवो (ऊ. सं. २९५) आर्भावः ॥१७॥

दी. त्राऽ२३४इः । अस्मैसम्रधेनवोदुदौ (ऊ. सं. २९५) इति मरुतांधेनौ तृतीयायाम् अस्यसन्तुकेतवोअमौ । होत्यौवा: । अत्रावृद्धस्य मृ-शब्दस्यार्भावः । ततः औहोस्तोभेन सह संधिः ॥ १७ ॥

कृण्वते क्रौञ्चे ॥ १८ ॥

वि. अयं पूषा (ऊ. अ. ५९०) इति क्रौश्चाद्ये अवृद्धस्याप्यार्भावः । सोमासः कृण्वते इति ॥ १८ ॥

भा. अयंपूषायां (ऊ. अ. ५९०) क्रौञ्चे सोमासः कृण्वत इत्यार्भावः ॥ १८ ॥

दी. अयंपूषौहो । रायिर्भगाः (ऊ. अ. ५९०) इति क्रौश्चाद्ये द्वितीयायां सोमसऽकौहो । अत्रावृद्धस्य कृशब्दस्यार्भावः । तत औहोस्तोभेन सह संधिः ॥ १८ ॥

मृज्यकण्वतरे । कृन्तच्छङ्कुनि । मार्ज्यमानस्सुहस्तिया । निर्गाअका । एऽ२ । तदो ॥ १९ ॥

वि. कण्वरथन्तरे मृज्यमानेति मृ-शब्दोऽवृद्धम आप्यार्भवति ॥ शङ्कुनि निर्गाअकृन्तशब्दः अवृद्धम् अपि आर्भावति इति प्रायेण ज्ञात्वा प्रदर्शनं कृतम् । मार्ज्यमानस्सुहस्तिया । निर्गाअका । एऽ२ । तदो ॥ १९ ॥

---

2. V^2PA^1 om. इति.

5. M^4 औ, L^1 आ, R अ० for औहो०.

7. A^2 om. अपि.

10. E क्रौञ्चे for क्रौश्चाद्ये.

11. E इत्यस्य, M^4 ०कारस्य for ०शब्दस्य

12. $KA^2M^{1-2}TS^{1-2}$ Read मृज्यकण्वतरे । कृन्तच्छङ्कुनि and मार्ज्यमानः....तदो as three separate sutras and comment.

14. $A^2M^{1-2}T$ तरे for रथन्तरे KS^{1-2} मृज्यशब्दः for मृशब्दः; M^{1-2} om. अवृद्धम्.

16. T एका for एऽ२; A^2 तदेवो, M^{1-2} तदेवोदाहरणम्, T तदोजशा for तदो.

भा. अवृद्धमप्यार्भवतीति प्रमाणं कृत्वा प्रदर्शनं कृतम् ।। १९ ।।

दी. **भाज्यमानस्सुहस्तिया** (ऊ. अ. ७८६) इति **कण्वरथन्तरे** अवृद्धस्य ऋवर्णस्य आर्भावः । **एषस्यधा** । एऽ२ । **रया** । **सुताः** (ऊ. स. ७००) इति **शङ्कुनि** तृतीयायां **निर्गअका** । एऽ२ । **तदो** । जसा । अत्रावृद्धस्य ऋवर्णस्यार्भावः । विरामे व्यञ्जनलोपः ।। १९ ।।

तृम्पायामृवर्णे प्राप्तम् । रेफः प्रथमस्वरायां वृद्धायामप-
दिश्यते । त्राऽ२३म्पाऽ३ ।। २० ।।

वि. **प्रथमस्वरस्थायां वृद्धायां तृम्पायामृवर्णं प्राप्तम्** । **रेफः** प्रापितः । त्राऽ२३म्पाऽ३व्याश्नुहीत्यत्र **वृद्धमृवर्णम्** (पु. सू. ६. ६. १) इत्यार्भावे प्राप्ते **तृकारस्त-पायोरार्भवति** (पु. सू. ६. ६. ३) इति ऋवर्णं प्राप्तम् । वचनात् । **प्रथमस्वरायां** रेफ उपदिश्यते ।। २० ।।

भा. आर्भावे **तृम्पाव्यश्नुहीति** अत्र **तृकारस्तपयोरार्भवतीति** ऋवर्णमेव प्राप्तम् । वचनात् । प्रथमस्वरायां वृद्धायां रेफोत्पत्तिरुपदिश्यते । यथोदाहृतम् ।। २० ।।

---

1. B^4 प्रसंगाणां for प्रमाणं.
2. M^4L^1 मृवर्णस्य for ऋवर्णस्य.
4. M^4L^1My कृवर्णस्य for ऋवर्णस्य.
6. $A^2M^{1-2}T$ प्राप्तरेफं for प्राप्तं रेफः : $KA^2M^{1-2}T$ उपदिश्यते for-अपदिश्यते
7. $A^2M^{1-2}T$ om. त्राऽ२३म्पाऽ३
8. $M^{1-2}TS^1$ before प्रथम add: तृकारस्तु न सर्वेषामार्भवति । ऋकार एव प्राप्ते वचनमिदम्. A^2-$M^{1-2}TS^1$ प्राप्तरेफं रेफप्राप्तिः for प्राप्तम् । रेफः प्रापितः
9. $A^2M^{1-2}TS^1$ त्राम्पा । आर्भावित्रम्पा A^2 तृम्पा । वियश्नुहीति तृकारस्यार्भाववचनात् ($M^{1-2}S^1T$-त्रकारस्य रत्वमार्भाव वचनात्) भवति । प्रथमस्वारायां वृद्धायां त्राम्पायां पूर्वसूत्रेणार्भावे प्राप्ते रेफ पूर्वभावो विधीयते for त्राऽ२३म्पाऽ३....उपदिश्यते ।।
12. V^2PA^1 आर्भाव for आर्भावे; B^4 ऋवर्णप्राप्तं for ऋवर्णमेव प्राप्तम्

दी. **अभित्वावृषभासुते । सुतꣳ सृजोवा** (ऊ. द. २५) इत्यार्भावे **त्राऽ२३म्पाऽ३** । अत्रार्भावे प्राप्ते **तृकारस्तु न सर्वेषु स्पर्शेष्वार्भवति** (पु. सू. ६. ६. २) इत्यनेन तृम्पायामृवर्णं प्राप्तम् । ततः प्रथमस्वरस्थस्य वृद्धस्य तृमध्ये ऋवर्णस्य रेफादेशोऽपदिश्यते उपदिश्यते । क्रियते इत्यर्थः ॥ २० ॥

रथन्तरे च ॥ २१ ॥

वि.&भा. **रथन्तरे च** एतदेव व्याख्यानम् ॥ २१ ॥

दी. **आभित्वावृषभासुतोवा** (र. अ. १०५) इति **रथन्तरे च त्राम्पावियाऽ२३स्नुऽ३** । अत्र तृम्पायामार्भावे प्राप्ते तृकारस्य ऋवर्णं प्राप्तम् । ततः प्रथमस्वरायां वृद्धायां तृम्पायां रेफादेशः । **त्राम्पा** इति ॥ २१ ॥

ऋऽण्वन्देव्यहदाग्नेययोर्ऋवर्णं प्राप्तमकारः क्रियते ।
नायण्वन् ॥ २२ ॥

वि. **तमग्निमस्ते वसवो न्यृण्वन्नित्यत्रावृद्धत्वादृवर्णं प्राप्तमकारः क्रियते वामदेव्यबृहदाग्नेययोः । नायण्वन्** ॥ २२ ॥

इति फुल्लसूत्रविवरणे आर्भावे द्वितीयस्य सप्तमः खण्डः ॥ ७ ॥

॥ आर्भावः समाप्तः ॥

---

3. RL[1] तृवर्णे मध्ये, M[4] तृवर्णस्य मध्ये, My[3] E तृवर्णमध्ये for तृमध्ये
4. M[4] om. उपदिश्यते
6. A[2]M[1-2]T om. रथन्तरे च; B[1] after व्याख्यानम् adds: अभित्वावृषभासुत इति त्रऽ३म्पाऽ२-वियाऽ२.
8. M[4] तृम्पायाः for तृम्पायाम्
12. T om. तमग्निम्....; M[1-2] ऋवर्णमकारप्राप्तमाकारः for ऋवर्णं प्राप्तमकारः
14. A[2]M[1-2] om. इति द्वितीयस्य सप्तमः खण्डः; T षड्विंशः for इति....खण्डः M[1-2]TS[1] फुल्लभाष्ये for फुल्लसूत्रवरणे

भा. **तमग्निमस्ते वसवो न्यृण्वन्निति वामदेव्यबृहदाग्नेययोरवृद्धत्वादृकार** एव प्राप्तो वचनात् । ऋकारः क्रियते । यथोदाहृतम् ॥ २२ ॥

इति पुष्पसूत्रभाष्ये द्वितीयस्य सप्तमी कण्डिका ॥ ७ ॥

॥ आर्भावः समाप्तः ॥

दी. **आऽ५ग्निम्** (ऊ. द. २२२) इति **वामदेव्ये** द्वितीयायां **नाइ** । **अर्ण्वनृत्सु प्रतिचक्षमवसे** । अत्र ऋवर्णस्यावृद्धत्वात् ऋवर्णं प्राप्तम् । सूत्रकारवचनादर्कारः क्रियते । अर्ण्वन्निति । **अग्निनरोदीधितिभिः** । **इयइयाहाइ** (ऊ. अ. ६४२) इति **बृहदाग्नेये** द्वितीयायां **नायर्ण्वन्** । अत्र ऋवर्णस्यावृद्धत्वात् ऋवर्णं प्राप्तम् । **सूत्रकारवचनादर्कारः** क्रियते । ततो **दीर्घवृद्धोपहित इपदान्त आइभूतोकाराकारयोः प्रत्यययोः संधौ यकारमापद्यते** । **गतिर्विरते** (पु. सू. ७१०. १४) इत्यनेन निमध्ये इकारस्य दीर्घवृद्धे कृते तत आइभावे च कृते अकारे प्रत्यये संधौ गतिर्यकारमापद्यते **नयर्ण्वन्** । । एवम् । विरते गतिर्भवति । **नाइ** । **अर्ण्वन्** । एवम् ॥ २२ ॥

इति फुल्लसूत्रदीपे षष्ठप्रपाठकस्य सप्तमः खण्डः ॥ ७ ॥

॥ आर्भावः समाप्तः ॥

अष्टमः खण्डः

अथ प्रश्लेषविश्लेषौ

ऋचि प्रश्लिष्टाः स्वरसंधयः पादमध्ये ॥ १ ॥

---

3. B^4 इति सप्तमी कण्डिका for इति पुष्पसूत्रभाष्ये…कण्डिका; V^2 om. colophon.

5. M^4 तृतीयायाम् for द्वितीयायां

6. $KA^2M^{1-2}TS^{1-2}$ Treat this and the next sutra as a single one and interpret.

वि. अयं वा **महेऽवसे** । **नूनं पुनानोऽविभिः परिस्रव** । **अथादित्यव्रते वयं तव** । एवं स्वरयोरेकीभावः **प्रश्लेषः** । **अयं वामहे अवसे** । नूनं पुनानो अविभिः । अथ आदित्यव्रते वयं तव । एवं स्वरयोरनेकीभावो विश्लेषः । **ऋचि प्रश्लिष्टाः** एकीभूता **स्वरसंधयः** । स्वराणाम् अचां संधयः स्वरसंधयः ॥ १ ॥

भा. ऋग्विषये पादमध्ये स्वरसंधिर्यत्र भवति रूपसंधिना यथा **अग्निमीडिष्वावसे महेव** । **नत्वा अद्रिवः** इति । **तथादित्यव्रते वयं तव** । एवं यत्र स्वरयोरेकीभावः क्रियते स प्रश्लेष उच्यते । तथात्यन्तलुप्तसंधिना यत्र **स्वरस्य** लोपः क्रियते स च प्रश्लेषः । यथा **पादोऽस्य सर्वा भूतानि** । सोऽयमनेन सूत्रेण सिद्धोपन्यासः क्रियते विशेषविवक्षया ॥ १ ॥

दी. ऋग्विषये **पादमध्ये** [ये] स्वरयोः संधयः एकीभावाः क्रियन्ते **ते** प्रश्लिष्टा प्रश्लेषाः उच्यन्ते । यथा **अग्निमिडिष्वावसे निष्कृण्वाना आयुधानीव** । **एषो उषा अपूर्व्या** । **पादोऽस्य सर्वा भूतानि** ॥ १ ॥

साम्नि विवृत्ता ये तान् वक्ष्यामः ॥ २ ॥

वि. ऋचि एकीभूताः स्वरसंधयः **साम्नि ये विवृत्ताः** विश्लिष्टाः अनेकीभूतास्**तान् वक्ष्यामः** ॥ २ ॥

भा. एवं पूर्वलक्षणेन पादमध्ये संश्लिष्टा एकीभूताः **ये** सामविषये विश्लिष्टा भवन्ति तान् उच्चारयिष्यामः ॥ २ ॥

---

1. M^{1-2} आदित्ये for आदित्य०; T वयं त परिस्रव for वयं तव । एवं.
2. M^{1-2} om. नूनं…अविभि
3. M^{1-2}T om. वयं तव; M^{1-2}T om. एकीभूताः
4. KS^{1} om. अचाम् ; $A^{2}M^{1-2}$T om. स्वरसंधयः
5. V^{2} after मध्ये adds: साम्नि; B^{4} पर० for रूप०
7. A^{1} om. उच्यते; A^{1} यथा for तथा; B^{4} वर्णवत्य, A^{1} वर्णवता for अत्यन्तलुप्त०;
9. V^{2} ०विवक्षायाम् for विवक्षया.
10. E ऋचि for ऋग्.
13. $A^{2}M^{1-2}$T trans. ये before साम्नि; KS^{1} विवृक्ता, S^{1}P विवृता for विवृत्ता

दी. एवं पूर्वलक्षणेन पादमध्ये प्रश्लिष्टा एकीभूताः **ये साम्नि** सामविषये **विवृत्ताः** पृथग्भूताः तान् **वक्ष्यामः** कथयिष्यामः वक्ष्यामाणेषु सामसु ॥ २ ॥

महेऽवस इमाउवायां वारदेव्यरथबृहत्सु ॥ ३ ॥

वि. अयं **वामहेऽवस इमाउवायां** (सा. ७५३) **वारन्तीयवामदेव्यरथन्तर-बृहत्सु** विश्लेषः ॥ ३ ॥

भा. **अयं वामहेऽवसे** इति वारवन्तीयादिषु विश्लेषः ॥ ३ ॥

दी. **इमाउवायां** (सा.७५३) ऋचि **वारवन्तीयवामदेव्यरथन्तरबृहत्सु अयं**
२र र र १२
वा महेऽवस इत्यत्र विवृत्तः विश्लेषः पृथग्भूतः । **इमाउवाऔहोहाइ** (ऊ. प्रा. ८२९)
१ र र र २र ३ र
इति **वारवन्तीये अयंवामहेअवसेशचीवाऽ२३४** । अत्राकारस्य विश्लेषः । **आऽ५इमाः**
१ र र र २र१
(ऊ. प्रा. ८३२) इति **वामदेव्ये अयंवामहेअवसेशचीव** । अत्राकारस्य विश्लेषः ।
२ २ र १ २ र र
आइमाउवान्दिविष्टायोवा (र. द. ४) इति **रथन्तरे अयंवामहेअवसे** । अत्राकारस्य
२र र र र २ २र१र
विश्लेषः । **औहोइमाउवान्दिविष्टयाऽ३ए** (र. प्रा. १५७) इति **बृहति वामहेआ** ।
अत्राकारस्य विश्लेषः ॥ ३ ॥

श्रुद्ध्ये तु प्रश्लेषः ॥ ४ ॥

वि. **श्रुद्ध्ये तु प्रश्लेषो** भवति ॥ ४ ॥

भा. एष एव शब्दः **श्रुद्ध्ये** प्रश्लिष्यते ॥ ४ ॥

१र २१ र २१र २र १र
दी. **इमाउवाऽ२न्दि** (ऊ. प्रा. ८३५) इति **श्रुध्ये तु अयंवामहेवसे शची**
रर
वसु । अत्राकारस्य प्रश्लेषः । एकीभावः ॥ ४ ॥

अभीन्द्रमभिवायुमित्यत्र पार्थे ॥ ५ ॥

---

3. A[2]M[1-2]TS[2] रथन्तर for रथ.

10. E ०कारः for ०कारस्य

वि.&भा. अभित्रायुंवीत्यर्षागृणान (ऊ. सं. ३१६) इत्यत्र **पार्थे अभीन्द्रं वृषणम्** इति विश्लिष्यते ॥ ५ ॥

दी. ओऽ३होऽ३होइ । अभित्रायुम् (ऊ. सं. ३१६) **इत्यस्यां पार्थे अभिइन्द्रा ।** अत्रेकारस्य विश्लेषः ॥ ५ ॥

केतवः स्वासु मरुताम् ॥ ६ ॥

वि. भा. स्वासु मरुतांधेनौ ते अस्य सन्तु केतवो मृत्यव इति विश्लेषः ॥६॥

दी. लाऽ२३४इः । अस्मैसम (ऊ. सं. २९४) इति **स्वासु मरुतांधेनौ** तृतीयायाम् **अस्यसन्तुकेतवोअमौ** । अत्राकरस्य विश्लेषः ॥ ६ ॥

गर्भो महत्तत्सोमायां सर्वत्र ॥ ७ ॥

वि. महत्तत्सोमायां (सा. १२५५) **सर्वत्र गर्भो वृणीत देवान्** विश्लेषः ॥७॥

भा. महत्तत्सोमायां (सा.१२५५) **अपां यद्गर्भो वृणीतेति** सर्वसामसु विश्लेषः ॥७॥

दी. हाउ । उहवाइ । अक्राऽ२३४औहोवा (ऊ. अ. ६७३) इति वासिष्ठे **महत्तत्सोमायां** तृतीयायामृचि **भोऽ३अवृ** । अत्राकारस्य विश्लेषः । एवं **महत्तत्सोमायामृचि** (सा. १२५५) **सर्वत्र** सर्वसामसु **हाउहोवाऽ३हाइ । अक्रान्त्समुद्राऽ३ प्रा** (ऊ. अ. ९१४) इति सामराजे । **होईऽ२ । अक्रान्त्समुद्रः प्रथ** (ऊ. क्षु. ९१८) इति वात्सप्रे । **आक्रान्** (र. क्षु. २०३) इति दीर्घतमसोऽर्के । **भोअवृणी** । अत्राकारस्य विश्लेषः ॥ ७ ॥

छन्दासि तु प्रश्लेषः ॥ ८ ॥

---

2. PV²B⁴A¹ विश्लेषः for विश्लिष्यते.

6. KA²M¹-²T¹S¹-² om. ते अस्य सन्तु; A¹ om. मृत्यवः

12, E om. हाइ...सर्वत्र, (1.14)

वि. महत्तत्सोमायां (ग्रा. १६. ७. ४४१) छन्दसि वेदसाम्नि प्रश्लेष एव गर्भोऽवृणीत-शब्दः ॥ ८ ॥

भा. वेदे तु प्रश्लेषः । छन्दःशब्देन वेद उच्यते ॥ ८ ॥

दी. छन्दसि वेदे तु प्रश्लेषः । अकारस्यैकीभावः । महत्तत्सोमोमहिषश्चाऽ३कराऽ२ (ग्रा. १६. ७. ५४२. १) इत्यत्रे अपांयद्गर्भोवृणीताऽ३दाइवाऽ२न् । अत्राकारस्य प्रश्लेषः ॥ ८ ॥

प्रसुन्वानायां सर्वत्र ॥ ९ ॥

वि. सर्वसामसु प्रसुन्वानायां (सा. १३८६) अन्धशब्दो विश्लेषः ॥ ९ ॥

भा. प्रसुन्वानायान्धस (सा. १३८६) इति सर्वसामसु विश्लेषः ॥ ९ ॥

दी. प्रसुन्वानायान्धस (सा. १३८६) इत्यस्यामृचि सर्वसामसु प्रश्लेषः । प्रसु । न्वाना । यअन्धसाः । प्रसुन्वानाय अन्धसाः इत्यादिषु सामसु अकारस्य विश्लेषः ॥९॥

पवस्व यस्तेमदायां सर्वत्र ॥ १० ॥

वि. यस्तेमदायां (सा. ८१५) सर्वत्र तेनापवस्वान्धसा विश्लिष्टः ॥ १० ॥

भा. यस्तेमदायन्तेनापवस्वान्धसेति सर्व[त्र] विश्लेषः ॥ १० ॥

दी. यस्ते मदो वरेण्यः (सा. ८१५) इत्यस्यामृचि तेनापवस्वान्धसेत्यत्राकारस्य विश्लेषः । सर्वत्र । सर्वसामसु । यस्तेमदोवरेणियः । औहोवा (ऊ. द. १३०) इति दक्षणिधने औक्षे स्वअन्धसा । अत्राकारस्य विश्लेषः । इत्यादिषु सामसु ॥ १० ॥

---

3. v[2] om. वेदे तु प्रश्लेषः

8. A[2] विश्लिष्टः for विश्लेषः

13. A[2]M[1-2]TS[1] before यस्ते add: सर्वत्रेत्यनुवर्तते; M[1-2] विश्लेषः for विश्लिष्टः

14. v[2] om. सर्वत्र; B[4] om. सर्वत्र विश्लेषः

15. L[1] before यस्ते adds: गौरीवितं गौतमम्

17. E निधनम् for निधने

सोमसामसाहीयशाम्मदेषु प्रश्लेषः ॥ ११ ॥

वि. **सोमसाम-सत्रासाहीय-शाम्मदेषु तेनापवस्वान्धसा** [इति] प्रश्लेषः ॥ ११ ॥

भा. **तेनापवस्वान्धसा** इति **सोमसामादिषु** प्रश्लेषः ॥ ११ ॥

२ ३ २ ३१२३
दी. **यस्ते मदोवरेण्य** (सा. ८१५) इत्यस्याम् ऋचि **सोमसामसत्रासाहीय-**
१र र र २
शाम्मदेषु तेनापवस्वान्धसेत्यत्राकारस्य प्रश्लेषः । **यस्तेमदोवरेणियाऽ३ए** (ऊ. सं. ३७०)
२र१र २ ३२ र
इत्यध्यर्धेडे **सोमसाम्नि तेनापवस्वान्धसा** । अत्राकारस्य प्रश्लेषः । **यस्तेऽ३४** । **मदोव-**
र ५ ७ १र र र र
रेणियः । **ओऽ६वा** (ऊ. ए. ४८३) इति **सत्रासाहीये तेनापवस्वान्धाऽ२सा** । अत्रा-
३५र ५१ र १र र र र
कारस्य प्रश्लेषः । **यस्तेमदोवऐ** (ऊ. स. ७६१) इति **शाम्मदे तेनापवस्वान्धसा-**
ऐऽ२ । अत्राकारस्य प्रश्लेषः ॥ ११ ॥

पुरो नस्सर्वत्र ॥ १२ ॥

वि. **प्रेद्धो अग्नायां** (सा. १३७५) **पुरो नोऽजस्रया** विश्लिष्यते ॥ १२ ॥

भा. **प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रयेति सर्वत्र** विश्लेषः ॥ १२ ॥

३ २ र
दी. **अग्निनर** (सा. १३७३-५) इत्येतासु तृतीयायां **पुरो न** इत्यत्र सर्वसामसु
१ ४ २ ४र ५
विश्लेषः । **आऽ५ग्निम्** । **नरोऽ२दाऽ३धीतिभाइः** (ऊ. द. २२२) इति विराट्सु **वाम-**
१ र२२१ २र
देव्ये तृतीयायां **पू** । **रोनोअजस्रया** । अत्राकरस्य विश्लेषः । इत्यादिषु सामसु ॥ १२ ॥

माशि वासस्सर्वत्र ॥ १३ ॥

वि.&भा. **माशिवासोऽव क्रमुरिति** सर्वसामसु विश्लेषः ॥ १३ ॥

---

2. M[1-2] trans. प्रश्लेषः before तेना°

12. P दीदिहीति for दीदिहि.

14. M[4] om. इत्यत्र...अजस्रया ; L[1]R om. आऽ५ग्निम्...अजस्रया

17. V[2]B[4]PA[1] शिवासो अव for शिवासोऽव.

दी. इन्द्रक्रतुन्न आ भर (सा. १४५६–७) इत्येतासु द्वितीयायां माशिवासो-ऽव ऋमुरित्यत्र सर्वसामसु विश्लेषः । इन्द्रक्रतोहाइ (ऊ. सं. ३३९) इति महावैष्टम्भे द्वितीयायां माशाइवाऽ२साऽ२३ः । होवाऽ३हाइ । अव । अत्राकारस्य विश्लेषः । इत्यादिषु सामसु ॥ १३ ॥

श्वाद्रिर्नार्वा च पिबा सोमायामृषभे ॥ १४ ॥

वि.&भा. पिबासोममिन्द्रायां (सा ९२७–९) वैराजऋषभे यं ते सुषाव हर्यश्वाद्रिः । सुयतो नार्वा च विश्लेषः ॥ १४ ॥

दी. इयाहाउ । पिबासोमाम् (र. क्षु. १६७) इति वैराजऋषभे अश्व अद्रीः तोनअर्वा । अत्राकारस्य विश्लेषः ॥ १४ ॥

प्र स्म वाजेषु नस्सर्वत्र ॥ १५ ॥

वि. पाहिनोअग्रायां (सा. १५४४–५) प्र स्म वाजेषु नोऽवेति विश्लेषःसर्वत्र सामसु ॥ १५ ॥

भा. प्र स्म वाजेषु नोऽवेति सर्वत्र प्रश्लेषः ॥ १५ ॥

दी. पाहिनो अग्र एकया (सा. १५४४–५) इत्येतासु तृतीयायां प्र स्म वाजेषु नोऽवेत्यत्र विश्लेषः सर्वसामसु । पाहाऽ३१इ । नोऽ३आ । ग्रे (ऊ. ए. ४१३) इति यौधाजये तृतीयायां नो आऽ२३४वा । अत्राकारस्य विश्लेषः ॥ १५ ॥

रथोद्गीथे तु प्रश्लेषः ॥ १६ ॥

---

6. B[4]V[2]PA[1] पिबासोमायां for पिबासोममिन्द्रायां

7. B[4]V[2]PA[1] इति for च.

15. E om. सर्वसामासु.

वि. **रौरवोद्गीथे** तु प्रश्लेषः ॥ १६ ॥

भा. एष एव शब्दो रौरवोद्गीथे प्रश्लेषः ॥ १६ ॥

दी. **पाहिनोअग्नाऽ३आइकाऽ२३४या** (ऊ. ए. ४१०) इति **रौरवे** तु तृतीयायां **प्रस्मवाजेषुनोव** इत्युद्गीथे तु अकारस्य **प्रश्लेष** ॥ १६ ॥

नोअविभिस्सुषावसोमायां सर्वत्र ॥ १७ ॥

वि.&भा. सुषावसोमायां **नूनं पुनानो अविभिर्** (सा॰ १३१४) इति सर्वसामसु विश्लेषः ॥ १७ ॥

दी. **परीतोषिञ्चतासुतम्** (सा. १३१३–५) इत्येतासु **सुषावसोमायामृचि नूनं पुनानो अविभिरित्य**त्राकारस्य विश्लेषः सर्वसामसु । **पराऽ३इतोषिञ्चतासुताम्** (ऊ. द.-१८१) इति **पृष्ठे** द्वितीयायां **नूनंपुनानोअविभिः** अत्राकारस्य विश्लेषः । इत्यादिपु सामसु ॥ १७ ॥

आष्टादंष्ट्रार्कपुष्पसंक्रुतियशस्सु प्रश्लेषः ॥ १८ ॥

वि. एष एव शब्दः **आष्टादं ष्ट्रार्कपुष्पसंक्रुतियशस्सु** प्रश्लिष्यते सुषावसोमायाम् ॥ १८ ॥

इति फुल्लसूत्रविवरणे प्रश्लेषविश्लेषयोः द्वितीयस्याष्टमः खण्डः ॥ ८ ॥

भा. एष एव शब्दः आष्टादंष्ट्रादिषु प्रश्लिष्यते ॥ १८ ॥

इति पुष्पसूत्रभाष्ये द्वितीयस्य अष्टमी कण्डिका समाप्ता ॥ ८ ॥

---

6. KA^{2}M^{-3}TS$^{1-2}$My^{1} विश्लेषस्सर्वत्र for इति सर्वसामसु विश्लेषः
7. PV^{2}B^{4}A^{1} विश्लिष्यते for विश्लेषः.
13. T om. एव; M$^{1-3}$T om. आष्टा०...प्रश्लिष्यते.

१२र१र २ र १र २र१र २ २
दी. परीतोषिश्वतासुतमैयादौ । होऽ३वा (ऊ. ए. ४७२) इत्यष्टादँष्ट्रोत्तरे
र१ २र१र २ १२र१र २ र १
द्वितीयायां नूनंपुनानोऽविभिःपरि । अत्राकारस्य प्रश्लेषः । परीतोषिश्वताऽतम् ।
२र १२१२र २ २
हुवेऽ२ (ऊ. द. १८३) इत्यर्कपुष्पाद्ये द्वितीयायां नूनं पुनानोविभिः । परिस्रव अत्रा-
१ २ र १ १
कारस्य प्रश्लेषः । एपारी । तोषिश्वताऽ२३ होऽ२३इ (र. द. २४) इति संक्रतिनि
र १ २र१२ २ १२र१र २ र १
द्वितीयायां नूनं पुनानोविभिः । अत्राकारस्य प्रश्लेषः । परीतोषिश्वतासुतम् ।
र २र २र१ २र१र २ १ २
सोमो (र. द. २६) इति यशसि द्वितीयायां नूनंपुनानोविभिःपरिस्रव । अत्रा-
कारस्य प्रश्लेषः ॥ १८ ॥

इति फुल्लसूत्रदीपे षष्ठप्रपाठकस्य अष्टमः खण्डः ॥ ८ ॥

नवमः खण्डः

सुते चित्वा नवे ॥ १ ॥

वि.&भा. उत्तरे मानवे सुते चित्वाप्सुमदा (ऊ. द. १८४) इति विश्लेषः ॥१॥

१ २र १र २ १
दी. होवाइ । परीतोषिश्वतासुतम् । होवाइ (ऊ. अ. ६०५) इति
१र २ र
मानवोत्तरे तृतीयायां सुतेचित्वा । अप्सुमदऽ३१ । अत्राकारस्य विश्लेषः ॥ १ ॥

वृद्धाच्च सर्वत्र ॥ २ ॥

वि. सुते चित्वाप्सु-शब्दो वृद्धादक्षरात् परो विश्लियते सर्वत्र ॥ २ ॥

भा. वृद्धात् परस्ताच्चैष एव शब्दः सर्वत्र विश्लिष्टः ॥ २ ॥

---

8. M[4] दीपिकायां षष्ठप्रपाठके ०दीपे षष्ठप्रपाठकस्य
11. A[2]KM[1-2]TS[1-2] om. इति.
15. My[1] om. सर्वत्र.
16. v[2] after विश्लिष्टः । adds: यौधाजये सुताऽ३इंचित्वाऽ३अप्सुमदाऽ३३ । त्वाशब्दो वृद्धः । एतस्मात् परात् अप्सुमदाम इति विश्लेषः ।

दी. **परीतोषिञ्चतासुतम्** (सा. १३१३–५) इत्येतासु तृतीयायां **सुतेचित्वाप्सुमदामोअन्ध** इति वृद्धाक्षरात् परस्याकारस्य विश्लेषः सर्वसामसु। **परीतोषिञ्चतासुतमोहाओहाऽ३ए** (ऊ. द. १८४) इति **दैर्घश्रवसे तृतीयायां सुताऽ३४इचित्वा। आप्सुम।** अत्र वृद्धाक्षरात् परस्याकारस्य विश्लेषः। इत्यादिषु सामसु दीर्घात् परस्याकारस्य तु प्रश्लेषः। **चित्वाप्सुमदामोअन्धासा।** (ऊ.द १५६) अत्राकारस्य प्रश्लेषः॥ २॥

आयास्ये तु प्रश्लेषः॥ ३॥

वि.&भा. आयास्ये तु वृद्धात् परस्य अपि **प्रश्लेषः**॥ ३॥

दी. आइपराइ। तोषाइ (ऊ. सं. २४६) **इत्यैडे आयास्ये** तृतीयायां **सुतेचित्वाऽ३१। प्सुमदा।** अत्र वृद्धात् परस्याकारस्य **प्रश्लेषः**॥ ३॥

उदिन्द्र त्वं ह्येहीत्यत्र कण्वबृहति पूर्वकल्पे॥ ४॥

वि. त्वं ह्येहि (ऊ. क्षु. ८६७) **कण्वबृहति पूर्वकल्पे** विषये उदिन्द्राश्वशब्दो विश्लेषः॥ ४॥

भा. त्वँ ह्येहि चेरव (ऊ. क्षु. ८६७) इति **कण्वबृहति उदिन्द्राश्वमिष्टय** इति **पूर्वकल्पे** विश्लेषः॥ ४॥

दी. औहोतुवँहियाऽ३ए (ऊ. क्षु. ८६७) इति **कण्वबृहति उदाइन्द्राऽ१आऽ२३४** इति **पूर्वकल्पे** प्रथमपक्षे अकारस्य **विश्लेषः**॥ ४॥

स्तावे च॥ ५॥

---

2. M[4]L[1]My[2]R वृद्धाक्षरात् परस्तात् सुतेचित्वाप्सुमदामो अन्धेत्यत्र for सुते...परस्य
7. My[1] KA[2]M[1-2]TS[1-2] om. अपि
10. M[1-2] om. कण्वबृहति पूर्वकल्पे
11. K ०शब्दे for ०शब्दो

वि. **प्रस्तावे** विषये एष एव शब्दो विश्लेषः ॥ ५ ॥

भा. **प्रस्तावे च** कण्वबृहति **उदिन्द्राश्वमिष्टय** इति विश्लेषः ॥ ५ ॥

दी. त्वं ह्येहि (ऊ. क्षु. ८६७) इति कण्वबृहति द्वितीयायाम् **औहोउदिन्द्र आऽ३ए** इति **प्रस्तावे च** अकारस्य विश्लेषः ॥ ५ ॥

जम्भे प्रतिहारे ॥ ६ ॥

वि. **वार्कजम्भे** च **प्रतिहारे** उदिन्द्राश्व-शब्दो विश्लेषः ॥ ६ ॥

भा. बृहन्निधने **वार्कजम्भे उदिन्द्राश्वमिष्टय** इति प्रतिहारे विश्लेषः ॥ ६ ॥

दी. **हाउत्वँह्येहिचेरावाइ** (र. क्षु. १६२) इति बृहन्निधने वार्कजम्भे **उदिन्द्र-आ** इति **प्रतिहारे** अकारस्य विश्लेषः ॥ ६ ॥

कौल्मे स्तावे ॥ ७ ॥

वि. **कौल्मलबर्हिषे प्रस्तावे** एष एव विश्लेषः ॥ ७ ॥

भा. **कौल्मलबर्हिषे प्रस्तावे उदिन्द्राश्व**मिति विश्लेषः ॥ ७ ॥

दी. **तुवाऽ३ह्योऽ३एहिचेराइ** (ऊ. ए. ४३३) इति **कौल्मलबर्हिषे** द्वितीयायां **उदाऽ३इन्द्राऽ३अश्वमिष्टयाइ** इति प्रस्तावे अकारस्य विश्लेषः ॥ ७ ॥

गायन्तो यूथादानायां कण्वबृहति ॥ ८ ॥

वि.&भा. **यूथादानायां कण्वबृहति** इन्द्रंगायन्तोवस इति विश्लेषः ॥ ८ ॥

---

4. R. om. च
5. A²M¹⁻²TS¹⁻² after जम्भे adds च
6. T om. वार्कजम्भे च प्रतिहारे
7. V² after ०जम्भे adds: च
16. T om. यूथादानायां कण्वबृहति.

दी. त्वँह्येहि (ऊ. क्षु. ८६७) कण्वबृहति तृतीयायाम् औहोयूथादानाऽ३ए इत्यस्यां तोआऽ३ । अत्राकारस्य विश्लेषः ॥ ८ ॥

जम्भे च ॥ ९ ॥

वि. वार्कजम्भे च प्रतिहारे एष एव शब्दो विश्लेषः ॥ ९ ॥

भा. वार्कजम्भे च इन्द्रं गायन्तोऽत्रस इति विश्लेषः ॥ ९ ॥

दी. हाउत्वँह्येहिचेरावाइ (र. क्षु. १६२) इति बृहद्विधने वार्कजम्भे च हाउयूथादानायमँहासाइ इत्यस्यां तोऽ२आऽ२३४औहोवा । अत्राकारस्य विश्लेषः ॥ ९ ॥

तवाद्यायां सहोदैर्घमराययोः ॥ १० ॥

वि. सहोदैर्घतमससमराययोराद्यायां तवाहं सोमेति विश्लेषः ॥ १० ॥

भा. सोहोदैर्घमराययोः तवाहँ सोमेति अस्मिञ्छब्दे विश्लेषः ॥ १० ॥

दी. हाउतवा । अहाँसो (ऊ. क्षु. ८८१) इत्याद्यायां सहोदैर्घतमसे हाउ-तवा । अह॰सो । अत्राकारस्य विश्लेषः । हाउहाउहाउ । तावा । अहाम् (ऊ. क्षु. ८८३) इत्याद्यायां मराये तावा । अहाम् अत्राकारस्य विश्लेषः ॥ १० ॥

वैराजे च स्तावे ॥ ११ ॥

वि.&भा. महावैराजे च प्रस्तावे आद्यायमेव तवाहंसोमेति विश्लेषः ॥ ११ ॥

दी. होइयाहोइयाहोइयाऽ२३४तावा (र. क्षु. १८९) इति वैराजे प्रस्तावे च तवा । अहाम् । अत्राकारस्य विश्लेषः ॥ ११ ॥

---

3. M[1]-[2] om. जम्भे च....तवाहं सोमेति विश्लेषः (L.15)

9. M[1]A[2]S[1]M[2] om. सहोदैर्घ....विश्लेष.

15. A[2]M[1]-[2]S[1] om. महावैराजे...विश्लेषः

17. E होइ इत्यादि for होइ...तावा.

तवद्वितीयायामाभशिवद्वैगतयोः ॥ १२ ॥

वि. द्वितीयायां स्तोत्रीयायां **तवाहंनक्तमाभी**शवद्वैगतयोर्विश्लेषः ॥ १२ ॥

भा. **तवाहꣳसोम** द्वितीयायां **आभीशवद्वैगतयोः** **तवाहन्नक्तमुतसोमेति** विश्लेषः॥ १३ ॥

दी. **तवाहꣳसोमरारणए**। (ऊ. ८. ७०) इत्या**भीशवोत्तरे** द्वितीयायां **ताऽ२३४ वाहाऽ३हाइ** । **अहंनक्त** । अत्राकारस्य विश्लेषः । **तवाहाऽ२ꣳसोमरारणा** (ऊ. अ. ६४८) इति **द्वैगते** द्वितीयायां **तवाऽ३** । **हौऽ३होऽ३वा** । **अहन्नक्त** । अत्राकारस्य विश्लेषः ॥१२॥

रहस्ये च बृहति ॥ १३ ॥

वि. **ऊहरहस्ये च तवाहंनक्तम्** [इति] **बृहति** विश्लेषः ॥ १३ ॥

भा. **तवाहꣳसोम**-द्वितीयायां **तवाहन्नक्तेति** विश्लेषः ॥ १३ ॥

दी. **रहस्ये** आरण्यके बृहतो गीत्युत्पन्ने । चकारात् पूर्वस्य **तवाह**मित्यस्य परामर्शः । **औहोहोइतवाहꣳसोमरारणाऽ३ए** (र. क्षु. १९४) इति **बृहति द्वितीयाय तवाऽ३४** । **औहोवा** । **अहान्नक्ताम्** । अत्राकरस्य विश्लेषः ॥ १३ ॥

अरुषी प्रतिष्यासूनरीद्वितीयायां बोधीये ॥ १४ ॥

वि. **प्रतिष्यासूनरीद्वितीयायां जराबोधीये चित्रारुषी**ति विश्लेषः ॥ १४ ॥

भा. **जराबोधीये प्रतिष्यासूनरी**-द्वितीयायां **अश्वेव चित्रारुषीति** विश्लेषः ॥ १४ ॥

दी. **प्रतिष्यासोवा** (ऊ. सा ७२१) इति **जराबोधीये** द्वितीयायां **त्राअरुषाइ** । अत्राकारस्य विश्लेषः ॥ १४ ॥

देवाजरमा ते अग्न इधीमहीत्यत्र ॥ १५ ॥

---

3. B[4] after सोम adds: इति.
14. A[2]M[1-2]Ts[1] om. जरा.

वि. **आ ते अग्न इधीमाहि** (ऊ.द. ९६&स. ६५८) इत्यत्र **सौम्मतसंजययोः** **द्युमन्तं देवाजर**मिति विश्लेषः ॥ १५ ॥

भा. **द्युमन्तं** **देवाजर**मिति [अस्याम्] **आ ते अग्ने इधीमहीत्यत्र** विश्लेषः ॥ १५ ॥

३र ४र ५ र ५ २ ४र५४ ५
दी. **आ ते अग्न इधी** (ऊ. द. ९६) इत्यस्यां संजये **द्युमन्ताऽ३न्देवअजरम्** । अत्राकारस्य विश्लेषः । एवमादीनि ॥ १५ ॥

त्वन्न इन्द्रौपगवे ॥ १६ ॥

वि. **त्वंनइन्द्रायामौपगवे** (ऊ. द. १३८) **त्वं न इन्द्राभर** [इति] विश्लेषः ॥१६॥

भा. उत्तरे **औपगवे त्वं न ईन्द्राभरे**ति विश्लेषः ॥ १६ ॥

५ २ ४ ५र ४ ५र
दी. **तुवन्नाऽ३इन्द्रआभरा** (ऊ. द. १३८) इत्युत्तरे **औपगवे च इन्द्रआभरा** । अत्राकारस्य विश्लेषः ॥ १६ ॥

चासाद्वन्तीयोत्तमतृतीयायाम् ॥ १७ ॥

वि. **वारवन्तीयोत्तमतृतीयायां** स्तोत्रीयायां **स नो दूराच्चासा** [इति] विश्लेषः ॥ १७ ॥

भा. उत्तरे **वारवन्तीये** स्वासु तृचे उत्तमायां **स नो दूराच्चासा**चेति विश्लेषः ॥१७॥

२ र र १ २
दी. **अश्वन्नत्वाऔहोहाइ** (ऊ. ए. ४९१) इति **वारवन्तीयोत्तरे तृतीयायां**
२ ३ ५
चाअसाऽ२३४च्चा । अत्राकारस्य विश्लेषः ॥ १७ ॥

आपप्राथोभे यदिन्द्रायां श्येने ॥ १८ ॥

वि.&भा. **उभेयदिन्द्रायां** (र. द. १९) **श्येने आपप्राथोषा** इवेति विश्लेषः ॥ १८ ॥

---

6. RPA[1]U[2]B[4]M[4]L[1]E after ॰गवे. add: च

11. PA[1]V[2]B[4]M[4]L[1]E R om. च

16. M[1-2] om. आप...॰र्चेतो विश्लेषः (p. 478, l. 14)

१ २ १ १ २२१ १
दी. **ऊभाइ** । **यदिन्द्ररोऽ२दसाइ** (र. द. १९) इति **श्येने** **प्राथउषाऽ२इवा** । अत्रौकारस्य विश्लेषः ।। १८ ।।

स्यार्चतो वैराजर्षभे ॥ १९ ॥

वि.&भा. **वैराजर्षभे** **बोधाविप्रस्यार्चत** इति विश्लेषः ।। १९ ।।

२१२ २ १
दी. **श्रुधीहवाम्** । **विपि** (र. क्षु. १६८) इति **वैराजर्षभे** **स्याऽ३अर्च** । अत्राकारस्य विश्लेषः ।। १९ ।।

देवाञ्जसा बृहति ॥ २१ ॥

वि.&भा. **त्वमग्ने** बृहति तृतीयायां **पथश्च** **देवाञ्जसा** इति विश्लेषः ।। २० ।।

२२२ २ २ २ २
दी. **औहोइत्वमग्नेयज्ञानाꣳहोऽ३ए** (र. सं. ६४) इति **बृहति** तृतीयायां

२१ २
चदाइ । **वाआऽ३१२** । अत्राकारस्य विश्लेषः ॥ २० ॥

महीन धारा गोराजा च कावे ॥ १२ ॥

वि. **कावे** **मही न धारात्यन्धो** । **अग्रेगो राजा** । एतौ विश्लिष्टौ ॥ २१ ॥

भा. **अञ्जकावे महीनधारात्यन्धो** । **अग्रेगोराजाप्यस्तविष्यते** इति विश्लिष्टौ ॥२१॥

२ १ १२ २ २
दी. **अञ्जोवा** (ऊ. ए. ४७१) इति **कावे** द्वितीयायां **महीनधाराअतिया** ।

१२ २ २
अत्राकारस्य विश्लेषः । तृतीयायां **गोराजा अपिया** । अत्राकारस्य विश्लेषः ॥ २१ ॥

पादान्त्यात् परः स्वरो विकृष्यते ॥ २२ ॥

3,5 R वैरजऋषभे for वैराजर्षभे

4. KA[2]TS[1-2] om. इति

8. KPA[1]V[2]B[4] om. तृतीयायाम्

12. K हेतौ for एतौ; M[1-2]T om. एतौ; T after विश्लिष्टौ adds: सप्तविंशः

वि. सर्वत्र सामसु **पादान्त्यत्** ऋक्पादान्त्यात् अक्षरात् परः स्वरो विश्लिष्यत इत्यर्थः ॥ २२ ॥

भा. पादमध्ये स्वरसंधिविश्लेषः उक्तः । इदानीं पादान्ते स्वरयोर्विश्लेष उच्यते ॥ २२ ॥

दी. एवं पादमध्ये स्वरयोः संधिविश्लेष उक्तः । इदानीं पादान्ते स्वरयोर्विश्लेष उच्यतेपादान्त्यादिति । पादस्य अन्त्यात् अक्षरात् परः स्वरोऽकारादिर्विकृष्यते विकर्षं प्राप्नोति । वक्ष्यमाणेषु सामसु ॥ २२ ॥

यथानूषतावद्युतानायाम् । शाचि पूजनायन्त इन्द्रद्वितीयायाम् । दक्षाय विधर्मिणि । गमिष्ठान संस्कृतमित्यौशने ॥ २३ ॥

वि. पूर्वसूत्रस्योदाहरणं वक्ष्यामः । कथम्? **यथा अवद्युतानायां** कावे **अभीऋतस्य दोहना अनूषताधीति** ॥ **अयन्त इन्द्रद्वितीयायां शाचिगो शाचिपूजने**ति दैवोदासादिषु ॥ **विधर्मणि पवस्व सोम महे दक्षाये**ति । **औशने संस्कृतं प्रमिमीतो गमिष्ठानी**ति विश्लेषः ॥ २३ ॥

दी॰ यथा **अभ्यो** वा (ऊ. द. १३) इति कावे तृतीयायाम् **अवोवा** इत्यस्याम् **अनूषाताऽ२३** । **आधीऽ३** । अत्र पादान्ते अकारस्य विश्लेषः । **अयंत इन्द्रसोऽ४मः** (ऊ. द. २२) इति रात्रिदैवोदासे द्वितीयायां **जनाऽ३** । **आऽ२३४** । अत्र पादान्ते अकारस्य विश्लेषः । **पवस्वसोमाऽ२३४** (ऊ. द. २०४) इति **विधर्मणि महेदक्षायाऽ२३४५** । **अश्वो** । अत्र पादान्ते अकारस्य विश्लेषः । **आभा** ।

---

3. V[2] ०मध्यविश्लेषः for ०मध्ये स्वरसंधिविश्लेषः
4. V[2] कथ्यते for उच्यते
5. M[4] इति for एवम्
8. sutras यथा....औशने and एवंजातीयानि are combined in the Northern version.
10. A[2]M[1-2]T om. कथम्
11. KA[2]TS[1-2] om. अयन्तइन्द्रद्वितीयायाम्
17. T om. विधर्मणि

तियग्निरुषसाम् (ऊ. स. ७२८) **इत्यौशने** द्वितीयायां **नासाम्** इत्यस्यां **गमाऽ३इष्ठा** । **अन्ति** । अत्र पादान्ते अकारस्य विष्लेषः ॥ २३ ॥

एवंजातीयानि ॥ २४ ॥

वि. एवंजातियानि अन्यान्यपि द्रष्टव्यानि ॥ २४ ॥

इति फुल्लसूत्रविवरणे प्रश्लेषविश्लेषयोः द्वितीयस्य नवमः खण्डः ॥ ९ ॥

भा. पादान्त्यात् परः स्वरो विकृष्यते इत्यत्रैतान्युदाहरणानि ॥ २३–२४ ॥

इति पुष्पसूत्रभाष्ये द्वितीयस्य नवमी कण्डिका समाप्ता ॥ ९ ॥

दी. सामसु पादान्ते **एवंजातीया**न्युदाहरणानि ज्ञातव्यानि ॥ २४ ॥

इति फुल्लसूत्रदीपे षष्ठप्रपाठकस्य नवमः खण्डः ॥ ९ ॥

दशमः खण्डः

अथापवादाः प्राश्लिष्टाः ॥ १ ॥

वि. अथ अनन्तरं पूर्वलक्षणेन पादन्त्यात् परस्य विश्लेषे प्राप्ते तदपवादत्वेन प्रश्लेषं वक्ष्यामः ॥ १ ॥

---

1. E om. द्वितीयायां
4. $A^2M^{1-2}T$ om. एवंजातीयानि; A^2M^{1-2} om. अन्यानि; T अत्र for अन्यानि
5. $A^2M^{1-2}S^1$ om. इति...नवमः; T अष्टाविंशः for इति ....नवमः
9. M^4 °दीपिकायां षष्ठप्रपाठके for °दीपे षष्ठप्रपाठकस्य.
12. $A^2M^{1-2}T$ om. तद्

भा. पादान्त्यात् परः स्वरो विकृष्यते (पु. सू. ६. ९. २) इत्यस्यापवादः **अथापवादाः प्रश्लिष्टा** इति ॥ १ ॥

दी. अथ पादान्ते विश्लेषकथनानन्तरं **पादान्त्यात् परः स्वरो विकृष्यते** (पु. सू. ६. ९. २) इत्यस्य **अपवादाः** विपरीताः **प्रश्लिष्टा** एकीभावा उच्यन्ते । वक्ष्यमाणेषु सामसु ॥ १ ॥

अंशोरित्यस्य शब्दस्यावृद्धात् परस्य प्रश्लेषः सर्वत्र ॥ २ ॥

वि. प्रसोमदेवायां (ऊ. स. ७५५) **सिन्धुर्न पिप्ये अर्णसा॑ऽशोरित्यत्र अवृद्धात्** पादान्त्यात् अक्षरात् **परस्य** अक्षरस्य **प्रश्लेषः सर्वत्र** । हारायणादिषु उदाहरणम् ॥२॥

भा. सिन्धुर्न पिप्ये अर्णसांशोः पयसा इत्यवृद्धात् परस्य सर्वत्र प्रश्लेषः । द्विहिंकारादिषु ॥ २ ॥

दी. प्रसोमाऽ२३देववीतयाइ (ऊ. स. ७५५) इति द्विहिंकारवामदेव्ये **साइन्धुर्नपिप्येअर्णसा॑ऽशो॑ पयसा** । अत्र पादान्ते अवृद्धात् परस्याकारस्य प्रश्लेषः एकीभावः सर्वसामसु । वृद्धात् **परस्य** अकारस्य तु विश्लेषः । **प्रसोमाऽ३देववीतयाइ** (ऊ. स. ६९०) इति द्वैगते **प्ये आ॑र्णा॑ऽ१सा॑ऽ२** । **आ॑ऽशोऽ३ः** । अत्र वृद्धात्परस्य **अकारस्य** विश्लेषः ॥ २ ॥

इह न यदिन्द्रचित्रायां वासिष्ठप्रियषङ्गयोः ॥ ३ ॥

वि. वसिष्ठस्य प्रियातीषङ्गयोः यदिन्द्रचित्रायाम् **इहनेति** पादान्त्यात् परस्य प्रश्लेषः । **नास्ती** । इति ॥ ३ ॥

---

8. My[1] om. अक्षरात् ; A[2]M[1]-[2]T om. अक्षरस्य; A[2] विश्लेषः for प्रश्लेषः; T om. सर्वत्र ०दाहरणम्

15. L[1] प्रश्लेषः for विश्लेषः

16. A[2]M[1]-[2]T वसिष्ठस्य for वसिष्ठ०

17. Ms[1]-[2]trans. यदिन्द्रचित्रायाम् before वसिष्ठस्य; S[1] वसिष्ठ० for वसिष्ठस्य; A[2] चित्रम इहनास्ति for चित्रायामिहनेति; M[1]-[2] नास्ति for नेति; M[1]-[2]A[2] om. पादान्त्यात् परस्य

18. A[2] om. नास्ती इति; M[1]-[2] trans. प्रश्लेषः after इति.

भा. **यदिन्द्रचित्रायां** **इह नास्ति त्वादागतमद्रिवः** इति **वसिष्ठप्रियातीषङ्गयोः** प्रश्लेषः ॥ ३ ॥

दी. **यदिन्द्राऽ२३ । चित्रमइह । नास्ती** (ऊ. क्षु. ८८८) इति **वसिष्ठप्रिये** **नास्ती ।** अत्रावृद्धात् परस्याकारस्य प्रश्लेषः । **एयदिन्द्रचाइ** (र. क्षु. १७१) इत्यतीषङ्गे **त्रमइहनास्ति ।** अत्रावृद्धात् परस्य अकारस्य प्रश्लेषः ॥ ३ ॥

दिवस्पदे तपोष्पवित्रायां ज्ञीये ॥ ४ ॥

वि.&भा. **तपोष्पवित्रायां** **यज्ञायज्ञीये** **दिवस्पदेऽर्चन्तो** **अस्येति** पादान्त्यात् परस्य प्रश्लेषः ॥ ४ ॥

दी. **पवाऽ५इत्रं । ताऽ३इवाऽ३इततंत्रा** (ऊ. अ. ५७४) इति यज्ञायज्ञीये द्वितीयायां **ताता । पोष्पवित्रम्** इत्यस्यां **दिवस्पदेर्चन्तो ।** अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ ४ ॥

मोषुत्वा-पार्श्वे श्रुधिशब्दोऽभ्यासे ॥ ५ ॥

वि. **मोषुत्वायां** (ऊ. अ. ५६१) **गायत्रपार्श्वेऽभ्यासे** विषये **इहवासन्नुपश्रुधीमेहिते** [इति] पादान्त्यात्परस्य प्रश्लेषः ॥ ५ ॥

भा. **मोषुत्वायां गायत्रपार्श्वे** (ऊ. अ. ५६१) **इहवासन्नुपश्रुधीमेहिते ब्रह्मकृत** इत्यभ्यासविषये प्रश्लेषः ॥ ५ ॥

दी. **मोषू । त्वावाघताऽ२३उवाऽ२३** (ऊ. अ. ५६१) इति **गायत्रपार्श्वे** **इहवासन्नुपश्रुधीमेहिते** इति **अभ्यासे** अवृद्धात् परस्येकारस्य प्रश्लेषः ॥ ५ ॥

---

3. L[1] om. यदिन्द्रा...प्रश्लेषः; E वसिष्ठस्य for वसिष्ठ; M[4] प्रियो for प्रिये

4. E om. नास्ति

7. PA[1]V[2]B[4] om. पादान्त्यात् परस्य प्रश्लेषः

10. M[4] वृद्धात् for अवृद्धात्

धियोऽग्ने भरामेध्मायां मन्ते ॥ ६ ॥

वि. भारामेध्मायां समन्ते जीवातवे प्रतरां साधया धियोऽग्ने प्रश्लेषः ॥ ६ ॥

भा. समन्ते भरामेध्मायां जीवातवे प्रतराँ साधया धियोऽग्ने सख्ये इति प्रश्लेषः ॥ ६ ॥

दी. इमँस्तोममर्हतेजातवेदसाइ (ऊ. ए. ६६७) इति समन्ते भरामेध्ममित्यस्यां योअग्नाइ । अत्र अवृद्धात् परस्याकारस्य प्रश्लेषः ॥ ७ ॥

जिषु सन्तानिनि ॥ ७ ॥

वि. सन्तनिनीन्द्रो मदायां (ऊ. स. ७४२) तमिन्महत्स्वाजिषूतिमिति प्रश्लेषः॥७

भा. सन्तनिनि तमिन्महत्स्वाजिषूतिमर्भे इति प्रश्लेषः ॥ ७ ॥

दी. इन्द्रोहाउ (ऊ. स. ७४२) सन्तनिनि तमिन्महत्स्वाजिषूतिमर्भे । अत्रावृद्धात् परस्य उकारस्य प्रश्लेषः ॥ ७ ॥

त्वचिं सुष्वाणायामान्धीगवे ॥ ८ ॥

वि. सुष्वाणायाम् (ऊ. अ. ६०९) आन्धीगवे त्वचीषमस्मभ्यम् इति प्रश्लेषः ॥ ८ ॥

भा. त्वचीषमस्मभ्यमभित इति प्रश्लेषः ॥ ८ ॥

दी. सोमाःपवन्तआऽ१ इन्दावाः (ऊ. अ. ६०९) इत्यान्धीगवे तृतीयायां सुष्वाणासोवियाऽ१द्राइभाइः इत्यस्यां त्वचीष । अत्रावृद्धात् परस्य इकारस्य प्रश्लेषः ॥८॥

अन्धसस्तंवोदस्माद्यायामाथर्वणसौभरयोः ॥ ९ ॥

---

2. TS² om. भरामेध्मायां समन्ते; M¹⁻² om. जीवातवे

6. M⁴ वृद्धात् for अवृद्धात्; M⁴ before प्रश्लेषः adds: न

8. A³ om. सन्तनिनि; A² om. ऊतिमिति.

वि. तंवोदस्माद्यायामाथर्वणसौभरयोः वसोर्मन्दानमन्धसोऽभि प्रश्लेषः ॥ ९ ॥

भा. तंवोदस्माद्यायाम् (र. प्रा. १३६) अन्धसोऽभि वत्सं न इति प्रश्लेषः ॥ ९ ॥

दी. उहुवाओहा । औहोवा । तंवोदस्माम् (र. प्रा. १३५) इत्याथर्वणे आद्यायां नमन्धसोऽभिवत्सन्न । अत्र अवृद्धात् परस्य अकारस्य प्रश्लेषः । तंवोऽ३दाऽ३स्मामृतीषहोवा इति सौभरे आद्यायां वसोर्मन्दानमन्धसोऽभिवत्सम् । अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ ९ ॥

प्रत्यस्मै तृतीयायां च रथन्तरे ॥ १० ॥

वि. अस्मा अस्मा इदन्धसो [इति] प्रश्लेषः रथन्तरे ॥ १० ॥

भा. एष एव शब्दः प्रत्यस्मै (र. सं. ३८) तृतीयायां रथन्तरे इदन्धसोऽध्वर्यो प्र भरा सुतम् इति प्रश्लेषः ॥ १० ॥

दी. प्रात्यस्मैपिपीषतोवा (र. सं. ३८) इति रथन्तरे तृतीयायां भिरोवा । इत्यस्यां धसोध्वर्यो । अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ १० ॥

अवासृजो ऽरातय इत्येतौ शब्दौ प्रोषु वत्सासु च ॥ ११ ॥

वि. प्रोष्वस्मैपुरोरथायां वत्सासु च त्वश्सिन्धूर३वासृजो । वि षु विश्वा अरातयोऽर्यो नशन्त नो [इति] प्रश्लेषः ॥ ११ ॥

भा. प्रोषु वत्सासु अवासृजोऽधराच इति अरातयोऽर्यो नशन्त नो इति प्रश्लेषः ॥ ११ ॥

---

9. M^{1-2} om. रथन्तरे
13. M^4 om. अवृद्धात् परस्याकारस्य
14. $M^{1-2}TPA^1V^2B^4M^4EL^1$ om. च.
15. V^2 वत्सायां for वत्सासु; $M^{1-2}A^2T$ om. च.

दी. एप्रोषु (र. क्षु. १७०) इति नित्यवत्सासु द्वितीयायां सिन्धूऽरवासृजोधरा। अत्रावृद्धात् परस्याकारस्य प्रश्लेषः। तृतीयायां विश्वाअरातयोर्योन। अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ ११ ॥

युजा णिरित्सिषायां रौरवे ॥ १२ ॥

वि. तरणिरित्सिषायां (ऊ. द. ५९) रौरवे वाजं पुरंध्या युजाव इन्द्रम् इति प्रश्लेषः ॥ १२ ॥

भा. रौरवे तरणिरित्सिषायां (ऊ. द. ५९) वाजं पुरंध्या युजाव इन्द्रम् इति प्रश्लेषः ॥ १२ ॥

दी. तरणित्साऽ३इषासाऽ२३४ती (ऊ. द. ५९) इति रौरवे वाजंपुरन्ध्या-युजाव। अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ १२ ॥

बोधयो महेनायां वाजीये ॥ १३ ॥

वि. महेनोअद्यायां रायोवाजीये बोधयोषो राय इति प्रश्लेषः ॥ १३ ॥

भा. रायोवाजीये (र. स. १२३) महेनो अद्य बोधयोषोर ाय इति प्रश्लेषः ॥ १३ ॥

दी. एमाहे। नोअद्य (र. स. १२३) इति रायोवाजीये बोधयोषो। राये अत्रावृद्धात् परस्य उकारस्य प्रश्लेषः ॥ १३ ॥

डितेवसो त्रैककुभे ॥ १४ ॥

वि. त्रैककुभे न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र। ऊतयो वासोऽस्मान् कदा चना दभन् [इति] प्रश्लिष्टौ ॥ १४ ॥

---

12. A[2] om. रायो·····तमोऽर्षायाम्(P. 486 L. 5)
16. M[1-2] om. डितेवसो···०द्रोणानि प्रश्लेषः (P. 486 L. 6)

भा. त्रैककुभे मर्डितेन्द्र ब्रवीमि ते वचः इति वसोऽस्मान् कदा चना इति च प्रश्लेषः ॥ १४ ॥

दी. त्वमङ्गप्रशँसाऽ३इषाः (ऊ. प्रा. ८०४) इति त्रैककुभे डितेन्द्रा । अत्र अवृद्धात् परस्य इकारस्य प्रश्लेषः द्वितीयायां वसोस्मान् अत्रत्वृद्धात् परस्याकारस्य प्रश्लेषः ॥१४॥

तमोर्षायां वर्णे ॥ १५ ॥

वि. शाक्करवर्णे अर्षायां (र. सं. ३४) तमोऽभिद्रोणानि प्रश्लेषः ॥ १५ ॥

भा. रहस्ये शाक्करवर्णे सोम द्युमत्तमोऽभिद्रोणानीति प्रश्लेषः ॥ १५ ॥

दी. ए आर्षा (र. सं. ३४) इति शाक्करवर्णे सोमद्युमत्तमोभि । अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ १५ ॥

अर्चत प्रिये ॥ १६ ॥

वि.&भा. वसिष्ठस्य प्रिये इन्द्राय नूनमर्चतोक्थानि इति प्रश्लेषः ॥ १६ ॥

दी. इममीऽ२३ । द्रसुतंपिब (ऊ. द. ८१) इति वसिष्ठस्य प्रिये तृतीयायां नूनमर्च । तोकथा । अत्रावृद्धात् परस्य उकारस्य प्रश्लेषः ॥ १६ ॥

ब्रह्मयुजा कक्षे ॥ १७ ॥

वि. औतकक्षे एह हरी ब्रह्मयुजा [इति] प्रश्लेषः । उदाहरणम्—एह हरीब्रह्मयुजैहहरोवा ॥ १७ ॥

भा. औतकक्षे एह हरी ब्रह्मयुजैहहरोवेति प्रश्लेषः ॥ १७ ॥

---

4. M⁴ वृद्धात् for अवृद्धात्; M⁴ भकारस्य for इकारस्य

11. PA¹V²B⁴ वसिष्ठ for वसिष्ठस्य; KA²TM¹⁻²S¹⁻²My¹ om. इति.

12. My¹ वसिष्ठ० for वसिष्ठस्य

13. E. om. अत्र and after अवृद्धात् add: जराशब्दात्

14. M¹⁻² om. ब्रह्म....प्रश्लेषः (P. 487 L. 5)

१ २ १ २२२ २
दी. पन्यंपन्यमित्सोतराः (ऊ. अ. ५३३) इति श्रौतकक्षे द्वितीयायां ब्रह्म-
१२२ १२
युजे। हहरोवा। अत्र अवृद्धात् जाशब्दात् परस्य एकारस्य प्रश्लेषः ॥ १७ ॥

धसो द्रयो वात्सप्रे ॥ १८ ॥

वि. वात्सप्रे अन्धसो यज्ञाय सन्त्वद्रयः इत्यत्र ऋक्पादान्त्यात् परस्य प्रश्लेषः ॥: १८ ॥

भा. क्षौद्रे वात्सप्रे अन्धसोऽन्धस इति अद्रयोऽद्रय इति प्रश्लेषः ॥ १८ ॥

२२ २ २ १ २ १२
दी. हाउहाउहाउ। ओ। होहोवा(त्रिः) पुरोजिताइ (ऊ. क्षु. ८९८) इति
२ १ २ २
वात्सप्रे वो। अन्धसो। धसो। धसः। अत्रावृद्धात् परस्याकारस्य प्रश्लेषः।
१ २ २
तृतीयायाम् अद्रयो। द्रयो। द्रयः। अत्र अवृद्धात् परस्य अकारस्य प्रश्लेषः ॥ १८ ॥

नदीधिमः श्रायन्तायां सौभरे ॥ १९ ॥

वि. श्रायन्तइवायां (ऊ. ए. ३८८) सौभरे भागं न दीधिमोऽलर्षि प्रश्लेषः ॥ १९ ॥

भा. सौभरे न दीधिमोऽलर्षि रातिमिति प्रश्लेषः ॥ १९ ॥

५२४ २ ४ ५२ ४५
दी. श्रायाऽ३न्ताऽ३इत्रस्हरियोत्रा (ऊ. ए. ३८८) इति सौभरे द्वितीयायां
१ २ २
प्रतिभागंनदीधिमोलर्षि। अत्रावृद्धात् परस्य अकारस्य प्रश्लेषः ॥ १९ ॥

सेन्योऽसि बार्हद्गिरसन्तानिनोः ॥ २० ॥

वि. बार्हद्गिरसन्तनिनोर्वीर सेन्यो सि [इति] प्रश्लेषः ॥ २० ॥

भा. बार्हद्गिरसन्तनिनोः वीर सेन्योऽसि भूरि परादददिरिति प्रश्लेषः ॥ २० ॥

2,8 L[1]R om. अत्र.

8. E ओकारस्य for अकारस्य M[4] after प्रश्लेष; adds: भवति.

17. A[2] om. बार्हद्गिरसन्तनिनो२; T om. बार्हद्गिर.

दी. इन्द्रोमदा । यवावृधे (र. द. १२) इति बार्हद्गिरे द्वितीयायां रसेन्योसि । अत्रावृद्धात् परस्याकारस्य प्रश्लेषः । इन्द्रोहाउ (ऊ. स. ७४२) सन्तनिनि द्वितीयायाम् असिहिवीरसेन्योसि । अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ २० ॥

वाहनोऽग्ने विवस्व द्वितीयायां श्रुध्ये ॥ २१ ॥

वि. वाहनोऽग्ने रथी (ऊ. प्रा. ८३८) इति अग्नेविवस्वद्वितीयायां श्रुध्ये प्रश्लेषः ॥ २१ ॥

भा. दूतो असि हाव्यवाहनोऽग्ने रथीरिति प्रश्लेषः ॥ २१ ॥

दी. अग्नेविवाऽ२स्वत् । उषसोरा (ऊ. प्रा. ८३८) इति श्रुध्ये द्वितीयायां व्यवाहनोग्ने । अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ २१ ॥

वृष्ण उद्यस्य त इत्यत्र वाजीये ॥ २२ ॥

वि. उद्यस्यतेनवजातजीये नवजातस्य वृष्णो प्रश्लेषः ॥ २२ ॥

भा. रायोवाजीये नवजातस्य वृष्णोऽग्ने चरन्तीति प्रश्लेषः ॥ २२ ॥

दी. एआग्नीम् । वोदेवमग्निभिः (र. अ. ११७) इति रायोवाजीये तृतीयायां एऊद्या इत्यस्यां वृष्णोग्ने । अत्राकारस्य प्रश्लेषः ॥ २२ ॥

धारया सेधे ॥ २३ ॥

वि. पुनानस्सोमायाम् (ऊ. द. २११) उत्सेधे धारयापो प्रश्लेषः ॥ २३ ॥

भा. उत्सेधे पुनानः सोम धारयेति प्रश्लेषः ॥ २३ ॥

---

3. RL¹M⁴My³ अकारप्रश्लेषः for अत्रावृद्धात् परस्याकारस्य प्रश्लेषः

16. M¹⁻² om. उत्सेधे धारया. S² after आप१: adds: इत्यत्र

दी. पुनानःसोमधारया । पः (ऊ. द. २११) इत्युत्सेधे धारया । पः । अत्राकारस्य प्रश्लेषः ॥ २३ ॥

धियो सेधे ॥ २४ ॥

वि.&भा. उत्सेधे अस्माँ अवन्तु ते धियोऽस्मान् इति प्रश्लेषः ॥ २४ ॥

दी. पिबासुतस्य रसिनः (ऊ. ए. ५१०) इत्युत्सेधे द्वितीयायां धियो । स्मान् । अत्रावृद्धात् परस्याकारस्य प्रश्लेषः ॥ २४ ॥

जमवर्ते च ॥ २५ ॥

वि.&भा. जमदग्नेरभीवर्ते च एष एव शब्दः प्रश्लिष्टः ॥ २५ ॥

दी. पिबासुतस्यरसिनोनत्स्वाहाउ (ऊ. स. ७१५) इति जमदग्नेभीवर्ते द्वितीयायां धियोऽस्मान् हाउ । अत्राकारस्य अवृद्धात् परस्य प्रश्लेषः ॥ २५ ॥

अग्ने तमद्य कमश्वे ॥ २६ ॥

वि. अग्नेतमद्यायां (ऊ. प्रा. ८२५) साकमश्वे अग्ने तमद्याश्वन्न प्रश्लेषः ॥ २६ ॥

भा. साकमश्वे अग्ने तमद्याश्वन्नेति प्रश्लेषः ॥ २६ ॥

दी. अग्नेताऽ३मद्याश्वाऽ६न्ना (ऊ. प्रा. ८२६) इति साकमश्वे अद्याश्वऽ६न्ना । अत्राकारस्य प्रश्लेषः ॥ २६ ॥

ततार्दिथो दैर्घे ॥ २७ ॥

---

4. KA[2]S[1-2]M[1-2]T om. इति.

6. L[1]E My[3]R om. अवृद्धात् परस्य.

8. B[4]PA[1] अस्माँ अवन्तु ते धियः for एष एव शब्दः

10. My[3] om. अवृद्धात् परस्य

वि.&भा. **त्वेसोमायां दैर्घश्रवसे ततर्दिथोंत्सं न कम्** इति प्रश्लेषः ।। २७ ।।

दी. **त्वेसोमप्रथमाद्दोहावृगोहाओहाऽ३ए** (ऊ. ए. ४०१) इति **दैर्घश्रवसे** द्वितीयायां ततऽर्दिथोंत्सन्नाऽ२का । अत्रावृद्धात् परस्योकारस्य प्रश्लेषः ।। २७ ।।

श्रवस्यवो देव्ये । श्रवस्यवो देव्ये ।। २८ ।।

वि. **वामदेव्ये अहमहि श्रवस्यवो** प्रश्लेषः । अभ्यासः प्रकरणसमाप्त्यर्थः ।।२८।।

इति फुल्लसूत्रविवरणे प्रश्लेषविश्लेषयोः द्वितीयस्य दशमः खण्डः ।। १० ।।

।। इति प्रश्लेषविश्लेषौ समाप्तौ ।।

भा. **एदुमधोर्वामदेव्ये** (ऊ. अ. ५९८) **अहमहि श्रवस्यवोऽप्रायुभिरिति** प्रश्लेषः ।। २८ ।।

।। प्रश्लेषविश्लेषौ समाप्तौ ।।

इति पुष्पसूत्रभाष्ये द्वितीयस्य दशमी कण्डिका समाप्ता ।। १० ।।

दी. **एऽ५दु । माधोऽ३र्माऽ३दिन्तराम्** (ऊ. अ. ५९८) इति **वामदेव्ये** तृतीयायां **हमहिश्रवस्यवोप्रायु** । अत्रावृद्धात् परस्याकारस्य **प्रश्लेषः** । आलाभ्यासः प्रकरणसमाप्त्यर्थः ।। २८ ।।

---

1. A²KM¹⁻²TS¹⁻² om. त्वेसोमायां; PB⁴V² दैर्घे for दैर्घश्रवसे.

4. A² om. श्रवस्य....देव्ये; M¹-²TS¹ do not repeat श्रवस्यवो देव्ये

5. A² श्रवस्य वामदेव्यस्य for वामदेव्ये; A²M¹-²T om. अभ्यासः प्रकरणसमाप्त्यर्थः; S¹ प्रश्लेष इति प्रश्लेषस्य संकेतः for अभ्यासः प्रकरणसमाप्त्यर्थः

6. M¹-²TS¹ इति फुल्लसूत्रभाष्ये अजातशत्रुविरचिते प्रश्लेषः समाप्तः for the colophon.

10. B⁴ विश्लेषः समाप्तः for प्रश्लेषविश्लेषौ समाप्तौ

11. V² om. colophon; B⁴ om. पुष्पसूत्रभाष्ये द्वितीयस्य

॥ प्रश्लेषविश्लेषौ समाप्तौ ॥

इति फुल्लदीपे षष्ठप्रपाठकस्य दशमः खण्डः ॥ १० ॥

एकादशः खण्डः

अथ संकर्षविकर्षौ

यः संयोगो यवान्तः क्वचित्संकृष्टः क्वचिद्विकृष्टस्तत्र संकृष्टग्रहणम् ॥ १ ॥

वि. यकारवकारान्तौ **संयोगौ क्वचित् संकृष्टौ क्वचित्** विकृष्टौ ऊहगाने भवतः । कः संकृष्टः को विकृष्टः इति संदेह उपजायते । तयोः संदेहनिरासार्थं संकृष्टः प्रदर्श्यते ॥ १ ॥

भा. यः कश्चित् **संयोगो** यान्तः कश्चित् वान्तः तयोश्च ऊहगीतौ कस्यचित् संकर्षः कस्यचित् विकर्षः । तत्र संदेहः । तन्निर्णयार्थं यत् संकृष्टं तदुदाहरिष्यामः ॥ १ ॥

दी. **यो यान्तः** यकारान्तः **संयोगः** न्यर्थ इत्यादिः । यो वान्तो वकारान्तः संयोगः स्व इत्यादिः । तयोश्च ऊहगीतौ **क्वचित्** कस्यचित् **संकृष्टः** एकीभूतः । **क्वचित्** कस्यचित् **विकृष्टः** पृथग्भूतः । तत्र संदेहे निर्णयार्थं संकृष्टानामेकीभूतानां **ग्रहणं** संग्रहः कर्तव्यः । वक्ष्यमाणेषु सामसु ॥ १ ॥

---

1. EL[1] °विश्लेषः समाप्तः for विश्लेषौ समाप्तौ.
2. M[4] इति फुल्लसूत्रदीपिकायां षष्ठप्रपाठके for इति···प्रपाठकस्य.
5. My[1] before यः adds: श्रीगणेशाय नमः
6. T before यकार adds: तत्र; T °वकारौ यौ for °वकारान्तौ.
7. M[1-2] om. कः····विकृष्टः
9. V[2] om. यः; V[2] क्वचित्···क्वचित् for कश्चित्···कश्चित्.
10. B[4] before तत्र adds: तस्य; B[4] संदेहनिर्णयार्थं for संदेहः । निर्णयार्थं ; B[4]PA[1] अधिकृतम for उदाहरिष्यामः
13. E °भावः for °भूत
14. L[1]R संदेह for संदेहे°; E om. कर्तव्यः; L[1] कर्तव्यं for कर्तव्यः

न्यर्यः साहीयपर्णवर्णमित्रविलम्बेषु ॥ २ ॥

वि. **सत्रासाहीय-स्वारसौपर्ण-शाकरवर्ण-सौमित्र-विलम्बसौपर्णेषु** **एना विश्वान्यर्य** इत्यत्र न्यशब्दः संकृष्टः। नान्येषु ॥ २ ॥

भा. **एना विश्वान्यर्य** इति **सत्रासाहीयस्वारसौर्णशाकरवर्णसौमित्रविलम्बसौपर्णेषु**। एतेषु सामसु न्यर्यःशब्दः संकृष्टः। अन्यत्र विकृष्टः ॥ २ ॥

दी. **उच्चा ते जातमन्धसः** (सा. ६७२–४) इत्येतासु **सत्रासाहीयस्वारसौपर्ण शाकरवर्णसौमित्रविलम्बसौपर्णेषु** न्यर्यशब्दः संकृष्टः एकीभूतः। **उच्चाऽ२३४। तेजातमन्धसः** (ऊ. सं. ३१४) इति **सत्रासाहीये** तृतीयायां **विश्वान्यंआ**। अत्र न्य इति संकृष्टः॥ **उच्चातेजातमन्धाऽ३साः** (ऊ. ए. ३८४) इति **स्वारसौपर्णे** तृतीयायाम् **एनाविश्वान्यर्यआऽ३आ**। अत्र न्यर्यः संकृष्टः॥ **उच्चा। तेजातमन्घसाः** (ऊ. ए. ३८५) इति **शाकरवर्णे** तृतीयायां **विश्वान्यर्यआ**। अत्र न्य इति संकृष्टः॥ **उच्चातेजातमन्घसाऽ३ए** (ऊ. ए. ७६५) इति **सौमित्रे** तृतीयायाम् **एनाविश्वान्यर्यआऽ३ए**। अत्र न्य-शब्दः संकृष्टः॥ **उच्चातेजातमन्धसः। ईयइयाहाइ** (ऊ. स. ७६८) इति **विलम्बसौपर्णे** तृतीयायाम् **एनाविश्वान्यर्यआ**। अत्र न्य इति संकृष्टः॥ २ ॥

नैडे ॥ ३ ॥

---

2. A[2] om. स्वरसौपर्ण; M[1]-[2]TS[1] om. स्वार; s[2] om. सत्रा...सौपर्णेषु; A[2] before सौमित्र adds: सौपर्ण.
4. v[2] om. एना...सौपर्णेषु
5. v[2] trans. एतेषु समासु after न्यर्यशब्दः; B[4]P न्यर्य for न्यर्यः.
9. L[1]M[4]My[2]R संकर्षः for संकृष्टः;
10. L[1]R संकर्षः for संकृष्टः
11. My[3]L[1]Rसंकर्षः for संकृष्टः
12. M[2]E न्यइति for न्यशब्दः
14. M[4] न्यर्य My[3]L[1] न्य for न्य इति; My[3]R संकर्षः for संकृष्टः

वि. पूर्वसूत्रेण संक्रुष्टप्राप्तावपवादः । **ऐडसौपर्णे** न संक्रुष्यते ॥ ३ ॥

भा. पूर्वसूत्रात् त्रिष्वपि सौपर्णेषु संक्रुष्टे प्राप्ते **ऐडसौपर्णे** विक्रुष्टः ॥ ३ ॥

दी. पूर्वसूत्रात् त्रिष्वपि सौपर्णेषु न्यर्यशब्दस्य संकर्षः प्राप्तः । **उच्चातेजोवा** (ऊ. ए. ४१२) इत्यैडसौपर्णे तृतीयायां **नाअयाऽ२३४आ** । अत्र न यान्तः संकर्षः ॥ ३ ॥

दिव्यं ज्यर्षसि यशःसंसर्पपुष्पेषु ॥ ४ ॥

वि. **यशःसंसर्पार्कपुष्पेषु** च **दुहान ऊधर्दिव्यम्** । आपृच्छ्यं **धरुणं वाज्यर्षसि** । इत्येतौ संक्रुष्टौ ॥ ४ ॥

भा. **दुहान ऊधर्दिव्यम्** । **धरुणं वाज्यर्षसि** इति च एतौ शब्दौ एतेषु सामसु संक्रुष्टौ ॥ ४ ॥

२र १ २र १र २र २ १
दी. **पुनानःसोमधारया** (र. स. १३०) इति **यशसि** द्वितीयायां **धर्दिव्यम्** ।
२र १ २ १ र २र१र
अत्र व्यंशब्दः संक्रुष्टः । तृतीयायां **वाज्यर्षसि** । अत्र ज्यशब्दः संक्रुष्टः । **उत्सोदेवो**
२ २ २ १ २ र १
हिरण्ययः (र. स. १३२) इति **संसर्पे** **धर्दिव्यम्म** । अत्र व्यंशब्दः संक्रुष्टः । **पुनानः-**
२र १र २र १ २ १
सोमधारया । **हुवेऽ२३** (ऊ. स. ७९६) इति **अर्कपुष्पे** द्वितीयायां **धर्दिव्यंमा** ।
२र ५ २
अत्र व्यंशब्दः संक्रुष्टः । तृतीयायां **वाज्यर्षसि** । अत्र ज्यंशब्दः संक्रुष्टः ॥ ४ ॥ —

आपृच्छ्यमवृद्धं सर्वत्र ॥ ५ ॥

वि. **आपृच्छ्यं धरुणं वा** इत्यत्र च्छ्यशब्दम् (ब्दः?) **अवृद्धं** (द्धः?) संक्रुष्यते सर्वत्र । अभीवर्तादिषु विक्रुष्टः । त्रिणिधनादिषु संक्रुष्टः ॥ ५ ॥

---

1. $My^1M^{1-2}T$ संक्रुष्टे for संक्रुष्ट०, $KM^{1-2}TS^1$ My^1 प्राप्ते for प्राप्तौ.
2. B^4A^1 संकर्षे प्राप्तः....विकर्षः for संक्रुष्टे प्राप्ते....विक्रुष्टः
3. E ०सूत्रेण for ०सूत्रात्
4. E om. ऐडसौपर्णे; E यान्तसंक्रुष्टः for यान्तः संकर्षः
6. A^2T यशसि संसर्पे अर्कपुष्पे for यशः....०पुष्पेषु; $M^{1 \cdot 2}$ om. यशस्संसर्पार्कपुष्पेसु च; PV^2B^4 वरुणं for धरुणम्
11. $RMy^3M^4L^1$ संकर्षः for संक्रुष्टः; $My^3L^4M^4$ ज्य इति संकर्षः for ज्यशब्दः संक्रुष्टः
12. $L^1M^4My^3$ संकर्षः for संक्रुष्टः.
17. KA^2 ०वर्षादिषु for वर्तादिषु.

भा. आपृच्छ्यम् अवृद्धं सत् सर्वसामसु विकृष्यते । अभीवर्तादिषु विकृष्टम् ॥

दी. आपृच्छ्यं यान्तम् अवृद्धं सत् संकृष्टं भवति सर्वसामसु । यथा पुनानः-सोमा ऽ२धारा ऽ२३४या (ऊ. द. २) इति रौरवे तृतीयायां दापृच्छ्यन्ध । अत्र अवृद्धत्वात् छ्यंशब्दः सकृष्टः । पूना ऽ३१ (ऊ.द.३) इति यौधाजयादिषु तृतीयायाम् आपाच्छियाम् । इति वृद्धत्वात् विकृष्टः ॥ ५ ॥

मदेष्वाकूलीये ॥ ६ ॥

वि&भा. रोहितकूलीये पूर्वे अस्येदिन्द्रो मदेष्वा इति ष्वाशब्दः संकृष्टः ॥६॥

दी. इन्द्रमच्छा (ऊ. द. २१७) इति पूर्वे रोहितकूलीये तृतीयायां मदेष्वा । अत्र ष्वाशब्दः संकृष्टः ॥ ६ ॥

जिह्व्यं न कृत्व्यश्च ज्ञीयस्योद्गीथे ॥ ७ ॥

वि. यज्ञायज्ञीये उद्गीथे सखायो दीर्घजिह्व्यम् इन्दुरश्वो न कृत्व्य इति च संकृष्टौ ॥ ७ ॥

भा. सखायो दीर्घजिह्व्यं इन्दुरश्वो न कृत्व्यः इति च यज्ञायज्ञीये (ऊ. प्रा. ८४३) उद्गीथे संकृष्टौ ॥ ७ ॥

दी. प्रो(४ ३)ऽजि । ता(४)ऽ३इन्द्रो(२)ऽ३अ(४)न्धासा(५)ः (ऊ. प्रा. ८४३) इति यज्ञायज्ञीये द्वितीयायां यो(र)दी(र)र्घजिहव्यं । अत्र हव्यं शब्दः संकृष्टः । तृतीयायाम् अश्वोनकृत्व्यः अत्र त्व्यशब्दः संकृष्टः ॥ ७ ॥

विश्वाच्याश्विनोर्व्रतपर्याकूपारमरायेषु ॥ ८ ॥

वि. अश्विनोर्व्रत-परित्याकूपारार्कपुष्पमरायेषु सोमं विश्वाच्या संकृष्टः ॥ ७ ॥

---

1. V[1] इति अवृद्धः; B[4] अवृद्धः for अवृद्धं; V[2]B[4] om. सत् ;V[2] विकृष्टः for विकृष्टम्

9. R om. °शब्दः

भा. **सोमं विश्वाच्या** (ऊ. प्रां. १४०) इत्येतेषु सामसु **संकृष्यते**। **पर्याकूपार** इति **परित्यँहर्यतꣳहरिम्** (ग्रा. गे. १०८७) इति यस्य योनिः ॥ ८ ॥

दी. **पुरोजितीवोअन्धसाहो हाउ** (र. प्रा. १४०) **इत्याश्विनोर्व्रते** तृतीयायां **सोमं विश्वाच्याधि**। अत्र च्या संकृष्टः। **परित्यꣳहर्यतꣳहरिम्**। **पाऽ२३४** (ग्रा. गे. १०८७) इति यस्य योनिः तस्मिन् **पुरोजितीवोअधन्सः**। **पूऽ२३४** (ऊ. क्षु. ९५५) **इत्याकूपारे** तृतीयायां **सोमं विश्वाच्याधिया**। अत्र च्या संकृष्टः। **इन्दुरश्वोनकृत्वियः**। **हुवेऽ२३**। (ऊ. ए. ४९८) इति **अर्कपुष्पाद्ये** एकर्चे **सोमं विश्वाच्याधिया**। अत्र च्या संकृष्टः। **पुराः**। **जाइती** (ऊ. क्षु. ८८४) इति **मराये** तृतीयायां **सोमं विश्वाच्याधिया**। अत्र च्याशब्दः संकृष्टः ॥ ८ ॥

नाभ्यासे ॥ ९ ॥

वि. **अभ्यासे** विषये सोमं विश्वाच्या विकृष्यते ॥ ९ ॥

भा. **पर्याकूपारे अभ्यासे** विषये **विश्वाच्येति** विकर्षः ॥ ९ ॥

दी. **पुरोजितीवोअन्धसः** (ऊ. क्षु. ९५५) इति **पर्याकूपारे** तृतीयायां **सोऽ२३४। मंविश्वौहोऽ५चियाधिया** इति **अभ्यासे** विषये यकारस्य न संकर्षः ॥ ९ ॥

त्वद्रयश्चैतेषु ॥ १० ॥

वि. एतेषु सामसु **यज्ञाय सन्त्वन्द्रयः**[इति]संकृष्टः अभ्यासवर्जम् ॥ १० ॥

भा. **यज्ञाय सन्त्वद्रयः** इति अश्विनोर्व्रतादिषु सामसु त्वशब्दः संकृष्टः ॥ १० ॥

दी. अश्विनोर्व्रतादिषु सामसु **यज्ञायसन्त्वद्रयः**। इत्यत्र संकर्षः। **पुरोजिती**

---

4. L²RMy³ संकर्षः for संकृष्टः

9. RL¹M⁴My³ च्यासंकर्षः for च्याशब्दः संकृष्टः

11. A²M¹⁻²T om. सोमं.

12. B⁴PA¹ अभ्यास० for अभ्यासे; V² om. विश्वाच्येति

14. L¹ER अभ्यास० for अभ्यासे.

17. V² एतेषु समसु for अश्विनोर्व्रतादिषु

वो अन्धसाहोहा३ (र. प्रा. १४०) इति अश्विनोर्व्रते तृतीयायां **यज्ञायपन्त्वद्र्याहोहा३**। अत्र त्वशब्दः संकृष्टः। **पुरोजितीवोअन्धसः** (ऊ.क्षु. ८५५) इति पर्याकूपारे तृतीयायां **यज्ञायसन्त्वद्र्यः**। अत्र त्वशब्दः संकृष्टः। **इन्दुश्वोनकृत्वियः** (ऊ. ए. ४९८) इति अर्कपुष्पाद्ये **यज्ञायसन्त्वद्र्यः**। अत्र त्वशब्दः संकृष्टः ॥ १० ॥

वैघने च ॥ ११ ॥

वि. **वैघने च** सोमसामनि एष एव शब्दः संकृष्टः ॥ ११ ॥

भा. **वैधने च** सोमसाम्नि **यज्ञायसन्त्वद्र्यः** इति संकृष्टः ॥ ११ ॥

दी. विघनयज्ञे भवे **पुरोजाऽ३इतीवोअन्धसाः** (ऊ. ए. ४८७) इति सोमसाम्नि तृतीयायां **यज्ञायसन्त्वद्र्यः**। अत्र त्वशब्दः संकृष्टः ॥ ११ ॥

अमराये ॥ १२ ॥

वि. मराये एष एव शब्दो विकृष्टः। पूर्वसूत्रेण संकर्षे प्राप्तेऽपवादः ॥ १२ ॥

भा. मराये त्वद्र्यशब्दो विकृष्टः ॥ १२ ॥

दी. अ- प्रतिवेधे। **पूराः** (ऊ. क्षु. ८८४) इति मराये तृतीयायां **याज्ञा**। यसा। तुवद्र्यः। अत्र वकारस्य न संकर्षः ॥ १२ ॥

त्वम्नये स्वाशु दैर्घे ध्यमायाम् ॥ १३ ॥

वि. स्वसु दैर्घश्रवसे मध्यमायां स्तोत्रीयायां **प्रस्तोमा यन्त्वम्नय** इति त्वशब्दः संकृष्टः ॥ १३ ॥

---

2. E. संकृष्टः for संकर्षः

3, 4, 9. M[4]L[1]My[3] R संकर्षः for संकृष्टः

5. A[2]M[1-2] om. वैघने च.

14. E संकृष्टः for संकर्षः

16. KMy[1] om. स्तोत्रीयायां; A[3]M[1-2]T om. त्वम्नये ....संकृष्टः

भा. प्रस्तोमा यन्त्वग्नय (ऊ. ए. ४३९) इति स्वासु दैर्घश्रवसे मध्यमायां त्वशब्दः संकृष्टः ॥ १३ ॥

दी. योविश्वादयतेवस्वोहाओहाऽ३ए (ऊ. ए. ४३९) इति स्वासु दैर्घश्रवसे मध्यमायां प्रस्तोमायन्त्वग्नये । अत्र त्वशब्दः संकृष्टः ॥ १३ ॥

सूर्यस्याभि प्रियाणीत्यत्र स्वारकावङ्गीययोः ॥ १४ ॥

वि. अभि प्रियाणि पवते इत्यत्र स्वारकावयज्ञायज्ञीययोरासूर्यस्य बृहतो इति र्यशब्दः संकृष्टः ॥ १४ ॥

भा. अभिप्रियाणीत्यत्र आसूर्यस्य बृहत इति स्वारकावे यज्ञायज्ञीये च र्यशब्दः संकृष्टः ॥ १४ ॥

दी. अभ्योवा (ऊ. द. १३) इति स्वारकावे आसूर्यस्य बृहतो । अत्र र्यशब्दः संकृष्टः । अभाऽ५इप्रि (ऊ. अ. ६२८) इति यज्ञायज्ञीये आसूऽ२र्यस्य । अत्र र्यकारः संकृष्टः ॥ १४ ॥

एष एव शब्दः सूर्यवतीषु ॥ १५ ॥

वि. सूर्यस्येव रश्मय इत्यत्र सूर्यशब्दः सर्वत्र संकृष्यते ॥ १५ ॥

भा. सूर्यस्येव रश्मयः इति एताः सूर्यवत्यः । एतासु सूर्यशब्दः संकृष्टः ॥ १५ ॥

दी. सूर्यस्येव रश्मय इति एताः सूर्यवत्यः । सूर्योवा (ऊ. सं ३५३) इति सूर्य-

---

1. V² योविश्वादैर्घश्रवसे for प्रस्तोमा...दैर्घश्रवसे.
2. PB⁴A¹ om. त्वशब्दः
8. V² विमिप्रिया कावयज्ञायज्ञीययोः आसूर्यस्य इति for अभिप्रियाणी०...०यज्ञीये च.
10. RM⁴L¹ after इति adds: अस्याम्
13. A²T after शब्दः add: सर्वत्र:
15. P om. इति; V² om. एता: सूर्यवत्य: । एतासु स.
17. E om. सूर्यस्येव....सूर्यवत्य:

वतीषु कावे एष एव शब्दः सूर्य इति र्यंकारः संकृष्टः ॥ १५ ॥

इनो राजद्वितीयायां चौशने ॥ १६ ॥

वि. इनोराजद्वितीयायां कृष्णां यदेन्याम् (ऊ. ए. ४१४) **औशने** ऊर्ध्वं **भानुं सूर्यस्येति** संकृष्टः ॥ १६ ॥

भा. इनोराजद्वितीयाम् ऊर्ध्वं भानुं सूर्यस्य स्तभायन्निति संकर्षः ॥ १६ ॥

दी. आइनाः । राजन्नरताइः (ऊ. ए. ४१४) **इत्यौशने** द्वितीयायाम् ऊर्ध्वं **भानुं सूर्यस्या ।** अत्र र्यंकारः संकृष्टः ॥ १६ ॥

आतिसूर्यं पुष्पमरायकीर्त्येषु ॥ १७ ॥

वि. अर्कपुष्प–मराय–महादिवाकीर्त्येषु दुहानोव्रश्रायां **घृणातपन्तमति** सूर्यमिति संकृष्टः ॥ १७ ॥

भा. तवाहंस्सोमतृतीयायां (सा. ९२३) **घृणातपन्तमतिसूर्यम्** इत्येतेषु सामसु सूर्यशब्दः संकृष्टः ॥ १७ ॥

दी. तवाहं सोमरारण । हुवेऽ२३ (ऊ. स. ७७३) इति **अर्कपुष्पे** तृतीयायां **घृणातपन्तमतिसूर्यपरः ।** अत्र र्यंशब्दः संकृष्टः । **हाउ (त्रिः) तवा । अहाम्** (ऊ. क्षु. ८८३) इति मराये तृतीयायां **घृणातपन्तमतिसूर्यंपरः ।** अत्र र्यंशब्दः संकृष्टः । **तवा हंसोमरारण** (र. सं. ४९) इति **महादिवाकीर्त्ये** तृतीयायां **घृणातपन्तमति** सूर्यं रः । अत्र र्यंशब्दः संकृष्टः ॥ १७ ॥

---

5. E सूर्यं इति र्यं शब्दः संकृष्टः for सूर्यस्य...संकर्षः

9. S^2 om. अर्कपुष्प...कीर्त्येषु; $A^2M^{1-2}T$ om. इति.

11. B^4 om. तवाहंसोमतृतीयायाम्

12. B^4 om. सूर्यशब्दः

15. E र्यंकारः for र्यंशब्दः

इन्द्रस्सूर्यं स्रुचनैपकीर्त्येषु ॥ १८ ॥

वि.&भा. यौक्तस्रुच–नैपातिथ–महादिवाकीर्त्येषु इन्द्रमिद्दे-(सा. १५८७-८) मध्यमायां इन्द्रःसूर्यमिति र्यशब्दः संकृष्टः ॥ १८ ॥

दी. इन्द्रमिद्देवता । तयाइ (ऊ. ए. ४४६) इति **यौक्तस्रुचे** द्वितीयायां **सूर्य-मरो॒२३४वा** । अत्र र्यकारः संकृष्टः । तृतीयायां च । **इन्द्रमिद्देवतातया॒३ए** (ऊ. क्षु. ९३४) इति **नैपातिथे** द्वितीयायां **इन्द्राःसूर्या॒३म्** । अत्र र्यकारः संकृष्टः । तृतीयायां च । **इन्द्रमिद्देवतातये** (र. सं ५१) इति **महादिवाकीर्त्ये** द्वितीयायाम् **इन्द्रःसूर्यमरोचयत्** । अत्र र्यकारः संकृष्टः । तृतीयायां च ॥ १८ ॥

इव सूर्यं कीर्त्ये ॥ १९ ॥

वि. महादिवाकीर्त्ये श्रायन्त इव सूर्यमिति [र्य]शब्दः संकृष्टः । सौभरादिषु विकृष्टः ॥ १९ ॥

भा. श्रायन्त इव सूर्यम् (र. सं ५२) इति **महादिवाकीर्त्ये** संकृष्टः ॥ १९ ॥

दी. श्रायन्तइवसूर्यम् (र. सं. ५२) इति **महादिवाकीर्त्ये इवसूर्यम्** इत्यत्र र्यशब्दः संकृष्टः ॥ १९ ॥

बण्महाँ असीत्यत्र सूर्यशब्दः सर्वत्र ॥ २० ॥

वि. बण्महाँ असिसूर्य (सा. १७८८-९) इति सूर्यशब्दः संकृष्टः सर्वत्र ॥ २० ॥

---

2. A[2]M[1-2]T om. महादिवा; B[4]PA[1] इन्द्रः सूर्यमरोचयदिति महादिवकीर्त्यादेषु for यौक्त ---र्यशब्दः; KA[2]M[1]S[1]TMy[1] om. इन्द्रमिद्दे मध्यमायां.
3. KA[2]M[1]S[1]TS[2]My[1] om. इति र्य.
5. L[1] द्वितीयायां for तृतीयायां.
8. My[3]L[1] om. तृतीयायां च
10. M[1-2] om. सौभारादिषु विकृष्टः
16. S[1]A[2] ब्रह्महां for बण्महां; M[1-2] om. बण्मह...सूर्यशब्दः (P. 501 L. 11); M[4] ब्रह्महा असि सूर्य इत्यत्र for बण्महा.. सर्वत्र; ; A[2] om. सर्वत्र.

भा. **बण्महाँ असि** सूर्य- **बट्सूर्य** (सा. १७८८-९) इति च **सूर्यशब्दः** सर्व-सामसु संकृष्टः ॥ २० ॥

दी. **बण्महाँअसिसूर्य** (र. सं. ५०) इति महादिवाकीर्त्यादिषु सर्वसामसु सूर्य-शब्दः संकृष्टः ॥ २० ॥

वितनैपयोस्त्वाद्यो विकृष्टः ॥ २१ ॥

वि. **गौरीवितनैपातिथयो**राद्यायां स्तोत्रीयायां सूर्यशब्दो **विकृष्टः** ॥ २१ ॥

भा. **गौरीवितनैपातिथयो**राद्यः सूर्यशब्दो **विकृष्टः** ॥ २१ ॥

दी. **बण्म । हा॰आऽ३ । सिसूरिया** (ऊ. प्रा. ८४५) इति **गौरीविते** आद्यः सूर्यशब्दस्तु **विकृष्टः** । र्यकारः पृथग्भावं प्राप्तः । **बण्महा॰असिसूरियाऽ३ए** (ऊ. क्षु ९३५) इति **नैपातिथे** आद्यः सूर्यशब्दः **विकृष्टः** ॥ २१ ॥

सूर्ये महत्तत्सोमायां वैश्वज्योतिष-वात्सप्रयोः ॥ २२ ॥

वि.&भा. **महत्तत्सोमायां** (ऊ. क्षु. ९१७) **वैश्वज्योतिषवात्सप्रयोः** **अजन-यत्सूर्ये** इति [र्यं]शब्दः संकृष्टः ॥ २२ ॥

दी. **हाउहोवाऽ३हाइ । अक्रान्त्समुद्रः प्रथमेऽ३४३विधर्मन्** (ऊ. क्षु. ९१७) इति **वैश्वज्योतिषे** तृतीयायां **महत्तत्सोमोमहिषाऽ३४३श्चकार** इत्यस्याम् **अजनयत्सूर्येज्योऽ-**

---

1. PV^2 om. बण्महां...संकृष्टः.

6. A^2 om. आद्यायां; TS^1 अद्यायोः स्तोत्रीययोः for आद्यायां स्तोत्रीयायां:; A^2 स्तोत्रीययोः for स्तोत्रीयायाम्

7. V^2 गौरीवितिनैपातिथदिवाकीर्त्येषु बण्महां असिसूर्य इति र्यशब्दः आद्य असिसूर्य इति र्यशब्दो विकृष्टः for गौरी....विकृष्टः.

10. RM^4L^1 after ०शब्दः adds: तु; after विकृष्टः ॥ TA^2S^2 add: र्भ्यं कीर्त्ये ॥ महादिवा-कीर्त्ये विश्वाज्योतिरदार्भ्यं विकृष्टः ॥ ; simon ins. this sūtra in square brackets.

13. K सूरिये for सूर्यः My^1 A^2KTS^{1-2} om. इति.

ऽ२४२तिरिन्दुः । अत्र यैशब्दः संकृष्टः । होईऽ२ । (त्रिः) । अक्रान्त्समुद्रः प्रथ (ऊ. क्षु. ९१८) इति वात्सप्रे तृतीयायाम् अजनयत्सूर्यंज्यो । अत्र यैशब्दः संकृष्टः ॥ २२ ॥

आमायामासूर्यं सर्वत्र ॥ २३ ॥

वि. आमासु पक्कायां सर्वत्र आसूर्यशब्दः संकृष्टः ॥ २३ ॥

भा. आमासु पक्कमैरय इति आसूर्यंरोहय इति यैशब्दः सर्वत्र संकृष्टः ॥२३॥

दी. यज्ञायथा अपूर्व्य (सा. १४२९–३१) इत्येतासु तृतीयायां आमासु पक्वमैरये इत्येतस्यां सूर्यशब्दः सर्वसामसु संकृष्टः । उदाहरणम् । याज्ञायाज्ञा (र. सं. ३९) इति पयोनिधने स्वरे तृतीयायाम् आसूर्यंरोहयो । अत्र यैकारः संकृष्टः । इत्यादिषु सर्वसामसु ॥ २३ ॥

अस्य प्रत्नायामयं सूर्यशब्दस्सर्वत्र ॥ २४ ॥

वि. अस्यप्रत्नायामयंसूर्यशब्दः सर्वत्र संकृष्यते । ऐटतादिषु ॥ २४ ॥

भा. अस्यप्रत्ना- (ऊ. सं. ३४५) द्वितीयायाम् अयं सूर्य इवोपदगिति सर्वत्र संकृष्टः ॥ २४ ॥

दी. अस्यप्रत्नामनुद्युतम् (सा. ७५५–७) इत्येतासु द्वितीयायां सूर्यशब्दः सर्वसामसु संकृष्टः । उदाहरणम् । अस्यप्राऽ३त्नामनुद्युताम् (ऊ. सं. ३४५) इत्यामहीयवे द्वितीयायाम् अयंसूर्यइवोपदक् । अत्र यैशब्दः संकृष्टः । इत्यादिषु सर्वसामसु ॥२४॥

अत्रैव तृतीयायां न सूर्यो भ्राजे ॥ २५ ॥

---

7. M[4]L[1]R om. शब्दः; M[4]L[1] संकृष्टम् for संकृष्टः

11. T संकृष्टः सर्वत्र for सर्वत्र संकृष्यते.

12. V[2] भ्राज अस्य प्रत्नायां न सूर्यं इति यैशब्दः संकृष्टः for अस्य प्रत्ना...संकृष्टः.

वि. अत्र अस्यप्रत्ना- (र. सं. ४७) तृतीयायां भ्राजे सोमो देवो न सूर्य [इति सूर्य]शब्दः संकृष्टः ॥ २५ ॥

भा. अस्यप्रत्ना- (र. सं. ४७) तृतीयायाम् एष सोमो देवो न सूर्य इति भ्राजे संकृष्टः ॥ २५ ॥

दी. अस्यप्रत्नामनुद्युतम् (र. सं. ४७) इत्येतास्वेव भ्राजे तृतीयायां सोमो देवोनसूर्यः । अत्र र्यकारः संकृष्टः ॥ २५ ॥

असुर्यस्य न ते गिर इत्यत्र ॥ २६ ॥

वि.&भा. न ते गिरो अपि इत्यत्र न सुष्टुतिमसूर्यस्येति र्यशब्दः सर्वत्र संकृष्टः ॥ २६ ॥

दी. श्रुधीहवंविपिपानस्य (सा. १७९८–१८००) इत्येतासु द्वितीयायाम् असुर्यस्येत्यत्र र्यशब्दः सर्वसामसु संकृष्टः । उदाहरणम् । श्रूधाइ (ऊ. क्षु. ८७३) इति मराये द्वितीयायाम् असु । र्यस्यविद्वान् । अत्र र्यकारः संकृष्टः । इत्यादिषु सर्वसामसु ॥ २३ ॥

महिसूर्यः कीर्त्ये ॥ २७ ॥

वि.&भा. महादिवाकीर्त्ये विश्वभ्राड् भ्राजो महि सूर्यः इति संकृष्टः ॥ २७ ॥

दी. विभ्राड् बृहत् पिबतु सोम्यं मधु (र. सं. ४८) इति महादिवाकीर्त्ये तृतीयायां विश्वभ्राड्भ्राजोमहिसूर्योदृशे । अत्र र्योशब्दः संकृष्टः ॥ २७ ॥

---

5. E om. एव; M⁴ भ्राजेषु for भ्राजे.

8. P om. न ते....इत्यत्र; V² om. इत्यत्र; PB⁴A¹KA²M¹-²My¹ om. इति र्यशब्दः; A om. सर्वत्र.

13. My³ सर्वसामसु for सामसु

15. M¹-²A²T om. महादिवा.

16. KA²M¹-²TS¹-² om. इति.

सँसूर्यस्येहवद्वामे ॥ २८ ॥

वि.&भा. **इहवद्वामदेव्ये संसूर्यरश्मिभिर्** इति संकृष्टः ॥ २८ ॥

दी. **एतमुत्यंदशक्षिपः । इहा ।** (ऊ. द. १०७) इति **इहवद्वामदेव्ये** द्वितीयायां **सँसूर्यस्यराऽ२** । अत्र र्यकारः संकृष्टः ॥ २८ ॥

सूर्या वैरूपान्तरिक्षयोः ॥ २९ ॥

वि. **वैरूपान्तरिक्षयोः पञ्चनिधने न त्वा वज्रिन्त्सहस्रँ सूर्याः** संकृष्टः ॥ २९ ॥

भा. न त्वावज्रिन्त्सहस्रऽसूर्या इति पञ्चनिधने **वैरूपान्तरिक्षयोः** संकृष्टः ॥२९॥

दी. **यद्यावइन्द्रतेशतम्** (र. द. ७) इति **पञ्चनिधनवैरूपे नत्वावज्रिन्त्सहस्र-ऽसूर्याअनु** । अत्र र्या संकृष्टः । **हाउयाद्यावइ** (र. क्षु. १६५) **इत्यन्तरिक्षे न त्वाव-ज्रिन्त्सहस्रऽसूर्याअ** । अत्र र्याशब्दः संकृष्टः ॥ २९ ॥

त्वं सूर्यं सौमित्रे ॥ ३० ॥

वि. **सौमित्रे इन्द्राय साम गायत** (ऊ. द. ९७) इत्यत्र **त्वं सूर्यमरोचयः** संकृष्टः ॥ ३० ॥

भा. **इन्द्रायसाम** (ऊ. द. ९७) मध्यमायां **त्वं सूर्यम्** इति र्यशब्दः संकृष्टः ॥३०॥

दी. **औहौहोइ । औऽ३होऽ३इ ।** **ओऽ३२३४५वाऽ६५६ । इन्द्राऽ२यसाम-गायताऽ२३४५** (उ. द. ९७) इति **सौमित्रे त्वँसूर्यम** । अत्र त्वंशब्दो र्यशब्दश्च संकृष्टः ॥ ३० ॥

समुसूर्यं सन्तानिनि यथर्चगीते पर्वणि ॥ ३१ ॥

---

2. KA[2]M[1-2]S[1-2]T ०रश्मयः for ०रश्मिभिः; KA[2]M[1-2]S[1-2]T om. इति

6. A[2]T om. वैरूपान्तरिक्षयोः;

7. V[2] वैरूपान्तरिक्षयो; यद्यावइन्द्रायायां सहस्रंसूर्यां इति र्यशब्दः संकृष्टः । for न त्वा.... संकृष्टः ॥

8. M[4] om. यद्याव....अनु अत्र र्या संकृष्टः

14. B[4]PA[1] om. इन्द्राय साममध्यमायाम्; B[4]PA[1] om. र्यशब्दः

16. M[4]L[1]My[3] र्यकारः for र्यशब्दः

18. KA[2]M[1] संसूर्यं for समुसूर्यं

वि. अस्तावि मन्म (ऊ. अ. ५६२) संतनिनि पर्वणि यथर्चगीते समुद्र्यं संकृष्टः। स्तोभव्यवधाने विकृष्टः ॥ ३१ ॥

भा. अस्ता-(ऊ. अ. ५६२) संतनिनि संक्षोणीसमुद्र्यम् इति यथर्चगीते पर्वणि संकृष्टः। निधनस्वर इत्यर्थः ॥ ३१ ॥

दी. अस्ताहाउ (ऊ. अ. ५६२) इति संतनिनि तृतीयायां यथर्चगीते ऋक्-स्वरवद्गीते संक्षोणीसमुद्र्यं२स२शुक्रास इति पर्वणि यंशब्दः संकृष्टः ॥ ३१ ॥

ष्वविता दाशेमहायां ज्ञाय-विशीय-वार-महामित्र-तरेषु ॥ ३२ ॥

वि. दाशेमहायां यज्ञायज्ञीय-विशोविशीय-वारवन्तीय-महावैश्वामित्र-रथन्तरेषु भुवद्वाजेष्वविता संकृष्टः ॥ ३२ ॥

भा. यज्ञायज्ञीय- विशोविशीय-वारवन्तीय- महावैश्वामित्र-रथन्तरेषु। एतेषु सामसु यज्ञायज्ञावो अन्त्यायां दाशेमहायां भुवद्वाजेष्व इति ष्वशब्दः संकृष्टः ॥ ३२ ॥

दी. यज्ञाऽ५य। ज्ञाऽ३वोऽ३ग्नायाइ (ऊ. द. १४) इति यज्ञायज्ञीये तृतीयायां दाशे इत्यस्यां भुवद्वाजेऽ२ष्ववि। अत्र ष्व-शब्दः संकृष्टः। यज्ञायाज्ञाहुमवोऽ२अग्नयाइ (ऊ. ए. ४७९) इति विशोविशीये तृतीयायां दाशेमहाहुम् इत्यस्यां भूऽ३वाद्वाऽ३जे।ष्ववि। अत्र ष्वशब्दः संकृष्टः। यज्ञा यज्ञा औऽोऽहाइ (ऊ. ए. ५०६) इति वारवन्तीये तृतीयायां दाशेमहाऔहोहाइ इत्यस्यां जेष्वविताभु। अत्र ष्व-शब्दः संकृष्टः। हयाइ। हयाऽ३। ओहाओहा। यज्ञायज्ञा (ऊ. प्रा. ८३९) इति महावैश्वामित्रे तृतीयायां दाशेमहा इत्यस्यां ष्वविता। अत्र ष्वशब्दः संकृष्टः। यज्ञायज्ञावो अग्नयोवा (र. सं. ३५) इति रथन्तरे तृतीयायां दाशोवा इत्यस्यां ष्वविता। अत्र ष्वशब्दः संकृष्टः ॥ ३२ ॥

एह्यू कमश्वे ॥ ३३ ॥

---

6. E स्वरगीते for स्वरवद्गीते

10. B[4] om. यज्ञायज्ञीय…अन्त्यायाम्.

11. PB[4]A[1] ०वाजेष्विति एतेषु सामासु for ०वाजेष्व इति ष्वशब्दः.

13. E हिम् for हुम्

17. My[3] om. तृतीयायाम्

वि. एह्यूषु (ऊ. द. १५) साकमश्वे ह्यूशब्दः संकृष्टः ॥ ३३ ॥

भा. साकमश्वे एह्यू षु (ऊ. द. १५) इति एह्यूशब्दः संकृष्टः ॥ ३३ ॥

दी. एह्यूषूऽ३ब्रवाणाऽ६इताइ (ऊ. द. १५) इति साकमश्वे एह्यूष्वित्यत्र ह्यूशब्दः संकृष्टः ॥ ३३ ॥

त्वामिद्ध्यावि भरे ॥ ३४ ॥

वि. सौभरे त्वमिद्ध्यवितारम् इत्यत्र त्वामिद्ध्यौ संकृष्टौ ॥ ३४ ॥

भा. त्वामिद्ध्यवितारं ववृमहे इति सौभरे वयमुत्वापूर्व (ऊ. द. १६) इति अन्ते त्वामिद्ध्य इति ध्यशब्दः संकृष्टः ॥ ३४ ॥

दी. वयाऽ३मूऽ३त्वामपूर्वियोवा (ऊ. द. १६) इति सौभरे तृतीयायां त्वामिद्ध्यविताऽ२ । अत्र त्वांशब्दो ध्यशब्दश्च संकृष्टः ॥ ३४ ॥

त्वाय सर्वत्र ॥ ३५ ॥

वि. सर्वत्र वार्णत्वायेति त्वा-शब्दः संकृष्टः । अधाहीन्द्र- (ऊ. द. १७) द्वितीयायां नार्मेधादिषु ॥ ३५ ॥

भा. वार्णत्वायेति त्वाशब्दः सर्वत्र संकृष्टः ॥ ३५ ॥

दी. अधाहीन्द्रगिर्वणाऽ३ए (ऊ. द. १७) इति नार्मेधे द्वितीयायां वार्णत्वायव्याभीऽ३रे । अत्र त्वाशब्दः संकृष्टः । वार्णत्वायेति त्वाशब्दः संकृष्टः सर्वसामसु ॥३५॥

व्याभिर्नार्मेधे ॥ ३६ ॥

---

6. T after त्वामिध्यौ adds: शब्दौ; M[1]-[2] संकृष्टः for संकृष्टौ

10. RM[4]L[1]My[3] त्वा ध्य for त्वाशब्दो ध्यशब्दश्च

12. M[1]-[2] om. सर्वत्र; A[2]M[1]-[2]TS[1] om. वार्णत्वायेति; S[1] trans. सर्वत्र after त्वाशब्दः; A[2]M[1]-[2] T त्वां for त्वा; A[2]M[1]-[2]TS[1] om. अधाहीन्द्र....नार्मेधादिषु

16. M[4] व्याशब्दः for त्वाशब्दः

वि.&भा. नार्मेधे वार्णत्वायव्याभिर् (ऊ. द. १७) इति व्या-शब्दः संकृष्टः ॥३६॥

दी. अधाहीन्द्र (ऊ. द. १७) इति नार्मेधे द्वितीयायां वार्णत्वायव्याभीऽ३रे । अत्र व्याशब्दः संकृष्टः ॥ ३६ ॥

कुण्डपाय्यस्सद्मने ॥ ३७ ॥

वि.&भा. और्ध्वसद्मने प्रणपात्कुण्डपाय्यः इति संकृष्टः ॥ ३७ ॥

दी. अयन्तइन्द्रसोमः । उवाहाइ (ऊ. द. २३) इति और्ध्वसद्मने तृतीयायां प्रणपात्कुण्डपाय्यउवाऽ२३होइ । अत्र य्य-शब्दः संकृष्टः ॥ ३७ ॥

व्योमनीन्द्रसुतायां वंशीये ॥ ३८ ॥

वि.&भा. इन्द्रसुतायाम् (ऊ. स. ७२०) उद्वंशीये स प्रथमे व्योमनि । [अत्र व्योशब्दः] संकृष्टः ॥ ३८ ॥

दी. इन्द्रसुतेषुसोमेष्वा (ऊ. स. ७२०) इति उद्वंशीये द्वितीयायां सप्रथमे व्योमनिया । अत्र व्योशब्दः संकृष्टः ॥ ३८ ॥

हिन्वन्त्यपसो द्विहिंकारगौङ्गवद्वैगततरेषु ॥ ३९ ॥

वि. प्रसोमदेवायां (सा. ७६७–८) द्विहिङ्कारगौङ्गव–द्वैगत–रथन्तरेषु तमीं हिन्वन्त्यपसो संकृष्टः ॥ ३९ ॥

भा. द्विहिङ्कारवामदेव्य- गौङ्गव-द्वैगत-रथन्तरेषु प्रसोमदेवायां (सा. ७६७-८) तमींहिन्वन्त्यपसो इति त्यशब्दः संकृष्टः ॥ ३९ ॥

---

3. E adds: इति before अत्र

5. V[2] after ०सद्मने adds: अयन्तइन्द्रअभ्यायां

9. P om. इन्द्रसुतायां; B[4] उद्वंशीये इन्द्रसुते मध्यमायां for इन्द्र०.....०वंशीये.

13. A[7] द्वैगततरगौङ्गवेषु for गौङ्गवद्वैगततरेषु

14. T om. प्रसोम...रथन्तरेषु

दी. प्रसोमाऽ२३देववीतयाइ (ऊ. स. ७५५) इति द्विहिङ्कारे वामदेव्ये तृतीयायां प्रायस्स्वनुर्नमर्जियस्तमीꣳहिन्वन्त्यपसो । अत्र त्यशब्दः संकृष्टः । प्रसोमाऽ३ देववीतयाइ (ऊ. ए. ४३१) इति गौङ्गवे तृतीयायां हिन्वन्त्यपसो । अत्र त्यशब्दः संकृष्टः । प्रसोमाऽ३ देववीतयाइ (ऊ. स. ६९०) इति द्वैगते तृतीयायां हिन्वन्त्यपसोय । अत्र त्यशब्दः संकृष्टः । प्रासोमदेववीतयोवा (र. क्षु. १८३) इति रथन्तरे तृतीयायां तमीꣳहिन्वन्त्यपसः । अत्र त्यशब्दः संकृष्टः ॥ ३९ ॥

ण्वतरे च पूर्वकल्पे ॥ ४० ॥

वि. कण्वरथन्तरे च पूर्वकल्पे हिन्वन्त्यपशब्दः संकृष्टः ॥ ४० ॥

इति पुष्पसूत्रविवरणे संकृष्टविकृष्टयोः द्वितीयस्यैकादशः खण्डः ॥ ११ ॥

भा. कण्वरथन्तरे च प्रसोमदेवायां (ऊ. क्षु. ८७५) तमीꣳहिन्वन्त्यप इति पूर्वकल्पे त्यशब्दः संकृष्टः ॥ ४० ॥

इति पुष्पसूत्रभाष्ये द्वितीयस्य एकादशी कण्डिका ॥ ११ ॥

दी. प्रसोमदेववीतयाइ (ऊ. क्षु. ८७५) इति कण्वरथन्तरे तृतीयायां तमीꣳहिन्व-

---

7. A^2M^{1-2} पूर्वे for पूर्व; $A^2M^{1-2}T$ repeat पूर्वे कल्पे

8. K पूर्वविकल्पे, A^2 पूर्वे विकल्पे for पूर्वकल्पे; $A^2M^{1-2}T$ after संकृष्टः । adds: अभ्यासः खण्डसमाप्त्यर्थः

9. KS^2 इति द्वितीयस्यैकादशमः; A^2T इति संकृष्टविकृष्टे प्रथमः खण्ड; M^{1-2} इति फुल्लसूत्रभाष्ये अजातशत्रुविरचिते संकृष्टविकृष्टे प्रथमः खण्डः for the colophon

10. B^4 om. प्रसोम...इति.

11. PV^2 °विकल्पे for °कल्पे; B^4 om. त्यशब्दः संकृष्टः

12. B^4 इति एकादशी कण्डिका, V^2 इति पुष्पभाष्ये द्वितीयस्य एकादशकण्डिका for colophon.

पसो यथारथाऽ२३४**मैही** इति पूर्वकल्पे प्रथमपक्षे त्यशब्दः संकृष्टः । द्वितीयपक्षे तु **ति-यपसो** । अत्र विकृष्टः ॥ ४० ॥

इति फुल्लदीपे षष्ठप्रपाठकस्यैकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः

ण्योस्तन्वाधर्तायां हाविष्मतसंतनिनोः ॥ १ ॥

वि. **हाविष्मतसंतनिनोस्तन्त्वाधर्तारमोण्यो**ऽशब्दः संकृष्टः ॥ १ ॥

भा. **हाविष्मतसन्तनिनोः वृषापवस्व-** मध्यमायां **तन्त्वाधर्तारमोण्यो** इति ण्यो-शब्दः संकृष्यते ॥ १ ॥

दी. **हाउवृषापवस्वधारयाहाउ** (ऊ. स. २४३) इति **हाविष्मते** द्वितीयायां **हाउतन्त्वाधर्तारमोण्योहाउ** । अत्र ण्योऽशब्दः संकृष्टः । **वृषाहाउ** (ऊ. द. १२१) इति **सन्तनिनि** द्वितीयायां **तन्त्वाधर्तारमोण्यो**ऽ**पवमा** । अत्र ण्योःशब्दः संकृष्टः ॥ १ ॥

विभाषा प्रसुन्वानद्वितीयायां रथन्तरे ॥ २ ॥

वि. **प्रसुन्वान-** (र. क्षु. १८४) **द्वितीयायां रथन्तरे भुजेनपुत्रओण्योः विभाषा** । संकृष्टो विकृष्टो वा भवति ॥ २ ॥

---

1. E om. तु
3. M[4] फुल्लसूत्रदीपिकायां for फुल्लदीपे
5. My[1] before ण्योस्त adds: श्रीगणेशाय नमः
6. A[2] om. हाविष्मतसन्तनिनोः; M[1-2] तन्त्वाधर्तायां हाविष्मतसन्तनिनोः ण्योशब्दः for हाविष्मत···· ण्योऽशब्दः
7. B[4] तन्त्वाधर्तायां ण्योशब्दः हाविष्मतसन्तनिनोः संकृष्यते for हाविष्मत····संकृष्यते; P trans. हाविष्मतसन्तनिनोः after ण्योशब्दः; V[2] °सन्तनिनि for सन्तनिनोः
8. संकृष्टः for संकृष्यते.
14. A[2]T om. विभाषा; M[1-2] trans. विभाषा after संकृष्टो; K after संकृष्टो adds: वा .

भा. रथन्तरे प्रसुन्वानद्वितीयायां भुजेनपुत्रओण्योरिति ण्योशब्दः संकृष्टो विकृष्टो वा । एष विकल्पः ॥ २ ॥

दी. प्रासुन्वानायअन्धसोवा (र. क्षु. १८४) इति रथन्तरे द्वितीयायां ब्योव, इत्यस्याम् ओण्योस्सरज्ञारः । अत्र ण्योःशब्दः संकृष्टः । अथवा ओणियोस्सरज्ञारः । एवं विकृष्टः ॥ २ ॥

इदाह्यो मानवे ॥ ३ ॥

वि.&भा. उत्तरे मानवे त्वामिदाह्योनरः (ऊ. स. ७०७) इति ह्योशब्दः संकृष्टः ॥ ३ ॥

दी. होवाइ । त्वमिदाह्योनरः (ऊ. स. ७०७) इति मानवोत्तरे । अत्र ह्योशब्दः संकृष्टः ॥ ३ ॥

स्युपमा च्छन्दसे ॥ ४ ॥

वि.&भा. माधुच्छन्दसे तवश्रवांस्युपमा इति स्युशब्दः संकृष्टः ॥ ४ ॥

दी. त्वामिदा । होइ । हियोंनराऽ६ए (ऊ. द. ४४) इति माधुच्छन्दसे तृतीयायां तवश्रवाऽस्युपमा । अत्र स्युशब्दः संकृष्टः ॥ ४ ॥

पूर्व्यो वृषामतींद्वितीयायां ज्ञीये ॥ ५ ॥

वि.&भा. यज्ञायज्ञीये वृषामती- (ऊ. अ. ६३०) द्वितीयायां नीषिभिःपवते पूर्व्यं इति र्व्यशब्दः संकृष्टः ॥ ५ ॥

---

4. E. after एवं adds: वा
7. M[1-2] om. इति ह्योशब्दः; A[2]T om. ०शब्दः
12. A[2]T om. माधुच्छन्दसे; V[2] after च्छन्दसे adds: त्वामिदायां
13. KA[2]M[1-2]S[1-2]My[1] om. इति…स्युशब्दः
16. T om. वृषामती द्वितीयायाम् ; V[2] मध्यमायां for द्वितीयायां; A[2] after द्वितीयायां adds: स्त्रोत्रीयायां
17. My[1] om. इति र्व्यशब्दः

दी. वृषाऽ५म (ऊ. अ. ६३०) इति यज्ञायज्ञीये द्वितीयायां नीपिमि२पवते पूर्व्य२कविः । अत्र व्यःशब्दः संकृष्टः ॥ ५ ॥

त्वामभिदंष्ट्रोत्तरे ॥ ६ ॥

वि.&भा. आष्टादंष्ट्रोत्तरे त्वाममिप्रनोनुम (ऊ. सं. २५३) इति त्वांशब्दः संकृष्टः ॥ ६ ॥

दी. इन्द्रंविश्वा । अवीवृधन्नयादौ । होऽ३वा (ऊ. सं. २५३) इत्याष्टादंष्ट्रोत्तरे द्वितीयायां त्वाममिप्रनो । अत्र त्वांशब्दः संकृष्टः ॥ ६ ॥

मद्यं द्विहिंकहारभारमानोत्तररौरतरेषु ॥ ७ ॥

वि. अभिसोमायां (सा. ७००-२) द्विहिंकारहारायण-भारद्वाज-मानवोत्तर-गौरव-रथन्तरेषु पवन्ते मद्यं संकृष्टः ॥ ७ ॥

भा. पवन्ते मद्यं मदम् इति द्विहिंकार-हरावण-भारद्वाज-मानवोत्तर-रौरव-रथन्तरेषु द्यंशब्दः संकृष्टः ॥ ७ ॥

दी. अभिसोऽ२३मास आयवाः (ऊ. द. १४७) इति द्विहिंकारे पावन्तेमद्यं मदम् । अत्र द्यंशब्दः संकृष्टः । अभिसोमौहोऽ२इस आयवाः (ऊ. द. १५१) इति हारायणे पावन्तेमद्यंमदम् । अत्र द्यंशब्दः संकृष्टः । अभिसोमा । सआयाऽ१वाऽ२ः (ऊ. सं. ३५७) इति भारद्वाजे पवन्ते मद्यंमदम् । अत्र द्यंशब्दः संकृष्टः । होवाइ । अभिसोमास

4. M^{1-2} उत्तराष्टादंष्ट्रे; $PV^2B^4A^1$ उत्तरे आष्टादंष्ट्रे for आष्टादंष्ट्रोत्तरे

5. $A^2M^{1-2}T$ after संकृष्टः add: त्वां सर्वत्रेति प्राप्ते संकर्षः (T संकृष्टौ) नियमार्थं वचनम् । उत्तर एवेत्यर्थः

10. M^{1-2} om. पवन्ते

11. V^2 om. पवन्ते मद्यं मदम् इति.

12. PV^2 after रथन्तरेषु add: एतेषु समासु.

14. V^2. before द्यशब्दः adds: अभिसोमायपवन्तेमद्य इति

आयवः । होवाइ (ऊ.सं. २७६) इति मानवोत्तरे पावन्तेमद्यंमदम् । अत्र यंशब्दः संकृष्टः । अभिसोमासा३ आया२३४वाः (ऊ. सं २५५) इति रौरवे पावन्तेमद्यंमदम् । अत्र यंशब्दः संकृष्टः । अभिसोमासआयवोवा (र. क्षु. १९२) इति रथन्तरे पावन्तेमद्यंमदम् । अत्र यंशब्दः संकृष्टः ॥ ७ ॥

उतस्युर्वैरूपान्तरिक्षह्रस्वासु ॥ ८ ॥

त्रि. **पञ्चनिधनवैरूप-ह्रस्वावैरूप—अन्तरीक्षेषु शतं भूमीरुत स्युः** संकृष्टः: ॥८॥

भा. **शतं भूमीरुत स्युरिति स्युशब्दो वैरूपादिषु** संकृष्टः ॥ ८ ॥

दी. **यद्यावइन्द्रतेशतम्** । ए (र. द. ७) इति **पञ्चनिधने वैरूपे शतंभूमीरुत** । **स्योवा** । अत्र स्युःशब्दः संकृष्टः । **हाउयद्यावई** । **द्रतेग** । **ताम्** (र. क्षु. १६५) इत्यन्तरिक्षे **शतंभूमीरुत** । **स्यूः** । अत्र स्युःशब्दः संकृष्टः । **यद्याव इन्द्रतेशतम्** । **ए** (र. क्षु. १६३) इति **ह्रस्वाबृहदोपशावैरूपे शतंभूमीरुत** । **स्योवा** । अत्र स्युशब्दः संकृष्टः: ॥८॥

वृष्ण्या वैरूपे ॥ ९ ॥

वि॰ पञ्चनिधने **वैरूपे आपप्राथमहिना वृष्ण्येति** संकृष्टः ॥ ९ ॥

भा. **आपप्राथमहिना वृष्ण्या वृषन्** (र. द. ७) इति **पञ्चनिधनवैरूपे** संकृष्टः ॥ ९ ॥

दी. **यद्यावइन्द्रतेशतम्** । **ए** (र. द. ७) इति **पञ्चनिधनवैरूपे** द्वितीयायाम् **आपप्राथमहिनावृष्ण्यावृषन्** । अत्र ष्ण्याशब्दः संकृष्टः ॥ ९ ॥

---

6. T before पञ्च adds: हयद्याव इन्द्रायाम्: A²T om. वैरूपह्रस्वा; M¹⁻³ om. वैरुप; A² अन्तरिक्षह्रस्वासु; T अन्तरिक्षह्रस्वाबृहदोपशेषु for अन्तरिक्षेषु; T om. शतंभूमीरुत.

7. V²P before शतं adds: पञ्चनिधनवैरूपह्रस्वावैरूपान्तरिक्षेपु एतेषु समासु; V²P यद्याव for शतं भूमीर्

13. A² om. पञ्चनिधने वैरूपे

14. V² पञ्चनिधनवैरूपे यद्याव इति मध्यमायां वृष्ण्या इति ष्ण्याशब्दः संकृष्टः for आपप्राथ...संकृष्टः; P after वैरूपे adds: यद्याव इति मध्यमायां वृष्ण्या इति ष्ण्याशब्दः

हर्यश्व पिबासोम- द्वितीयायां सहोदैर्घे ॥ १० ॥

वि. पिबासोममिन्द्र–(ऊ. क्षु. ८७०) द्वितीयायां सहोदैर्घतमसे येन वृत्राणि हर्यश्वेति र्यः संकृष्टः ॥ १० ॥

भा. सहोदैर्घतमसे पिबासोम-द्वितीयायां येन वृत्राणि हर्यश्व हꣳसीति र्यशब्दः संकृष्टः ॥ १० ॥

दी. हाउपिबा । सोममिन्द्र । मा (ऊ. क्षु. ८७०) इति सहोदैर्घतमसे द्वितीयायां येनवृत्राणिहर्यश्व । अत्र र्यशब्दः संकृष्टः ॥ १० ॥

मराये त्वाद्ययोः ॥ ११ ॥

वि. मराये त्वाद्ययोः स्तोत्रीययोः हर्यश्वशब्दः संकृष्टः ॥ ११ ॥

भा. मराये पिबासोमाद्ययोः हर्य इति र्यशब्दः संकृष्टः ॥ ११ ॥

दी. हाउ । त्रिः । पाइबा । सोमाम् (ऊ क्षु. ८७२) इति मराये आद्यायां वहर्यश्वाद्रिः । अत्र र्यशब्दः संकृष्टः । द्वितीयायां णिहर्यश्वहꣳसि । अत्र र्यशब्दः संकृष्टः ॥ ११ ॥

स्यन्त मा मराये ॥ १२ ॥

वि. मराये कृष्वादुवांस्यन्त संकृष्टः ॥ १२ ॥

भा. मराये श्रुधीहवाद्यायां कृष्वादुवाꣳस्यन्तमेति स्यंशब्दः संकृष्टः ॥ १२ ॥

---

3. $M^{1-2}T$ om. इति र्यः

4. V^2 ०मध्यमायां for ०द्वितीयायां.

10. A^1B^4 यातेसुषावहर्यश्व । येन वृत्राणीति संकृष्टौ for पिबा...संकृष्टः; P after संकृष्टः adds: यन्तेसुखावहर्येति येन वृत्राणीति च संकृष्टः

15. A^2M^{1-2} ०स्यन्तशब्दः for स्यन्त

16. PV^2 मरायेषु for मराये; B^4 om. मराये श्रुधीहवाद्यायां; B^4P after स्यन्तमेति add: मराये

दी. **श्रूधाइ । हवाम्** (ऊ. क्षु. ८७३) इति **मराये स्यन्तमास्येमा** । अत्र स्यंशब्दः संकृष्टः ॥ १२ ॥

विद्वान् मरायवैराजर्षभयोः ॥ १३ ॥

वि. **मरायवैराजर्षभयोः न सुष्टुतिमसुर्यस्य विद्वानिति** द्वान् संकृष्टः ॥ १३ ॥

भा. **श्रुधीहवमध्यमायां मरायवैराजर्षभयोः असुर्यस्य विद्वानिति** द्वाशब्दः संकृष्टः ॥ १३ ॥

दी. **श्रूधाइ** (ऊ. क्षु. ८७३) इति **मराये** द्वितीयायां **यस्यविद्वान्** । अत्र द्वानिति संकृष्टः । **श्रधीहवाम्** । **विपि** (र. क्षु. १६८) इति **वैराजर्षभे** द्वितीयायां **यस्यविद्वान्** । अत्र द्वानिति संकृष्टः ॥ १३ ॥

त्वामिद्भूरिहितायां मराये ॥ १४ ॥

वि.&भा. **मराये भूरिहितायां भूरिमनीषी हवते त्वामिदिति** त्वांशब्दः संकृष्टः ॥ १४ ॥

दी. **श्रूधाइ** (ऊ. क्षु. ८७३) इति **मराये** तृतीयायां **षीहवतेत्वामित्** । अत्र त्वाशब्दः संकृष्टः ॥ १४ ॥

सहोदैर्घे त्वभ्यासः ॥ १५ ॥

वि.&भा. **सहोदैर्घे** अभ्यासविषये एष एव शब्दः संकृष्टः ॥ १५ ॥

---

4. S^1 om. इति द्वान्; K द्वान् for द्वाशब्दः

11. A^2T om. भूरिमनीषी; $B^4PA^1V^2$ trans. मराये after हितायां; A^2 त्वामित् for त्वामिदिति त्वां; $M^{1-2}T$ om. इति त्वांशब्दः

16. M^{1-2} अभ्यासं त्वामित्शब्दः for अभ्यासे....शब्दः; $KS^{1-2}T$ अभ्यासे for अभ्यास; $PV^2A^1B^4$ त्वांशब्दः for एष एव शब्दः; PV^2 after दैर्घे add: श्रुधीहवान्त्यया हवतेत्वामिति; $PA^1B^4V^2$ **संकृष्यते** for **संकृष्टः**

दी. हाउश्रुधाइ (ऊ. क्षु. ८७१) इति सहोदैर्घतमसे तृतीयायां हाउभूराइ इत्यस्यां त्वामाऽ२इत् इत्यभ्यासे त्वाशब्दः संकृष्टः । भूरिमनीषीहवतेतू । वाऽ१माऽ२इत् इति पूर्ववचने तु न संकृष्टः ॥ १५ ॥

नस्त्योरौर्णायवयोः परिप्रियायाम् ॥ १६ ॥

वि.&भा. परिप्रियायाम् (ऊ. द. ७५&२००) और्णायवयोः वयांऽसिनस्योः संकृष्टः ॥ १६ ॥

दी. परिप्रियादिवःकावीः (ऊ. सं. २७०) इति और्णायवाद्ये वयांऽसिनस्योर्हिताः । अत्र स्योशब्दः संकृष्टः । परिप्रियाऽ२दिवःकवाइः (ऊ. द. ७५) इति और्णायवोत्तरे वयाऽ२होऽ१वांऽसिनस्योवोर्हिताः । अत्र स्योशब्दः संकृष्टः ॥ १६ ॥

मार्गीयेव च ॥ १७ ॥

वि. परिप्रियायाम् (ऊ. स. ७७६) ईनिधनमार्गीयवे च नस्योः संकृष्टः ॥ १८ ॥

भा. ईनिधने च मार्गीयवे नस्योशब्दः संकृष्टः ॥ १८ ॥

दी. परिप्रियादिवःकवाऽ३इरे (ऊ. स. ७७६) इति ईनिधनमार्गीयवे च वयांऽसिनस्योर्हिताः । अत्र स्योशब्दः संकृष्टः ॥ १८ ॥

त्वं ह्येत्येतौ शब्दौ सौपर्णे ॥ १८ ॥

वि.&भा. स्वारसौपर्णे त्वं ह्यङ्ग दैव्येति त्वंह्येत्येतौ शब्दौ संकृष्टौ ॥ १८ ॥

---

1. E तु for तृतीयायाम्

3. E संकर्षः for संकृष्टः

5. B[4]V[2]A[1] om. परिप्रियायां; A[2]T om. वयांसिः V[2]A[1] before वयांसि adds: द्वयोः ईनिधने मार्गीयवेषु परिप्रियाद्यायां

11. A[2]T om. परिप्रियायाम्

15. E after संकृष्टः । adds: परिप्रियायां गौषूक्ते विकृष्ट एव । परिप्रिया इति बृहद्द्वारद्वाजेऽपि ॥

17. M[1]-[2]T om. स्वारः KA[2]M[1]-[2]TS[1]-[2]My[1] trans. त्वह्यङ्गदैव्येति after संकृष्टौ; PA[1]V[2]B[4] त्वशब्दो ह्यशब्दश्च for त्वह्येत्येतौ शब्दौ.

दी. त्वᳲह्यङ्गदेवा॒ऽ३या (ऊ. द. १९६) इति स्वारसौपर्णे त्वंह्येत्यत्र त्वंह्यशब्दौ संकृष्टौ ॥ १८ ॥

पवित्रमत्ये ज्ञीये ॥ १९ ॥

वि. सोमःपवते (ऊ. क्षु. ८९९) [इति]ज्ञीये द्वितीयायां स्तोत्रीयायां सोमः पवित्रमत्येति रेभन्निति त्येशब्दः संकृष्टः ॥ १९ ॥

भा. यज्ञायज्ञीये सोमःपवते-(ऊ. क्षु. ८९९) मध्यमायां पवित्रमत्येति रेभन्निति त्येशब्दः संकृष्टः ॥ १९ ॥

दी. सोमाऽ५ᳲप । वाऽ३ताइजनिता (ऊ. क्षु. ८९९) इति यज्ञायज्ञीये द्वितीयायां वाइत्रमत्येताऽ२इरेभाउ । अत्र त्येशब्दः संकृष्टः ॥ १९ ॥

नकिष्ट्वा सिते ॥ २० ॥

वि.&भा. आसिते नकिष्ट्वद्रथीरतः संकृष्टः ॥ २० ॥

दी. इममिन्द्रसुताम् । पिबा (ऊ. क्षु. ८८६) इत्यासिताद्ये द्वितीयायां नकिष्ट्व-द्रथाइ । अत्र ष्ट्वशब्दः संकृष्टः ॥ २० ॥

असाव्यंशुस्सर्वत्र ॥ २१ ॥

वि.&भा. असाव्यंशुर्मदाय (सा. १००८–१०) इति व्यंशब्दः सर्वसामसु संकृष्टः ॥ २१ ॥

---

1. RMy³ त्वंशब्दो ह्यशब्दश्च for त्वंह्यशब्दौ
4. A²M¹⁻²T om. सोमः पवते ज्ञीये द्वितीयाया स्तोत्रीयायां
5. KS¹ om. रेभन्निति.
11. PV² after आसिते add: इत्य(म?)मिन्द्रमध्यमायां; PV² before संकृष्टः add: ष्ट्वाशब्दः
12. My³E om. द्वितीयायां
15. KA²M¹⁻²TS¹⁻²My¹ before असावि add: सर्वत्र and om. सर्वसामासु; V² व्यंशब्दः सर्वत्र संकृष्टः for असाव्यंशु····संकृष्टः
16. M¹⁻² after संकृष्टः add: मित्रो स्वा ॥ नात्र स्वाशब्दः संकृष्टः । दध्याशिते विते ॥ गौरीविते सोमासो दध्येति ध्याशब्दः संकृष्टः

दी. **असाव्य॑शुर्मदाय** (सा. १००८–१०) इत्यस्यां सर्वसामसु व्यंशब्दः संक्रुष्टः। उदाहरणम् **असाव्य॑शो**। **हाइ** (ऊ. अ. ६१७) इत्यैडसैन्धुक्षिते। अत्र व्यंशब्दः संक्रुष्टः। एवमादिषु सामसु ॥ २१ ॥

न सन्तानिनि ॥ २२ ॥

वि. **असाव्यंशुः-** (ऊ. द. ९०) **सन्तनिनि** व्यंशब्दो **न** संक्रुष्टः ॥ २२ ॥

भा. **सन्तनिनि** विक्रुष्टः ॥ २२ ॥

दी. **अषाहाउ** (ऊ. द. ९०) इति **सन्तनिनि** **वाय॑शुर्माऽ२१ उवाऽ२३**। अत्र व्यंशब्दो **न** संक्रुष्टः ॥ २२ ॥

पाष्योः क्रोशे ॥ २३ ॥

वि. **क्रोशे** **उपत्रितस्य** **पाष्योः** संक्रुष्टः ॥ २३ ॥

भा. **उपत्रितस्य** पाष्योरिति **क्रोशे** संक्रुष्टः ॥ २३ ॥

दी. **प्राणा**। **शिशुर्महीनाम्** (ऊ. द. ९२) इति **क्रोशे** द्वितीयायाम् **उपा**। **त्रितस्यपाष्योः**। अत्र ष्योःशब्दः संक्रुष्टः ॥ २३ ॥

ष्वैरयत्रैतक्रोशवार्शेषु ॥ २४ ॥

वि. **पृष्ठेष्वैरयदिति** ष्वैशब्दः संक्रुष्टः। **त्रैतक्रोशवार्शेषु** ॥ २४ ॥

भा. **पृष्ठेष्वैरयद्रयिम्** (ऊ. द. १६२) इति ष्वैशब्दः त्रैतादिषु संक्रुष्टः ॥ २४ ॥

---

3. M^4 after सामसु adds: व्यंशब्दः संक्रुष्टः; My^2 सर्वसामसु for सामसु

5. M^{1-2} om. असाव्यंशुः; $A^2M^{1-2}T$ विक्रुष्टः for व्यंशब्दो न संक्रुष्टः; KMy^1 after संक्रुष्टः add: विक्रुष्टः

11. PV^2 before उपत्रितस्य add: प्राणाशिशुर्मध्यमायां पाष्यो इति ष्योशब्दः; V^2 om. उपत्रितस्य पाष्योरिति क्रोशे

15. M^{1-2} trans. त्रैतक्रोशवार्शेषु before पृष्ठेषु; A^2 om. त्रैतक्रोशवार्शेषु.

16. PV^2 before पृष्ठेषु add: प्राणाशिशुरन्त्यायां; V^2 पृष्ठेष्वैशब्दः for पृष्ठे० त्रैतादिषु

दी. प्राणाशिशुर्महाइनाम् (ऊ. द. १६२) इति त्रैते तृतीयायां पृष्ठेष्वैरयद्र-याइम् । अत्र ष्वैशब्दः संकृष्टः । प्राणा (ऊ. द. ९२) इति क्रोशे तृतीयायां पृष्ठे-ष्वैरयद्रयाइम् । अत्र ष्वैशब्दः संकृष्टः । प्राणाशिशूः । महा२इनाम् (ऊ. अ. ६४०) इति वार्शे तृतीयायां पृष्ठेष्वैरयद्र । याइम् । अत्र ष्वैशब्दः संकृष्टः ॥ २४ ॥

त्वाऽरित्वं द्यां च गवाऽष्टेडासिमासु ॥ २५ ॥

वि. आन्धीगवे अष्टेडे सिमासु च त्वां रिहन्ति त्वं द्यां चेति त्वां–त्वंशब्दौ संकृष्टौ ॥ २५ ॥

भा. त्वांरिहन्ति त्वंद्यां चेति च त्वां–त्वंशब्दौ अन्धीगवाष्टेडसिमासु संकृष्टौ ॥ २५ ॥

दी. पवस्ववजसाऽ१तायाइ (ऊ. अ. ६१२) इत्यान्धीगवे द्वितीयायां त्वांरिह-न्तिधाऽ१तायाः । अत्र त्वांशब्दः संकृष्टः । तृतीयायां त्वन्द्याञ्चमहाऽ१इव्राता । अत्र त्वंशब्दः संकृष्टः । ईडा । पवस्ववाजसातये । ईडा । (र. द. १६) इत्यष्टेडप-दस्तोभे द्वितीयायां त्वाऽरिहन्तिधीतयः । अत्र त्वांशब्दः संकृष्टः । तृतीयायां त्वान्द्याञ्च महिव्रत । अत्र त्वंशब्दः संकृष्टः । एऽ२ । पवस्ववाजसातयाइ (र. क्षु. २०५) इति सिमासु द्वितीयायां त्वांरिहन्तिधीतयाः । अत्र त्वांशब्दः संकृष्टः । तृतीयायां त्वंद्यांचमहिव्रता । अत्र त्वंशब्दः संकृष्टः ॥ २५ ॥

त्वं द्यां शुद्धीये ॥ २६ ॥

---

6. T ᶜगवाष्टेड for गवे अष्टेडे; A²T om. ᵒशब्दौ;
7. A²T संकृष्टः for संकृष्टौ.
8. V² आन्धीगवाष्टेडसिमासु पवस्वमध्यमायां त्वांरिहन्ति द्यां च एतौ शब्दौ संकृष्टौ for त्वांरिहन्ति···संकृष्टौ
13. M⁴ om. तृतीयायां
15. M⁴ द्वितीयायां for तृतीयायाम्
16. E after संकृष्टः । adds: पवमान महित्वनेति सर्वत्रासंकष्टत्वात् क्वचित्संकष्टः । क्वचित् विकृष्टः

वि.&भा. **शुद्धाशुद्धीये त्वं द्यां** चेति त्वंशब्दः संकृष्टः ॥ २६ ॥

दी. **त्वन्द्याश्चमहिव्रता** (ऊ. क्षु. ९०१) इति **शुद्धाशुद्धीये** त्वंशब्दः संकृष्टः ॥२६॥

सुहस्त्यारन्ध्रोत्तरवरुणगोष्ठार्कपुष्पेषु ॥ २७ ॥

वि. **मृज्यमानः सुहस्त्या** (सा. १०७९–८०) इति **रन्ध्रोत्तरवरुणसामगोष्ठार्कपुष्पेषु** सुहस्त्याशब्दः संकृष्टः ॥ २७ ॥

भा. **मृज्यमानः सुहस्त्या** (सा. १०७९–८०) इति स्त्याशब्दः संकृष्टः उत्तरौक्ष्णोरन्ध्रादिषु ॥ २७ ॥

दी. **मृज्यमानस्सुहस्त्या** (ऊ. द. १०३) इत्यौक्ष्णोरन्ध्रोत्तरे स्त्याशब्दः संकृष्टः । **मृज्यमानस्सुहस्त्योवा** (ऊ. द. १०५) इति **वरुणसाम्नि** स्त्याशब्दः संकृष्टः । **हाउहाउहाउवा । मृज्यमानः सुहस्त्या । इहा** (ऊ. द. १०६) इत्यङ्गिरसांगेष्ठे स्त्याशब्दः संकृष्टः **मृज्यमानस्सुहस्त्या । हुवाइ** (ऊ. स. ७८७) इत्यर्कपुष्पोत्तरे स्त्याशब्दः संकृष्टः: ॥२७॥

स्वानः परिस्वानायां वैदन्वत-हाविष्मत-रेवतीषु ॥ २८ ॥

वि. **परिस्वानायां** (सा. १०९३–५) **वैदन्वत–हाविष्मत–रेवतीषु** स्वानशब्दः संकृष्टः ॥ २८ ॥

भा. **परिस्वानो गिरिष्ठा** इति स्वाशब्दः संकृष्टः **वैदन्वतहाविष्मतरेवतीषु** ॥२९॥

दी. **पारी । स्वानोगिरिष्ठाः** (ऊ. द. ११०) इति **वैदन्वताद्ये** स्वाशब्दः संकृष्टः । **पाऽ५रि । स्वानोऽ३** (ऊ. द. १०९) इति **तृतीये वैदन्वते** स्वाशब्दः संकृष्टः । **औऽ३होइ** इत्यादि **पराइस्वाऽ२३४नो** (ऊ. द. १११) इति चतुर्थे वैदन्वते स्वाशब्दः

1. KA[2]M[1]-[2]TS[1]-[2]My[1] om. त्वंशब्दः
2. M[4]L[1] om. शुद्धा.
6. PV[2] before मृज्य adds: स्वारमौक्ष्णोरन्ध्रवारुणसम्नगोष्ठ अर्कपुष्प एतेषु सामसु
7. PV[2] om. उत्तरौक्ष्णोरन्ध्रादिषु
13. A[2]T वैदन्वतादिषु for वैदन्वत....रेवतीषु.
15. V[2] एतेषु सामसु परित्व इति स्वा शब्द संकृष्ट; for परि....रेवतीषु; B[4] वैदन्वतेषु त्रिषु हाविष्मतरेवतीषु च for वैद०...रेवतीषु.

२र र र
संकृष्टः । हाउपरिस्वानो गिरिष्ठाहाउ (ऊ. अ. ५८१) इति हाविष्मते स्वाशब्दः संकृष्टः ।
१ २ र १
हाउपाराइ । स्वानाः (र. क्षु. १९१) इति रैवते स्वाशब्दः संकृष्टः ॥ २८ ॥

एष एव शब्दोऽक्रान्वासिष्ठे ॥ २९ ॥

वि. अक्रान्-वासिष्ठे एष एव शब्दः संकृष्टः । वावृधे स्वान इति ॥ २९ ॥

भा. अक्रान्त्समुद्रायां (ऊ. अ. ६७६) इति वासिष्ठे बृहत्सोमो वावृधे स्वान इति स्वाशब्दः संकृष्टः ॥ २९ ॥

२ ३ २ ३र४र५ २र१र
दी. हाइ । उहुवाइ । अक्राऽ३४औहोवा (ऊ. अ. ६७३) इति वासिष्ठे वावृधे ।
२
स्वाऽ३४३ । एष एव शब्दः संकृष्टः ॥ २९ ॥

परीताध्यास्यायां च ॥ ३० ॥

वि. परीतोष्यध्यास्यायां च श्रीणन्तायां स्वानःशब्दः संकृष्टः सर्वत्र ॥ ३० ॥

भा. श्रीणन्त इत्यत्र परिस्वानश्चक्षस इति स्वाशब्दः संकृष्टः सर्वसामसु ॥३०॥

दी. परीतोषि (सा. १३१३–४) इत्येतासु अध्यास्यायाम् । अधि उपरि आस्यत
३र ५
इति अध्यास्या । श्रीणाऽ३१ । तोऽ३गो । भिः (ऊ. सं. २६७) इति यौधाजये
२ १ २र १ ४र ३ ४र ३र ४३४ ५
पराइस्वानाः । अत्र स्वाशब्दः संकृष्टः । श्रीणन्तोगोभिरुत्तरम् । श्रीण (ऊ. ए. ४९५)
३२ ४र २र १ ४र ५
इत्युत्सेधे पराऽ३इस्वाना । अत्र स्वाशब्दः संकृष्टः । श्रीणन्तोऽ२३गोभिरुत्तरऽ्हाउ (ऊ. अ.
१ २
५८०) इति पृश्निनि पराइस्वाऽ१नाऽ२३ः । अत्र स्वाशब्दः संकृष्टः ॥ ३० ॥

---

2. E after संकृष्टः adds: पारी इति द्वितीये वैदन्वते द्वितीयायां विप्रस्त्वं कविः । त्वं संकृष्टः ।

4. M[1-2] हाइउहुवाइ अक्रान्वासिष्ठे वावृधेस्वान इति स्वान शब्दः संकृष्टः for अक्रान्...स्वान इति; A[2] वा प्रधन इति for एष एव शब्दः संकृष्टः वावृधे; T trans. संकृष्टः after इति; A[1] संकृष्टः for इति.

6. B[4] om. स्वाशब्दः

9. M[1-2]T after च add: अनवमेऽहनि.

10. A[2]T श्रीणन्तो for श्रीणन्तायां

11. V[2] श्रीणन्तोगे परिस्वा इति स्वाशब्दः सर्वत्र संकृष्टः for श्रीणन्त....॰सामसु

16. E after संकृष्टः adds: देवस्थाने च ॥ श्राइणा । इति दीर्घतमसेऽर्के । पारी । स्वानश्चक्षसे । अत्र स्वाशब्दः संकृष्टः ।

अनवमेऽहानि ॥ ३१ ॥

वि. **नवमेऽहनि** वासिष्ठे विकर्षः ॥ ३१ ॥

भा. श्रीणन्त (ऊ. द. १८७) इति **नवमेऽहनि** वासिष्ठे **परिस्वानश्चक्षस** इति विकृष्टः स्वाशब्दः ॥ ३१ ॥

दी. **श्रीणन्तोगोऽ२भिरुत्तराम्** (ऊ. द. १८७) इति **नवमेऽहनि** वासिष्ठे **परि सुवाऽ२३नाः** । अत्र स्वाशब्दो न संकृष्टः ॥ ३१ ॥

त्वं कविर्द्वितीये दन्वते ॥ ३२ ॥

वि· **द्वितीये वैदन्वते** त्वं **कविरिति** त्वंशब्दः संकृष्टः । ऊहानुक्रमद्वितीये ॥३२॥

भा. **वैदन्वते** ऊहसमाम्नाये क्रमद्वितीये वैदन्वते त्वं **कविरिति** त्वंशब्दः संकृष्टः ।

दी. **पारी** । **स्वानोगिरिष्ठाः** । इति **वैदन्वते** ऊहाध्ययने **द्वितीये वैदन्वते विप्रस्त्वंकविः** । अत्र त्वंशब्दः संकृष्टः ॥ ३२ ॥

मित्राः स्वानाः सर्वत्र ॥ ३३ ॥

वि.&भा **सोमाःपवन्तायां मित्राःस्वाना** इति **सर्वत्र** संकृष्टः ॥ ३३ ॥

दी. **सोमाः पवन्त** (सा. ११०१) इत्यस्यां **मित्राः स्वानाः** इति स्वाशब्दः सर्वसामसु संकृष्टः । उदाहरणम् । **सोमाः** । **पवाऽ३** । **तइन्दवाः** (ऊ. द. ११४) इति **गौरिविते माइत्राःस्वानाऽ३१२३ः** । अत्र स्वाशब्दः संकृष्टः । एवमादिषु सामसु ॥३३॥

---

2. TS¹A²M¹-²My¹ before नवमे adds: नवमाहवर्जं; A² हि व । एषु for अहनि वासिष्ठे.

7. TA²M¹-²S¹-² before त्वं कविर् add: तमसोऽर्के च ॥ श्रीणन्ते दीर्घतमसोऽर्के (T after ०र्के adds: परिस्वान इति) स्वां संकृष्टः; Simon includes तमसोऽर्के च in his edition

8. A²T ऊहगाने M¹-² ऊहगान for ऊह नु

9. V² वैदन्वताद्य परिस्वानमध्यमायां for वैदन्वते ...वैदन्वते.

10. E om. वैदन्वते ऊहाध्ययने.

13. A²M¹-²My¹ after इति add: स्वाशब्दः; PA¹V²B⁴ सर्वसामसु for सर्वत्र.

16. E सर्वसामसु for सामसु

दध्याशिरो विते ॥ ३४ ॥

वि. **गौरीविते सोमासो दध्याशिर** इति ध्याशब्दः संकृष्टः ॥ ३४ ॥

भा. **सोमासो दध्याशिर** (ऊ. द. ११४) इति **गौरीविते सोमाःपवन्तमध्यमायां दध्या** इति ध्याशब्दः संकृष्टः ॥ ३४ ॥

५र र ३२ ४ ५
दी. **सोमाः । पवाऽ३ । तइन्दवाः** (ऊ. द. ११४) इति **गौरीविते** द्वितीयायां
१र र र र
सोमासोदध्याशिराऽ२३ः । अत्र ध्याशब्दः संकृष्टः ॥ ३४ ॥

व्यद्रिभिर्यज्ञीये ॥ ३५ ॥

वि.&भा. **यज्ञायज्ञीये** सोमाःपवन्तायां **सुष्वाणासो व्यद्रिभिरिति** व्यशब्दः संकृष्टः ॥ ३५ ॥

४र३ ४ २ ४ ५
दी. **सोमाऽ५ऽप । वाऽ३न्ताऽ३इन्दावाः** (ऊ. क्षु. ९०३) इति **यज्ञायज्ञीये**
१र र र र र
तृतीयायां **ष्वाणासोव्यद्रिभिश्चितानागोः ।** अत्र व्यशब्दः संकृष्टः ॥ ३५ ॥

त्वं मातौपगवे ॥ ३६ ॥

वि.&भा. **औपगवे त्वं माता शतक्रतो** इति त्वंशब्दः संकृष्टः ॥ ३६ ॥

५ २ ४ ५र १ र र
दी. **तुवन्नाऽ३इन्द्रआभरा** (ऊ. द. १३८) इत्यौ**पगवोत्तरे** द्वितीयायां **त्वम्माता-**
र र
शतक्रतो । बभूविथा । अत्र त्वंशब्दः संकृष्टः ॥ ३६ ॥

वरेण्यं प्राध्यं चातीषङ्गे ॥ ३७ ॥

---

2. T om. इति ध्याशब्दः

3. V² om. सोमासो दध्याशिर इति

8. T after इति adds: अत्र; KA²M¹-²S¹-²T om. सोमाःपवन्तायां; PB⁴A¹ सुष्वाणासो व्यद्रिभिरिति यज्ञायज्ञीये संकृष्टः for यज्ञायज्ञीये...संकृष्टः

13. V¹ after ०गवे adds: त्वन्नइन्द्रमध्यमायांः B⁴ om. त्वंशब्दः

वि.&भा. **अतीषङ्गे यन्मन्यसे वरेण्यम् । यत्त दिक्षु प्राध्यम्** इति ण्यध्य-शब्दौ संकृष्टौ ॥ ३७ ॥

दी. **एयदिन्द्रचाइ** (र. क्षु. १७१) इत्यतीषङ्गे द्वितीयायां **वरेण्यमिन्द्र** । अत्र ण्यशब्दः संकृष्टः । तृतीयायां **प्राध्यंमनो** । अत्र ध्यंशब्दः संकृष्टः ॥ ३७ ॥

अत्यो गभस्त्योः स्वःशब्दश्च ज्ञीये ॥ ३८ ॥

वि.&भा. यज्ञायज्ञीये हरिः **सृजानो अत्यो । शूरो न धत्त आयुधा गभस्त्योः स्वः सिषासन्** इति त्यो–स्त्योः–स्वः–शब्दाश्च संकृष्टाः ॥ ३८ ॥

दी. **धर्ताऽ५दि । वाऽ३ः षाऽ३वतेका** (ऊ. अ. ५८८) इति **यज्ञायज्ञीये हराऽ२इःसृजानोअत्योनसत्व** । अत्र त्योशब्दः संकृष्टः । द्वितीयायां **रोनधत्त-आयुधागभस्त्योःस्वःसिषासन्नथिरो** । अत्र त्योःस्वःशब्दौः संकृष्टौ ॥ ३८ ॥

स्वः कावाभिक्रन्दयोः ॥ ३९ ॥

वि. **कावाभिक्रन्दयोः स्वस्सिषसन्निति** स्वःशब्दः संकृष्टः ॥ ३९ ॥

भा. **स्वःसिषासन्निति** स्वःशब्दः **कावे अभिक्रन्दे** च संकृष्टः ॥ ३९ ॥

दी. **धर्तोवा । दिवःपवतेका** (ऊ. सं. ३३८) इति **कावे** द्वितीयायां **स्वस्सि-षासन्नथिरो** । अत्र स्वःशब्दः संकृष्टः । **धर्तादिव॒पवतेकृत्वियौ** । **होइरासाः** ।

1. A² om. अतीषङ्गे; V² यदिन्द्रचित्रमध्यमान्त्ययोः वरेण्यं प्राध्यं एतौ for यन्मन्यसे...शब्दौ; M¹-²T om. ण्यध्यशब्दौ; B⁴ P. च for ण्यध्यशब्दौ

6. V² धर्तादिमध्यमायां सृजानो अत्यो गभस्त्योः स्वः सिषा एतानि संकृष्टानि for यज्ञायज्ञीये....संकृष्टाः; A²T om. शूरो न धत्त

7. PV²B⁴A¹ om. त्योस्त्योःस्वश्शब्दाः; A²T om. च; M¹-² om. च संकृष्टाः; A¹S¹ शब्दश्च संकृष्टः for ०शब्दाश्च संकृष्टाः

12. A² om. कावाभिक्रन्दयोः; A²T om. शब्दः

13. V² वायोरभिक्रन्दे धर्तादिवमध्यमायां स्वःसिषा इति स्वःशब्दः संकृष्टः for स्वःसिषासन्निति...संकृष्टः

(ऊ. क्षु. ९२८) इति वायोरभिक्रन्दे द्वितीयायां स्वःसिषान्नथि । अत्र स्वःशब्दः संकृष्टः ॥ ३९ ॥

अत्योऽर्के ॥ ४० ॥

वि.&भा. तमसोऽर्के धर्तायायाम् (र. ए. ८०) हरिःसृजानोअत्यो संकृष्टः ॥४०॥

दी. धार्ता । दाइवःपवतेकृत्वियः (र. ए. ८०) इति दीर्घतमसोऽर्के सार्जानो अत्योनस । अत्र त्योशब्दः संकृष्टः ॥ ४० ॥

अत्यो गभस्त्योः ष्वाविशेत्येते शब्दास्त्रयः शाङ्र्गे ॥ ४१ ॥

वि. शार्ङ्गे अत्यो गभस्त्योस्तविष्यमाणो जठरेष्वाविवश इति त्यो-स्त्योः-ष्वा त्रयः शब्दाः संकृष्टाः ॥ ४१ ॥

भा. अत्यो गभस्त्योः ष्वाविश इत्येते शब्दाः संकृष्टास्त्रयः शार्ङ्गे ॥ ४१ ॥

दी. हाउधार्ता । दाऽ२३४इ (ऊ. अ. ६७२) इति शार्ङ्गे जानोअत्यो नसत्वभिः । अत्र त्यशब्दः संकृष्टः ॥ द्वितीयायां धत्तआयुधागभस्त्योः । अत्र स्त्योःशब्दः संकृष्टः । तृतीयायां माणोजठरेष्वाविश । अत्र ष्वाशब्दः संकृष्टः ॥ ४१ ॥

कृत्व्योऽनुमाद्योऽत्योगभस्त्योः स्वः ष्वाविशेत्येते शब्दाः षडर्केडे ॥ ४२ ॥

---

4. PB[4]A[1] हरिः सृजानो अत्यो दीर्घतमसोऽर्के त्यशब्दः संकृष्टः for तमसोऽर्के···संकृष्टः; My[3] om. धर्तायायां; V[2] अत्योशब्दः for अत्यो.

7. R शार्गे for शार्ङ्गे

8. KS[2] शार्गे for शार्ङ्गे; T हरिः सृजनो अत्यो न दीष्वागभस्त्योजठरेष्वाविवेशेति त्यस्त्योष्वाशब्दास्त्रयः for शार्ङ्गे····शब्दाः A[2] om. तविष्यमाणो.

10. V[2] adds धर्तादिवा आदिमध्यमायां before अत्यो; V[2] एते त्रयः संकृष्टाः for इत्येते···शब्दाः

वि. अष्टेडे कृत्व्योऽनुमाद्यो अत्यो गभस्त्योः स्वस्सिषाष्वाविशेत्येते षट् शब्दाः संकृष्टाः ॥ ४२ ॥

इति फुल्लसूत्रविवरणे संकृष्टविकृष्टयोः द्वितीयस्य द्वादशः खण्डः ॥ १२ ॥

इति अजातशत्रुभट्टोपाध्यारयविरचिते फुलसूत्रविवरणे द्वितीयः प्रपाठकः समाप्तः ॥२॥

भा. एते शब्दाः षड् अष्टेडे संकृष्टाः ॥ ४२ ॥

इति पुष्पसूत्रभाष्ये द्वितीयस्य द्वादशी कण्डिका समाप्ता ॥ १२ ॥

इति उपाध्यायाजातशत्रुकृते पुष्पसूत्रभाष्ये द्वितीयः प्रपाठकः समाप्तः ॥ २ ॥

दी. कृत्व्यः–अनुमाद्यः–त्यः–गभस्त्योः–स्वः–ष्वाविश इत्येते शब्दाः षड्
१२र २१र २१ २र १ २र१२
अष्टेडे संकृष्टाः । ईडा । ध्नर्तादिवःपवतेकृत्व्योरसः (र. अ. ११०) इत्यष्टेडे-
र २र१रर २ १र२र १ २
त्व्यःशब्दः संकृष्टः । दक्षोदेवानामनुमाद्योनृभिः । अत्र द्यःशब्दः संकृष्टः । हरिः
२ र १र २र १ २ र २र १ २१र
सृजानो अत्योनसत्वभिः । अत्र त्यःशब्दः संकृष्टः । द्वितीयायां शूरोनधत्तआयु
२र१ २र र २ १र २
धागभस्त्योः । अत्र स्त्योःशब्दः संकृष्टः । स्वःसिषासन्नथिरोगविष्टिषु । अत्र

---

1. M^1-^2T add: न after अत्यो

3. Ks^2 इति द्वितीयस्य द्वादशमः । द्वितीयः प्रपाठकः; A^2T इति संकृष्टविकृष्टे द्वितीयः खण्डः; M^{1-2} इति द्वितीयः खण्डः for the colophon.

4. S^1 षष्ठः for द्वितीयः

5. V^2 अष्टेडपदस्तोमे धर्तादिव आदिमध्यमान्त्यायां कृत्व्योनुमाद्योऽत्योगभस्त्योः । स्वसिषास्वाविशेति एते शब्दाः षट् संकृष्टाः for एते... संकृष्टाः

7. B^4 इति द्वादशमी कण्डिका ॥ पुष्पभाष्ये द्वितीय प्रपाठकः समाप्तः ॥ V^2 इति पुष्पभाष्ये द्वितीयस्य द्वादशी कण्डिका समाप्ता ॥ द्वितीयः प्रपाठकः समाप्तः for the colophon.

२ १२ र २१२र१र २
स्वःशब्दः संकृष्टः । तृतीयायां **तविष्यमाणोजठरेष्वाविश** । अत्र ष्वाशब्दः संकृष्टः ॥ ४२ ॥

इति फुल्लदीपे षष्ठप्रपाठकस्य द्वादशः खण्डः ॥ १२ ॥

इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नान्हाभाइ-द्वितीयनाम्ना कृते फुल्लदीपे षष्ठः प्रपाठकः समाप्तः ॥ ६ ॥

4: M^{4} °कृतायां फुल्लसूत्रदीपिकायां for कृते फुल्लदीपे
5: L संपूर्णः for समाप्तः

सप्तमः प्रपाठकः

प्रथमः खण्डः

देवेभ्यः संक्षारे ॥ १ ॥

वि. इडनांसंक्षारे पवमान रुचारुचा देव देवेभ्य इति भ्यःशब्दः संकृष्टः ॥ १ ॥

भा. इडनांसंक्षारे हिन्वन्तिसूर- (ऊ. स. ७४८) द्वितीयायां भ्यःशब्दः संकृष्टः ॥ १ ॥

२र र १ २ ४ २३५
दी. औहोइहुवाऽ३होइ । हिन्वन्तिसूऽ३राऽ३मुस्नयः (ऊ. स. ७४८) इति
२र ४ २ ३ ५
इडानाꣳसंक्षारे द्वितीयायां देवदेऽ३वेऽ३भ्यस्सुतः । अत्र भ्यःशब्दः संकृष्टः ॥१॥

नर्यः परीतायाम्माधुयास्यभीशरौरदंष्ट्रजम्भानूपयौधद्वैगण्वतरस्थान संकृतिभर्गयशाथर्वणतरेषु ॥ २ ॥

वि. परितायां माधुच्छन्दस–आयास्य–आभीशव–रौरव–आष्टादंष्ट्रोत्तर–ईनिधन वार्कजम्भ–आनूप–यौधाजय–द्वैगत–कण्वरथन्तर– देवस्थान–संकृति–भर्गयश– आथर्वण-रथन्तरेषु दधन्वाँयोनर्य इति र्यशब्दः संकृष्टः ॥ २ ॥

---

3. My[2-3] R before देवेभ्यः add: श्रीगणेशाय नमः

4. A[2] om. देव; M[1-2]T om. इति भ्यःशब्दः

11. M[1-2]T om. परीतायां...रथन्तरेषु

भा. दधन्वाऽयोनय (सा. १३१३) इति माधुच्छन्दस-ऐडायास्य-आभीशव-रौरव-आदंष्ट्रोत्तर-वार्कजम्भ –आनूप –यौधाजय–द्वैगत–कण्वरथन्तर –देवस्थान- संकृति–भर्ग–यश–आथर्वण–रथन्तरेषु संकृष्टः ॥ २ ॥

दी. परीतोषिञ्चतासुतम् (सा. १३१३) इत्यस्यां माधुच्छन्दस-ऐडायास्य-आभीशव –रौरव– आष्टादंष्ट्रोत्तर –वार्कजम्भ– आनूप –यौधाजय –द्वैगत– कण्वरथन्तर–देवस्थान–संकृति–भर्ग–यश–आर्थवण–रथन्तरेषु नर्यशब्दः संकृष्टः ॥ परीतोषा । होइ । चतासुताऽ६मे (ऊ. सं. २४५) इति माधुच्छन्दसे दधन्वाऽयोनर्योअ । अत्र र्यःशब्दः संकृष्टः । आइपराइ । तोषाइ (ऊ. सं. २४६) इत्यैडआयास्ये नर्योआ । अत्र र्यःशब्दः संकृष्टः । परीतोषिञ्चतासुतम् । ए (ऊ. द. १८६) इत्याभीशवाद्ये न्वाऽयोनर्योअप्सूअन्तरा । अत्र र्यःशब्दः संकृष्टः । परीतोषिञ्चाऽ३तासूऽ२३४ताम् (ऊ. सं. ३७३) इति रौरवे दधन्वाऽयोनर्यो अप्सुवाऽरन्तरा । अत्र र्यः शब्दः संकृष्टः । परीतोषिञ्चातसुतमैयादौ । होऽ३वा (ऊ. ए.४७२) इत्याष्टादंष्ट्रोत्तरे दधन्वाऽ योनर्यो अप्सुव । अत्र र्यः संकृष्टः । परीतोषिञ्चतासूताम् । सूताम् (र. सं. ६६) इति वार्कजम्भोत्तरे दधन्वाऽयो नर्यो अप्सुवन्तारा । अत्र र्यः संकृष्टः । पराइपराइ । तोषिञ्चाऽ३ तासूऽ१ताऽरम् (ऊ. अ. ६०६) इत्यानूपे वाद्यश्चे नर्यो अप्सुवन्ताऽर३रा । अत्र र्यः संकृष्टः । पारऽ३१इ । तोऽ३षीञ्च (ऊ. स. ६१८) इति यौधाजये न । योआऽ२ । अत्र र्यः संकृष्टः । परीतोऽ३षिञ्चतासुताम् । सोमोयाउ (ऊ. अ. ६१९) इति द्वैगते न्वाऽयोनर्यो अप्सूअन्ताराऽ२ । अत्र र्यः संकृष्टः । परीतोषिञ्चतासुताम् (ऊ. अ. ७३६) इति कण्वरथन्तरे दधन्वाऽयोनर्योअप्सुवंतराऽ२३४ऐही । अत्र र्यः संकृष्टः । हाउपरीतोषाइ । (र. द. २३) इति देवस्थाने दधन्वाऽयोनर्योआऽ३ । अत्र र्यःशब्दः संकृष्टः । एपारी ।

---

8. My[2] om. आइपराइ…संकृष्टः

14. M[4]My[2-3]R जम्भाद्ये for जम्भोत्तरे

18. E अप्सुवन्तरा for अप्सू अन्तरा

तोषिंचताऽ२ ३होऽ२३इ (र. द. २४) इति **संक्रतिनि दधन्वा२ऽयोनर्योअ** । अत्र र्यः संक्रुष्टः । **यत्** । **परीतोषी** (रां द. २५) इति **भर्गे दधन्वा२ऽयोनर्यो** । **अ** । अत्र र्यः-संक्रुष्टः । **परीतोषिश्वतासुतम्** (र. द. २६) इति **यशसि दधन्व२ऽयोनर्योअप्सुवन्तरा** । अत्र र्यः संक्रुष्टः । **उहुवाओहा** । **औहोवा** । **परीतोषाइ** (र. सं. ३२) इत्याथर्वणे **तम२ऽहविर्दधन्वा२ऽयोनर्योअ** । अत्र र्यः संक्रुष्टः । **परीतोषिश्वतासुतोवा** (र. द. ६२) इति **रथन्तरे दधन्वा२ऽयोनर्योअ** । अत्र र्यः संक्रुष्टः ॥ २ ॥

नवमे चाहानि सर्वत्र ॥ ३ ॥

वि. **नवमेऽहनि** सर्वसामसु संक्रुष्टः पृष्ठादिषु ॥ ३ ॥

भा. **नवमेऽहनि पृष्ठ**कौल्मलादिषु नर्य इति संक्रुष्टः ॥ ३ ॥

दी. द्वादशाहस्य **नवमेऽहनि परीतोषी**–(सा. १३१३)त्यस्यां सर्वसामसु पृष्ठ-कौल्मलबर्हिषार्कपुष्पदेवस्थानसंक्रतिवैय्यश्वभर्गाभीशवयशस्सु नर्यःशब्दः संक्रुष्टः । **पराऽ३इतोषिश्वतासुताम्** (ऊ. द. १८२) इति **पृष्ठे दधन्वा२ऽयोनर्योअ** । अत्र र्यः संक्रुष्टः । **पराऽ३इतोऽ३षिश्वतासुताम्** (ऊ. द. १८२) इति कौल्मलबर्हिषे **दधन्वा२ऽयोनर्योअ** । अत्र र्यस्संक्रुष्टः । **परीतोषिश्वतासुतम्** । **हुवेऽ२३** (ऊ. द. १८३) इत्यर्कपुष्पे **दधन्वायोनर्यो अप्सुवन्तरा** । अत्र र्यः संक्रुष्टः । देवस्थानस्य संक्रतिनश्चोक्तम् । **परीतोषिश्वतासुताम्** (ऊ. द. १८५) इति **वैयश्वे नर्योअन्प्सुवन्तरा** । अत्र र्यः संक्रुष्टः । भर्गस्योक्तम् । आभीशवस्य यशसश्चोक्तम् ॥ ३ ॥

दैर्घवर्जम् ॥ ४ ॥

वि. नवमेऽहनि **दैर्घश्रवसे** र्यशब्दो विक्रुष्टः ॥ ४ ॥

---

2. L[1] om. यत् । परीतोषि....र्यः संक्रुष्टः

14. RMY[2] ०पुष्पाद्ये for ०पुष्पे

भा. दैर्घश्रवसे तु विकृष्टो नर्यशब्दः ॥ ४ ॥

२ र र र र र र २
दी. परीतोषिश्चतासुतमोहाओहाऽ३ए (ऊ. द. १८४) इति दैर्घश्रवसवर्जम् । १ २र १ २ नारियः । अप्सूअन्तरा । अत्र नर्यशब्दः विकृष्टः ॥ ४ ॥

विभाषा रुण-साम्नि ॥ ५ ॥

वि. वरुणसाम्नि नर्यःशब्दः संकृष्टः । विभाषा विकृष्टो वा भवति परीतायाम् ॥५॥

भा. परीतायामेव वरुणसाम्नि नर्यःशब्दो विभाष्यते विकल्प्यते । संकृष्टो विकृष्टो वा ॥ ५ ॥

२ र र र ३ २ १ २ १२र
दी. परीतोषिश्चतासुतोत्रा । ओत्रा (ऊ. ए. ४८२) इति वरुणसाम्नि नर्यो अ। अत्र र्यःशब्दः संकृष्टः । विभाषा विकल्पेन । नरियोअ । एवं वा विकृष्टः ॥ ४ ॥

एष एव शब्दः संकृष्टो गोमन्नः ष्कले ॥ ६ ॥

वि. गोमन्न (ऊ. स. ७०५) इति पौष्कले एष एव शब्दः संकृष्टः । सखेव सख्ये नर्यं इति ॥ ५ ॥

भा. एष एव शब्दो गोमन्न (ऊ. स. ७०५) इत्यत्र सनोहरीणायां संकृष्टः ॥ ६ ॥

२र १ ७ ४ ५र २ १ ५
दी. गोमन्नाऽ३इन्दो । अश्वाऽ२३४वात् (ऊ. स. ७०५) इति पौष्कले द्वितीयायां ३ खियाऽ२इनाऽ२३४यीऽ६५६ः । अत्र एष एव शब्दः संकृष्टः ॥ ६ ॥

---

1. M¹T trans. विकृष्टः before र्यशब्दो; T र्यः for र्यशब्दः
3. E. नारिय M¹ नारीयः for नारिय; L¹ अप्सुवन्तरा for अप्सू अन्तरा; My³ नर्यः for नर्यशब्दः
4. A³T वरुण for रुण.
5. M² om. भवतिः; A² om. वा.
6. B¹V² om. विकल्प्यते; PA¹L² before विकल्प्यते; add: नर्मः शब्दो V¹ भाष्यते for विभाष्यते; V² संकृष्टविकृष्टौ for संकृष्टो विकृष्टो वा.
11. A² इन्दो for इति.

त्येष्यव्य द्व्यभ्यालौशे ॥ ७ ॥

वि. असाविसोमायां (ऊ. सं. २८५) द्व्यभ्याघाते लौशे **पुनानोवारमत्येष्य** व्ययेति त्रयः संकृष्टाः ॥ ७ ॥

भा. असाविसोमायां द्व्यभ्यालौशे **पुनानोवारमत्येष्यव्यमेते** शब्दास्त्रयः संकृष्टाः ॥७॥

दी. **असाविसोमोअरुषोवृषा** । **हराइः** (ऊ. सं. २८५) इति द्विरभ्यासे लौशे **नोवारमत्येष्य** । **व्ययाम्** । **व्ययाम्** । अत्र **त्ये** । **ष्य** । **व्य** एते त्रयः शब्दाः संकृष्टाः ॥७॥

तमसोऽर्के च ॥ ८ ॥

वि. **दीर्घतमसोऽर्के च** त्रयः संकृष्टाः ॥ ८ ॥

भा. **दीर्घतमसोऽर्के च** एते एव त्रयः शब्दाः संकृष्टाः ॥ ८ ॥

दी. **आसा** । **वाइसोंमोअ**-(र. द. २८) इति **दीर्घतमसोऽर्के** **नोवारमत्येष्य** । **व्ययांव्ययाम्** । अत्र **त्येष्यव्य** एते त्रयः शब्दाः संकृष्टाः ॥ ८ ॥

अत्रैव तृतीयायामत्यः सर्वत्र ॥ ९ ॥

वि. अत्र **तृचे एव** तृतीयायाम् अत्योनमृष्टो अभीत्यत्र त्यशब्दः **सर्वत्र** संकृष्टः ॥ ९ ॥

---

1. KA[2]M[1]S[1]My[1] अत्तेष्यव्यं E अत्येष्यव्य for त्येष्यव्य; M[2] अत्येष्यव्यालौशे for अत्येष्यव्याद्व्यभ्या लौशे; M[1-2] द्व्यभ्यासे, A[2] द्व्याघाते for द्व्याभ्याघाते.
3. KS[1-2] ०ष्यव्ययमिति for ष्यव्ययेति
5. L[1] द्विभ्यास EMy[3] द्विभ्या for द्विरभ्यासे
6. L[1] om. त्येष्यव्यायाम् व्यायाम् अत्र; L[1] एतेऽत्र for एते त्रयः
7. My[2] om. तमसो०...संकृष्टाः (l. 11)
8. M[1-2]T om. दीर्घतमसोऽर्के च.
9. V[2] ते for एते; P om. एव
12. PV[2]L[1] अन्त्यः for अत्यः.

भा. अस्मिन्नेव असाविसोम-तृचे कविर्वेधायाम् (सा. १३१८) अत्यो न मृष्टः इति त्यशब्दः सर्वसामसु संकृष्टः ॥ ९ ॥

दी. अस्मिन्नेव असाविसोम-तृचे तृतीयायां कविर्वेधायाम् (सा. १३१८)
२र र २ र र र १
अत्यःशब्दः सर्वसामसु संकृष्टः । उदाहरणम्-हाउहोवाऽ३हाइ । असाविसोमोऽ२आ
२ र र १
(ऊ. द. १८८) इति सामराजे तृतीयायाम् अत्योनमृष्टोऽ३आ । अत्र त्यःशब्दः संकृष्टः । एवमादिषु सामसु ॥ ९ ॥

न्योजसा कीर्त्ये ॥ १० ॥

वि. दिवाकीर्त्ये श्रायन्तायां (र. सं. ५२) वसूनि जातो जनिमान्योजसा इति न्योशब्दः संकृष्टः ॥ १० ॥

भा. महादिवाकीर्त्ये श्रायन्तायां (र. सं. ५२) वसूनि जातो जनिमान्योजसा इति न्योशब्दः संकृष्टः ॥ १० ॥

१र २ १र १२२ र १र
दी. श्रायन्तइवसूर्यम् (र. सं. ५२) इति महादिवाकीर्त्ये वसूनिजातोजनि-
२र १र २र
मान्योजसा । अत्र न्योशब्दः संकृष्टः ॥ १० ॥

भ्यं कीर्त्ये ॥ ११ ॥

वि. कीर्त्ये बण्महऽ अस्यां (र. सं. ५०) विभु ज्योतिरदाभ्यमिति भ्यं संकृष्टः ॥

भा. महादिवाकीर्त्ये एव बण्महऽअसि (र. सं. ५०) इत्यत्र विभु ज्योतिरदाभ्यमिति भ्यंशब्दः संकृष्टः ॥ ११ ॥

---

2. PV[2] मृज्य; for मृष्टः.
3. M[4] after एव adds: सान्नि
8. S[1] om. दिवाकीर्त्ये.
15. M[1-2] दिवाकीर्त्ये for कीर्त्ये and trans. बण्महा असि after संकृष्टः; My[1] om. इति भ्यं
17. A[2] भ्यः; M[1-2] भ्यशब्दः for भ्यंशब्दः

दी. **बण्महाॅ असिसूर्य** (र. सं. ५०) इति **महादिवाकीर्त्ये** तृतीयायां **विभुर्ज्योतिरदाभ्यम्** । अत्र भ्यंशब्दः संकृष्टः ॥ ११ ॥

काशीतहाविष्कृतयोस्त्वंशब्दः सर्वासु ॥ १२ ॥

वि. **त्वंसोमासि** (सा. १३२३–५) इत्यत्र **सर्वासु** स्तोत्रीयासु **प्रतीचीनेडकाशीतहाविष्कृतयोः** त्वंशब्दः संकृष्टः ॥ १२ ॥

भा. **त्वँसोमासि** । **धाऽरयूः** (सा. १३२३) इति **त्वंशब्दः** **सर्वासु** स्तोत्रीयासु संकृष्टः ॥ १२ ॥

दी. **त्वँसोमासि** । **धाऽरयूः** (ऊ. द. १९४) इति **प्रतीचेनेडे** **काशीते** प्रथमायां **त्वंशब्दः** संकृष्टः । द्वितीयायां **त्वँसुतोम** । अत्र त्वंशब्दः संकृष्टः । तृतीयायां **त्वंसुष्वाणः** । अत्र त्वंशब्दः संकृष्टः । **त्वंसोमासिधाहाउरायूः** (ऊ. द. १९५) इति **हाविष्कृते** प्रथमायां त्वंशब्दः संकृष्टः । द्वितीयायां **त्वँसुतोमदा** । अत्र त्वंशब्दः संकृष्टः । तृतीयायां **त्वंसुष्वा** । अत्र त्वंशब्दः संकृष्टः ॥ १२ ॥

त्वां देवासो रीत्याप इत्येतौ शब्दौ वैश्वमनसश्रुध्ययोः ॥ १३ ॥

वि. **वैश्वमनसश्रुध्ययोः पवस्वदेवायां** (सा. १३२६) **त्वां देवासो अमृता** (सा. १३२७) **वृष्टिंद्यावो रीत्यापः** (सा. १३२८) इति त्वां-त्या-शब्दौ संकृष्टौ ॥ १३ ॥

भा. **पवस्व देव** (सा. १३२६) इत्यत्र **त्वान्देवा** इति त्वांशब्दः संकृष्टः । **वृष्टिंद्यावः [रीत्यापः]** इत्यत्र त्या-शब्दः संकृष्टः ॥ १३ ॥

दी. **पवस्वदेववीताऽ३याइ** (ऊ. द. १९७) इति **वैश्वमनसे** द्वितीयायां **बृधुरा त्वांदेवासोअमृताऽ२३४** । अत्र त्वांशब्दःसंकृष्टः । तृतीयायां **रयिमावृष्टिंद्यावो-**

---

4. T om. स्तोत्रीयासु; My[1]KM[1-2]TS[1-2] om. प्रतीचीनेड

5. A[2] adds: सर्वासु before संकृष्टः

रीत्यापाऽ२३४५: । अत्र त्याशब्दः संकृष्टः । पवस्वदाऽ२ इव । वीतयोवा । (ऊ. स. ७३१) इति श्रुध्ये द्वितीयायां त्वांदेवासोअमृताया । अत्र त्वांशब्दः संकृष्टः । तृतीयायां वृष्टिद्यावोरीत्यापःसु । अत्र त्याशब्दः संकृष्टः ॥ १३ ॥

अर्चन्त्युद्वंशीयवितयोः ॥ १४ ॥

वि. **उद्वंशीयगौरीवितयोः गायन्तित्वायाम् अर्यन्त्यर्कमिति** त्यशब्दः संकृष्टः ॥

भा. **अर्चन्त्यर्कमर्किण** (ऊ. द. २०८) इति **उद्वंशीयगौरीवितयोः** त्यशब्दः संकृष्टः ॥ १४ ॥

दी. **गायन्तित्वागायत्रिणआ** (ऊ. द. २०८) इत्युद्वंशीये **अर्चन्त्यर्कमर्काऽ२३इणाः** । अत्र न्त्यशब्दः संकृष्टः । **गाय** । **तित्वाऽ३** (ऊ. क्षु. ८९४) इति **गौरीविते अर्चन्त्यर्कमर्किणाऽ२३:** । अत्र न्त्यशब्दः संकृष्टः ॥ १४ ॥

सान्वारुहो वंशीये ॥ १५ ॥

वि. उद्वंशीये **यत्सानोस्सान्वारुह** इति न्वाशब्दः संकृष्टः ॥ १५ ॥

भा. **गायन्तित्वायाम्** (ऊ. द. २०८) एव **यत्सानोः सान्वारुह** इति **उद्-वंशीये** न्वाशब्दः संकृष्टः ॥ १५ ॥

दी. **गायन्तित्वागायत्रिणआ** (ऊ. द. २०८) इत्युद्वंशीये द्वितीयायां **यत्सानोस्सान्वारुहआ** । अत्र न्वा-शब्दः संकृष्टः ॥ १५ ॥

भूर्य वंशीयलेयावितेषु ॥ १६ ॥

वि.&भा. **उद्वंशीय–कालेय–गौरीवितेषु भूर्यस्पृष्ट कर्त्वमिति** र्यशब्दः संकृष्टः ॥

---

5. M[1-2] त्यशब्दौ संकृष्टौ for त्यशब्दः संकृष्टः

11. A[2]M[1]-[2]T द्वंशीये for वंशीये

18. भा. om. कर्त्वम्

दी. गायन्तित्वा (ऊ. द. २०८) इत्युद्वंशीये द्वितीयायां भूर्यस्पष्टकर्तूऽ२३ वाम् । अत्र र्यः संकृष्टः । गायन्ताऽ३इत्वागायत्रिणाः (ऊ. प्रा. ८२४) इति कालेये द्वितीयायां भूर्यास्पष्टा । अत्र र्यः संकृष्टः । गायन्तित्वाऽ३ । गायत्रिणाः (ऊ. क्षु. ८९४) इति गौरीविते द्वितीयायां भूर्यस्पष्टकर्तुवाऽ२३म् । अत्र र्यः संकृष्टः ॥ १६ ॥

पर्यूष्वान्धीगवसंस्तोभयोः ॥ १७ ॥

वि.&भा. आन्धीगवसंस्तोभयोः पयूषु प्रधन्वा (सा. १३६४) इति यूशब्दः संकृष्टः ॥ १७ ॥

दी. पर्यूषुप्रधाऽ१न्वावा (ऊ. द. २१९) इत्यान्धीगवे । अत्र यूशब्दः संकृष्टः । पर्यूषुप्रधन्वावा । न्वावा । न्ववा (र. ए. ७७) इति संस्तोभे । अत्र यूशब्दः संकृष्टः ॥ १७ ॥

तरध्यै विते ॥ १८ ॥

वि.&भा. गौरीविते द्विषस्तरध्या ऋणया इति ध्यैशब्दः संकृष्टः ॥ १८ ॥

दी. परि । ऊषूऽ३ । प्रधन्वावा (ऊ. स. ७८४) इति गौरीविते ध्यात्रह-णायाऽ३१२३ः । अत्र ध्यैशब्दः संकृष्टः ॥ १८ ॥

राज्ये न्धीगववदेव्ययोः ॥ १९ ॥

वि.&भा. आन्धीगव–वामदेव्ययोः महेसमर्यराज्य (ऊ. द. २१९) इति ज्ये-शब्दः संकृष्टः ॥ १९ ॥

दी. पर्यूषुप्रधाऽ१न्वावा (ऊ. द. २१९) इति आन्धीगवे तृतीयायां समर्य-राज्येवाजाःअमीऽ२३४५ । अत्र ज्येशब्दः संकृष्टः । पाऽ५री । ऊषूऽ३प्राऽ३-धन्वावा (ऊ. सं ३५०) इति वामदेव्ये तृतीयायां दामसिमहेसमर्यराज्येवाजाःअ । अत्र ज्येशब्दः संकृष्टः ॥ १९ ॥

---

6. PM[1-2] om. आन्धीगवसंस्तोभयोः

12. P om. ऋणया

सानित्यः सर्वत्र ॥ २० ॥

वि. सनित्यशब्दः सर्वत्र संकृष्टः तमग्निमस्तेवसवायाम् (सा. १३७४) ॥

भा. अग्निंनर (सा. १३७३–७५) इति द्वितीयायां दक्षाय्यो यो दम आस नित्य इति नित्यशब्दः सर्वसामसु संकृष्टः ॥ २० ॥

दी. अग्निंनर (सा १३७३–५) इत्येतासु द्वितीयायां दम आस नित्य इति नित्यशब्दः सर्वसामसु संकृष्टः । उदाहरणम् । आऽ५ग्निम् । नरोऽ३दाऽ३इ (ऊ. द. २२२) इति वामदेव्ये द्वितीयायां सनौहोऽ३ । हिम्माऽ२ । त्याऽ२योऽ३५हाइ । अत्र त्यशब्दः संकृष्टः । एवमादिषु सामसु ॥ २० ॥

अत्रैव तृतीयायां त्वाꣳश देव्ये ॥ २१ ॥

वि. अस्मिन्नेव तृचे तृतीयायां वामदेव्ये त्वां शश्वन्त इति त्वांशब्दः संकृष्टः ॥

भा. अग्निंनर- (ऊ. द. २२२)तृतीयायां प्रेद्धोअग्नायां त्वां शश्वन्त इति त्वांशब्दः संकृष्टः ॥ २१ ॥

दी. अत्रैव अग्निंनर (ऊ. द. २२२) इत्येतास्वेव वामदेव्ये तृतीयायां प्रेद्धो-अग्नायां रोनोअजस्त्रयास्सूर्म्यायविष्ठत्वाम् । शा । अत्र त्वांशब्दः संकृष्टः ॥ २१ ॥

न्यृण्वन् दक्षाय्य इत्येतौ शब्दौ मराये ॥ २२ ॥

वि. तमग्निमस्तेवसवो न्यृण्वन्–दक्षाय्यो यो दम इति न्यृ-य्यौ शब्दौ मराये संकृष्टौ ॥ २२ ॥

---

2. A[2] om. सनित्यशब्दः सर्वत्र.
5. A[2]V[2] नरायां for नर इत्येतासु द्वितीयायां; M[4] after इति adds: अत्र
7. RL[1]My[2-3] हुम् for हिम्; M[4] om. अत्र
15. A[2]M[1-2]T नृण्वन् for न्यृण्वन्
16. M[1-2]T trans. मराये after संकृष्टौ

भा. अग्निनरायामेव **तमग्निमस्ते वसवो न्यृण्वन् दक्षाय्य** इति च न्यृशब्द-य्य-शब्दौ संक्रुष्टौ ॥ २२ ॥

दी. हाउहाउहाउ । आग्नीम् । नराः (ऊ. क्षु. ९००) इति **मराये** द्वितीयायां **स्तेवसवो न्यृण्वन्** । अत्र न्यृशब्दः संक्रुष्टः । **दाक्षा** । **य्योयोदमआसनित्यः** । अत्र य्योशब्दः संक्रुष्टः ॥ २२ ॥

शेप्या भारद्वाजे ॥ २३ ॥

वि.&भा. भारद्वाजे **हरी मयूरशेप्या** (ऊ. स. ७११) इति प्याशब्दः संक्रुष्टः ॥

दी. आत्वासहा (ऊ. स. ७११) इति **भारद्वाजे** द्वितीयायां **हारीमायूरशेप्या** । अत्र प्याशब्दः संक्रुष्टः ॥ २३ ॥

व्यास्थिरन् षडिडे ॥ २४ ॥

वि.&भा. **पवित्रंतायाम्** (र. अ. १०९) **षडिडे अर्चन्तो अस्य तन्तवो व्यस्थिरन्** इति व्यशब्दः संक्रुष्टः ॥ २४ ॥

दी. **पवित्रन्तेवित** । **ईडा** (र. अ. १०९) इति **षडिडपदस्तोभे** द्वितीयायाम् **अर्चन्तोअस्यतन्तवोव्यस्थिरन्**। अत्र व्यशब्दः संक्रुष्टः ॥ २४ ॥

अवन्त्यस्य स्वारकावज्ञीययोः ॥ २५ ॥

वि. **स्वारकावज्ञीययोः अवन्त्यस्य पविता** (सा. ८७६) इति त्यशब्दः संक्रुष्टः ॥

भा. पवित्रन्तायाम् (सा. ८७५–७) **अवन्त्यस्य पवितारम्** इति **स्वारकावयज्ञायज्ञीययोः** त्यशब्दः संक्रुष्टः ॥ २५ ॥

---

1. B[4] om. एव; P om. च
7. भा. adds: स्वासु before भारद्वाजे; My[1]K om. ०शब्दः.
11. वि. om. पवित्रंतायाम्; A[2] om. षडिडे
12. K om. ०शब्दः
16. M[1-2] स्वारकावयज्ञीययोः for स्वारकावज्ञीययोः
17. A[3] om. स्वारकावयज्ञायज्ञीययोः

दी. पवोवा । त्रन्तेवितंत्रा (ऊ. ए. ४७७) इति स्वारकावे द्वितीयायाम् अवन्त्यस्यपविता । अत्र त्यशब्दः संकृष्टः । पवाऽ५इत्वम् (ऊ.. ५७४) इति यज्ञायज्ञीये द्वितीयायाम् अवाऽ२न्त्यस्यपवितारमाश । अत्र त्यशब्दः संकृष्टः ॥ २५ ॥

त्वमिन्द्र त्वं वृत्राणीद्रस्ययशासि ॥ २६ ॥

वि. इन्द्रस्ययशसि त्वमिन्द्र यशा । त्वं वृत्राणि । इत्येतौ शब्दौ संकृष्टौ ॥२६॥

भा. त्वमिन्द्रयशा असि (सा. १४११) इत्यत्र इन्द्रस्य यशसि त्वमिन्द्र त्वं वृत्राणि इति च त्वंशब्दौ संकृष्टौ ॥ २६ ॥

दी. त्वमिन्द्रा । यशाः । असाइ (ऊ. स. ७१३) इतीन्द्रस्य यशसि । त्वमिन्द्रा । अत्र त्वंशब्दः संकृष्टः । त्वंवृत्राणीऽ३ । अत्र त्वंशब्दः संकृष्टः ॥ २६ ॥

त्वं वृहःस्येत्येतौ शब्दौ द्विहिंकादेव्ये ॥ २७ ॥

वि. द्विहिंकारावामदेव्ये त्वं वृत्राणि हःस्येत्येतौ शब्दौ संकृष्टौ ॥ २७ ॥

भा. अत्रैव द्विहिंकारे वामदेव्ये त्वं वृत्राणि हःस्येति त्वंशब्दः स्यशब्दश्च संकृष्टौ ॥ २७ ॥

दी. तुवमाऽ२ ३इन्द्रयशाअसाइ (ऊ. अ. ६३९) इति द्विहिंकारे वामदेव्ये त्वंवृत्राणिहःस्यप्रतीनआइ । अत्र त्वंस्यशब्दौ संकृष्टौ ॥ २७ ॥

त्वंस्यन्ये यशसि ॥ २८ ॥

---

6. A³ om. इन्द्रस्य यशसि

9. LE om. ०शब्दः

10. A¹M¹⁻² त्वं वृत्राणि for त्ववृ; s¹ om. त्वंवृह....संकृष्टौ (l. 11) A³T हिंकारदेव्ये, M¹⁻² ०हिंकारवामदेव्ये for हिंकादेव्ये

12: V² त्वशब्दस्यशब्दौ for त्वशब्दः स्यशब्दश्च.

वि. रहस्ये यशसि त्वमिन्द्र त्वं वृत्राणि हंस्यप्रतीन्येकेति त्वंशब्दौ संकृष्टौ । स्यन्ये-शब्दौ च ॥ २८ ॥

भा. त्वमिन्द्र यशा असि (र. ए. ८८) इत्यत्रैव यशसि त्वं वृत्राणि हꣳस्य-प्रतीन्येक इति त्वंशब्दस्यशब्दन्येशब्दाः संकृष्टाः ॥ २८ ॥

१ २ १र २ ... र २ १र
दी. त्वमिन्द्रयशाअसि (र. ए. ८८) इति यशसि त्वंवृत्राणिहꣳस्यप्रती-
र २ १ २१
न्येकइत्पुरू । अत्र त्वं-स्य-न्ये इत्येते शब्दाः संकृष्टाः ॥ २८ ॥

हꣳस्य भीवर्ते ॥ २९ ॥

वि. अमीवर्ते हꣳस्य प्रतीन्येति स्यशब्दः संकृष्टः ॥ २९ ॥

भा. अत्रैवामीवर्ते त्वं वृत्राणि हꣳस्येति स्यशब्दः संकृष्टः ॥ २९ ॥

५४ २ ४ ५र ४ ५ ... ३ ४
दी. तुवाऽ३माऽ३इन्द्रयशाअसोवा (ऊ. सं. २८०) इत्यमीवर्ते निहꣳस्य-
५ र र
प्रतीनिए । अत्र स्यशब्दः संकृष्टः ॥ २९ ॥

ष्वार्पितो लौशे ॥ ३० ॥

वि.&भा. गोवित्पवस्व (ऊ. सं. ३०९) इति द्व्यभ्याघातलौशे रेतोधाइन्दो-भुवनेष्वर्पित [इत्यत्र] ष्वशब्दः संकृष्टः ॥ ३० ॥

४र ३ ४ ३ ४ ५ ... २र र
दी. गोवित्पवस्ववसुविद्धिर (ऊ. सं. ३०९) इति द्विरभ्यासलौशे धाइन्दो-
र
भुवनेष्व । अत्र ष्वशब्दः संकृष्टः ॥ ३० ॥

त्वं सुवीरः श्येने ॥ ३१ ॥

---

1. A^1 om. त्वमिन्द्र; $KS^{1-2}My^1$ प्रतीन्येत्येतौ शब्दौ, T प्रतीन्येति त्वंशब्दौ for प्रतीन्येकेति त्वंशब्दौ
2. A^2M^{1-2} स्येन्यौ for स्यन्ये
7. A^2 हꣳस्या, M^{1-2} हंस्ये for हंस्य
8. A^2 om. अमीवर्ते
13. A^2 व्यभ्यास for द्व्यभ्याघात; भा. om. रेतोधाइन्दो
15. E द्व्भ्या; L^1 My^3 द्विभ्या for द्विरभ्यास

वि.&भा. गोविच्छ्येयने त्वं सुवीरो असीति त्वंशब्दः संकृष्टः ॥ ३१ ॥

दी. गोवित्पवस्ववसुत्राइत् (ऊं क्षु. ९०७) इति श्येने त्वंसौऽ३हो । अत्र त्वंशब्दः संकृष्टः ॥ ३१ ॥

व्येशब्दः शिशुं देव्यज्योतिषयोः ॥ ३२ ॥

वि.&भा. शिशुं जज्ञानम् (सा. ११७५–७) इति वामदेव्यवैश्वज्योतिषयोः कविर्गीर्भिः काव्येनेति व्येशब्दः संकृष्टः ॥ ३२ ॥

दी. शाऽ५शुम् । जज्ञाऽ३ (ऊ. ए. ३८१) इति वामदेव्ये कविर्गीर्भिः काव्येनाकविस्सन्त्सोमः । अत्र व्येशब्दः संकृष्टः । हाउहोऽ३हाइ । शिशुंजज्ञानंहर्या-ऽ३तांमृजन्ताऽ२३४५इ । (ऊ. क्षु. ९१६) इति वैश्वज्योतिषे । कविर्गीर्भिःकाव्येऽ३नाकविस्साऽ२३४५न् । अत्र व्येशब्दः संकृष्टः ॥ ३२ ॥

पुत्रेभ्यो भारद्वाजे ॥ ३३ ॥

वि. भारद्वजे पिता पुत्रेभ्यो यथेति भ्योशब्दः संकृष्टः ॥ ३३ ॥

भा. इन्द्रक्रत्वायाम् (ऊ. सं ३६७) भारद्वजे पुत्रेभ्य इते भ्यःशब्दः संकृष्टः ॥

दी. इन्द्रक्रतूम् । नआभाऽ१राऽ२ (ऊ. सं ३६७) इति भारद्वाजे पाइता पुत्रेभ्योयथा । अत्र । भ्यःशब्दः संकृष्टः ॥ ३३ ॥

प्रत्यशब्दो नानतरयोः ॥ ३४ ॥

वि. नानद–रथन्तरयोः प्रत्यस्मै पिपीषत (सा. १४४०) इति त्यशब्दः संकृष्टः ॥

भा प्रत्यस्मैपिपीषतायाम् (सा. १४४०–२) नानदरथन्तरयोः त्यशब्दः संकृष्टः ॥ ३४ ॥

---

1. वि. om. गोवित् ; My[1] om. ०शब्दः
14. L[1] आभाऽ२३४रा for आभाऽ२राऽ२
16. A[2]M[1]-[2]T नानद for नान
17. A[2]M[1]-[2]T om. ०षत इ
18. V[2] पिपीषते for पिपीषतायाम्

दी. प्रत्यस्मैपिपी। षताऽ३इ (ऊ. ए. ३७५) इति नानदे प्रत्यस्मै। अत्र त्यशब्दः संकृष्टः। प्रात्यस्मैपिपीषतोवा (र. सं. ३८) इति रथन्तरे प्रात्यस्मै। अत्र त्यशब्दः संकृष्टः ॥ ३४ ॥

युज्या विशीये ॥ ३५ ॥

वि. सदोविशीये तुविद्युम्नस्य युज्या वृणी–इति ज्याशब्दः संकृष्टः ॥ ३५ ॥

भा. आनोविश्वायां (ऊ. ए. ४७४) सदोविशीयेतुविद्युम्नस्य युज्येति ज्याशब्दः संकृष्टः ॥ ३५ ॥

दी. आनोविश्वासुहव्यमोहाओहाऽ३ए। औहोऔहोऽ३वा (ऊ. ए. ४७४) इति सदोविशीये तृतीयायां तुविद्युम्नस्य युज्यावृणीमहे। अत्र ज्याशब्दः संकृष्टः ॥

व्रतान्यस्य श्यैतवाजयियोः ॥ ३६ ॥

वि.&भा. स्वादोरित्थायां श्यैतरायोवाजीययोः व्रतान्यस्य इति न्यस्यशब्दौ संकृष्टौ ॥ ३६ ॥

दी. स्वादोरित्थाविषू। वताऽ३४औहोवा (ऊ. ए. ३७८) इति श्यैते तृतीयायां व्रतान्यस्यसश्चिरेपु। अत्र न्यस्यशब्दौ संकृष्टौ। एस्वादोः। इत्थाविषूवतो (र. द. १४) इति रायोवाजीये तृतीयायां व्रतान्यस्यसाऽ१श्चाऽ३इराइ। अत्र न्यस्यशब्दौ संकृष्टौ ॥३६॥

---

2. E om. ०शब्दः E M[4] om. प्रत्यस्मै। अत्र

4. A[2]M[1-3]T युज्यादो for युज्या

6. M[1-2] om. सदोविशीये

11. A[2]M[1-2]TS[2] om. ०रायो०; KA[2]M[1-2]S[1]My[1] न्यशब्दः संकृष्टः, T न्य संकृष्टः for न्यस्यशब्दौ संकृष्टौ

13. M[4] वाताऽ२३४ for वताऽ३४

पूर्व्यमुत्सेधे ॥ ३७ ॥

वि.&भा. प्रत्नंपीयूषायाम् (ऊ. ए. ५२५) **उत्सेधे प्रत्नंपीयूषंपूर्व्यम्** इति व्यं-शब्दः संकृष्टः ॥ ३७ ॥

४३ ४र३र ४र३४५
दी. **प्रत्नं पीयूषं पूर्व्ययदू** (ऊ. द. ५२५) इत्युत्सेधे व्यंशब्दः संकृष्टः ॥ ३७ ॥

स्यृकाभिः पार्श्वे ॥ ३८ ॥

वि. भा. अयारुचायां **गायत्रपार्श्वे विश्वा यद्रूपा परिया स्यृकभिरिति** स्यृशब्दः संकृष्टः ॥ ३८ ॥

१ २ १ र २
दी. आया । रूचाहराऽ३१उवाऽ२३इ (ऊ. ए. ३९७) इति **गायत्रपार्श्वे**
१र १२र१र २ १र ३ १११
विश्वायद्रूपापरियास्यृकभीऽ२३४५ः । अत्र स्यृशब्दः संकृष्टः ॥ ३८ ॥

हरिण्या सप्तास्येभिर्वत्सासु ॥ ३९ ॥

वि. वत्सासु अयारुचा[याम्] (र. ए. ८२) **हरिण्याशब्दः सप्तास्येभिश्च** संकृष्टः ॥

इति फुल्लसूत्रविवरणे संकृष्टविकृष्टयोः तृतीयस्य प्रथमः खण्डः ॥ १ ॥

भा. अयारुचायाम् (र. ए. ८२) एव **नित्यवत्सासु अयारुचाहरिण्यासप्तास्येभिरिति** च ण्याशब्दस्येशब्दौ संकृष्टौ ॥ ३९ ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य प्रथमा कण्डिका समाप्ता ॥ १ ॥

---

2. वि. om. प्रत्नं पीयूषायाम्
4. E अत्र for इत्युत्सेधे; RL[1] before व्यंशब्दः adds: अत्र
6. वि. om. अयारुचायाम् ; KA[2]M[1-2]T पर्या for परिया
9. E om. अत्र
11. A[2]T om. वत्सासु; A[2]M[1-2]T ०रुचेति for रुचा
12. KS[2]My[1] तृतीयस्य प्रथमः; A[2] संकृष्टविकृष्टे तृतीयः खण्डः, M[1] संकृष्ट खण्डः तृतीयः, M[2] तृतीयः, M[2] तृतीयः खण्डः for colophon.
15. V[2] इति तृतीयस्य प्रथमकण्डिका for colophon.

दी. एआया। रुचाहरिण्यापुनान (र. ए. ८२) इति नित्यवत्सासु रुचाहरिण्या। अत्र ण्याशब्दः संकृष्टः। सप्तास्येमिराऽ२३हो। अत्र स्येशब्दः संकृष्टः ॥ ३९ ॥

इति फुल्लदीपे सप्तमप्रपाठकस्य प्रथमः खण्डः ॥ १ ॥

द्वितीयः खण्डः

त्वेसोमाभ्यभिहात्येतौ शब्दौ दैर्घे ॥ १ ॥

वि. दैर्घश्रवसे त्वेसोमप्रथमा–अभ्यमिहिश्रावसेत्येतौ शब्दौ संकृष्टौ ॥ १ ॥

भा. त्वे सोम प्रथमा वृक्तबर्हिष (ऊ. ए. ४०१) इति दैर्घश्रवसे त्वेशब्दभ्यशब्दौ संकृष्टौ ॥ १ ॥

दी. त्वेसोमप्रथमावृगोहाओहाऽ३ए (ऊ. ए. ४०१) इति दैर्घश्रवसे त्वेसोम। अत्र त्वेशब्दः संकृष्टः। द्वितीयायाम् अभ्यमिहिश्रवसाओहाओहाऽ३ए। अत्र भ्यशब्दः संकृष्टः ॥ १ ॥

घ्न्यानाꣳ श्रुध्ये ॥ २ ॥

वि. श्रुध्ये पतिं वो अघ्न्यानामिति घ्न्याशब्दः संकृष्टः ॥ २ ॥

भा. नदं वो ओदतीनाम् (ऊ. ए. ४०५) इति घ्न्याशब्दः संकृष्टः ॥ २ ॥

दी. नदंव ओऽ२द। तीनोवा (ऊ. ए. ४०५) इति श्रुध्ये पतिंवोअघ्न्यानांधेनूनामि। अत्र घ्न्याशब्दः संकृष्टः ॥ २ ॥

---

3. M[4] फुल्लसूत्रदीपिकायां for फुल्लदीपे
5. KA[2]TS[1-2] दैर्घ्ये for दैर्घे.
6. A[2]M[1-2] om. प्रथमा.
13. A[2]T trans. श्रुध्ये after घ्न्याशब्दः
14. PV[2] वो अदतीनाम् L[2]A[1] वो नुदतीनाम् for व ओदतीनाम्

पृणध्वं कण्वतरे ॥ ३ ॥

वि. **देवोवायाम्** (ऊ. क्षु. ८९६) **कण्वरथन्तरे उद्वा सिञ्चध्वमुप वा पृणध्व-मिति** ध्वंशब्दः संकृष्टः ॥ ३ ॥

भा. **कण्वरथन्तरे देवोवायाम्** (ऊ. क्षु. ८९६) **पृणध्वम्** इति ध्वंशब्दः संकृष्टः ॥ ३ ॥

२ ७ र १ र   २ र १
दी. **देवोवोद्रविणोदाः** (ऊ. क्षु. ८९६) इति कण्वरथन्तरे **वापृणध्वाऽ२३४ मैही** । अत्र ध्वशब्दः संकृष्टः ॥ ३ ॥

जातमार्य ज्ञीये ॥ ४ ॥

वि.&भा. **यज्ञायज्ञीये अदर्शिगातुवित्तमायाम्** (ऊ. ए. ४०७) **उपो षु जात-मार्यस्येति** र्यशब्दः संकृष्टः ॥ ४ ॥

४३   ४ २ ४ ५
दी **अदाऽ५र्शि । गाऽ२तूऽ३वितमाः** (ऊ. ए. ४०७) इति **यज्ञायज्ञीये**
१ १र र   २
उपोऽ२षुजातमा । र्यस्याऽ२३वा । अत्र र्यशब्द संकृष्टः ॥ ४ ॥

पाह्युत्वामिच्च रौरवे ॥ ५ ॥

वि. **पाहिनोअग्नायां गौरवे पाह्युत्त्वामिद्धि नेदिष्ठमिति** ह्युत्वाशब्दौ संकृष्टौ ॥ ५ ॥

---

1. TE प्रणध्वं, L[1]M[1] प्रणुध्वं for पृणध्वम्

2. A[2]M[-1]-[2] कण्वतरे for कण्वरथन्तरे

9. M[1]-[2] om. यज्ञायज्ञीये; A[2] ज्ञीये for यज्ञायज्ञीये; वि. om. अदर्शिगातुवित्तमायाम्

10. भा. ०मार्य for मार्यस्य

13. A[2] पाह्ये, M[1]-[2] पाह्यु for पह्यु; A[2] त्वामिद्धि for त्वामिच्च

14. A[2]M[1-2]T पाह्यू for पाह्यु; A[2]M[1-2]T ह्यूत्वा for ह्युत्वा; A[2]M[1-2]T नेदीति for नेदिष्ठमिति

भा. **रौरवे** पहिनो अग्नायाम् (ऊ. ए. ४१०) **पाह्युतेति** ह्युशब्दः संकृष्टः । **त्वामिद्धि नेदिष्ठमिति च** त्वांशब्दः ॥ ५ ॥

दी. **पाहिनोअग्नाऽ३आइकाऽ२३४या** (ऊ. ए. ४१०) इति **रौरवे** **पाह्युत-द्वितीयया** । अत्र ह्युशब्दः संकृष्टः । द्वितीयायां **प्रास्मवाजेषुनोवत्वामिद्धि** । अत्र त्वां-शब्दः संकृष्टः ॥ ५ ॥

ह्यग्निभिश्चरन्त्य स्तावे नैपे ॥ ६ ॥

वि. **नैपातिथे** **अग्न आ याह्यग्निभिः** (ऊ. क्षु. ९३३) इति ह्यशब्दः प्रस्तावे विषये **स्रुचश्चरन्त्यध्वेति** त्यशब्दश्च संकृष्टः ॥ ६ ॥

भा. **नैपातिथे** **अग्न आ याह्यग्निभिः** (ऊ. क्षु. ९३३) **स्रुचाश्चरन्त्यध्वर** इति च । अत्र प्रस्तावविषये ह्यशब्दत्यशब्दौ संकृष्टौ ॥ ६ ॥

दी. **अग्नआयाह्यग्निभाऽ३इरे** (ऊ. क्षु. ९३३) इति **नैपातिथे** **प्रस्तावे** **ह्यग्नि-भाऽ३इरे** । अत्र ह्यशब्दः संकृष्टः । **स्रुचश्चरन्त्यध्वराऽ३ए** इति **प्रस्तावे** त्यशब्दः संकृष्टः ॥ ६ ॥

दुर्यन्त्युद्यता चान्धीगवे ॥ ७ ॥

वि. **आन्धीगवे** विशोविशायाम् (ऊ. ए. ४२३) **अग्निं वो दुर्यं वच** इति र्यंशब्दो **यो देवतात्युद्यतेति** त्युद्यशब्दौ च संकृष्टाः ॥ ७ ॥

भा. **आन्धीगवे** **विशोविशो वो अतिथिम्** (ऊ. ए. ४२३) इत्यत्र दुर्यमिति

---

1. P om. रौरवे; V[2] trans. रौरवे after अग्नायाम्
3. My[2] om. पाहि····रौरवे
7. M[1]T प्रस्ताव० for प्रस्तावे.
8. TM[1-2] न्त्यशब्द:० for त्यशब्द:०; KA[2]S[1] om. च; T संकृष्टौ for संकृष्टः
15. S[1] trans. आन्धीगवे after विशोविशायम् ; T om. इति र्यंशब्दो;
16. T इत्यत्र र्यत्युशब्दौ for (इ)ति त्युद्यशब्दौ; KS[1] ०त्युद्यशब्दश्च संकृष्टः A[1]M[1-2] ०त्यशब्दश्च संकृष्टौ for ०त्युद्यशब्दौ च संकृष्टाः

यैशब्दः प्रथमायां संकृष्टः । तृतीयायां **यो देवतात्युद्यतेति** त्युशब्दोद्यशब्दश्च संकृष्टौ ॥ ७ ॥

दी. विशोविशोवोऽ१अताइथाइम् (ऊ. ए. ४२३) इत्यान्धीगवे **प्रियमग्नि-वोदुर्यैवचाऽ२३४५ः** । अत्र यैशब्दः संकृष्टः । तृतीयायां **दसंयोदेवत.त्युद्यताऽ२३४५** । अत्र त्युशब्दो द्यशब्दश्च संकृष्टौ ॥ ७ ॥

न्यैर् यज्ञीये ॥ ८ ॥

वि.&भा. अत्रैव **यज्ञायज्ञीये हव्यान्यैरयद्दिवीति** न्यैशब्दः संकृष्टः ॥ ८ ॥

दी. विशोऽ५वि । शोऽ३वोऽ३ अताइथाइम् (ऊ. ए. ४२४) इति **यज्ञायज्ञीये** तृतीयायां **हव्यान्यैरयाऽ२द्दिवाउ** । अत्र न्यैशब्दः संकृष्टः ॥ ८ ॥

त्वां दूतं ज्ञीये ॥ ९ ॥

वि. यज्ञायज्ञीये त्वां दूतमग्ने अमृतम् (ऊ. ए. ४२५) इति त्वांशब्दः संकृष्टः ॥

भा. समिद्धमग्निम् (ऊ. ए. ४२५) इति **यज्ञायज्ञीये त्वां दूतमिति** त्वांशब्दः संकृष्टः ॥ ९ ॥

दी. सामाऽ५ इद्धम् । आऽ३ग्नाऽ३इंसमिधा (ऊ. ए. ४२५) इति **यज्ञा-यज्ञीये** द्वितीयायां **सान्त्वाम्** । अत्र त्वांशब्दः संकृष्टः ॥ ९ ॥

शग्ध्यू हारमानवयोः ॥ १० ॥

वि.&भा. हारायणपूर्वमानवयोः शाग्ध्यूष्विति ग्ध्यूशब्दः संकृष्टः ॥ १० ॥

---

1. B[4]A[1] त्युशब्दद्यशब्दौ for त्युशब्दो द्यशब्दश्च.

4. My[2] त्युशब्दद्यशब्दौ for त्युशब्दो द्यशब्दश्च

6. वि om. अत्रैव.

16. भा. trans. शाग्ध्यूष्विति before हारा०

दी. **शग्ध्यूष्वौहोऽ२इशचीपताइ** (ऊ. ए. ४३२) इति **हारायणे शग्ध्यूष्वौहोऽ२इ** । अत्र ग्ध्यूशब्दः संकृष्टः । **शग्ध्यूषू** (ऊ. स. ७१०) इति पूर्वे **मानवे** ग्ध्यूशब्दः संकृष्टः ॥ १० ॥

त्वं ह्येहि जम्भे ॥ ११ ॥

वि.&भा. वार्कजम्भे त्वं ह्येहि चेरव (र. क्षु. १६२) इति त्वंह्येशब्दौ संकृष्टौ ॥

दी. हाउवंह्येहिचेरावाइ (र. क्षु. १६२) इति बृहन्निधने **वार्कजम्भे हाउत्वंह्येहि** । अत्र त्वंशब्दह्येशब्दौ संकृष्टौ ॥ ११ ॥

त्वं पुरू कौल्मजम्भयोः ॥ १२ ॥

वि.&भा. अत्रैव **कौल्मलबर्हिषार्कजम्भयोः त्वं पुरू सहस्राणीति** त्वंशब्दः संकृष्टः ॥ १२ ॥

दी. तुवाऽ३ह्योऽ३ एहिचेरवाइ (ऊ. ए. ४३३) इति **कौल्मलर्हिषे** द्वितीयायां **त्वंपुरूसहस्राणी** । अत्र त्वंशब्दः संकृष्टः । **हाउत्वंह्येहिचेरावाइ** (र. क्षु. १६२) इति **वार्कजम्भे** द्वितीयायां **त्वंपुरू** । अत्र त्वंशब्दः संकृष्टः ॥ १२ ॥

प्रयत्य कीर्त्ये ॥ १३ ॥

---

1. E. om. शग्ध्यूष्वौहोऽ२इ.

2. E मानवाद्ये, M[4] पूर्वेमानवे for पूर्वे मानवे

5. भा. trans. वार्कजम्भे after इति; वि त्वंह्यशब्दौ, B[1] त्वशब्दह्येशब्दौ; for त्वंह्येशब्दौ

7. E त्वं ह्य इत्येतौ for त्वंशब्दह्येशब्दौ

9. वि. om. अत्रैव.

14. A[2]M[1-2]T before प्रयत्यकीर्त्ये add: त्व (M[2] अ) मये स्वासु दैर्घे(A[2] ध्यें र्घे)मध्यमायाम् ॥ स्वासु दैर्घे (A[2]) श्रवसे मध्यमायां स्तोत्रीयायां त्वममय इति त्वंशब्दः संकृष्टः

वि.&भा. **महादिवाकीर्त्ये** **इन्द्रमिद्देवतायाम्** (र. सं. ५१) **इन्द्रं प्रयत्यध्वर** इति त्यशब्दः संकृष्टः ॥ १३ ॥

दी. **इन्द्रमिद्देवतातये** (र. सं. ५१) इति **महादिवाकर्त्ये** **इन्द्रंप्रयत्यध्वरे** । अत्र त्यशब्दः संकृष्टः ॥ १३ ॥

आर्यः कालेये ॥ १४ ॥

वि.&भा **कालेये** **यस्यायं** **विश्व आर्यः** (ऊ. ए. ४६५) इति र्यशब्दः संकृष्टः ॥ १४ ॥

दी. **यस्यायाऽ३ंविश्वाअर्याः** (ऊ. ए. ४६५) इति **कालेये विश्वाअर्याः** । अत्रा- र्यशब्दः संकृष्टः ॥ १४ ॥

पूर्याः संजये ॥ १५ ॥

वि.&भा. **संजये** **उतो न उत्पुपूर्या** इति र्याशब्दः संकृष्टः ॥ १५ ॥

दी. **आतेअग्नइधी** । **माऽ३हाइ** (ऊ. द. ९६) इति **संजये** तृतीयायाम् **उतोन उत्पुपूर्या** । अत्र र्याशब्दः संकृष्टः ॥ १५ ॥

वीर्यस्य ण्यस्य वारे श्रुधीहवायाम् ॥ १६ ॥

---

1. KM^{1-2} देवायाम्, भा. देवतातय इत्यत्र for देवतायाम्; KA^{2} इन्द्रः for इन्द्रं.

4. My^{2} त्यः for त्यशब्दः

6. भा. trans. कालेये after आर्यः; $A^{2}M^{1-2}T$ विश्वा अर्य for विश्व आर्यः; KS^{1-3} add: यस्य before कालेये

7. $KM^{1-2}S^{1}$ after संकृष्टः । add: अर्य इत्यार्यः कालेय इत्यत्वम्

11. A^{2} om. इति र्याशब्दः; T om. ०शब्दः; $KA^{3}M^{1-2}$ after संकृष्टः । add: आते अग्नायाम्

वि॰ श्रुधीहवायां (ऊ. ए. ५०९) वारवन्तीये सुवीर्यस्य गोमतः पुरूण्यस्य पौंस्येति र्येण्यशब्दौ संकृष्टौ ॥ १६ ॥

भा. श्रुधीहवायां (ऊ. ए. ५०९) वारवन्तीये सुवीर्यस्य गोमत इति र्यशब्दः संकृष्टः । पुरूण्यस्येति च ण्यशब्दः संकृष्टः ॥ १६ ॥

दी. श्रुधीहवाओहोहाइ (ऊ. ए. ५०९) इति वारवन्तीये सुवीर्यस्यगोमाऽ२३४ । अत्र र्यशब्दः संकृष्टः । तृतीयायां पुरूण्यस्यपौंस्याऽ२३४ । अत्र ण्यशब्दः संकृष्टः ॥१६॥

माद्ये पृष्ठे ॥ १७ ॥

वि.&भा. पिबासुतायां पृष्ठे आपिर्नो बोधि सधमाद्ये इति द्येशब्दः संकृष्टः ॥ १७ ॥

दी. पिबाऽ३सुतस्यरसिनाः (ऊ. अ. ६.४४) इति पृष्ठे आपिर्नोबोधिसधमाद्येवृ । अत्र द्यशब्दः संकृष्टः ॥ १७ ॥

सख्ये श्रुध्यत्रैतयोः ॥ १८ ॥

वि.&भा. गोमन्नायां श्रुध्यत्रैतयोः सखेव सख्ये इति ख्येशब्दः संकृष्टः ॥१८॥

दी. गोमन्नाऽ२इन्दो । अश्ववोवा (ऊ. ए. ४६८) इति श्रुध्ये द्वितीयायां सखेवसख्येन । अत्र ख्येशब्दः संकृष्टः । गोमन्नइन्दोअश्वावात् (ऊ. ६५४) इति त्रैते द्वितीयायां सखेवसख्येनाऽ३ । अत्र ख्येशब्दः संकृष्टः ॥ १८ ॥

---

1. M[1-2] om. वारवन्तीये
2. A[2] om. पौंस्येति र्येण्यशब्दौ; T om. पौंस्येति र्य; M[1-2] र्यादिशब्दाः संकृष्टाः for र्येण्यशब्दौ संकृष्टौ; A[1] संकृष्टः for संकृष्टौ
6. M[4] स्यशब्दः संकृष्टः; E र्यस्यशब्दौ संकृष्टौ for र्यशब्दः संकृष्टः; E ण्यस्यशब्दौ संकृष्टौ for ण्यशब्दः संकृष्टः
8. वि. om. पिबासुतायां; V[2] om. पिबासुतायां पृष्ठे
13. A[2]M[1-2]T सख्येव for सखेव; M[1-2] सख्येति for इति ख्ये; A[1] om. इति ख्येशब्दः
14. 16. M[1] सख्येव for सखेव

त्यूमाः पूर्वं व्यनद्वे त्वे क्रतुमित्येते शब्दाः श्यैते ॥ १९ ॥

वि. **तदिदासायां** **श्यैते** **त्यूमा**ऽशब्दः **पूर्वं** प्रथमायाम् द्वे द्वितीयायां **व्यनच्छ**ब्दौ । तृतीयायां **त्वेक्रतुम्** । इत्येते संकृष्टाः ॥ १९ ॥

भा. **तदिदासायां** (ऊ. ए. ५२६) **श्यैते अनु यं विश्वे मदन्त्यूमाः** । [इति त्यूमाःशब्दः ।] **अव्यनच्चव्यनच्च सस्नि** [इति] द्वौ व्यनशब्दौ । **त्वेक्रतुमिति** त्वेशब्दः । एते शब्दाः संकृष्टाः ॥ १९ ॥

दी. **तदिदासभुव** । **नेषूऽ२३औहोवा** (ऊ. ए. ५२६) इति **श्यैते** प्रथमायां त्यूऽ२माऽ२३४ः **औहोवा** । अत्र पूर्वः त्यूशब्दः संकृष्टः । तृतीयायां **वन्ता-ऊऽ१माऽ२-३४ः** । अत्रोत्तरस्त्यूशब्दः संकृष्टः । द्वितीयायाम् **अव्यनच्चव्य** अत्र **व्य-व्य** एतौ शब्दौ संकृष्टौ । तृतीयायां **त्वेक्रतुमपिब्र** । अत्र त्वेशब्दः संकृष्टः ॥ १९ ॥

पार्ये हर्यशब्दश्च देव्ये ॥ २० ॥

वि. **कस्तमिन्द्रायां** (ऊ. अ. ५९१) **वामदेव्ये श्रद्धाहिते मघवन्** **पार्ये** इति येंशब्दः **तवप्रणीति** **हर्यश्व** इति यंशब्दश्च संकृष्टौ ॥ २० ॥

भा. **मघवन्पार्ये** [इति] येंशब्दः तवप्रणीतीह[यंश्व इति]यंशब्दश्च । संकृष्ट इति वर्तते ॥ २० ॥

दी. **काऽ५स्तम्** । **इन्द्रा३तूऽ३वावसाउ** (ऊ. अ. ५९१) इति **वामदेव्ये श्रद्धा-**

1. M[1-2] इत्येतौ शब्दौ for इत्येते शब्दाः
5. P सव्यस्त्वशब्दौ, L[2] व्यचशब्दौ for सस्नि द्वौ व्यनशब्दौ
8. E om. तृतीयायां...त्यूशब्दः संकृष्टः; My[2] om. तृतीयायां
9. M[4] सोशब्दः for त्यूशब्दः
11. A[2] om. पार्ये...संकृष्टौ ॥ २० ॥ वावृधे...संकृष्टः (p. 550 15); M[1] TM[3] हर्यश्व for हर्यं°
12. M[1-2] इन्द्रेति, T इन्द्र for इन्द्रायां
13. K रिये for यें; M[1-2] add: च after यैंशब्द; M[1-2]T om. इति ;M[1-2]TS[3] संकृष्टः for संकृष्टौ
14. PV[2] मघवत्पार्येंशब्दः for मघवन् पार्ये येंशब्दः; PV[2] om. च

हितेमघवन्पार्येदि । अत्र येंशब्दः संकृष्टः । तृतीयायां **वप्रणीतीहर्यश्वसूरि** । अत्र यें: संकृष्टः ॥ २० ॥

वावृधेऽन्यं च देव्ये ॥ २१ ॥

वि.&भा. **एदु मधोर्मदिन्तरम्** (ऊ. अ. ५९८) इति **वामदेव्ये यज्ञेभिर्वावृधेऽन्यमिति** न्यशब्दः संकृष्टः ॥ २१ ॥

दी. **एऽ५दु** । **मधोऽ३र्माऽ३दिन्तरम्** (ऊ. अ. ५९८) इति **वामदेव्ये** तृतीयायां **वृधौहाऽ३** । **हुम्माऽ२** । **न्याऽ२मोऽ३५हाइ** । अत्र न्यशब्दः संकृष्टः ॥ २१ ॥

सत्राच्या नकिष्ट्वा योषत्या च वाशे ॥ २२ ॥

वि. **वाशे उभयंशृणवायां** (ऊ. स. ७०६) **सत्राच्यामेति** च्याशब्दः **कईवेदायां** (ऊ. ए. ६५२) **न किष्ट्वा नि यमेति** ष्ट्वाशब्दः **नेन्द्रो योषत्येति** त्याशब्दश्च संकृष्टाः ॥ २२ ॥

भा. उभयंशृण (ऊ. स. ७०६) कईवेद-, (ऊ. ए. ६५२)तृचयोः **वाशे सत्राच्येति** च्याशब्दः, **न किष्ट्वा नि यमदा सुत** इति ष्ट्वाशब्दः, **योषत्या गमत्** इति त्याशब्दः । एते शब्दाः संकृष्टाः ॥ २२ ॥

दी. **उभयांशा** (ऊ. स. ७०६) इति **वाशे सत्राच्यामघवान्** । अत्र च्याशब्दः संकृष्टः । **कईवेदा** (ऊ. ए. ६५२) इति **वाशे** द्वितीयायां **नकिष्ट्वानियमदा** । अत्र ष्ट्वाशब्दः संकृष्टः । तृतीयायां **नेन्द्रोयोऽ३षाऽ३** । **त्याऽ२आऽ२३४औहोवा** । अत्र त्याशब्दः संकृष्टः ॥ २२ ॥

---

2. R येंशब्दः for यें:
4. वि. om. मदिन्तरम्
7. L[1] हुम्माऽ२ । न्याऽ२उत्रोऽ M[1]हिम्माऽ२ । न्याऽ२त्रोऽ६५ for हुम्माऽ२न्याऽ२ । मोऽ३५
9. A[2] शृण्वच्छनायां for शृणवायां; T सत्राच्यामघवन् for सत्राच्याम ; M[1-2] after च्याशब्दः adds: संकृष्टः
10. A[2]M[1-2]T संकृष्टः for संकृष्टाः
11. V[2] तृचे योनौ, P सुतयोर्वांसे for तृचयोर्वाशे

संसद्यत्वे देवादन्त्यात्यान्ह्वश्मस्य मन्ते ॥ २३ ॥

वि. **इमं स्तोमम्** (ऊ. ए. ६६७) इति **समन्ते भद्रा हि नः प्रमतिरस्य संसद्येति** द्यशब्दः । **त्वे देवा हविरदन्त्याहुतम्** इति त्वेत्यशब्दौ] । **त्वमादित्यानिति** त्यान्शब्दः ।] **आ वह तान्ह्वश्मस्येति** ह्वस्य-शब्दौ । इत्येते संकृष्टाः ॥ २३ ॥

भा. **इमं स्तोम**-(ऊ. ए. ६६७)**समन्ते संसद्यग्ने** [इति] द्यशब्दः । **त्वे देवा हविरदन्त्याहुतमिति** त्वेशब्दत्याशब्दौ । **त्वमादित्यानिति** त्याशब्दः [तान्ह्व-इति] ह्वशब्दः; **स्यग्ने** इति स्यशब्दः । षडेते शब्दाः संकृष्टाः समन्ते ॥ २३ ॥

२१ र २१ २रर १र२ १
दी. **इमंस्तोममर्हतेजातवेदसाइ** (ऊ. ए. ६६७) इति **समन्ते द्यग्नाइ** । अत्र
र र र र
द्यशब्दः संकृष्टः । तृतीयायां **त्वेदेवाहविरदन्त्याहुताम्** । अत्र त्वेशब्दत्याशब्दौ संकृष्टौ । **त्यᳲआवहतान्ह्वश्म** । अत्र त्यंशब्दह्वशब्दौ संकृष्टौ । **स्यग्नाइसाख्या** । अत्र स्यशब्दः संकृष्टः ॥ २३ ॥

त्वमङ्ग ककुभे ॥ २४ ॥

वि.&भा. **त्रैककुभे त्वमङ्गप्रशंस** (ऊ. प्रा. ८०४) इति त्वंशब्दः संकृष्टः ॥२४॥

२ २
दी. **त्वमङ्गप्रशᳲसाऽ३इषाः** (ऊ. प्रा. ८०४) इति **त्रैककुभे त्वमङ्ग** । अत्र त्वंशब्दः संकृष्टः ॥ २४ ॥

व्युषाः कावे ॥ २५ ॥

---

1. M[1]-[2]T ०न्त्यादित्यान् for न्त्यात्यान्
2. S[2]S[1]K स्तोमसमन्ते for स्तोममिति समन्ते
5. V[2] om. समन्ते संसद्यग्ने [2]V संसद्यशब्दः for द्यशब्दः
6. आदित्याम् for आदित्यान्; V[2] om. त्याशब्दः...स्यग्ने इति
7. PB[4] om. स्यग्ने इति; V[2] om. षड्

वि. **कावे व्युषाश्चन्द्रा महाव** इति व्युषा:शब्दः संकृष्टः ॥ २५ ॥

भा. **अबोध्यग्निर्ज्म उदेति** (ऊ. स. ७३५) **कावे** व्युशब्दः संकृष्ट ॥ २५ ॥

दी. **अबोवा । घियग्निर्ज्मउदाइ** (ऊ. स. ७३५) इति **कावे व्युषाश्चन्द्रामह्या ।** अत्र व्युशब्दः संकृष्टः ॥ २५ ॥

महत्स्वा संतानिनि ॥ २६ ॥

वि.&भा. **इन्द्रोमदायां** (ऊ. सं. ७४२) **संतनिनि तमिन्महत्स्वाजिष्विति** त्स्वा-शब्दः संकृष्टः ॥ २६ ॥

दी. **इन्द्रोहाउ । मादा** (ऊ. स. ७४२) इति **संतनिनि तमिन्महत्स्वाजि ।** अत्र त्स्वाशब्दः संकृष्टः ॥ २६ ॥

वीरसेन्यः संतानिहद्विरयोः ॥ २७ ॥

वि.&भा. **इन्द्रोमदायां** (सा. १००२–४) एव **संतनिबार्हद्विरयोः असि हि वीर सेन्य** इति न्यःशब्दः संकृष्टः ॥ २७ ॥

दी. **इन्द्रोहाउ** (ऊ. स. ७४२) इति संतनिनि द्वितीयायाम् **असिहिवीर-सेन्योसि ।** अत्र न्यशब्दः संकृष्टः । **इन्द्रोमदा । यवावृधे** (र. द. १२) इति **बार्हद्वीरे** द्वितीयायां **रसेन्योसि ।** अत्र न्यःशब्दः संकृष्टः ॥ २७ ॥

ओषधीभ्यो ज्ञीये ॥ २८ ॥

वि. **यज्ञायज्ञीये उपास्मैगायतानरायाम्** (ऊ. प्रा. ८१०) **राजन्नोषधीभ्य** इति भ्यशब्दः संकृष्टः ॥ २८ ॥

---

6. K trans. इन्द्रोमदायां after सन्तनिनि; V[2]A[3] om. तमिन्महत्स्वाजिष्विति

11. वि om. इन्द्रोमदायामेव

16. A[2] om. ओषधीभ्यो....भ्यशब्दः संकृष्टः ॥ २९ ॥ मत्स्यः....संकृष्टः ॥ ३० ॥

भा. **उपास्मै ज्ञीये शंराजन्नोषधीभ्य** इति भ्यशब्दः संकृष्टः ।। २८ ॥

३३ र ४ २ ४र ५
दी. **उपा॒ऽ५स्मै** । **गाऽ३याऽ३तानाराः** (ऊ. प्रा. ८१०) इति **यज्ञायज्ञीये** तृतीयायां
१ र र ३ २
शा॒ऽ२राजन्नोषधाऽ२इभ्यआउ । अत्र भ्यशब्दः संकृष्टः ॥ २८ ॥

मत्स्य बृहति ॥ २९ ॥

वि.&भा. **मत्स्यपायितायां** (र. सं. ३७) **बृहति** मत्स्य इति त्स्यशब्दः **संकृष्टः** ॥

२र र २ र २
दी. **औहोइमत्स्यपाइतेमहाऽ३ए** (र. सं. ३७) इति **बृहति** त्स्यशब्दः संकृष्टः ।। २९ ॥

दधेवार्याणि कमश्वे ॥ ३० ॥

वि.&भा. **अयंसहोतायाम्** (ऊ. प्रा. ८२५) **साकमश्वे विश्वा दधे वार्याणि** इति र्याशब्दः संकृष्टः ॥ ३० ॥

५र २ ४ र ४
दी. **आय॒पूऽ३रन्नार्मिणीऽ६मा** (ऊ. प्रा. ८२५) इति **साकमश्वे** तृतीयायां
१र र २र र
न्माविश्वादधेवार्याणि । अत्र र्याशब्दः संकृष्टः ॥ ३० ॥

स्वर्णज्योतिरुत्तरे कमश्वे ॥ ३१ ॥

वि.&भा. अग्नेतमद्यायाम् (ऊ. प्रा. ८२६) **साकमश्वे उत्तरे भवानोअर्वाङ्-क्रस्वर्णज्योति**रिति स्वशब्दः संकृष्टः ॥ ३१ ॥

४र २ ४ र ५ ५
दी. **अग्नेताऽ३मद्याश्वाऽ६न्ना** (ऊ. प्रा. ८२६) इत्यु**त्तरे** अग्निमे **साकमश्वे** तृ-
१र र १
तीयायाम् **अर्वाङ्क्रस्वर्णज्योतिरग्नाऽ२इवाइ** । अत्र स्वशब्दः संकृष्टः ॥ ३१ ॥

स्वशब्द एना श्रुध्ये ॥ ३२ ॥

---

5. वि॰ बृहति मत्स्यपयिते for मत्स्यपायितायां बृहति

14. भा. एव for उत्तरे; KS²S¹ om. उत्तरे

18. My² om. स्वशब्दः...संकृष्टः

वि. एनावोअग्नायाम् (ऊ. प्रा. ८३३) श्रुध्ये प्रियश्वेतिष्ठमरतिं स्वध्वरमिति स्वशब्दः संक्रुष्टः ॥ ३२ ॥

भा. एना वो अग्निम् (ऊ. प्रा. ८३३) इति श्रुध्ये स्वध्वरमिति स्वशब्द संक्रुष्टः ॥ ३२ ॥

दी. एनावोआऽ३ग्निम् । नमसोवा (ऊ. प्रा. ८३३) इति श्रुध्ये प्रियश्वे तिष्ठमरतिंऽस्वध्वरम् । अत्र स्वशब्दः संक्रुष्टः ॥ ३२ ॥

अदश्र्या बृहद्रथन्तरयोः ॥ ३३ ॥

वि.&भा. प्रत्यु अदश्र्यायतीति (र. प्रा. १४६) बृहद्रथन्तरयोः श्र्याशब्दः संक्रुष्टः ॥ ३३ ॥

दी. औहोइप्रत्युवदश्र्यायताऽ३ए (र. प्रा. १४६) इति बृहति । अत्र श्र्याशब्दः संक्रुष्टः । प्रात्युवदश्र्यायतोवा (र. द. ३) इति रथन्तरे । अत्र श्र्याशब्दः संक्रुष्टः ॥ ३३ ॥

वहा त्वं श्रुध्ये ॥ ३४ ॥

वि.&भा. अग्नेविवस्वायां (ऊ. प्रा. ८३८) श्रुध्ये आ दाशुषे जातवेदो वहा त्वमिति त्वंशब्दः ॥ ३४ ॥

दी. अग्नेविवाऽ२स्वत् । उषसोवा (ऊ प्रा. ८३८) इति श्रुध्ये आदाशुषे-जातवेदोवहात्वम द्यादेवाऽउ । अत्र त्वंशब्दः संक्रुष्टः ॥ ३४ ॥

वृष्ण्या वषट्कारणिधने ॥ ३५ ॥

7. KS[1-3]T दश्र्या for अदश्र्या

8. TM[1-2] trans. प्रत्यु अदश्र्यायतीति after बृहद्रथन्तरयोः

14. PV[2]B[4]L[1] विवस्वदुषसेति for विवस्वायाम्; भा. om. आ दाशुषे

वि.&भा. विधुन्वद्द्राणायां (ऊ. प्रा. ८४४) **वषट्कारणिधने एमिर्ददे वृष्ण्येति-** ष्ण्याशब्दः संकृष्टः ॥ ३५ ॥

दी. **विधुंदद्राण॰ममने** (ऊ. प्रा. ८४४) इति **वषट्कारणिधने** तृतीयायाम् **एमिर्ददेवृष्ण्यापौ॰सि ।** अत्र ष्ण्याशब्दः संकृष्टः ॥ ३५ ॥

काव्यम् ॥

वि. अस्मिन्नेव वषडन्ते **देवस्य पश्य काव्यम्** इति व्यशब्दः संकृष्टः ॥

नाभ्यासे ॥ ३६ ॥

वि. **अभ्यासे** विषये काव्य**मि**ति व्यशब्दो विकृष्टः । पूर्वमभ्यस्तं परोऽभ्यास-इति । वचनात् ॥ ३६ ॥

(काव्यं नाभ्यासे ॥ ३६ ॥)

भा. अस्मिन्नेव तृचे वषट्कारणिधने देवस्य पश्य काव्यमिति व्यंशब्दः संकृष्टः । अनभ्यासविषये । अभ्यासे तु विकृष्ट एव । पूर्वमभ्यस्तं परोऽभ्यास इति । वचनात् ॥

दी. **विधुंदद्राणमि**ति वषट्कारणिधने (ऊ. प्रा. ८४४) प्रथमायां **देवस्यपश्य-काव्यमाऽ३हाइत्वाऽ२** । अत्र व्यंशब्दः संकृष्टः । **वियम्माहाऽ१इत्वाऽ२३** इत्यभ्यासे तु व्यंशब्दो न संकृष्टः ॥ ३६ ॥

त्वां वृष्विन्द्रगामश्वमित्येते शब्दास्त्रयो वारे ॥ ३७ ॥

---

1. भा. om. वषट्कारणिधने
5. A²T adds: अत्रैव and M¹-² अस्मिन before काव्यम्
8. A²M¹-²T om. विषये; T आकूपारे for परः
12. P अनभ्यस्त एव for अनभ्यास०; V³ विकृष्यते for विकृष्ट एव
16. A²M¹TM² त्रेष्विन्द्र for वृष्विन्द्र०

वि. त्वामिद्धि- (ऊ. क्षु. ८६२) **वारे त्वां वृत्रेष्विन्द्र** इति त्वांशब्दष्वि-शब्दौ **गामश्वमिति** श्वशब्दश्च त्रयः संकृष्टाः ॥ ३७ ॥

भा. **त्वामिद्धि हवामहे** (ऊ. क्षु. ८६२) इति **वारवन्तीये त्वां वृत्रेष्विति** त्वां-शब्दः । वृत्रेष्विति ष्विशब्दः । गामश्वमिति श्वंशब्दः । एते शब्दाः संकृष्टाः ॥ ३७ ॥

दी. **तुवामिद्धाऔहोहाइ** (ऊ. क्षु. ८६२) इति **वारवन्तीये** प्रथमायां **त्वांवृत्रे-ष्विन्द्रसत्पतिन्नाऽ२३४** । अत्र त्वांशब्दष्विशब्दौ संकृष्टौ । तृतीयायां **गामाश्वाऽ२३४-५होइ** । अत्र श्वंशब्दः संकृष्टः ॥ ३७ ॥

त्वामि त्वां काष्ठासु प्रतिहारे बृहाति ॥ ३८ ॥

वि. **बृहति त्वामिद्धि त्वां काष्ठास्वर्व** इति प्रतिहारविषये त्वांशब्दौ संकृष्टौ । प्रस्तावप्रतिहारयोर्यथासंख्यमित्यर्थः ॥ ३८ ॥

भा. त्वामिद्ध्यामेव **बृहति** (र. द. ५) **त्वामिद्धीति त्वांशब्दः त्वांकाष्ठास्विति** त्वांशब्दः प्रतिहारविषये संकृष्टौ । न प्रस्तावे ॥ ३८ ॥

दी. **औहोइत्यामिद्धिहवामहाऽ३ए** (र. द. ५) इति **बृहति त्वामिद्धि** । अत्र त्वांशब्दः संकृष्टः । प्रथमायां **त्वांकाष्ठाऽ३४** । **औहोवा** । इति **प्रतिहारे** त्वांशब्दः संकृष्टः । न प्रस्तावे ॥ ३८ ॥

त्वां सप्तहे ॥ ३९ ॥

वि॰ सप्तहे **त्वांशब्दः** संकृष्टः ॥ ३९ ॥

---

1. M^{1-3} त्वामिद्धयायां for त्वामिद्धि; TA^{3} त्वांष्विशब्दौ for त्वांशब्दष्विशब्दौ

2. M^{1-3} om. गामश्वमिति श्वशब्दः; $M^{1-3}A^{2}T$ om. त्रयः

6. M^{4} त्वांशब्दः ष्विन्द्रशब्दश्च संकृष्टौ भवतः for त्वांशब्दष्विशब्दौ संकृष्टौ

9. K र्वेतीति, $A^{2}M^{-12}T$ र्वेत शति for र्वे इति

भा. त्वामिद्धामेव सत्रहे (र. क्षु. ९१) त्रयस्त्वांशब्दाः संकृष्टाः ॥ ३९ ॥

दी. अयंवायाउ । त्वामिद्धाइ (र. ए. ९१) इति सत्रहे त्वामिद्धाइ । अत्र त्वांशब्दः संकृष्टः । त्वांवृत्राइ । अत्र त्वांशब्दः संकृष्टः । त्वांकाष्ठा । अत्र त्वांशब्दः संकृष्टः ॥ ३९ ॥

ष्विन्द्र बृहत्तरे ॥ ४० ॥

वि.&भा. त्वामिद्धामेव बृहद्रथन्तरे त्वांवृत्रेष्विन्द्रेति ष्विशब्दः संकृष्टः ॥

दी. औहोइत्वामिद्धिहवामहाऽ३ए (र. क्षु. १६०) इति बृहद्रथन्तरे प्रथमायां तूवांवृत्रेष्विन्द्रसत् । अत्र ष्विशब्दः संकृष्टः ॥ ४० ॥

त्वांशब्दौ पूर्वौ ष्विन्द्र च जम्भे ॥ ४१ ॥

वि. वार्कजम्भे त्वामिद्धि त्वांवृत्रेष्विति पूर्वौ त्वांशब्दौ संकृष्टौ । ष्विशब्दश्च संकृष्टः ॥ ४१ ॥

भा. त्वामिद्धामेव (र. क्षु. १६१) वार्कजम्भे त्वांशब्दौ पूर्वौ त्वामिद्धि त्वां वृत्रेष्विति । अत्र ष्विशब्दश्च । एते शब्दाः संकृष्टाः ॥ ४१ ॥

दी. हाउ त्वामिद्धिहवामहाइ (र. क्षु. १६१) इति बृहन्निधनवार्कजम्भे त्वामिद्धि त्वांवृत्रे इति पूर्वौ त्वांशब्दौ संकृष्टौ । ष्विन्द्रसा । अत्र ष्विशब्दः संकृष्टः ॥४१॥

जनित्रय श्येने ॥ ४२ ॥

वि.&भा. अरण्येगेये श्येने देवीजनित्रय इति । अत्र त्र्यशब्दः संकृष्टः ॥४२॥

---

7. E त्वाम् for औहोइ…०महाऽ३ए; L[1] om. औहोइ…महाऽ३ए

16. A[2]M[1-3]T before जनित्र्यश्येने add: त्वां कास्तावे ॥ जम्भे प्रस्ताव (M[1-2] प्रस्तावे) विषये त्वांकाष्ठा संकृष्टः

17. KS[1-3] after ०जनित्र्य: add: भद्राजनित्र्य:

दी. ऊभाइ । यदिन्द्ररोऽ२दसाइ (अ. गे. ३. ४. १३०) इत्यरण्येगेये श्येने जनित्र्यजाऽ२इजनात् । अत्र त्र्यशब्दः संकृष्टः ॥ ४२ ॥

वीर्यैर्देव्यबृहतोः ॥ ४३ ॥

वि.&भा. त्रिकद्रुकायां **पञ्चनिधनवामदेव्यबृहतोः साकंवृद्धो वीर्यैरिति** यैःशब्दः संकृष्टः ॥ ४३ ॥

दी. **त्रिकद्रुकेषुमहिषोयवाशिराम्** (र. सं. ६८) इति पञ्चनिधने **वामदेव्ये** द्वितीयायां **साकंवृद्धोवीर्यैस्सासहिर्मृघो** । अत्र यैःशब्दः संकृष्टः । **औहोइ त्रिकद्रुकेषुमहिषाऽ३ए** (र. प्रा. १४९) इति बृहति द्वितीयायां **साकंवृद्धोवीर्यैस्सासहिर्मृघो** । अत्र यैःशब्दः संकृष्टः ॥ ४३ ॥

अत्रैव काम्यं देव्ये ॥ ४४ ॥

वि. अस्मिन्नेव **वामदेव्ये दाता राध स्तुवते काम्यम्** इति म्यशब्दः संकृष्टः ॥

भा. त्रिकद्रुकायामेव पञ्चनिधने **वामदेव्ये दाता राध स्तुवते काम्यमिति** म्यंशब्दः संकृष्टः ॥ ४४ ॥

दी. अत्रैव त्रिकद्रुकायामेव पञ्चनिधने **वामदेव्ये** द्वितीयायां **दाताराधस्तुवते काम्यंवसू** (र. सं ६८) । अत्र म्यंशब्दः संकृष्टः ॥ ४४ ॥

सख्ये स्फिग्यं च रथन्तरे ॥ ४५ ॥

वि. रतन्थरे **माभेममायाम् उग्रस्य सख्ये तवेति** ख्येशब्दः **सव्यामनुस्फिग्यमिति** ग्यशब्दश्च संकृष्टः ॥ ४५ ॥

---

3. A[2] after बृहतोः adds: नेव वामदेव्ये दाता रायस्तुतेः

5. A[2] om. इति यैः; T om. इति यैःशब्दः

10. A[2]L[1] काब्यं for काम्यं

12. E. om. पञ्चनिधने

भा. मा भेम मा श्रमिष्म (र. स. १२१) इति रथन्तरे उग्रस्य सख्ये तव इति ख्येशब्दः सख्यामनुस्फिग्यमिति ग्यंशब्दः [च] संक्रुष्टौ ॥ ४५ ॥

दी. माभेममाश्रमिष्मोवा (र. स. १२१) इति रथन्तरे ऊग्रस्यसख्येतव । अत्र ख्येशब्दः संक्रुष्टः । सख्यामनुस्फिग्यंवा । अत्र ग्यंशब्दः संक्रुष्टः ॥ ४५ ॥

यामे व्यख्यत् ॥ ४६ ॥

वि. आयङ्गौरिति यामे व्यख्यन्महिषो दिवमिति व्यख्यशब्दौ संक्रुष्टौ ॥४६॥

भा. आयम् । गौःपाऽ२ । श्निरक्राऽ२३४मीत् (र. प्रा. १५३) इति यामे द्वितीयायां व्य । ख्यन्माऽ२३ । अत्र व्यशब्दख्यशब्दौ संक्रुष्टौ ॥ ४६ ॥

दी. आयम् । गौःपाऽ२ । श्निरक्राऽ२३४मीत् (र. प्रा. १५३) इति यामे द्वितीयायां व्य । ख्यन्माऽ२३ । अत्र व्यशब्दख्यशब्दौ संक्रुष्टौ ॥ ४६ ॥

स्वो वा रथन्तरे । स्वो वा रथन्तरे ॥ ४७ ॥

वि. रथन्तरे कयानश्चित्र–तृतीयायां स्तोत्रीयायां प्रस्तावे स्वोवाशब्दः संक्रुष्टः । सामिकमुदाहरणं नार्चिकमित्यतो वाशब्दो न विकल्पार्थः । इति संक्रुष्टसंज्ञा । अभ्यासः प्रकरणसमाप्त्यर्थः ॥ ४७ ॥

इति फुल्लसूत्रविवरणे संक्रुष्टविक्रुष्टयोः तृतीयस्य द्वितीयः खण्डः ॥ २ ॥

संकर्षविकर्षौ समाप्तौ

---

1. om. मामेम····रथन्तरे

12. M^{1-3}T ०श्चित्रायां for चित्र; A^2T om. तृतीयायां····प्रस्तावे; M^{1-2} om. स्तोत्रीयायां प्रस्तावे

13. A^2 om. इति संक्रुष्ट····समाप्त्यर्थः M^{1-2} om. अभ्यासः....समाप्त्यर्थः

15. TM^{1-2} इति फुल्लसूत्रभाष्ये अजातशत्रुविरचिते संक्रुष्टविक्रुष्टे (विक्रुष्टः) चतुर्थः खण्डः (T, त्रयस्त्रिंशः खण्डः) for the colophon.

16. A^2 संक्रुष्टः समाप्तः; T संक्रुष्टविक्रुष्टविवरणं समाप्तम् for संकर्षविकर्षौ समाप्तौ

भा. क्यानायां **रथन्तरे स्त्रोवा**-शब्दः संक्रुष्टः । सामिकमुदाहरणं नार्चिकम् । तेन वाशब्दो न विकल्पार्थः ॥ ४७ ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य द्वितीया कण्डिका समाप्ता ॥ २ ॥

---

२ २ २ १ १

दी. कयानश्चित्रआभुवोवा (र. द. २९) इति **रथन्तरे** तृतीयायां **स्वोवा** । अत्र स्वशब्दः संक्रुष्टः । इदं सामिकमुदाहरणम् । नार्चिकम् । तेन वाशब्दो न विकल्पार्थः । अभ्यासः प्रकरणसमाप्त्यर्थः ॥ ४७ ॥

इति फुल्लदीपे सप्तमप्रपाठकस्य द्वितीयः खण्डः ॥ २ ॥

॥ संक्रुष्टविक्रुष्टं समाप्तम ॥

तृतीयः खण्डः

अथ लोपालोपौ

आइःकारस्य भे स्वरे प्रत्यये ग्रहणैर्विसर्गलोपः ॥ १ ॥

वि. आइभावात् परस्य विसर्जनीयस्य लोपो भवति स्वरादौ स्तोभे **प्रत्यये** । वक्ष्यमाणेषूदाहरणेषु । आइःकारे यो विसर्जनीयः तस्य लोपो **ग्रहणै**र्वचनैः । **स्थामिर्यस्ते सुरूपे** (पु. सू. ७. ३. २) इत्यादिभिः । **भे** स्तोभे ॥ १ ॥

---

7. M[4] इति फुल्लसूत्रदीपिकायां सप्तमप्रपाठकस्य द्वितीयः खण्डः समाप्तः for the colophon.; E अध्यायस्य for प्रपाठकस्य

8. E ०विक्रुष्टौ for ०विक्रुष्टं

11. E आयिः for आइः

12. A[2]K विक्रर्जनीय० for विसर्जनीयस्य

13. A[2]M[1-2]T यत् विसर्जनीयं for यो विसर्जनीयः

भा. आयित्वादयो भावा विक्रुष्टान्ताश्चतुर्दशानुक्रान्ताः । क्रमप्राप्तं लोपालोपलक्षणम् तदुच्यते **आयिःकारस्येति** । **आयिःकारस्य स्तोभे स्वरे** प्रत्यये **ग्रहणैर्विसर्जनीयलोपः** । **ग्रहणैरिति** यावद्ग्रहणमित्यर्थः । नैतत् सामन्यं लक्षणम् । किं तर्हि? वक्ष्यमाणेषूदाहरणेषु लोपः । अतः परं तान्युदाहरणानि ॥ १ ॥

दी. इदानीं व्यञ्जनलोप उच्यते **आइःकारस्येति** । **आइःकारस्याकारादिस्वरे स्तोभे** प्रत्यये **परे** सति **ग्रहणैः** संग्रहणैः वक्ष्यमाणेषूदाहरणेषु **विसर्गस्य** विसर्जनीयस्य **लोपः** । अतः परं तान्युदाहरणानि ॥ १ ॥

स्थाभिर्यस्ते सुरूपे ॥ २ ॥

वि. **यस्तेमदायां** (ऊ. अ. ५६३) **सुरूपाद्ये** । **सूपस्थाभिरिति** आइःकारस्य लोपो विसर्जनीयस्य ॥ २ ॥

भा. पूर्वे **सुरूपे** **यस्तेमदायां** (ऊ. अ. ५६३) **सूपस्थाभिरिति** विसर्जनीयलोपः ॥ २ ॥

२ र१ १ १
दी. **यस्तेमदा॒ऽ२ः** । **इयाऽ२इया** (ऊ. अ. ५६३) इति **सुरूपाद्ये**
१र १र
तृतीयायां **सूपस्थाभाऽ२इ** । अत्र विसर्गलोपः । इयाऽ२ । इतीकारस्वरे स्तोभे प्रत्यये सति ॥ २ ॥

श्पतिरभिद्युम्नतृतीयायां वाचःसाम्नि ॥ ३ ॥

वि. **अभिद्युम्नंबृहद्वाचस्साम्नि** (ऊ. अ. ५६६) तृतीयायां **विशां बर्हिन-विश्पतिरिति** विसर्जनीयस्य लोपः । **विशांऽ३बार्ह्वीः** । **होइ** । **नविश्पताऽ६इ** । ए इति स्थिते अनेन विसर्जनीयलोपः **आइःकारस्य** । गतिश्चान्तस्थमापद्यते । अत्रीत्यधिकृष्यते । गतिश्च । अन्तस्था यरलवाः । अन्तस्थाकारतां प्राप्नोति **संधावचि परत** इति सामतन्त्रवचनात् ।

11. V² विसर्जनीयस्य for विसर्जनीय
17. A²M¹⁻²T om. बृहद् ; S¹ विमर्जनीयस्य for विसर्जनीय
20. KMy¹ ऋक्तन्त्र for सामतन्त्र

अन्तस्थां प्राप्नोति । तदा **ताऽ६ये** । **रमध्ये** (ऋक्तन्त्र ४. २. ९) असवर्णयोर्मध्यगताया अन्तस्थाया लोपो भवतीति वचनात् असवर्णयोर्मध्यगतस्य यकारस्य लोपः । **नविश्प-ताऽ३ए** । इत्येवं भवति ॥ ३ ॥

भा. विशां वह्निर्विश्पतिः (ऊ. अ. ५६६) इति आयि:कारस्य विसर्जनीय लोपः ॥ ३ ॥

दी. अग्निमुम्राम् । **होइ** (ऊ. अ. ५६६) इति **वाचस्साम्नि** तृतीयायां **नविश्पताऽ६ए** । अत्र विसर्गलोपः । स्वरे प्रत्यये संधौ गतिलोपः ॥ ३ ॥

भिः स्वासु विशीये ॥ ४ ॥

वि.&भा. स्वासु विशोविशीये म्नुषे शूषस्य मन्मभिः । प्रशंसति प्रशस्तिभिः इति च भि:शब्दे विसर्जनीयलोपः ॥ ४ ॥

दी. विशोविशोहुम्वोऽ३अतिथाइम् (ऊ. अ. ५७५) इति **स्वासु विशो-विशीये** प्रथमायां **न्माऽ२३४भाइ** । अत्र विसर्गलोपः । द्वितीयायां **स्ताऽ२३४इभाइ** । अत्र विसर्गलोपः ॥ ४ ॥

शुचिः परिप्रियायां मार्गीयवे ॥ ५ ॥

वि. परिप्रियायाम् (ऊ. अ. ७९६) ईनिधने **मार्गीयवे मातरा शुचिरिति** [अत्र] विसर्जनीयलोपः । **विस्वरमक्षरं स्वरे स्वरे त्रिमात्रं भवति** (cp. ऋक्तन्त्र

---

1. $S^1A^2M^{1-2}$ अमध्ये, T अमध्यमे for रमध्ये; KMy^1 स्वरयोः, M^{1-2} स्वर्णयोः स्वरयोः for असवर्णयोः
2. KMy^1 स्वरयोः for असवर्णयोः; $M^{1-2}S^1$ after °गतस्य add: लोपो भवतीत्यस्मात् A^2 चोभवतीत्यस्मात्
3. K om. इत्येवं भवति
15. $A^2M^{1-2}T$ °निधन° for °निधने
16. S^1 स्वारे A^2 स्वारे स्वरे for स्वरे स्वरे; $S^1A^2M^{1-2}$ om. विस्वरमक्षरं; K स्वत्रिमात्रं for त्रिमात्रं

२. ५. ५) इति वृद्धस्य **तालव्यमाइ** (पु सू. ३. १. १) इत्यादिना आइप्राप्तस्य **ऊहगाने योनिवत्** (पु. सू ८. ५. १) इत्यादिना मन्द्रातिस्वारप्राप्तस्य **चतुर्थमन्द्र** (पु. सू. ८. ५. ७) इत्यादिना द्वितीयतृतीयप्राप्तस्य अत एवातिस्वारधर्मविवर्जितस्य अनेन लुप्त-विसर्जनीयस्य पूर्ववत् प्रक्रियाप्रकृतिः । **ससूनुर्मातराशुचाऽ३ए** ॥ ५ ॥

भा. परिप्रियायां (ऊ. स. ७७६) ईनिधने **मार्गीयवे** स सूनुर्मातरा शुचिरिति-विसर्जनीयलोपः ॥ ६ ॥

दी. परिप्रियादिवःकवाऽ३इरे (ऊ. स. ७७६) इतीनिधने **मार्गीयवे** द्वि-तीयायां **ससूनुर्मातराशुचाऽ३ए** । अत्र इःकारस्य विसर्गलोपः । स्वरे प्रत्यये संधौ गतिलोपः ॥ ५ ॥

गृविः प्रसोमदायां कण्वतरे ॥ ६ ॥

वि.&भा. प्रसोमदायां (ऊ. क्षु. ८७५) **कण्वरथन्तरे नजागृविरि**ति विःशब्दे विसर्जनीयलोपः ॥ ६ ॥

दी. प्रसोमदेववीतयाइ (ऊ. क्षु. ८७५) इति **कण्वरथन्तरे अंशोःपयसा-मदिरोनजागृवाऽ२३४ऐही** । अत्र विसर्गलोपः । संधौ गतिलोपः ॥ ६ ॥

सुतिः पिबात्वास्याभिनिधने काण्वे ॥ ७ ॥

वि. इयमासुतिरिति विसर्जनीयस्य लोपः ॥ ७ ॥

---

2. A[3]M[1-2]T °गान after °स्वार°;

3. A[3]एवमातीने, S[3] एवादेरिति for अत एवाति; KS[1-2] My[1] विसर्जनीयस्य for विवर्जितस्य

4. S[1] om. °प्रकृतिः; M[1-3] परिक्रियां for प्रक्रिया

10. A[3]K देवायां for °दायां

11. TKA[3]M[1-3] S[1-3] कण्वतरे for कण्वरथन्तरे; S[3] पयसा मदिरो नजागृविः, KA[3]M[1-3]T रोनजागृविः for नजागृविः वि om. विःशब्दे

12. M[1-2]T यिसर्जनीयस्य for विसर्जनीय

14. EM[4] om. संधौ

16. M[1-2]T before इयम् add: पिबात्वस्याभिनिधने काण्वे; KM[1-2] विसर्जनीयस्य for विसर्जनीय°

भा. **अभिनिधने काण्वे** (ऊ. क्षु. ९३२) **आ त्वा सहस्रमाशतमिति** परिष्कृतस्य **रसिन इयमासुतिरिरिति** तिःशब्दे विसर्जनीयलोपः ॥ ७ ॥

दी. **औहोहाइ । आइही ।** आत्वा । **साऽ२३४हा** (ऊ. क्षु. ९३२) इत्यभिनिधने काण्वे तृतीयायां **पिबात्वस्याम् । इयमासुताइ ।** अत्र विसर्गलोपः ॥ ७ ॥

नृभिर्ददिरिन्द्रोमदायां बार्हद्गिररश्मयोः ॥ ८ ॥

वि. **इन्द्रोमदायां बार्हद्गिरपार्थुरश्मयोः वृत्रहा नृभिर्भूरि परादिरित्येतयो**र्लोपः ॥ ८ ॥

भा. **नृभिर्ददिरिन्द्रोमदायां बार्हद्गीरपार्थुरश्मयोः शवसे वृत्रहा नृभिः असि भूरि पदाददिरिति** च भिःशब्दे दिःशब्दे च विसर्जनीयलोपः ॥ ८ ॥

दी. **इन्द्रोमदा । यवावृधे** (र. द. १२) इति **बार्हद्गीरे शवसेवृत्राहाऽ२नृभाइ ।** अत्र विसर्गलोपः । द्वितीयायां **रसेन्योसिभूरिपराऽ२दादइ ।** अत्र विसर्गलोपः । **एईन्द्रा ।** **ओऽ२३४वा** (र. द. १३) इति **पार्थुरश्मे सेवृत्रहाऽ२नृभाइ ।** अत्र विसर्गलोपः । द्वितीयायां **भूरिपराऽ२ददाइ ।** अत्र विसर्गलोपः ॥ ८ ॥

वरीः स्वासु रश्मे ॥ ९ ॥

वि.&भा. **स्वासु पार्थुरश्मे या इन्द्रेण सयावरीरिति** रीःशब्दे आयिःकारे विसर्जनीयलोपः ॥ ९ ॥

दी. **एस्वादोः । ओऽ२३४वा** (र. अ. ९८) इति **स्वासु पार्थुरश्मे द्रोणसयाऽ२वराइ ।** अत्र विसर्गलोपः ॥ ९ ॥

---

1. P om. काण्वे

13. My² om. द्वितीयायां....विसर्गलोपः

15. s² om. स्वासु; M¹⁻² T om. पार्थु; वि. om. रिःशब्दे आयिःकारे

गिरेर्वृष्णि ॥ १० ॥

वि. **वृष्णि गिरेरिव** प्र **रसे**ति लोपः ॥ १० ॥

भा. **वृष्णि** साम्नि अभिप्रवायां **गिरेरिवे**ति **रे**शब्दे आयिःकारे विसर्जनीयलोपः ॥

३२र३र र २र३र र २
दी. **अभाओवा** । **प्रवाओवा** (र. प्रा. १३७) इति **वृष्णि** तृतीयायां **गा**ऽ३
१
ओ । **रा**ऽ३**ओइ** । अत्र विसर्गलोपः । विरते गतिलोपः ॥ १० ॥

ज्योतिस्तावे प्रत्यु वृहति ॥ ११ ॥

वि. प्रत्यु **वृहति** **प्रस्तावे** विषये **ज्योतिष्कृणो**तीत्यत्र विसर्जनीयलोपः ॥ ११ ॥

भा. प्रत्यु अदर्श्यायती (र. प्रा. १४६) इति **वृहति ज्योतिष्कृणोती**ति प्रस्ताव-विषये तिःशब्दे विसर्जनीयलोपः ॥ ११ ॥

२रर र २
दी. **औहोइप्रत्युवदर्श्यायता**ऽ३**ए** (र. प्रा. १४६) इति **वृहति** द्वितीयायाम्
२रर र २
औहोइज्योताऽ३**ए** । अत्र **प्रस्तावे** विसर्गलोपः । स्वरे परे गतिलोपः ॥ ११ ॥

सोमस्पतिर्हे प्रत्यये सहस्रधारायां त्वाष्ट्रीसाम्नोः ॥ १२ ॥

वि. **सहस्रधारायां त्वाष्ट्रीसाम्नोर्हेप्रत्यये सोमस्पति**रित्यत्राइःकारस्य विसर्जनीयस्य लोपः । मे स्वरे इत्यधिकारो निवृत्तः ॥ १२ ॥

भा. **स्वारयोस्त्वाष्ट्रीसाम्नोः सहस्रधारायां सोमस्पतिरि**ति तिःशब्दे विसर्जनीय-लोपः ॥ १२ ॥

१ र र २ २ ३२ १
दी. **सुतासोमा**ऽ३**हा** । **धुमत्तामा**ऽ२ः (ऊ. अ. ५९३) इति **स्वारत्वाष्ट्री-**

5. E अत्र ग्रहण्यः विसर्गलोपः for विरते गतिलोपः

7. A[1] ज्योतिश्शब्दे; M[1-3] ज्योतिःशब्द०, T ज्योतिःशब्दो for विसर्जनीय०

13. A[2]M[1-3] om. अत्र

14. KS[1] trans. मे स्वरे इत्याधिकारो निवृत्तः before सहस्रधारायां; T अधिकारिनिवृत्तिः for अधिकारो निवृत्तः

15. after A[1] ०स्पतिरिति adds: हकारे प्रत्यये

17. E स्वारे for स्वार०

साम्नि तृतीयायां सहस्रधाऽ३हा इत्यस्यां सोमस्पताऽ३इहाइ । अत्र हे हकारे प्रत्यये परे आइःकारस्य विसर्गलोपः । सुता । सोमाऽ३ । हाऽ३हा (ऊ. अ. ५९४) इति द्विरभ्यासत्वष्ट्रीसाम्नि तृतीयायां सहस्रधाऽ३ । इत्यस्यां सोमः । प ताऽ३इ । हाऽ३हाइ । अत्र हकारे प्रत्यये परे आइःकारस्य विसर्गलोपः ॥ १२ ॥

स्वरप्रथमे च ॥ १३ ॥

वि. सहस्रधारायां **स्वरप्रथमे च सोपस्पतिःशब्दे** लोपो हे प्रत्यये ॥ १३ ॥

भा. षड्वायोः स्वराणां **प्रथमे स्वरे** सहस्रधारायामेव हेशब्दे प्रत्यये विसर्जनीय-लोपः ॥ १३ ॥

दी. एसुतासोमा (र. सं. ४६) इति **प्रथमे** स्वरे तृतीयायाम् **एसहस्रधा** इत्यस्यां **सोमस्पताइ** । अत्र विसर्गलोपः ॥ १३ ॥

अरिष्टे चानादौ ॥ १४ ॥

वि. सहस्रधारयाम**रिष्टे** (र. क्षु. २००) **च** सोमस्पतिःशब्दे लोपः । ग्रहणा-**दनादौ** । आदिवर्जिते अभ्यासविषये । किमुक्तं भवति ? **तीरायाऽ२३४इणाम्** इति प्राप्ते आद्यस्य तकारस्य लोपः । तस्मिँल्लुप्ते आदिवर्जित इकारोऽभ्यास इति अनादि-रभ्यासः ॥ १४ ॥

भा. सहस्रधारायामेव**वारिष्टे** (र. क्षु. २००) **अनादावभ्यासे** प्रत्यये । किमुक्तं भवति ? **पतीरायायिणामि**ति प्राप्ते आद्यस्य तकारस्य लोपः । तस्मिन् लुप्ते आदि

---

1. E om. हे
2. L[1] om. सुतासोमाऽ३ ...विसर्गलोपः
3. E अस्यां for द्विरभ्यासः My[2] om. इत्यस्यां
4. RMy[2-3] om. प्रत्यये
6. S'T ०शब्दो for ०शब्दे
7. V[2] यथा यो वा स्वराणां प्रथमे स्वरे सहस्रधारायामेव हिशब्दे for षड्वायोः....हेशब्दे

वर्जितः इकारोऽभ्यस्त इत्यनादिरभ्यासः। यथा इनोराजायाम् (ऊ. ए. ४१४) राजन्नरतीत्यस्मिन्ननादावभ्यासे प्रत्यये इकारेति शब्दे विसर्जनीयलोपः ॥ १४ ॥

दी. हाह। होइया। सूता (र. क्षु. २१०) इत्यारेष्टे तृतीयायां सोमाः। पताऽ२इ। अत्र विसर्गलोपः। अनादौ। अन् प्रतिषेधे। पती। अत्र तीमध्ये तकार आदिः। आदिरहिते तकाररहिते ईकार अभ्यासे प्रत्यये परे ॥ १४ ॥

अद्रिरभ्यासे प्रत्ययेऽक्रायां वैश्वज्योतिषवात्सप्रार्केषु ॥ १५ ॥

वि.&भा. अक्रायां वैश्वज्योतिषवात्सप्रदीर्घतमसोऽर्केषु वावृधे स्वानो अद्रिरिति अद्रिशब्देऽभ्यासे प्रत्यये [भा. अभ्यासप्रत्यये द्रिःशब्दे आयिःकारस्य] विसर्जनीयलोपः ॥ १५ ॥

दी. हाउहोवाऽ३हाइ। अक्रान्त्समुद्रःप्रथमेऽ२३४विधर्मन् (ऊ. क्षु. ९१७) इति वैश्वज्योतिषाद्ये नोअद्राइ। अत्र विसर्गलोपः। नोआऽ५द्राउ इत्यभ्यासे प्रत्यये। होईऽ२(ति:)। अक्रान्त्समुद्रःप्रथ (ऊ. क्षु. ९१८) इति वात्सप्रे नोआंद्रऽ२इ। आद्राऽ२इ। अत्र विसर्गलोपः। आद्राऽ२इः। इत्यभ्यासे प्रत्यये। आक्रान्। सामुद्रःप्रथमेवि (र. क्षु. २०३) इति दीर्घतमसोऽर्के अद्रा अद्राइ अत्र विसर्गलोपः। अद्राइः इत्यभ्यासे प्रत्यये ॥ १५ ॥

नकिर्नकिष्ट्वद्रथायां स्वशब्दे प्रत्यये गौरीवितासितयोः ॥ १६ ॥

वि. नकिष्ट्वद्रथायां (सा. ९५०) गौरीवितासितयोः नकिःशब्दे विसर्जनीयस्य

---

1. B^4 अभ्यस्तः for अभ्यासः; A^2 M^{1-2} after अभ्यासः add: यथेनो राजन्नरतीत्यस्मिन् शब्देऽभ्यासे विषये नकारलोपः। राजानरताइः।; B^4 ओमीति तस्मिन्ननादौ, V^2 इतीतिरस्मिन्ननादौ L^1 ओममीति तस्मिन्ननादौ P ओमभीतिरस्मिन्ननादौ for इनो राजाया राजन्नरतीत्यस्मिन्
5. RMy^{2-3} om. परे
7. वि. om. दीर्घ; भा. before वावृधे adds: बृहत्सोमो
8. V^2 अभ्यासे for अभ्यास; $M^{1-3}T$ om. विसर्जनीय
12. E adds: प्रथम before वात्सप्र; M^4 adds: नो before आद्राइ
17. M^{1-2} om. नकिष्ट्वद्रथायां गौरीवितासितयोः

लोपः । **स्वशब्दे प्रत्यये नकिः स्वश्च आनश** इत्यत्र ॥ १६ ॥

इति फुल्लसूत्रविवरणे तृतीयस्य तृतीयः खण्डः ॥ ३ ॥

भा. गौरीवितासितयोः नकिष्टद्रथायां नकिः स्वश्चेति किःशब्दे विसर्जनीयलोपः । **स्वशब्दे प्रत्यये** ॥ १६ ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य तृतीया कण्डिका समाप्ता ॥ ३ ॥

दी. इमम् । इन्द्राऽ३ । सुतंपिबा (ऊ. क्षु. ८९२) इति **गौरीविते** द्वितीयायां **नकिष्टद्रथायां नाकिसुवा३१२३** । अत्र किःशब्दस्य विसर्गलोपः । **स्वशब्दे प्रत्यये** । **इममिन्द्रसुताम् । पिबा** (ऊ. क्षु. ८८६) इत्यासिते द्वितीयायां **नकिष्टद्रथायां नाकाऽ२इसुवाऽ२ः** । अत्र आइःकारस्य विसर्गलोपः । स्वशब्दे प्रत्यये ॥ १६ ॥

इति फुल्लदीपे सप्तमप्रपाठकस्य तृतीयः खण्डः ॥ ३ ॥

चतुर्थः खण्डः

उःकारस्य औहोवायां प्रत्यये ग्रहणैर्विसर्गलोपः ॥ १ ॥

वि. उःकारस्य विसर्जनीयस्य लोपः । **औहोवायां प्रत्यये ग्रहणैर्वक्ष्यमाणेषू**दाहरणेषु ॥ १ ॥

भा. उःकारविसर्जनीयस्य **औहोवायां** प्रत्ययस्य पूर्ववद्वक्ष्यमाणेषूदाहरणेषु विसर्जनीयलोपः । अतः परमुदाहरणानि वर्तिष्यन्ते ॥ १ ॥

---

1. A[2] स्वशब्द for स्वश्च; A[2]M[1]-[2]T om. आनश

3. E om. नकिष्टद्रथायां; L[4] नकिष्टऽ६१२३ for नकिष्टद्रथायां

12. My[1] before उःकारस्य adds: श्रीगणेशाय नमः

दी. विसर्जनीयसहितस्य **उःकारस्य ग्रहणैः** संग्रहैर्वक्ष्यमाणेषूदाहरणेषु विसर्गलोपः। **औहोवायां प्रत्यये** औहोवास्तोभे **परे** सति। अतः परमुदाहरणानि ॥१॥

पृथुः सांवर्ते ॥ २ ॥

वि. **गिरिर्न विश्वतः पृथुरि**त्यत्र थुःशब्दे: विसर्जनीयस्य लोपः **सांवर्ते** ॥२॥

भा. एन्द्रनायां **सांवर्ते** (ऊ. द. १७२) **गिरिर्न विश्वतः पृथुरि**ति थुःशब्दे उःकारस्य विसर्जनीयलोपः ॥ २ ॥

दी. **एन्द्रनोऽ२गघिप्राया** (ऊ. द. १७२) इति **सांवर्ते** पाऽ२थूंऽ२३४ **औहोवा**। अत्र थुमध्ये उःकारस्य विसर्गलोपः। औहोवास्तोभे परे सति ॥ २ ॥

क्रतुः परीताध्यास्यायामायास्ये ॥ ३ ॥

वि·&भा श्रीणन्तायां **त्रिणिधनायास्ये क्रतु**रिति तुःशब्दे विसर्जनीयलोपः ॥३॥

दी. **परीतोषि** इत्यध्यास्यायां परिस्वानायां **श्रीणन्तोगोभिरुहाउहोवा** (ऊ. सं. ४७) इति त्रिणिधनायास्ये **क्रतूऽ३४**। अत्र विसर्गलोपः ॥ ३ ॥

त्रीणित्रितायां वार्शे ॥ ४ ॥

वि.&भा. **त्रीणित्रितायां वार्शे** (ऊ. अ. ६४०) विसुक्रतुरिति तुःशब्दे विसर्जनीयलोपः ॥ ४ ॥

दी. **प्राणाशिशूः** (ऊ. अ. ६४०) इति **वार्शे त्रीणित्रिता** इत्यस्यां **क्राऽ२तूऽ२३४ औहोवा**। अत्र विसर्गलोपः ॥ ४ ॥

---

10. वि· क्रतुः (M^{1-2} ०तु) शब्दे for क्रतुरिति तुःशब्दे; भा· trans. श्रीणन्तायां after त्रिणिधनायास्ये; T om. श्रीणान्तायां... लोपः; वि· विसर्जनीयस्य for विसर्जनीय

13. M^4 trans· त्रीणि त्रितायां वार्शे after the sutra परिप्रियाया।

14. M^{1-2} om· त्रीणि त्रितायां वार्शे विसु; T om. त्रीणि...लोपः

15. V^2B^4 add: उःकार and P तुःकार before विसर्जनीय०; वि· विसर्जनीयस्य for विसर्जनीय·

परिप्रियायां च मार्गीयवे ॥ ५ ॥

वि. **परिप्रियायां** (ऊ. स. ७७६) **मार्गीयवे** क्रतुःशब्दे विसर्जनीयस्य लोपः ॥

भा. **परिप्रियायां** (ऊ. स. ७७६) ईनिधने **मार्गीयवे स्वानैर्याति कविक्रतुरिति** तुःशब्दे विसर्जनीयलोपः ॥ ५ ॥

दी. **परिप्रियादिवःकवाऽ३इरे** (ऊ. स. ७७६) इतीनिधने **मार्गीयवे क्राऽ२ तूऽ२३४ औहोवा** । अत्र विसर्गलोपः ॥ ५ ॥

क्रमुरिन्द्रक्रतुमित्ययत्र ष्टम्भश्यैतनित्रेषु ॥ ६ ॥

वि. **इन्द्रक्रतुमित्यत्र वैष्टम्भश्यैतजनित्रेषु** वक्रमुःशब्दे विसर्जनीयस्य लोपः ॥ ६ ॥

भा. इन्द्रक्रत्वायां महावैष्टम्भश्यैतपूर्वजनित्रेषु **माशिवसोवक्रमुरिति** मुशब्दे विसर्जनीयलोपः ॥ ६ ॥

दी. **इन्द्रक्रतोहाइ । नआभरोआ** (ऊ. सं. ३३९) इति **महावैष्टम्भे** द्वितीयायां **क्राऽ२मूऽ२३४औहोवा** । अत्र विसर्गलोपः । **इन्द्रक्रतुन्नआ** (ऊ. सं. ३४१) इति **श्यैते** द्वितीयायां **क्राऽ२मूऽ२३४ औहोवा** । अत्र विसर्गलोपः । **इन्द्रक्रा३तुन्नआभरा** (ऊ. सं. ३६५) इति **जनित्राद्ये** द्वितीयायां **क्राऽ२मूऽ२३४औहोवा** । अत्र विसर्गलोपः ॥ ६ ॥

इन्दुर्धर्त्तायां वासिष्ठे ॥ ७ ॥

वि.&भा. **धर्तायामुहुवायि** (ऊ. क्षु. ९६५) **वासिष्ठे इन्दुर्हिन्वान** इतीन्दुःशब्दे विसर्जनीयलोपः ॥ ७ ॥

---

2. M[1-2] T om. परि०....व्यवेः T adds: च after मार्गीयवे; M[1-2]T क्रतु for क्रतुः
7. A[2] क्रतु० T क्रमुम् for क्रमु०
8. M[1-2] च for व; A[2] क्रतु; M[1] क्रमु for वक्रमुः
12. My[1] om. इन्द्र...विसर्गलोपः
15. My[1] om. इन्दुर्...लोपः; भा. om. इति
16. भा adds: उःकार० before विसर्जनीय०

दी. उहुवाइ। घर्ताऽ३४ औहोवा (ऊ. क्षु. ९२५) इति वासिष्ठे द्वितीयायाम् इन्दूऽ३४। अत्र विसर्गलोपः ॥ ७ ॥

रहस्ये च योधा बृहति ॥ ८ ॥

वि. रहस्ये च योधाबृहति इन्दुःशब्दे विसर्जनीयस्य लोपः ॥ ८ ॥

भा. रहस्ये च योधारायां बृहति द्विर्द्विः पदमभ्यस्येत तस्मिन् इन्दुरश्च इति दुःशब्दे विसर्जनीयलोपः ॥ ८ ॥

दी. रहस्ये आरण्यके बृहतो गीतोत्पन्ने औहोइयोधारयापावकयाऽ३ए (र. क्षु. १५६) इति बृहति द्वितीयायाम् इन्दूऽ३४ औहोवा। अत्र दुमध्ये उकारस्य विसर्गलोपः ॥ ८ ॥

वाजयुः सदोवनायामन्तरिक्षे ॥ ९ ॥

वि.&भा. सदोवनायामन्तरिक्षे मीढ्वान्त्सप्तिर्न वाजयुरिति युःशब्दे विसर्जनीयलोपः ॥ ९ ॥

दी. हावासोमस्वा (र. अ. ११४) इत्यन्तरिक्षे द्वितीयायां हाउसदोवनाइ इत्यस्यां जाऽ२यूऽ२३४औहोवा। अत्र विसर्गलोपः ॥ ९ ॥

सजूरग्ने बृहति ॥ १० ॥

वि.&भा. अग्नेविवस्वायां (र. प्रा. १४८) सजूरश्विभ्यामिति जूःशब्दे विसर्जनीयलोपः ॥ १० ॥

---

5. PB[4] यो धरायां for योधारायां; B[4] अभ्यस्येत् for अभ्यस्येत

8. E दुर्मध्ये उः for दुमध्ये उ०

10. A[2] समदो M[1-2] सादो for सदो

11. भा trans. सदोवनायाम् after अन्तरिक्षे; T om. सदोवनायामन्तरिक्षे विसर्ग for विसर्जनीय My[1] om. युःशब्दे

16. M[1-2] विवस्व॰, T पवस्व for विवस्वायां; My[1] om. सजू....इति; वि. सजूः for जूः

17. A[2] om. विसर्जनीयलोपः

२२र र २
दी. औहोअग्नेविवस्वदुषासाऽ३ए (र. प्रा. १४८) इति **बृहति** तृतीयायां
१ २ ३२४र५
सजूऽ३४ औहोवा । अत्र विसर्गलोपः ॥ १० ॥

विसर्जनीयाकारौ ॥ ११ ॥ जीराः सैन्धुक्षिते ॥ १२ ॥

वि. अतः परं **विसर्जनीयाकारौ** लुप्येते । उदाहरणानि । **सैन्धुक्षिते जीरा अजिर** इति विसर्गाकारौ लुप्येते ॥ ११–१२ ॥

भा. पवमानस्य जिघ्नत (ऊ. द. १७७) इति **सैन्धुक्षिते** जीरा अजिरेति **विसर्जनीयाकारौ** लुप्यते ॥ ११–१२ ॥

१ २र१ २ १ २
दी. पवमानोहाइ । **स्वजिघ्नाऽ२३ताः** (ऊ. द. १७७) इति **सैन्धुक्षिते**
१र र ३ ५
जीराजोऽ२३४हाइ । अत्र **जीराः** । **अजीति** विसर्जनीयः अकारश्च लुप्यते ॥ ११ ॥

निकामा वितश्शृङ्गयोः ॥ १३ ॥

वि. गौरीवितगौशृङ्गयोः सपन्ति यं मिथुनासो निकामा अध्वर्यवो इति लोपः ॥ १३ ॥

भा. आजागृवायां गौरीवितगौशृङ्गयोः स्पन्ति यं **मिथुनासो निकामा** इति विसर्जनीयाकारयोर्लोपः ॥ १३ ॥

५र र ३ २ ४ ५
दी. आजा । **गृवाऽ३इः** । **विप्रऋताम्** (ऊ. द. २१४) इति **गौरीविते**
४ र र र
मिथुनासोनिकामाऽ५ध्वर्या । अत्र **निकामः** । **अध्वर्या** इति विसर्गः अकारश्च लुप्यते
३र ४र३ ४ ५ ३ २ र १
आजागृविर्विप्रः । **ऋताऽ३म्** (ऊ. क्षु. ९१९) इति **गौशृङ्गे निकामाऽ२ध्वर्या** ।
अत्र विसर्गाकारौ लुप्येते ॥ १३ ॥

ज्याकाः प्रोषु वत्सासु ॥ १४ ॥

वि.&भा. प्रोष्वस्मा (र. क्षु. १७०) इति **नित्यवत्सासु ज्याका** अधीति । अत्र विसर्जनीयाकारौ लुप्येते ॥ १४ ॥

---

3. भा.&दी. read विसर्जनीयाकारौ and जीराः सैन्धुक्षिते as a single sutra

11. M[1-2]T वितश्शृङ्गयोः for गौरीवितगौशृङ्गयोः

20. वि. om. इति and वत्सासु नित्यवत्सासु; M[1-3] om. प्रो ष्वस्मै...वत्सासु

दी. **एग्रोषु** । **अस्मै पुरोरथ** (र. क्षु. १७०) इति **नित्यवत्सासु** तृतीयायां **ज्याकाधिधाऽ२३हो** । अत्र विसर्गाकारौ लुप्येते ॥ १४ ॥

अःकारः ॥ १५ ॥

वि. अतः परमकारविसर्जनीयौ लुप्येते वक्ष्यमाणेषूदाहरणेषु ॥ १५ ॥

गोमन्न श्रुध्ये ॥ १६ ॥

गोमन्न इन्दायां (ऊ. ए. ४६८) श्रुध्ये **गोमन्नइन्द** इत्यत्र अःकारो लुप्यते । **न इन्दो** इति स्थिते अनेन लुप्ते निन्दो इति भवति । अत्र **नाइन्दो** भवति । वृद्धस्य तालव्यस्य आइभावविधानात् ॥ १६ ॥

भा. गोमन्नायां (ऊ. ए. ४६८) **श्रुध्ये** नःशब्दे अकारसहितो विसर्जनीयो लुप्यते । न् एवं स्थिते अस्वरस्य नकारस्य परगमनम् । इकारे नकारो गतः । नि एवं स्थिते तालव्यवृद्धत्वान् आयिभावः । ततः **गोमन्न३३यिन्दो** एतद्रूपं भवति ॥ १५–१६ ॥

दी. गोमन्नाऽ२इन्दो । **अश्वोवा** (ऊ. ए. ४६८) इति **श्रुध्ये नः इन्दो** । अत्र नकारमध्ये अःकारो विसर्गसहितो लुप्यते । ततः व्यञ्जननकार इकारमध्ये गतः । निन्दो । एवं स्थिते **तालव्यमाइ यद् वृद्धम्** (पु. सू. ३. १. १) इत्यनेन आइ-भावः । ततो **गोमन्नाऽ२इन्दो** एवं रूपं भवति । **गोमन्नाऽ२इम्** । अत्र गतिः कण्ठतालव्या ॥ १५–१६ ॥

समुद्रः प्रथमस्वर इमाउत्वायां श्यैतनौधसयोः ॥ १७ ॥

---

3. भा. & दी. treat अःकारः and गोमन्नश्रुध्ये as a single sutra

4. $A^2M^{1-3}T$ om. अतः परम्

5. T om. गोमन्न…अतो अन्ये पर्वाश्रया नियमाश्रयाश्च (पु. सू. 8. 5. 5.) and then resumes with तेषां नियमाश्रयाणाम् (8. 5. 6.)

7. A^2M^{1-2} om. इति

10. L^2 इति for एवं

17. M^{1-2} trans. इमाउत्वायां after नौधसयोः; A^3 समुद्रिव इति भवति for समुद्र….भवति समुद्रिव

वि. **इमाउत्वायां श्यैतनौधसयोः** (ऊ. ए. ४६४& ऊ. स. ७०४) **समुद्र इव पप्रथ** इति द्रशब्दो यदा प्रथमस्वरस्थो भवति । तदा द्रशब्दे अःकारलोपो भवति । समुद्रइवेति स्थिते अनेन अःकारलोपो भवति समुद्रिव । वृद्धत्वादाइभावः । **समुद्राइवाऽ२षा** ॥

भा. **समुद्र इव पप्रथ** इति यथा समुद्रःशब्दः प्रथमस्वरप्राप्तो भवति तथा द्रःशब्दे अःकारलोपः । अत्रापि पूर्वपदेन रूपसिद्धिः ॥ १७ ॥

दी. **इमाउत्वापुरू । वसाऽ२३४ औहोवा** (ऊ. ए. ४६४) इति **श्यैते** द्वितीयायां **समुद्रइवाऽ२पा** । समुद्रःइव । अत्र समुद्रः । प्रथमस्वरे वर्तमानो द्रमध्ये अःकारो लुप्यते । ततः व्यञ्जनद्रकार इकारमध्ये गतः ततःसमुद्रिव । एवं स्थिते आइभावः । ततः **समुद्राइवाऽ२पा** । एवं सिद्धम् ॥ **आऽ२३४इ । माउत्वापुरू । वासाउ** (ऊ. स. ७०४) इति **नौधसे** द्वितीयायां **द्राइवपोऽ२३४वा** । अत्र द्रमध्ये अःकारो लुप्यते । ततो व्यञ्जनद्रकार इकारमध्ये गतः । तत आइभावः ॥ १७ ॥

स्वःशब्दः पूर्वः पूर्वे यौक्ते ॥ १८ ॥

वि. **वृषापवस्वायां यौक्ताश्वे पूर्वे** (ऊ. द. ३९) **पवमानस्वर्दृशमिति** स्वःशब्दे विसर्जनीयस्यैव लोपः । अःकाराधिकारो निवृत्तः ॥ १८ ॥

भा. वृषापवस्वायां **पूर्वे यौक्ताश्वे** (ऊ. द. ३९) **पवमानस्वर्दृशमिति** पूर्वस्य स्वःशब्दस्य अःकारलोपः । अभ्यस्ताभ्यासापेक्षया पूर्वशब्दः । अत्रापि रूपसिद्धिः पूर्ववत् ॥

दी. **औहोहोहाइ । वृषा** (ऊ. द. ३९) इति **पूर्वे यौक्ताश्वे** द्वितीयायां **सुवाऽ२३** इति पूर्वस्य स्वःशब्दस्य विसर्गलोपः ॥ १८ ॥

स्वःशब्दश्चैवातिहारप्राप्तो लोपः क्रियते ॥ १९ ॥

---

4. B[4] समुद्रःशब्दे for द्रःशब्दे

12. A[2] स्वशब्दः पूर्वयौक्ताश्वे वृषापवमानायां for वृषा....पूर्वे; KS[2] पूर्वस्व; for स्वः

13. KS[2] My[1] om. अःकाराधिकारो निवृत्तः; S[1] अःकाराधिकारनिवृत्तिः A[2] आइःकाराधिकारो निवृत्तः; M[1-2] अकारोऽधिकारे निवृत्तः for अःकाराधिकारो निवृत्तः

14. V[2]P स्वशब्दस्य अकार० for स्वःशब्दस्य अःकार०

17. E यौक्ताश्वायां for यौक्ताश्वे; E adds: ओइ before सुवा

19. M[1-2] ०श्च वा प्रति० for श्चैवाति

वि. सूत्रारम्भस्य प्रयोजनम्। पूर्वे स्वशब्दे अतिहारप्राप्तस्य विसर्जनीयस्यैव लोपः। विपरीतः उत्तरसूत्रात् पूर्वसूत्रे अधिकारः कर्तव्यः। **विसर्जनीयस्य चालोपम्** (पु. सू. ७. ४. २४) इत्यतो विसर्जनीयस्येत्यधिकृष्यते। **विसर्जनीयस्य चालोपमि**त्यत्र चकारात् विपरीताधिकारः कर्तव्यः॥

स्वःशब्द एवातिहारप्राप्तस्य विसर्जनीयस्य लोपः उपदिश्यते वक्ष्यमाणेषूदाहरणेषु। स्वःशब्दस्यातिहारो (रं?) वक्ष्यत्युपरिष्टात् **स्वः सर्वत्र**। **यथा स्वर्विदः शङ्कनि सत्रासाहीये च** (7. 8. 30) इति। **पवस्वमधुमत्तमायां शङ्कुनि** (ऊ. द. ४६) **साहीये** (ऊ. सं. ३४९) च **अस्य पीत्वा स्वर्विद** इत्यत्र विसर्गस्य लोपप्राप्तस्यातिहारः। **स्वर्विदा नार्मेधे** (७. ८. ३२) **युञ्जन्ति हरी** इत्यस्यां नार्मेधे **इन्द्रवाहा स्वर्विदे**ति विसर्गस्य लोपप्राप्तस्यातिहारः॥ १९॥

भा. सिष्ठत्रैशोकयोः प्रसङ्गादिदमुच्यते। स्वःशब्दविसर्जनीयलोपः प्रकृत इत्यतः स्वःशब्दविसर्जनीयस्यैवातिहारप्राप्तस्य लोपः उपदिश्यते। वक्ष्यति हि पुरस्तात् **स्वः सर्वत्र॥ यथा स्वर्विदःशंकुनि साहीये च** (पु. सू. ७.८. ३०–३१) [इति] स्वःशब्दविसर्जनीयलोपः प्राप्तः स्तोभव्यवहितत्वात् सर्वत्रातिह्रियते। यथा किमुदाहरणम्। **पवस्वमधुमत्तमायाम्** (सा. ६९२–२) **अस्य पीत्वा स्वर्विद** इति शङ्कुसाहीययोः स्वःशब्दे विसर्जनीयस्य

---

1. KS^2My^1 om. सूत्रारम्भस्य प्रयोजनं...विपरीताधिकारः कर्तव्यः॥; A^2M^{1-2} om. अतिहारप्राप्तस्य
2. A^2 लोप इति M^{1-2} लोपमिति for चालोपमिति
3. A^2 °क्रियते for °कृष्यते; A^2अलोपः, M^{1-2}लोपम् for चालोपम्
5. $A^2M^{1-2}S^1$ क्रियते for उपदिश्यते
6. $A^2M^1S^1$ om. स्वःशब्दस्य....यथा; M^{1-2} om. सत्रा°
7. M^{1-2} मधुद्वितीयायां for °मधुमत्तमायां; A^2 °साहीययोः for साहीये च
8. A^2M^{1-2} विसर्जनीयलोपः for विसर्गस्य लोप°; A^2M^{1-2} om. प्राप्तस्यातिहारः
9. A^2M^{1-2} om. हरी; KS^2My^1 om. अस्यां; A^2M^{1-2} विसर्जनीयलोपः for विसर्गस्य....°तिहारः
10. A^1 om. सिष्ठत्रैशोकयोः
11. A^1 om.; हि; A^1 परस्तात् for पुरस्तात्
14. स्वःशब्द° for स्वशब्दे

रेफीभूतस्यातिहारः । स्वर्विदा नार्मेधे (७. ८. ३२)। अत्रापि **इन्द्रवाहास्वर्विदा-नार्मेधेऽपि** इन्द्रवाहास्वर्विदेति स्वःशब्दे विसर्जनीयलोपः **रेफीभूतस्यातिहारः** । एष उत्सर्गः । **न स्वे प्रत्यये** (७. ८. ३३)। अयमपवादः । उत्तरे **यौक्ताश्वे** स्वःशब्दे विसर्जनीय-लोपः । स्वःशब्दे परे अतिहृतेरपवादः । **पवमानस्य स्वर्दृशमिति । सुवा३३३सुव-३र्दृ३शामिति** प्राप्ते प्रतिषेधः अतिहारस्य ॥ १९ ॥

दी. स्वः सर्वत्र (पु. सू. ७. ८. ३०) इत्यनेन स्वश्शब्दस्यैव विसर्जनीयस्याति हारप्राप्तौ **लोपः क्रियते** । स्तोभस्य व्यवधानात् ॥ १९ ॥

सिष्ठ- त्रैशोकयोश्च ॥ २० ॥

वि. धर्तायां (ऊ. क्षु. ९२५) **वासिष्ठे** स्वासु **त्रैशोके च स्वःसिषासन् स्व-पतिर्यदीति** विसर्जनीयस्यातिहारप्राप्तस्य लोपः ॥ २० ॥

भा. धर्तायां **वासिष्ठे** (ऊ. क्षु. ९२५) **स्वःसिषासन्निति** स्वःशब्दे वि-सर्जनीयस्यातिहारप्राप्तस्य लोपः । **त्रैशोके च** स्वासु **स्वपतिर्यदीवृध** इति स्वःशब्दे विसर्जनीयस्यातिहारप्राप्तस्य लोपः । प्रासङ्गिकमुक्तम् । प्रकृतमेवेदानीं वर्णयिष्यामः । स्वः-शब्दे विसर्जनीयस्य लोपः प्रकृतः । तयोस्तदेव व्याख्यानम् । **सिष्ठत्रैशोकयोश्चेति** ॥

दी. उहुवाइ । **घर्ताऽ२३४ औहोवा** (ऊ. क्षु. ९२५) इति **वासिष्ठे** द्वितीयायां **सुवाऽ२३४ औहोवा** । अत्र स्वश्शब्दविसर्जनीयस्य अतिहारप्राप्तस्य लोपः ॥ **विश्वो-होइ** (ऊ. द. ७३) इति स्वासु **त्रैशोके** तृतीयायां सौहोइ । वौहोइ । अत्र स्वश्शब्दे विसर्जनीयस्यातिहारप्राप्तस्य लोपः । अत्र विसर्गलोपप्रसङ्गात् अतिहारप्राप्तनां वासिष्ठादीनां त्रयाणां स्वःशब्दे विसर्गस्य लोपविधानं कृतम् ॥ २० ॥

---

4. P स्वशब्दः परो नातिहुतो V² स्वशब्दपरानातिह्रतो L² घ्वशब्दः परोनातिहृतो for स्वशब्दे परे अति-हृतेः

6. My²⁻³ स्वाः for स्वः

12. V² om. त्रैशोके च...लोपः: A¹ om. स्वासु

13. V² प्रकृतिम् for प्रकृतम्

16. RMy²⁻³ after °प्राप्तस्य ins. विसर्जनीयस्य, R अविसर्जनीय°

यौक्ते चोत्तरे ॥ २१ ॥

वि. उत्तरे यौक्ताश्वे च पवमानः स्वर्द्दशमिति स्वःशब्दे अतिहारप्राप्तस्य विसर्जनीयस्य लोपः ॥ २१ ॥

भा. उत्तरे यौक्ताश्वे च एतदेव व्याख्यातम् । **न स्वे प्रत्यये** इति ॥ २१ ॥

दी. वृषा औहोहोहाइ (ऊ. सं. २४४) इत्युत्तरे **यौक्ताश्वे च** द्वितीयायां सुवाऽ३ । अत्र विसर्गलोपः । नातिहारः ॥ २१ ॥

ण्योर्मरायेऽभ्यासे प्रत्यये ॥ २२ ॥

वि. अग्निनरायाम् (ऊ. क्षु. ९००) **मरायेऽरण्योः**शब्दे विसर्जनीयस्य लोपः **अभ्यासे** परतः । **ण्यो** । **ण्यो** । **ण्योः** ॥ २२

भा. अग्निनरायां (ऊ. क्षु. ९००) **मराये ण्योः**शब्दे विसर्जनीयलोपः । अभ्यासे प्रत्यये लुप्यते । ण्योःशब्द एव प्रत्ययः ॥ २२ ॥

दी. हाउहाउहाउ । आग्नीम् । नराः (ऊ. क्षु. ९००) इति **मराये भिर-रण्यो । ण्यो । ण्योः** । अत्र ण्योःशब्दस्य विसर्गलोपः । ण्योरित्यभ्यासे प्रत्यये ॥

विसर्जनीयस्य चालोपमेके विरामे ॥ २३ ॥

वि. एके आचार्याः ण्योःशब्दे **विसर्जनीयलोपं** मन्यन्ते । **विरामे** विषये । न संधावित्यर्थः ॥ २३ ॥

विसर्जनीयस्य लोपो निवृत्तः ॥

इति फुल्लसूत्रविवरणे तृतीयस्य चतुर्थः खण्डः ॥ ४ ॥

---

4. V[2]P om. उत्तरे यौक्ताश्वे च; L[2] trans. उत्तरे after च

10. V[2]P अग्निनरायामरण्योः शब्दे for अग्निनरायां मराये ण्योःशब्दे; A[1] मरायेऽभ्यासे प्रत्यये ण्योःशब्दे विसर्जनीयलोपः । ण्योशब्द एव प्रत्यय इत्यर्थः ॥ for मराये ण्योः....प्रत्ययः ॥

16. KS[1-3] My[1] after संधावित्यर्थः add:- प्रयोगविशष इत्यर्थः ।

17. S[1] om. विसर्जनीयस्य लोपो निवृत्तः

18. A[2]M[1-3]S[1] om. इति तृतीयस्य चतुर्थः

भा. **अग्निन्नारायामेव** मराये (ऊ. क्षु. ९००) **एके** आचार्या **विसर्जनीयस्य अलोपं** मन्यन्ते । **विरामे** ण्योः ण्यो ण्यो इत्येवम् । अथवा **विसर्जनीयस्य एके** अलोपं मन्यन्ते **अविरमे** । संधावपि विकल्प इत्यर्थः । यथा **स्तंᳲपुंचैकः** इति । अत्रापि स्थितसंधिः संधिर्वा भवतीति एवमिहापि विकल्पः । संधावलोपः लोपो वेति ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य चतुर्थी कण्डिका समाप्ता ॥ ४ ॥

दी. ण्योःशब्दस्य **विरामे** अवसाने **विसर्जनीयस्य** न लोपमिच्छन्त्येके । ण्योः ण्योः । ण्योः । एवम् । सूत्रकारस्तु ण्यो । ण्यो । ण्योः एवम् ॥ २३ ॥

इति फुल्लदीपे सप्तमप्रपाठकस्य चतुर्थः खण्डः ॥ ४ ॥

पञ्चमः खण्डः

तकारलोपः ॥ १ ॥

वि.&भा. तकारलोपाधिकारात् **तकारलोपः** इदानीं वर्तिष्यते । पूर्ववद्यावद् वचनम् ॥ १ ॥

दी. लोपाधिकारादिदानीं तकारलोप उच्यते ॥ १ ॥

उच्छब्दः पार्थुरश्मे यदुदीरायाम् ॥ २ ॥

वि.&भा. **यदुदीरायां पार्थुरश्मे यदुदीरत** इति उच्छब्दे तकारलोपः ॥ २ ॥

---

8. M[4] फुल्लदीपिकायां for फुल्लदीपे

11. वि. om. तकारलोपाधिकारात्; वि. om. पूर्ववद्

15. भा. om. पार्थुरश्मे; वि. om. यदुदीरत इति; भा. दुरछन्दे for उच्छब्दे

दी. एइन्द्रा । ओऽ२३४वा (र. द. १३) इति **पार्थुरश्मे** तृतीयायाम् **एयाद्** इत्यस्याम् **एयाद्** । उच्छब्दे तकारस्य लोपः ॥ २ ॥

इलान्दे च वर्चे प्रत्यये ॥ ३ ॥

वि. इलान्दे च अनूवर्चा उदियर्षीति उच्छब्दे तकारलोपः । **वर्चेऽभ्यासे** प्रत्यये ॥ ३ ॥

भा. इलान्दे च प्रथमायां **पावकवर्चाः शुक्रवर्चा अनूनवर्चा उत्** । अत्राभ्यासे वर्चशब्दे प्रत्यये तकारलोपः ॥ ३ ॥

दी. अग्नेतवश्र । इडा (र. सं. ७०) **इतीलान्दे** प्रथमायां **नावर्चाऊ । वर्चाऊऽ३ । वर्चाउ । वर्चाउ ।** अत्र उच्छब्दे तकारलोपः । अभ्यासे वर्चशब्दे **प्रत्यये** ॥ ३ ॥

परिमर्द्धिषत्स्वासु हारायणे ॥ ४ ॥

वि.&भा. स्वासु हारायणे न किर्हि दानं परि मर्द्धिषदित्यस्य तकारलोपः ॥

दी. शग्ध्यूष्वौहोऽ२इ शचीपताइ (ऊ. ए. ४३२) इति **स्वासु हारायणे** तृतीयायां **धिषाऽ३हाइ** । अत्र धिषच्छब्दे तकारलोपः ॥ ४ ॥

दृढाचित्स्वासु वीङ्केऽभ्यासे प्रत्यये ॥ ५ ॥

वि. स्वासु वीङ्केऽभ्यासे प्रत्यये तेन दृढाचिदिति तकारलोपः ॥ ५ ॥

भा. स्वासु वीङ्के तेन दृढाचिदिति चिच्छब्द **एवाभ्यासे प्रत्यये** तकारलोपः ॥ ५ ॥

---

4. M[1]-[2] trans. अभ्यासे after प्रत्यये

12. वि. trans. स्वासु हारायणे after °लोपः; . वि. om. अस्य

16. A[2]S[1] om. स्वासु वीङ्केऽभ्यसे प्रत्यये; A[2]M[1]-[3] after चित add: अद्रिवः

17. B[4] om. तेन; V[2] om. अभ्यासे

दी. **यदिन्द्रचित्रमइ** (ऊ. द. १३९) इति **स्वासु वीङ्के** तृतीयायां **चाइचाऽ२इत्।** अत्र **चाऽ२इदित्यभ्यासे प्रत्यये** चिच्छब्दे तकारलोपः ॥ ५ ॥

वोवित्स न इन्द्रायां सौमित्रे ॥ ६ ॥

वि.&भा. उच्चातायां **वरित्रोविदिति** विच्छब्दे तकारलोपः ॥ ६ ॥

दी. **उच्चातेजातमन्धसाऽ३ए** (ऊ. स. ७६५) इति **सौमित्रे** द्वितीयायां **सन-इन्द्रायां वोवाऽ२ओऽ३** । अत्र विच्छब्दे तकारलोपः । आयिभावः । संधौ गतिलोपः ॥६॥

इन्द्रो मदायामिच्छब्दः पार्थुरश्मे ॥ ७ ॥

वि. **इन्द्रोमदायां पार्थुरश्मे तमिन्महत्स्वेति** मिच्छब्दे तकारलोपः ॥ ७ ॥

भा. ऋज्वर्थः ॥ ७ ॥

दी. **ए इन्द्रा । ओऽ२३४वा** (र. द. १३) इति **पार्थुरश्मे एतामी** । अत्र इच्छब्दे तकारलोपः ॥ ७ ॥

इद् द्विहिंकारज्ञीययोस्त्वामिन्द्र परित्ययोः ॥ ८ ॥

वि. **त्वमिन्द्रयशा** (ऊ. अ. ६३९) इति **द्विहिंकारदेव्ये प्रतीन्येक इदिति** तकारलोपः । **परित्यं हर्यतं हरिम्** (ऊ. अ. ६६१) इति यज्ञायज्ञीये **यो देवान् विश्वाऽ इत् परीति** तकारलोपः ॥ ८ ॥

भा. इच्छब्दे कारलोपः । **द्विहिंकारयज्ञायज्ञीययोः त्वमिन्द्रयशायां** द्विहिंकारे

---

4. वि॰ om. उच्चातायां and विच्छब्दे

8. A[1] om. इन्द्रोमदायां पार्थुरश्मे

12. A[2] om. इद्विर्हिंकार...

14. A[1]M[1-2] ज्ञीये for यज्ञायज्ञीये; M[1-2]A[2] om. यो देवान् and परीति

त्वं वृत्राणिहऽस्यप्रतिन्येकइदित्यत्र तकारलोपः । यज्ञायज्ञीये परित्यऽहर्यतायां यो देवा-न्विश्वाऽइदिति इत्कारे तकारलोपः ॥ ८ ॥

दी. तुवमाऽ२३इन्द्रयशाअसाइ (ऊ. अ. ६३९) इति द्विहिंकारवामदेव्ये तीनआइकऔहोऽ३ । अत्र ईच्छब्दलोपः । पराऽ५इत्यं (ऊ. अ. ६६१) इति यज्ञायज्ञीये विश्वाऽ१२३ आ । अत्र इच्छब्दे तकारलोपः ॥ ८ ॥

पुद्वैश्वामित्रे प्रसुन्वानद्वितीयायाम् ॥ ९ ॥

वि.&भा. प्रसुन्वानद्वितीयायां वैश्वामित्रे भुजेन पुदिति पुच्छब्दे तकार-लोपः ॥ ९ ॥

दी. प्रसुन्वानाय अन्धसः (ऊ. स. ७५७) इति वैश्वामित्रे द्वितीयायां भुज-इनाऽ२३४ पू । अत्र पुच्छब्दे तकारलोपः ॥ ९ ॥

तवेत्प्रत्यु बृहति ॥ १० ॥

वि.&भा. प्रत्यु अदर्श्यायत्यां बृहति तवेदुष इति वेच्छब्दे तकारलोपः ॥१०॥

इति तकारलोपः समाप्तः ॥

दी. औहोइप्रत्यु अदर्श्यायताऽ२३९ (र. प्रा. १४६) इति बृहति तृतीयायां तवेऽ३४ । अत्र तवेच्छब्दे तकारलोपः ॥ १० ॥

मकारलोपः ॥ ११ ॥

वि. अतः परं मकारलोपो वर्तिष्यते ॥ ११ ॥

भा.&दी. इदानीं मकारलोपो वर्तिष्यते । वर्तमानेषूदाहरणेषु ॥ ११ ॥

---

4. V² इकारे, P इतिकारे for इत्कारे

5. M¹ इत्शब्दलोपः for इच्छब्दे तकारलोपः

7. P om. प्रसुन्वानद्वितीयायां; भा. om. पुच्छब्दे

12. वि. om. अदर्श्यायत्यां; वि. तवेदुषोव्युषि for तवेदुषः

13. भा. om. इति तकारलोपः समाप्तः

उत्सन्नकं दैर्घेऽभ्यभिहीत्यत्र ॥ ११ ॥

वि.&भा. **दैर्घश्रवसे अभ्यभिहीत्यत्र उत्सन्नक**मिति कंशब्दे मकारलोपः ॥१२ ॥

दी. **त्वेसोमप्रथमावृदोहावृगोहाओहाऽ३ए** (ऊ. ए. ४०१) इति **दैर्घश्रवसे** द्वितीयायां **अभ्यभिहीत्यस्यां** **तताऽ२र्दिथोत्सन्नाऽ२का**। अत्र नकंशब्दे मकारलोपः ॥ १२ ॥

मां सूर्यमायास्ये साप्तमिके तवायाम् ॥ १३ ॥

वि. **तवाहंसोमायाम्** (ऊ. अ. ६५०) **साप्तमिके आयास्ये बभ्रो नि चरन्ति मा**मिति **घृणा तपन्त**मिति **सूर्य**मिति च मकारलोपः ॥ १३ ॥

भा. **तवाहंसोमायां साप्तमिके** द्विनिधनायास्ये (ऊ. अ. ६५०) **पुरूणि बभ्रो नि चरन्ति माम्**। अत्र मांशब्द एकाक्षरमुदाहरणम्। **घृणा तपन्तमति सूर्यं पर** इति मांशब्दसूर्यशब्दयोर्मकारलोपः ॥ १३ ॥

दी. **साप्तमिके** ककुब्दशरात्रस्य सप्तमेऽहनि भवे। **तवाहंसोमराणाए३** (ऊ. अ. ६५०) इति **द्विनिधने आयास्ये** प्रथमायां **ताइमाऽ३ आ**। अत्र मांशब्दे मकारलोपः। तृतीयायां **रायाऽ३आ**। अत्र सूर्यशब्दे मकारलोपः ॥ १३ ॥

मनीषां क्षौद्रेषु सहोदैर्घमरायराजर्षभेषु ॥ १४ ॥

वि. **क्षौद्रेषु सहोदैर्घमरायवैराजर्षभेषु बोधा विप्रस्यार्चतो मनीषा**मिति मकारलोपः ॥ १४ ॥

---

2. वि. om. अभ्यमिहीत्यत्र; वि. नकञ्चित् for नकम्
8. M[1-2] trans. मकारलोपः before घृणा०
12. E after इति adds: सप्तमिके
16. A[2] om. क्षौद्रेषु....०र्षभेषु

भा. श्रुधीहवायां **बोधा विप्रस्यार्चतो मनीषाम्** इत्यत्र मकारलोपः । क्षौद्रेषु **सहो-दैर्घमरायवैराजर्षभेषु** ॥ १४ ॥

दी. **हाउश्रुधाइ** (ऊ. क्षु. ८७१) इति क्षौद्रपर्वणि भवे **सहोदैर्घतमसे नीऽषा-ऽ२** । अत्र **मनीषां**शब्दे मकारलोपः । **श्रुधाइ** । **हवाम्** (ऊ. क्षु. ८७३) इति क्षौद्रे मराये **स्यार्चतोमनीषा** । **षा** । **षा** । अत्र मनीषांशब्दे मकारलोपः । **श्रुधीहवां** (र. क्षु. १६८) इति क्षौद्रे **वैराजर्षभे तोमनीषा** । अत्र मनींषांशब्दे मकारलोपः ॥ १४ ॥

स्रसामैटतेऽभ्यासे प्रत्यये ॥ १५ ॥

वि.&भा. **अस्यप्रत्नायाम्** (ऊ. अ. ५५४) **ऐटते पयस्सहस्र**सामिति **अभ्यासे प्रत्यये** मकाररलोपः । स्रसाशब्द एव प्रत्यये इत्यर्थः ॥ १५ ॥

दी. **अस्य** । **एआस्या** (ऊ. अ. ५४४) इत्यैटते **स्रसाऽ३** । अत्र स्रसां-शब्दे मकारलोपः । **स्रऽ२साऽ२३४ औहोवा** इत्यभ्यासे प्रत्यये ॥ १५ ॥

स ई त्रिकबृहति ॥ १६ ॥

वि.&भा. **त्रिकद्रुकायां बृहति सईममादे**ति ईकारे मकारलोपः ॥ १६ ॥

दी. **औहोइ त्रिकद्रुकेषुमहिषाऽ३ए** (र. प्रा. १४९) इति **त्रिकबृहति सईऽ३४** । अत्र सईशब्दे मकारलोपः ॥ १६ ॥

पप्रीं यज्ञाबृहति ॥ १७ ॥

वि. **यज्ञायज्ञाबृहति पप्रीं वयमि**ति प्रींशब्दे मकारलोपः ॥

॥ इति मकारलोपः समाप्तः ॥

---

4. E adds: पर्वणि after क्षौद्रे

8. वि. trans. अभ्यासे प्रत्यये after मकारलोपः

9. वि. om. स्रसा....इत्यर्थः

13. वि. om. ईकारे

17. A² om. यज्ञायज्ञाबृहति; K म० for मकार०

भा. **यज्ञायज्ञाबृहति** पर्प्रीशब्दे मकारलोपः ॥ १७ ॥

दी. **औहोइयज्ञायज्ञावोअग्नयाऽ३ए** (र. क्षु. ११४) इति **बृहति पप्रीऽ३४** । अत्र **पप्रीं**शब्दे मकारलोपः ॥ १७ ॥

उकारलोपः ॥ १८ ॥

वि.&दी. इदानीमुकारलोपः उच्यते ॥ १८ ॥

भा. उकारलोप इदानीं वर्तिष्यते ॥ १८ ॥

उपदृगयं सूर्यायामैटते ॥ १९ ॥

वि. **अयंसूर्यायामैटते इवोपदृगिति** उपशब्दे उकारलोपः ॥ १९ ॥

भा. **अस्यप्रत्नायामैटते अयं सूर्य इवोपदृगिति** इवउपेति उकारलोपः ॥ १९ ॥

दी. **अस्य । ए आस्या** (ऊ. अ. ५५४) इत्यैटते द्वितीयायाम् **अयम् । ए आयाम्** । सूर्यइ । इत्यस्यां सूर्यइ । वाऽ३ । अत्र इवउपशब्दे उकारलोपः ॥ १९ ॥

उत विष्णोश्च जनितायां श्यावाश्वे ॥ २० ॥

वि. **सोमःपवतेजनितायां श्यावाश्वे** (ऊ. क्षु. ९०५) त्रैककुभे **जनितोत विष्णो**रिति उतशब्दे उकारलोपः ॥ २० ॥

अतः परं यकारलोपः ॥

भा. सोमःपवतायां (ऊ. क्षु. ९०५) त्रैष्टुभे **श्यावाश्वे जनिताउतेति** उकारलोपः ॥ २० ॥

---

5. M[1-2] trans. इदानीम् after उकारलोपः

8. A[2]M[1-2] om. अयंसूर्यायामैटते

13. A[2] पवतायां for पवतेजनितायां

दी. सोमऽपवा । तेजनि (ऊ. क्षु. ९०५) इति त्रैष्टुभे श्यावाश्वे स्याजनिताऽ२३ । अत्र जनिताउतशब्दे उकारलोपः ।। २० ।।

यकारः परिष्टोभन्त्येत्यास्मिंश्च्छब्दे दविद्युते ॥ २१ ॥

वि.&भा. दिवद्युतत्यायां यज्ञायज्ञीये परिष्टोभन्त्या इति त्याशब्दे यकारलोपः ।। २१ ।।

दी. दावाऽ५इद्यु । ताऽ४तीऽ३यारूचा (ऊ. प्रा ८११) इति यज्ञायज्ञीये ताऽ२३आ । अत्र त्येत्यस्मिन् शब्दे तियेति विश्लेषे कृते यकारलोपः ।। २१ ।।

वाशब्दः सफे प्रियंदेवायां प्रथमतृतीययोर्विकल्पयोः॥ २२ ॥

वि. प्रियंदेवायां (ऊ. ए. ४६७) सफे प्रथमतृतीययोर्विकल्पयोर्वाशब्दस्य लोपः । ऋतेन य ऋतजातो विवावृध इति ॥ २२ ॥

भा. आसोतोपायां (ऊ. ए. ४६७) सफे प्रियंदेवायां प्रथमतृतीययोर्विकल्पयोर्वाशब्दलोपः । प्रतृजाप्लुतो वलोपश्चेत्येतदुक्तं भवति ।। २२ ।।

दी. आसोताऽ३परि । षिञ्चाऽ२३४ता (ऊ. ए. ४६७) इति सफे तृतीयायां प्रियंदेऽ३वाय इत्यस्यां प्रथमे विकल्पे तजातोऽ२वाऽ३इ । अत्र वाशब्दलोपः । अथ तृतीये विकल्पे तजातोऽ३वाऽ३इ । अत्रापि वाशब्दलोपः ॥ २२ ।।

अकारः सनेमित्वायामदेवं श्रुध्यत्रैतष्कलेषु ॥ २३ ॥

वि. सनेमित्वायां श्रुध्यत्रैतपौष्कलेषु अदेवंकंचिदिति अकारस्य लोपः ।।२३।।

भा. गोमन्नायाम् (सा. १६११–३) सनेमि त्वमस्मदेति [अत्र] अदेवमिति अयमकारो लुप्यते श्रुध्यत्रैतष्कलेषु ।। २३ ।।

---

4. भा. ०तत्या रुचेति for ०तत्यायां; वि. ज्ञीये for यज्ञायज्ञीये; भा. ०भन्त्या कृपेति for ०भन्त्या इति and om. त्याशब्दे; A² om. इति त्या०

9. A²M¹-² वाशब्द० for वाशब्दस्य

17. S¹M¹-³ after इति add: दकारात् परस्य and A² adds: अस्मात् परस्य

दी. **गोमन्नाऽ२इन्दो**। **अश्ववोवा** (ऊ. ए. ४६८) इति श्रुध्ये तृतीयायां **सनेमितूऽ२वम्** इत्यस्याम् **आदेवकाम्**। अत्र **अदेवमिति** शब्दे अकारो लुप्यते। ततः **पूर्व** आकारे मिलिते **आदेवंकामिति** रूपं सिद्धम्। **गोमन्नइन्दोअश्वावात्** (ऊ. अ. ६५४) इति **त्वैते** तृतीयायां **सनेमितुवमास्मात्** इत्यस्याम् **आदेवंकश्चिदत्रिणाम्**। अत्र **अदेवमिति** शब्दे अकारो लुप्यते। ततः पूर्व आकारे मिलिते **आदेवमिति** रूपं सिद्धम्। **गोमन्नाऽ३ इन्दो**। **अश्वाऽ२३४वात्** (ऊ. स. ७०५) इति **पौष्कले** तृतीयायां **सनेमीऽ३तु**। **वामाऽ२३४स्मात्** इत्यस्याम् **आदेवंकाम्**। अत्र अदेवमिति शब्दे अकारलोपः। पूर्ववद्रूपं सिद्धम् ॥ २३ ॥

अघायोर्वारे प्रथमे ॥ २४ ॥

वि. पूर्ववारवन्तीये **निमत्यांदघायोरिति** दशब्दे अकारलोपः ॥ २४ ॥

मा. वारवन्तीये **प्रथमे** स्वासु **निमर्त्यादघायोरिति** अकारलोपः ॥ २४ ॥

दी. आश्वा। **औहोऽ२३४वा** (ऊ. क्षु. ९०४) इति स्वासु **प्रथमे वारवन्तीये** तृतीयायां **घायोःपाहिसदाम्**। अत्र **अघायोरिति** शब्दे अकारलोपः ॥ २४ ॥

अन्धसः क्षुल्लकान्धीगवयोः ॥ २५ ॥

वि.&मा. **पुरोजिती वो अन्धसः** (सा. ६९७–९) इति **क्षुल्लककालेयान्धीगवयोरकारलोपः** ॥ २५ ॥

दी. **पुरोजिती वो ऽ१न्धासाः**। **सुतायमाऽ३** (ऊ. अ. ६३८) इति **क्षुल्लककालेये**। अत्र **अन्धसःशब्दे** अकारलोपः। **पुरोजितीवोऽ१ न्धासाः** (ऊ. द. १२) **इत्यान्धीगवे अन्धसःशब्दे** अकारलोपः ॥ २५ ॥

4, 7. M[4]L[2] द्वितीयायां for तृतीयायां

15. मा. trans. क्षुल्लककालेयान्धीगवयोः after अकारलोपः; A[1] om. °कालेय°; KS[1-2]My[1] क्षुल्लककालेये अन्धीगवे च for क्षुल्लककालेयान्धीगवयोः

18. My[2] R om. पुरो.... अकारलोपः

वृद्धादक्षरद्वैदन्वते प्रथमे ॥ २६ ॥

वि.&भा. ऊहसमाम्नायप्रथमे **वैदन्वते** पविते **सौमो अक्षरदिति** अक्षरच्छब्दे धृद्धात् सोमशब्दात् परस्याकारस्य लोपः । **सोमोऽ२३ । क्षारात्** ॥ २६ ॥

दी. पाऽ५रि । स्वानोऽ२गाऽ३इरिष्ठाः (ऊ. द. १०९) इति ऊहाध्ययने **प्रथमे वैदन्वते सोमोऽ२३ । क्षारात्** । अत्र वृद्धात् सोमशब्दात् परे अक्षरदिति शब्दे अकारलोपः ॥ २६ ॥

अद्र्युः सिमासु ॥ २७ ॥

वि.&भा. **सिमासु सखा सुशेवो अद्रयुरिति** अकारलोपः ॥ २७ ॥

दी. एऽ२ । **विदामघवन्विदा** (आ. गा. ६. २. २९१) इति **सिमासु** तृतीयायां **सुशेवोऽ२द्रयूः** । अत्र **अद्रयुःशब्दे** अकारलोपः ॥ २७ ॥

अक्षरन्नब्रुवंस्त्वाष्ट्राद्ये ॥ २८ ॥

वि. आद्ये **त्वाष्ट्रीसाम्नि पवित्रवन्तो अक्षरन्निति देवासो अब्रुवन्निति च** अकारौ लुप्येते ॥ २८ ॥

भा. सुतसोमायां त्रिणिधने **त्वाष्ट्रीसाम्नि पवित्रवन्तो अक्षरन्निति देवासो अब्रुन्निति च** तोशब्दात् वृद्धात् अकारलोपः । सोशब्दाच्च वृद्धादकारलोपः ॥ २८ ॥

---

2. A^2M^{1-2} om. ऊहसमाम्नाय; My^1 ऊहाम्नाय० for ऊहासमाम्नाय०; A^2M^{1-2} क्षरच्छब्दे for अक्षरच्छब्दे;

3 भा. पर अकारलोपः for परस्याकारस्य लोपः; भा. om. सोमोः । क्षागत्

8. A^2M^{1-2} after सिमासु add: सुच्छान्दसीषु; A^2 समासु for सिमासु; भा. om. सिमासु

13. A^2M^{1-2} trans. अक्षरन्नब्रुवंस्त्वाष्ट्राद्ये ॥ ...लुप्येते (L. 13) and आग्नये ज्ञीये ॥ ....अकारलोपः after अकारस्य लोपः (p. 585 l. 17)

15. V^2 अक्षरलोपः for अकारलोपः

दी. सुतासोमा । धुमाऽ३त्तमाः (ऊ. द. ६४) इत्याद्ये त्वाष्ट्रीसाम्नि एऽ३ । क्षरन्ना । अत्र अक्षरन्शब्दे अकारलोपः । द्वितीयायाम् एऽ३ । ब्रुवन्ना । अत्र अब्रुवन्-शब्दे अकारलोपः ।। २८ ।।

अग्नये ज्ञीये ।। २९ ।।

वि. स्वासु यज्ञाज्ञीये वो अग्नय इत्यत्राकारलोपः ।। २९ ।।

भा. यज्ञायज्ञीये स्वासु यज्ञायज्ञा वो अग्नय इति अकारलोपः ।। २९ ।।

दी. यज्ञाऽ५य । ज्ञाऽ३न्नोऽ३ग्नायाइ । (ऊ. द. १४) इति स्वासु यज्ञायज्ञीये ज्ञाऽ३न्नो३ग्नायाइ । अत्र अग्नय इति शब्दे अकारलोपः ।। २९ ।।

आकारस्तन्त्वाविप्रायाभिहवद्वामे ।। ३० ।।

वि.&भा. तन्त्वाविप्रायाम् (ऊ. क्षु. ९०८) इहवद्वामदेव्ये सन्त्वामृजन्त्यायव इति आकारलोपः ।। ३० ।।

दी. तन्त्वाविप्रावचोविदः । इहा (ऊ. क्षु. ९०८) इति इहवद्वामदेव्ये सन्त्वा-मृजन्ताऽ२इ । अत्र आयव इति शब्दे आकारलोपः ।। ३० ।।

इकारः प्रसोमाश्वे ।। ३१ ।।

वि.&भा. प्रसोमायाम् अश्वे वनानि महिषा इवेति इवशब्दे इकारलोपः ।।

दी. प्रसोमासोऽ२विपश्चितः (ऊ. सं. २३४) इत्याश्वे षाऽ३२उवाऽ३ । वा-ऽ२३४५ । अत्र इवशब्दे इकारलोपः ।। ३१ ।।

---

2. L[1] om. द्वितीयायां .. लोपः

9. M[1-2] वामदेव्ये for वामे; S[1] om. आकारः.....तन्त्वा...०लोपः ।। ३० ।।

10. A[2]M[1-2] om. तन्त्वा प्रियायां; भा. trans. इहवद्वामदेव्ये after आकारलोपः; वि. मृजन्त्याशब्दे for मृजन्त्यायव इति

14. A[2]M[1-2] इव for इकारः

15. A[2]M[1-2] प्रसोमाया for प्रसोमायाम्०

व्यञ्जनमपराङ्गं विरामे लुप्यते ॥ ३२ ॥

वि. **अपराङ्गं** परस्यानङ्गम् । पूर्वाङ्गमित्यर्थः । अपराङ्गमिति किम् ? स्पर्शक्रमजस्वरभक्तिरेफानुस्वाराः यमरहितस्ववर्गीयसंयुक्तस्पर्शः । स्वरात् संयोगादिः क्रमजम् । असंयोगोष्मपरकरेफः स्वरभक्तिः । स्पर्शपरकरेफः संयोगोष्मपरकश्च । रोफोष्मपरकमकारोऽनुस्वारः । एते अपराङ्गशब्देनोच्यन्ते । एतेषामन्तःपदिकानामेतल्लक्षणम् । कुतः ? प्रत्युदाहरणेष्वन्तःपदिकानामुदाहरणात् । **अपराङ्गं व्यञ्जनं विरामे लुप्यते** । उदाहरणानि । अनुस्वारस्य वामदेव्ये **मा । हिङ्ग्रोमात्सादन्ध** । सा (ऊ. द. ५) । तथा त्वं **सोमायां** (ऊ. द. १९५) हाविष्कृते **पवस्व महयद्रयि** रेति । रेफस्य **वयमुत्वा** । (ऊ. द. १६) सौभरे **त्वामिध्यावितारंवव्** इति वृद्धत्वादाभावः तस्माद्रेफो भवति । तस्य लोपः । औशने **मर्जयन्तः** (ऊ. द. ४) इति । ऐडे स्वारे (र. सं. ४३) **पृतनाषाडिति** च । स्वरभक्तेः **पुना**-त्रिणिधनयौधाजययोरा**पृच्छयं धरुणं वाज्यर्षसी**-(ऊ. द. ४१)ति **वसानो अर्षसी**-(ऊ. द. ३)ति च । क्रमजोदाहरणम् औशने **प्रतुद्रवे**-

---

2. In $A^{2}M^{1-2}S^{1}My^{1}$ the commentary on व्यञ्जनमपराङ्गं विरामे लुप्यते ॥ greatly differs. Hence it is given here:— अपराङ्ग अपरस्य विधेरङ्गम् । अपरस्य विध्यङ्गमिति किम् । (A^{2} after किम् adds: इति and M^{1-2} add: किमिति) स्पर्शरेफानुस्वाराणि (ऽस्वारणाम्) ($M^{1-2}A^{2}$ om. °रेफानु°) स्पर्श (My^{1} स्पर्शस्य) स्ववर्गीयपरत्वम् । रेफस्य ($S^{1}My^{1}$ रेफ) स्पर्शोष्मभिः संयोगः । अनुस्वारस्पर्शरेफाणामन्तःपदिकत्वं च । एतत्परं विधय..म् । आत्मनः परस्य अङ्ग (M^{1-2} add: अक्षरस्य after अङ्गम्) परस्य अक्षरस्य अङ्गं (M^{1-2} om. अङ्गम्) पूर्वाङ्गम् ($S^{1}My^{1}$ अन्तःपदस्यक्षारस्य पूर्वाङ्गम्) for आत्मनः परस्य…पूर्वाङ्गम्) अपराङ्ग (A^{2} om. अपराङ्गम् परस्य अनङ्गम् (M^{1-2} अङ्गम्) after अनङ्गम् adds: अपराङ्गम् । अपराङ्गन्) अपराङ्गमिति दिर्विंचि (M^{1} दुर्विंचि M^{2} द्रिचि A^{2} चित्रचि S^{1} दिर्गिचित्ति, त्वैकरोरः । कुतः (A^{2} अतः My^{1} कृतम् अ) परस्याक्षरस्यानङ्गं परस्य (My^{1} अपरस्य) विधेरङ्ग व्यञ्जनं विरामे लुप्यते । अस्मिन् विषये समासस्यैकपदं नेच्छन्ति । उदाहरणानि । अनुस्वरस्य स्वासु (My^{1} वाम°) देव्ये । मा । हिङ्ग्रोमात्सादन्ध । सा । तथा त्वंसोमायां हाविष्कृते पवस्व महयद्रयिरेति । रेफस्य वयमुत्वा सौभरे त्वामिध्यवितारे वव इति वृद्धात्वादाभावः । तस्माद्रेफो भवति । तस्य लोपः । ऐडे स्वरे (My^{1} वैते तृतीयस्वारे M^{1} ऐळेरे, M^{2} ऐतरे S^{1} त्रैतस्वरे) वृषाते वृष्णेति वृषामरो च । पुनात्रिणिधनयौधाजययोरापृच्छ्यं धरुणं वाज्यर्षसि (M^{1-2} वाजर्षसि) वसानो अर्षसीति च । स्वरोदाहरणम् । औशने प्रतुद्रवेति । पूर्वस्य दकारस्य लोपः । त्वंसुतो मदिन्तमानीति My^{1} म for °मा° and om. नीति) आश्वसक्ते । परस्या (My^{1} परा°) नङ्गमिति किम् । यज्ञायज्ञा वो अग्नय इति । अपराङ्गमिति किम् । तंत्वो दस्महूती ।

(ऊ. द. ४)ति पूर्वस्य दकारस्य लोपः । तथा आतूनाकूपारे (ऊ. द. २४) **दित्सन्तमिति** अभ्यासे त्सशब्दे पूर्वस्य तकारस्य लोपः । **परित्यं हर्यतं हरिमि**ति यद्वाहिष्ठीये (ऊ. द. २००) र्यशब्दे रेफः पराङ्गम् । एको यकारः पूर्वाङ्गम् । तस्य लोपः । तथा परिस्वानायां हाविष्कृते (ऊ.अ. ५८५) **मदेषु सर्वधा** इति र्वशब्दे रेफः पराङ्गम् । एको वकारः पूर्वाङ्गम् तस्य लोपः । स्पर्शोदाहरणं **त्वं सुतो मदिन्तम** आश्वसूक्ते (ऊ. द. १९१) न्तशब्दे क्रमजस्पर्शौ लुप्येते ॥ ३२ ॥

भा. **व्यञ्जनमपराङ्गम्** । पूर्वाङ्गमित्यर्थः । तद् **विरामे लुप्यते** । कानि पुनस्तानि व्यञ्जनानि ? उच्यन्ते । अनुस्वारः । रेफः । स्वरभक्तिः । क्रमजम् । स्पर्शश्च । स्पर्शे प्रत्यये एतेषां लोपः । एतेषां चान्तःपदिकानामेतल्लक्षणम् । कुतः । प्रत्युदाहरणेषु अन्तःपदिकोदाहरणात् । तस्मादेवमुदाहरणानि । अनुस्वारस्य तावत् वामदेव्ये **मंहिष्ठोमत्सदन्धसः** (ऊ. द. ५) इति । तथा **त्वं सोमायां** (ऊ. द. १८५) हाविष्कृते **पवस्व मंहयद्रियिरिति** रेफोदाहरणम् । **वयमुत्वायां** (ऊ. द. १६) सौभरे **त्वामिध्य-वितरंवत्र** । अत्र **वृद्धमृवर्णम्** (पु. सू. ६. ६. १) इति आर्भावः । प्रतिहारप्राप्तिः विरामे । अत्र विरामत्वाल्लोपः । तथा ऐडस्वारे **मत्स्यपायितायां वृषा ते वृष्ण इन्दुः** । **वृषा-मदो वरेण्यः** इति च आर्भूतयो रेफलोपः । स्वरभक्तेरुदाहरणम् । **पुनानायां** त्रिणि-धनायास्य-(ऊ. द. ४१) यौधाजययोः (ऊ. द. ३) । **अपो वसानो अर्षसि** । **आपृच्छ्यं धरुणम्** । **वाज्यर्षसीति** च वर्षशब्दस्वरभक्तिलोपः । क्रमजोदाहरणम् । औशने **प्रतुद्रवे-**(ऊ. द. ४)ति द्रशब्दक्रमजस्य दकारस्य लोपः । तथा आतूनाकूपारे (ऊ. द. २४) **न मांसो दित्स**– अभ्यासविषये त्सशब्दे क्रमजस्य तकारस्य लोपः । स्पर्श इत्यत्रोदाहरणानि । **त्वंसुतोमदिन्तम** (ऊ. द. १९१) इत्यत्र आश्वसूक्ते त्वंशब्दे **द्वौ** तकारौ पूर्वाङ्गत्वात् एकस्य

---

8. B[4] उच्यते for उच्यन्ते

10. PV[2]L[2] after उदाहरणानि adds: अनुस्वारादीनि

13. B[4] अतिहार० for प्रतिहार; V[2]PA[1]L[2] प्रतिहारप्राप्तस्य विरामे for प्रतिहारप्राप्तिः विरामे

18. B[4] द्रशब्दे for द्रशब्द

19. B[4] तकारलोपः for तकारस्य लोपः

20. B[4] एतस्य for एकस्य

क्रमजत्वात् । द्वितीयस्पर्शप्रत्ययत्वात् । तस्मात् क्रमजस्पर्शो लुप्यते । तथा **परित्यं हर्यतं हरिमिति** यज्ञाहिश्रीये (ऊ. द. २००) यंशब्दे रेफः पराङ्गम् । एकः क्रमजो यकारः पूर्वाङ्गम् । पूर्वाङ्गत्वात्तस्य लोपः । तथा परिस्वानायां हाविष्कृते (ऊ. अ. ५८५) **मदेषु सर्वधा** इति सर्वशब्दे रेफः पराङ्गम् । एकः क्रमजो वकारः पूर्वाङ्गम् । पूर्वाङ्गत्वा-देकस्य वकारस्य लोपः ॥ ३२ ॥

दी. व्यञ्जनं यत् स्वररहितम् **अपराङ्गं पूर्वाङ्गं** पूर्वस्वराङ्गं **विरामे** अवसाने **लुप्यते** ॥ लोपो भवति । **पूर्वाङ्ग**स्य स्वरूपमुक्तं नारदशिक्षायाम्—

अनुस्वारः पदान्तश्च क्रमजं प्रत्यये स्वके ।
स्वरभक्तिस्तथा रेफः सर्वं पूर्वाङ्गमुच्यते ॥

क्रमजं ककारादिवर्णानां द्विर्भावः । स्वरभक्तिस्तु शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदसंधौ । इउवर्णाभ्यां हीना क्वचिदेकपदा क्रमवियुक्ता । शषसहारानामादौ रकारो रेफः स्वरभक्तिर्जायते । द्विपदस्य संधौ क्वचित् कुत्रचित् स्वरभक्तिरेकपदा । कथंभूता ? इउवर्णाभ्यां हीना ॥

व्यञ्जनान्युच्यन्ते । अनुस्वारः रेफः स्वरभक्तिः क्रमजं प्रत्यये स्वके इति । एतेषां चान्तःपदिकानामेतल्लक्षणम् । कुतः । प्रत्युदाहरणेष्वन्तःपदिकोदाहरणात् । अन्तः-पदिकानमनुस्वारादीनामुदाहरणानि । आदौ अनुस्वारस्य । **का**ऽ५**यां** (ऊ. द. ५) इति वामदेव्ये । **मा** । **हिंष्ठो** । अत्र मंहिष्ठशब्दे अनुस्वारलोपः ॥ अथ **रेफस्योदाहरणम्** । **वयाऽ३मूऽ३त्वामपूर्वियोवा** (ऊ. द. १६) इति सौभरे **त्वामिध्यविताऽ२रांवन्नाऽ२३** अत्र रेफलोपः । विरामत्वात् ॥

8. M^4 क्रमजः for क्रमज

10. M^4 क्रमजः for क्रमजं; E सहरादौ, M^4 ०सहा औ for ०सहरादौ; My^3 ०भक्तिजनिते for भक्तिर्जायते

14. E क्रमजः for क्रमजं; L^1 स्वरभक्तिक्रमजप्रत्यये for स्वरभक्तिः क्रमजं प्रत्यये; R स्वरे for स्वके

17. EM^4 om. अथ

18. R $My^{2.3}$ before वयाऽ add: वाजिनऽमा

अथ स्वरभक्तेरुदाहरणम् । **पुनाऽ२३** (ऊ. द. ३) इति यौधाजये **न आऽ२३४५ षाऽ२३४सी** । अत्र द्विपदसंधौ स्वरभक्तेर्लोपः ॥ अथ क्रमजस्योदाहरणम्—**प्रातू** (ऊ. द. ४) इत्यौशने **द्रवापरिक्रोशाम्** । अत्र द्रशब्दे पूर्वदकारस्य लोपः । **गौतमशिक्षायां** त्र्यक्षरोदाहरणमुक्तम्—**ददरावरुणसाम्नीन्दुः समुद्रम्** इति । क्रमजस्य स्वकीये उदाहरणम् । **परित्य॰ हर्यतः॰हरिम्** (ऊ. द. २००) इति यद्वाहिष्ठीयोत्तरे **यतः॰हराइम्** अत्र यशब्दे द्वौ यकारौ । स्वकीये यकारे प्रत्यये क्रमजस्य यकारस्य लोपः । नौधसे स्पर्शस्योदाहरणम् । **क्षूऽ२३मा** (ऊ. दा ६) । अत्र मकारलोपः ॥ ३२ ॥

अभ्यासे च ॥ ३३ ॥

वि. अभ्यासे च प्रत्यये व्यञ्जनमपराङ्गं लुप्यते । दीर्घतमसोऽर्के **इन्द्रस्य सोमपवमान ऊर्मिणे**—(र. ए. ८०)ति पूर्वस्य विरामे लोपः । उत्तरयोरभ्यासत्वाल्लोपः । तथा **पर्जन्यः पिता महिषस्य पर्णिनः** (र. द. २८) **सोमः पुनानो अर्षती**—(र. द. १०१)ति च ॥ ३३ ॥

भा. अभ्यासे च लुप्यते । चशब्दात् पूर्वाङ्गम् । अन्तःपदिकमिति । तथा दीर्घतमसोऽर्के **इन्द्रस्य सोम पवमान ऊर्मिणे**—(र. ए. ८०)ति प्रथमस्य रेफस्य विरामत्वाल्लोपः । उत्तरस्याभ्यासप्रत्ययत्वात् । तथा **असाविसोमायां** (र. द. २८) **पर्जन्यः पितामहिषस्य पार्णिनाऽ३णिनाऽ३ः** । तथा **अभिप्रियाणिपवतायां** (र. स. १२५) **नामानि यह्वो अधि येषु वर्धते** इति । **अयंपूषायां** (र. अ. १०१) च **सोमः पुनानो अर्षति** इति दीर्घतमसोऽर्के एव ॥ ३३ ॥

दी. अभ्यासे प्रत्यये च शब्दात् अन्तःपदिकं पूर्वाङ्गं व्यञ्जनं लुप्यते । उदाहरणम् **धर्ता दाइवः पवते** (र. ए. ८०) इति दीर्घतमसोऽर्के तृतीयायां **स्यासोमपवमानऊ** । अत्र

4. R °हरणे for °हरणम्

5. R °हरायि for °हाराइम्

7. R भकार° for मकार°

8. A[2]M[1-3] after अभ्यासे च add: अर्के; A[3] पराङ्गम् for अपराङ्गम्

विरामत्वात् रेफलोपः । **मिणामिणा** । अत्र अभ्यासे प्रत्यये पूर्वे मिणाशब्दे रेफलोपः ॥

नोर्मेयार्णसार्जुनऋम्वसे एवामृता चार्के ॥ ३४ ॥

वि. पूर्वलक्षणस्यापवादः । **द्विर्यपश्चायां** (र. अ. ११९) **प्रस्नापयन्त ऊर्मयेति** अभ्यासप्रत्ययत्वाल्लोपप्राप्तस्यापवादः । **प्रसोमदेवायां** (ऊ. स. ६९१) **सिन्धुर्न पिप्ये अर्णसेति** अभ्यासप्रत्ययत्वाल्लोपप्राप्तस्यापवादः । **आ हर्यतो अर्जुन** इति लोपप्राप्तस्यापवादः । **विश्वा धामानि विश्वचक्ष ऋभ्वस** इति लोपप्रतिषेधः । **परिप्रधन्वायाम एवामृतायेति** तमसोऽर्कपौरुहन्मनयोः संधिविषयः । तमसोऽर्कपौरुहन्मनशैखण्डिनेषु अभ्यासप्रत्ययत्वाल्लोपप्राप्तस्यापवादः ॥ ३४ ॥

भा. नेति प्रतिषेधः । पूर्वलक्षणप्राप्तानामपवादः । **द्विर्य पश्चस्वायां प्रस्नापयन्त ऊर्मय** इति अभ्यासप्रत्ययस्यान्तःपदिकस्य रेफस्य लोपप्रतिषेधः । प्रसोमदेवायां (ऊ. स. ६९१) **सिन्धुर्न पिप्ये अर्णसा** । **आ हर्यतो अर्जुन** इति पौरुहन्मने रेफस्य अभ्यासप्रत्ययस्य रेफलोपप्रतिषेधः प्रयोगे संधौ विषये । **प्रत आश्विनीः** (ऊ.क्षु. ९०६) इत्यत्र **विश्वा धामानि विश्वचक्षऋभ्वस** इति शैखण्डिने । **परिप्रधन्वायां** (र. अ. १०४) दीर्घतमसोऽर्के **एवामृतायेति** रेफस्यालोपः पूर्ववत् ॥ ३४ ॥

दी. **नेति** प्रतिषेधः । **द्वाइर्यां पाश्चस्वय** (र. अ. ११९) इति दीर्घतमसोऽर्के **मयामेयाः** इत्यभ्यासे प्रत्यये अन्तःपदिकस्य रेफस्य न लोपः । **प्रसोमाऽ३देववीतायाइ** (ऊ. स. ६९१) इति पौरुहमन्ने प्रथमायां प्ये **आर्णाऽ३साऽ२** । **णासाऽ२**

---

3. A²M¹⁻² om. पूर्वलक्षणस्यापवादः; A² पश्चस्वायां; M¹⁻² पश्चत्वायां for पश्चायां; A²M¹⁻² om. प्रस्नापयन्तः

4. A²M¹⁻² om अभ्यासप्रत्ययत्वात्; A² अलोपः for अपवादः; KS² प्रसोमदायां for प्रसोमदेवायां A² before प्रसोम० adds: नो अर्के; M¹⁻² before प्रसोम० add: नोर्मदे and trans प्रसोमदेवायां ....०प्राप्तस्यापवादः after आहर्यतो....०पवादः

14. V¹P लोपः for अलोपः

15. E नो इति L¹ नोति for नेति

इत्यभ्यासे प्रत्यये आर्णासाशब्दे न रेफलोपः । द्वितीयायां जुनोअऽ३ । जुनोआऽ३ इत्यभ्यासे प्रत्यये प्रयोगविषये संधौ पूर्वस्य न रेफलोपः । प्रताऽ३होइ । आश्वीऽ३ऽ२३४ (ऊ. क्षु, ९०६) इति शैखण्डिने तृतीयायां भ्यासाऽर्भ्वेसाः इत्यभ्यासे प्रत्यये पूर्वस्य न रेफलोपः । पारी । प्रा । धन्वा धन्वा (र. अ. १०४) इति दीर्घतमसोऽर्के द्वितीयायां तयर्ताया । अत्राभ्यासे प्रत्यये पूर्वस्य न रेफलोपः ॥ ३४ ॥

आन्कारोऽनुनासिको वृद्धः सर्वत्र ॥ ३५ ॥

वि. सर्वत्र वृद्ध आन्कारोऽनुनासिको भवति । परिधीँ२रतिताँ२ (ऊ. अ. ६४७) इति पौरुहन्मनादिषु ॥ ३५ ॥

भा. आन्कारो वृद्धः सन् अनुनासिको भवति । रङ्गीभवतीत्यर्थः । यथा परिधीँ२रतिताँ२ (सा. ९२२) इत्यत्र पौरुहन्मनद्वैगतयौधाजयबृहद्रौङ्गवरथादिषु ॥ ३५ ॥

दी. आन्कारो वृद्धः सन् अनुनासिको भवति । रङ्गो भवतीत्यर्थः । उदाहरणम् । तवाहाँ२सोमरारणा । सख्यइन्दो (ऊ. अ. ६४७) इति पौरुहन्मने प्रथमायां ताइता आऽ२३४ इहाइ । अत्र तान्-शब्दस्य रङ्गः । एवं सर्वसामसु द्वैगतयौधाजयबृहद्रौङ्गव-रथन्तरादिषु ॥ ३५ ॥

अरेववैखानससन्तानिषु ॥ ३६ ॥

वि. वृद्धोऽप्यान्कारोऽननुनासिको भवति एषूदाहरणेषु । रेवतीषु आ घ त्वावानि-(र. सं. ६३)ति पदगीत एव । एवं वैखानसे (ऊ. अ. ५५०) अवद्युतानः कलशानिति । इन्द्रोमदायां (ऊ. स. ७४३) संतनिनि अस्मानिति ॥ ३६ ॥

इति फुल्लसूत्रविवरणे तृतीयस्य पञ्चमः खण्डः ॥ ५ ॥

---

4. L[1] दैर्घ० for दीर्घ०

6. KA[2]S[2]My[1] trans. वृद्धः before अनुनासिकः

7. A[2] om. सर्वत्र; M[1-2] om. सर्वत्र वृद्धः

16. A[2]M[1-2] एतेषु for एषु; A[2]M[1-2] om. रेवतीषु

17. A[2]M[1-2] om. एवं

भा. एतेषु वृद्धोऽपि सन् अननुनासिको न भवति । **रेवतीर्नायाम्** (र. सं. ६३) उभयोरपि ैवतयोः **आ घ त्वावानित्यत्र** पदगीत एव भवति । **वैखानसे अवद्युतायां** (ऊ. अ. ५५०) पदगीत एव भवति । **इन्द्रोमदायां** (ऊ. स. ७४३) सन्तनिनि **अस्मा**ः **इन्द्र वसाविति** च पदगीतः । त्रिष्वपि रङ्गो न भवतीत्यर्थः ॥ ३६ ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य पञ्चमी कण्डिका समाप्ता ॥ ५ ॥

दी. अकारः प्रतिषेधे । **हाउरेवा** (र. सं. ६३) इति **रेवतीषु हावाघा** । **त्वावान्** । अत्र न रङ्गः । **अभिप्रीऽ३याणिपवताइ** (ऊ. अ. ५५०) इति **वैखानसे** तृतीयायाम् **अवग्रूऽ३तानः कलशान्** । अत्र न रङ्गः । **इन्द्रो हाउ** (ऊ. स. ७४३) इति सन्तनिनि तृतीयायाम् **अस्मान् हाउ** । अत्र न रङ्गः ॥ ३६ ॥

इति फुल्लदीपे सप्तमप्रपाठकस्य पञ्चमः खण्डः ॥ ५ ॥

षष्ठः खण्डः

आउभावः

आउवा व्यहितमाउवा भवति सर्वं पदान्त्यं च व्यञ्जनं लुप्यते ॥ १ ॥

वि. **आउवा व्यवहितस्वरमाउ भवति** । आउवास्वरयोर्मध्ये यत् **पदान्त्यं** तच्च **लुप्यते** । उदाहरणानि स्वारसौपर्णे ॥ १ ॥

---

2. B[4] वैखानसे...एव भवति
3. V[a] before इन्द्रो मदायां adds: वैश्वानरो अवग्रुनायां
13. My[2] before आउवा adds: श्रीगणेशाय नमः; EM[1]L[1] पदान्तं for पदान्त्यं
15. A[1]M[1-3] My[1] सर्वं for स्वरं; K om. स्वरम्; S[3] सर्वं with supra स्वरं for स्वरं; A[2] adds: वा before भवति; My[1] यच्च for यत् पादान्तं, KS[1]My[1] पदान्तं for पदान्त्य; A[2] om. मध्ये;
16. KA[2] om. तच्च; A[1]M[1-3] om. स्वारसौपर्णे

दी. आउवा–स्तोभे व्यवहितस्य व्यवधानस्यार्चिकस्यान्त्यः स्वरः आउ भवति । यच्च पदान्तीयं पदस्यान्त्यं **व्यञ्जनं** स्वररहितं तस्य च लोपः । तथोदाहृतम् ॥ १ ॥

शाताऽ३उवा । भवा । सियोऽ२३४वा । ऊग्राऽ३२उवा शर्म ।
महोऽ२३४वा । यूजाऽ३उवा । वाजेषुचो२३४वा । मधा
ऽ३ऽ२३ उवाऽ२३ ॥ २ ॥

वि. **शताऽ३उवा** । **भवा** । **सियोऽ२३४वा** इति **कयानः** (ऊ. ए. ३८२) स्वारपर्णे । **ऊग्राऽ३उवा** इत्यादि **उच्चा** (ऊ. ए. ३८४) स्वारपर्णे । **अयाच्चित्तायां** (ऊ. ए. ४४९) स्वारपर्णे **यूजाऽ३उवा** इत्यादि । प्रसोदेवायां (ऊ. क्षु. ८७५) कण्वरथन्तरे **मधाऽ३१उवाऽ२३** । इत्यादि ॥ २ ॥

दी. **कयानश्चित्र आभूऽ३वात्** (ऊ. ए. ३८२) इति स्वारसौपर्णे तृतीयायां **शाताऽ३उवा** । अत्र आउवाव्यवहितस्य शतमित्यार्चिकस्यान्त्यस्वरः अकारः आउभावं प्राप्नोति । पदस्यान्त्यं व्यञ्जनं मकारं लुप्यते । ततः स्वरे परे गतिलोपः । एवं **शाताऽ३उवा** इति रूपं सिद्धम् । **उच्चातेजातमन्धाऽ३साः** (ऊ. ए. ३८४) इति स्वार-सौपर्णे प्रथमायाम् **ऊग्राऽ३उवा** । अत्र पूर्ववद्रूपं सिद्धम् । **वृषापवस्वधाराऽ३या** (ऊ. ए. ४४९ इति स्वारसौपर्णे तृतीयायां **यूजाऽ३उवा** । अत्र पूर्ववद्रूपं सिद्धम् । **प्रसोमदेववीत-याइ** (ऊ. क्षु. ८७५) इति **कण्वरथन्तरे** प्रथमायां **मधाऽ३१ उवाऽ२३** । अत्र धुशब्दे

---

1. M[1] om. स्वरः L[1] शवः for स्वरः
4. S[1] om. मधउवा
6. A[2]M[1-2] om. शताउवा.... इत्यादि
7. S[1] स्वारसौपर्णे for स्वारपर्णे
8. KS[1] देव for देवायां
9. S[1] om. मधाऽ....इत्यादि
10. L[1]My[2] स्वारे for स्वार॰
15. L[1] स्वारे for स्वार

उकारस्य आउभावः । ततः **स्वरे परे** गतिलोपः ॥ २ ॥

भा. आउवा . . . लुप्यते ॥ शाताऽ३उवा । . . . उवाऽ२३ ॥ १–२ ॥

आउवाव्यवहितस्यार्चिकस्यान्त्यः स्वरः आउ भवति । यच्चापदान्तीयं व्यञ्जनं तस्य च लोपः । यथोदाहृतम् । स्वारसौपर्णे **कयानश्चित्र**–(ऊ. ए. ३८२) **वृषापवस्व** (ऊ. ए. ४४९) तृचान्त्ययोः । अत्रैव **उच्चातायां** (ऊ. ए. ३८४) सौपर्णे **उग्रंशर्मेति** च । एतेषु लोपः । तथा कण्वरथन्तरे **प्रसोमदायाम्** (ऊ. क्षु. ८७५) अच्छाकोशं मध्विति ॥

एवंजातीयानि ॥ ३ ॥

वि. एवंजातीयानि एवं प्रकाराणि ॥ ३ ॥

दी. सर्वसामसु एवमादीन्युदाहरणानि ज्ञातव्यानि ॥ ३ ॥

अनाउभावो भृगण्वतरे ॥ ४ ॥

वि. अतः परमनाउभावो वक्ष्यते । **प्रसुन्वानायां** (ऊ. क्षु. ८७६) **कण्वतरे भृगवःशब्दो**ऽनाउ भवति ॥ ४ ॥

भा. अकारः प्रतिषेधे । पूर्वलक्षणेन आउभावः [प्राप्तः] । तस्य प्रतिषेधः । **प्रसुन्वानायां** (ऊ. क्षु. ८७६) **कण्वतरे हता मखं न भृगवः** ॥ ४ ॥

दी. अन्कारः प्रतिषेधे । पूर्वलक्षणेन आउभावे प्राप्ते तस्य प्रतिषेधः ।
१र२र १ २ १ २ १
प्रसुन्वानाय अन्धसाः (ऊ. क्षु. ८७६) इति **कण्वरथन्तरे नभृऽ३आउवाऽ२३** । अत्र भृशब्दे न आउभावः ॥ ४ ॥

---

2. भा. treats the sutras 1&2 as a single sutra and comments accordingly
3. V² adds: वा before भवति
10. KS¹⁻² separate अनाउभावः from sutra 4 and treat it as a अधिकारसूत्र
11. A²M¹⁻² om अतः·····वक्ष्यते
15. My²⁻³R ०भावः प्राप्तः for ०भावे प्राप्ते
17. My²⁻³ भृशब्दो for भृशब्दे

रेतः श्येने ॥ ५ ॥

वि.&भा. गोविच्छ्येने **रेतोधा** इत्यनाउभावः ॥ ५ ॥

दी. **गोवित्पवस्ववसुवाइत्** (ऊ. क्षु. ९०७) इति **श्येने** ण्याविद्रेतोऽ३आउवाऽ२३ । अत्र **तोशब्दे** न आउभावः ॥ ५ ॥

षुप्रनः संतानिनि ॥ ६ ॥

वि.&भा. **इन्द्रोमदायां** (ऊ. स. ७४२) **संतनिनि स वाजेषु प्र नो** इति अनाउभावः ॥ ६ ॥

दी. **इन्द्रोहाउ** (ऊ. सं ७४२) इति **संतनिनि** जाइषुप्रनोऽ३आउवाऽ२३ । अत्र **नो**-शब्दे न आउभावः ॥ ६ ॥

अशिश्रयुः प्रवद्धार्गवे ॥ ७ ॥

वि.&भा. **प्रवद्धार्गवे प्रोअयास्याम्** (ऊ. द. १२७) **अभिधेनवः पयसे** **दशिश्रयुरित्यनाउभावः** ॥ ७ ॥

दी. **प्रोअयासाइत्** । **इन्दुरिन्द्रा** (ऊ. द. १२७) इति **प्रवद्धार्गवे आऽ२शिश्रयूऽ३राउ** । अत्र **युःशब्दे** न आउभावः ॥ ७ ॥

ओष्ठ्यश्चान्तःपादिको नाउ भवाति ॥ ८ ॥

वि. ओष्ठ्यान्यक्षराणि अन्तःपदिकानि **सर्वत्रानाउ** भवन्ति ॥

दी. **ओष्ठ्यश्च** उकारः ओकार औकारः । **अन्तःपदिकः** पदमध्ये वर्तमानः **न आउ भवति** सर्वसामसु ॥ ८ ॥

---

6. भा. om. संतनिनि
7. वि. आउभावप्रतिषेधः for अनाउभावः
11. वि. om. प्रोअयास्याम्
12. K after इति adds: अत्र; वि. आउभावप्रतिषेधः for अनाउभावः
16. M^{1-2} trans. ओष्ठ्यान्यक्षराणि...उदाहरणानि after आउवाऽ२३ (p. 599, l. 2); Ks^{1-3} after भवन्ति ॥ add: इति

यथा मान्दीमाऽ२३४दा । यतोऽ३आउवाऽ२३ । श्रीणन्तो गोभिरूऽ३ आउवाऽ२३ ॥ ९ ॥

मरुच्च (रूऽ२आउवाऽ२३च) ॥ १० ॥

वि. उदाहरणानि । **सोमउष्णायाम्** (ऊ. द. ८८) अग्रेस्त्रिणिधने **मान्दीमा ऽ२३दा** । **यतो ऽ३आउवाऽ२३** (ऊ. द. ८८) । **श्रीणन्तोगोभिरूऽ३आउवाऽ२३** (ऊ. अ. ६०७) ॥

---

5. मरुच्च. The Puṣpasūtra cites examples from the gānas where the labial vowels (ओष्ठ्य) within a word are converted into diphthongs. out of the three instances cited in the present context two are from the gānas of Triṇidhanas and one from santani. But the citation from santani differs from the above two to the extant that the labial vowel therein unlike in the first two stands at the end, not within, of the word cited, Hence the rule laid down by ओष्ठ्यश्चान्तः पदिकोऽनाउ भवति सर्वत्र is not applicable in its entirety to the word मरुत्. Therefore मरुच्च must be regarded as a separate sūtra, which च therein clearly indicates. The vivaraṇa therefore appears to be corret in the present context, which does not convert all the three 8 to 10 sūtras into a single one as done by the Bhāṣya. phulladīpa, however, counts 9 to 10 as a single sūtra

Here it may be noted that the Puṣpasūtra, which is concerned with the sāmagānas, cites instances from the books of gānas and not from the saṁhitā. At the present context the first two examples cited are from two Triṇidhanas and not from the basic verse–texts on which these gānas are sung. Therefore it is but proper if the third example too must be picked up from the gāna concerned and not from its verse text. But we have here मरुत् taken from the verse text चन्द्रो मरुद्गणः (सा. १३११) and not from the concerned sāmagāna. In this उ, the labial sound comes at the end of the word मरुत्, since on formation of gāna त् is dropped from the word. Thefore to be correct the sūtra should be मरूऽ३ आउवाऽ२३ in line with the two previous citations.

पवमानोरथीतमायाम् (ऊ. स. ६८४) सन्तनिनि पदान्तोऽपि मरुच्छब्दोऽनाउ भवति ॥ ९-१०॥

दी. यथा **सोमउष्वाणःसोतृऽ२३४भिः** (ऊ. द. ८८) इत्यग्नेस्त्रिणिधने तृतीयायां **यतोऽ३आउवाऽ२३**। अत्र **तो**-मध्ये ओकारे ओष्ठ्ये न आउभावः। **श्रीणन्तोगो**। **भाइरुत्ताऽ२३४राम्** (ऊ. अ. ६०७) इत्यग्नेस्त्रिणिधने **श्रीणन्तोगोभि-रूऽ३आउवाऽ२३**। अत्र रु-मध्ये उकारे ओष्ठ्ये न आउभावः ॥ **पवाहाउ**। **मान-स्यजाऽ३१उवाऽ२३इ** (ऊ. स. ६८४) इति सन्तनिनि द्वितीयायां **चान्द्रोमरूऽ६ आउवाऽ२३**। अत्र रु-मध्ये उकारे ओष्ठ्ये न आउभावः ॥९-१०॥

भा. ओष्ठ्यश्च . . . सर्वत्र । यथा. . गोभिरुऽ३आउवाऽ२३ ॥ मरुच्च ॥९-१०॥

ओष्ठ्यश्चान्तःपदिकोऽनाउ भवति सर्वत्र। यथोदाहृतम्। **सोमउष्वाणायामग्ने-स्त्रिणिधने**। **श्रीणन्त** इति च। **पवमानस्यजिघ्नतायां** (ऊ. स. ६८४) सन्तनिनि **हरि श्चन्द्रो मरुद्गण** इत्यनाउभावः ॥ ९-१०॥

न योनिं सोमसाम्नि ॥ सीदञ्छ्येनाऽ२३ हाइ। नायाउवा।

नाइमाउवाऽ३ ॥ ११ ॥

वि. यस्तेमदायाम् (ऊ. सं. ३७०) अध्यर्धेडे **सोमसाम्नि श्येनोनयोनिं**-शब्दे **आउवाव्यवहितम्** (पु. सू. ७. ६. १) इत्याउभावे प्राप्ते ओष्ठ्यान्तःपदिकत्वाभ्यामनाउभावे तस्य प्रतिषेधः। पुनरप्याउभावो विधीयत इत्यर्थः। **सीदाञ्छ्येनाऽ२३ः**। **हाइ**। **नाया उवा ना इमाउवाऽ६** ॥ ११ ॥

---

3. M⁴ om. यथा

5. E om. इत्यग्नेस्त्रिणिधने

9. भा. combines sutras 9 and 10 and comments accordingly

15. A²M¹⁻³ om. यस्ते....०साम्नि

16. M¹⁻²om. भावे; K ०भावः for भावे; M¹⁻³ ०पदत्वाभ्याम् for पदिकत्वाभ्याम्

भा. अध्यर्धेडे सोमसाम्नि स्वासु **सीदञ्छ्येनो न योनिमेति** ओष्ठ्यश्चान्तःपदिकः । अस्याउभावः ॥ ११ ॥

दी. **यस्तेमदोवरेणियाऽ३ए** (ऊ. सं. ३७०) इत्यध्यर्धेड**सोमसाम्नि** तृतीयायां **नायाउवा** । अत्र योमध्ये ओकारे ओष्ठ्ये आउभावः ॥ ११ ॥

सुनोत सौपर्णे ॥ १२ ॥

वि- **विलम्बसौपर्णे दिवःपीयूषायाम्** (ऊ. द. १४६) **सुनोता मधुमत्तममिति** नानाउभावः । आउभाव इत्यर्थः ॥ १२ ॥

भा. **विलम्बसौपर्णे** (ऊ. द. १४६) **अध्वर्यो अद्रिभिरि**त्यन्तायां **सुनोता मधु-मत्तम**मित्याउभावः ॥ १२ ॥

दी. **अध्वर्योऽअद्रिभिःसुतम्** । **ईयइयाहाइ** (ऊ. द. १४६) इति **विलम्ब-सौपर्णे** तृतीयायां **सूनाऽ३उवाऽ३** । अत्र **नो-मध्ये** ओकारे आउभावः ॥ १२ ॥

ऊर्मिणा वाभ्रमैधातिथयोः ॥ १३ ॥

वि. **वाभ्रमैधातिथयोस्तरत्समुद्रं पवमान ऊर्मिणे**त्याउभावः ॥ १३ ॥

भा. **अभिसोमायां** (सा. ८५६–७) **वाभ्रमैधातिथयोः ऊर्मिणे**ति आउभावः ॥

दी. **अभिसोमासआ** । **हाऽ३हाऽ३इ** (ऊ. सं. २७८) इति **वाभ्रे** द्वितीयायां **नआउवाऽ३** । अत्र नऊ-शब्दस्य ऊकारे आउभावः । **अभिसोमोहाइ** (ऊ. सं. ३६८) इति **मैधातिथे** द्वितीयायां **नाआउवा** । अत्र नऊ-शब्दस्य ऊकारे आउभावः ॥

---

1. V²P अध्यर्धेड० for अध्यर्धेडे; V²P ०पदिकस्य for पदिकः । अस्य

11. M⁴L¹My²⁻³ उकारे for ओकारे

वर्णसदस्यवप्रवदुद्वत्सामराजेषु स्पर्शानामलोपो यथा

द्युम्नानि । मानूऽ२ । षाणाऽ३माउ । सहस्रिणाऽ३माउ ।
घाजिह्विया ३माउ । वन्मधुमात् । सूऽ२वीरियाऽ३माउ ।
तिरेभाऽ३ नाउ । धृतावसानाऽ३पारियाऽ३सीऽ३ **निर्णिजाऽ३माउ** ।
श्येनोयोनीऽ३म् घा । तवाऽ३न्ताऽ३म् आसदाऽ३दाउ ॥ १४ ॥

वि. **शाक्करवर्णत्रासदस्यवप्रवद्धार्गवोद्वद्धार्गवसामराजेषु** आउवाव्यवहितमपि व्यञ्जनं न लुप्यते । उदाहरणानि **यथा—एनाविश्वायां** (ऊ. ए. ३८५) **द्युम्नानि । मानूऽ२ । षाणाऽ३माउ ॥ इषन्तोकायाम्** (ऊ. ए. ३९३) । **आपत्राऽ२३स्वा । सहस्रिणाऽ३माउ ॥ पुरोजित्याम्** (ऊ. ए. ४८८) **घाजिह्वियाऽ३माउ ॥ प्रोअयास्याम्** (ऊ. द. १२७) **वन्मधुमात् । सूऽ२वीरियाऽ३माउ ॥ शिशुञ्जज्ञानायाम्** (ऊ. क्षु. ९१३) । **तिरेभाऽ३नाउ ॥ असाविसोमायाम्** (ऊ. द. १८८) **घृतावसानाऽ३: पा । रियाऽ३सीऽ३ । निर्णिजाऽ३माउ ॥ श्येनोनयोनीऽ३म् घा । तत्राऽ३न्ताऽ३म् । आसदाऽ३दाउ ।** इत्येतान्युदाहरणानि । एतेष्वेवालोपः । नान्येषु ॥ १४ ॥

भा. **शाक्करवर्णे** एनाविश्वायां (ऊ. ए. ३८५) इषन्तोकायां (ऊ. ए. ३९३) **त्रासदस्यवे** पुरोजित्यां (ऊ. ए. ४८८) **प्रवद्धार्गवे** प्रोंआयास्याम् (ऊ. द. १२७) **उद्वद्भार्गवे** शिंशुजज्ञानायां (ऊ. क्षु. ९१३) **सामराजे** असाविसोमायाम् (ऊ. द. १८८) । एतेषां साम्नामेतेषु तृचेषु यथासंख्येनोदाहरणानि ॥ १४ ॥

---

5. R भा. घातेवा for घा । तवा; A^2M^{1-2} after दाउ add: नतिष्टुपू शिशुमुद्वति

8. A^2M^{1-2} इषन्तायां for इषन्तोकायां; A^2M^{1-2} om. सहस्रिणा...निर्णिजाऽ३माउ (l. 12)

12. A^2M^{1-2} after दाउ add: वा

13. S^1 इत्येतदन्तानि for इत्येतानि; A^2M^{1-2} om. इत्येतान्युदाहरणानि; KMy^1 om. नान्येषु

14. V^2 om. एनाविश्वायां; B^4 trans. एनाविश्वायां after इषन्तोकायां

दी. यथा उच्चा। तेजातमन्धसाः (ऊ. ए. ३८५) इति शाक्करवर्णे तृतीयायां षाणाऽ३माउ। अत्र न मकारस्य लोपः। आइषाम्। तोकायनोदधात् (ऊ. ए. ३९३) इति शाक्करवर्णे सहस्रिणाऽ३माउ। अत्र न मकारस्य लोपः। पूऽ२३४। रः। जिताइ (ऊ. ए. ४८८) इति त्रासदस्यवे घाजिह्वियाऽ३माउ। अत्र न मकारस्य लोपः। प्रोअयासाइत् (ऊ. द. १२७) इति प्रवद्भार्गवे तृतीयायां सूऽ२वीरियाऽ३माउ। अत्र न मकारलोपः। (ऊ. क्षु. ९१३) शिशुञ्जज्ञाऽ२३ इत्युद्वद्भार्गवे तीऽ२रे भाऽ३नाउ। अत्र नकारस्य न लोपः। हाउहोवाऽ३हाइ। आसाविशोमोऽ३आ (ऊ. द. १८८) इति सामराजे तृतीयायां निर्णिजाऽ३माउ। अत्र न मकारलोपः। अत्रैव प्रथमायां तवाऽ३न्ताऽ३म्। आसदाऽ३दाउ। अत्र न तकारलोपः॥ १४॥

न तिष्टुप् शिशुमुद्वति॥ सोमोवाइराऽ२३जमनूराऽ२३ जतिष्टा१३उ॥ १५॥

वि. शिशुञ्जज्ञानायाम् (ऊ. क्षु. ९१३) उद्वति मनुराजतिष्टुविति पकारस्य लोपः। [यथा] सोमोवाइराऽ२३। जमनूऽराऽ२३जतिष्टाऽ३१उ॥ १३॥

भा. उद्वद्भार्गवे शिशुञ्जज्ञानायां (ऊ. क्षु. ९१३) सोमोविराजमनुराजतिष्टुविति स्पर्शस्य पकारस्य लोपः॥ १५॥

दी. नकारः प्रतिषेधे। शिशुञ्जज्ञाऽ२३ (ऊ. क्षु. ९१३) इत्युद्वद्भार्गवे द्वितीयायां जतिष्टाऽ३१उ। अत्र पकारलोपः॥ १५॥

रहस्ये च सर्वमाउ भवति। व्यञ्जनं च न लुप्यते यथा वाजीयानित्यवत्सातीषड्गासिमासु॥ १६॥

---

5. RE om. तृतीयायां; M[4] द्वितीयायां for तृतीयायां

9. E दकारलोपः for तकारलोपः

10. KS[1] A[2] M[1-3] om. सोमो ...जतिष्टाउ

13. A[2]M[1-2] om. सोमो....जमनूरा

16. L[1] ०भार्गव for ०भार्गवे

19. A[2]M[1-2] वाजीये for वाजीय०: and trans. नित्यवत्सातीषड्गासिमासु after स्वराज्यमिति। तथा (p. 604 l. 2)

वि. सर्वं रहस्ये न आउ भवति । व्यञ्जनलोपोऽपि न भवति । यथा **रायोवाजीये** (र. द. १४) **वस्वीरनुस्वराज्यमिति** । तथा **नित्यवत्सासु** (र. ए. ८२) **सप्तास्येभिर्ऋक्कभि रित्यादि** । **अतीषङ्गे** (र. क्षु. १८१) **सिमासु** (र. क्षु. २०४) च । एवमदीनि उदाहरणानि ॥ १६ ॥

भा. रहस्ये च आउभावो व्यञ्जनलोपश्च न भवति । एष उत्सर्गः । यथा स्वासु **रायोवाजीये** (र. द. १४) **वस्वीरनुस्वराज्यमिति** । तथा **नित्यवत्सासु** (र. ए. ८२) **सप्तास्येभिर्ऋक्कभिरिति** प्रतिषेधः । **अतीषङ्गे** (र. क्षु. १८१) **सिमासु** (र. क्षु. २०४) च **सोमउष्वापवस्ववाजसातयोः** । एवमादीनि ॥ १६ ॥

दी. **रहस्ये** चारण्येगेये **सर्वमार्चिकं न** आउ **भवति** । सर्वं **व्यञ्जनं च न लुप्यते** । उदाहरणानि–**यथा वाजीयनित्यवत्सातीषङ्गसिमासु** ॥ **यथा एस्वादोः** । **इत्था विषूवतो** (र. द. १४) इति **रायोवाजीये जायमाऽ३१उवाऽ२३** । अत्र पदस्यान्ते न आउभावो न व्यञ्जनलोपः । **ए आया** । **रुचा हरिण्या** (र. ए. ८२) इति **नित्यवत्सासु कामिराऽ३१उवाऽ२३** । अत्र पदस्यान्ते न आउभावो न व्यञ्जनलोपश्च । **एसोमउष्वा** (र. क्षु. १८१) इत्य**तीषङ्गे** द्वितीयायां **आक्षआऽ२३ उवाऽ२३** । अत्र पदस्यान्ते न आउभावः । **एऽ२** । **सोमउष्वाणस्सोतृभाइः** (र. क्षु. २०४) इति **सिमासु** द्वितीयायाम् **आक्षआऽ३१उवाऽ२३** । अत्र पदस्यान्ते न आउभावः । एवमादीनि ॥ १६ ॥

यत्राउभावो व्यञ्जनलोपश्च तद्वक्ष्यामः ॥ १७ ॥

---

1. A^2M^{1-2} om. अपि; A^2M^{1-2} om. रायो

2. A^2M^{1-2} इत्यादि; S^1 इत्यादीन्युदाहरणानि for इति । तथा; $A^2M^{1-2}S^1$ before नित्यवत्सासु add: नित्यवत्सातीषङ्गसिमासु च । उदाहरणानि

5. V^2 व्यञ्जनं च न लुप्यते for व्यजनलोपश्च न भवति

9. R. आरण्यके for अरण्येगेये

12. M^4 after लोपः adds: च

15. R. om. एऽ२ ...ना आउभावः

वि. **यत्राउभावो भवति यत्र व्यञ्जनलोपश्च तद्वक्ष्यामः** ॥ १७ ॥

भा. रहस्ये यत्राउभावो भवति व्यञ्जनलोपश्च तदुत्तरत्रोदारिष्यामः ॥ १७ ॥

दी. रहस्ये **यत्राउभावो व्यञ्जनलोपश्च** भवति **तद्वक्ष्यामः** कथयिष्यामः । वक्ष्यमाणेषूदाहरणेषु ॥ १७ ॥

स्वरान्तः कण्ठ्यः सर्वत्र ॥ १८ ॥

वि. अ आ ए ऐ ओ औ विसर्गश्च इत्येते कण्ठ्याः । **कण्ठ्यः स्वरान्तः सर्वत्राउ** भवति । **मन्द्रायायातिधाऽ२३होइरायाऽ३ः उवाऽ२३** (र. क्षु. २०४) कस्मिन् प्राप्ते एतदारभ्यते । **न वृद्धम्** इति संनिकर्षप्रतिषेधात् **रायाऽ३ आउवाऽ२३** इति प्राप्तेऽनेन वचनेन संधिर्भवति । **रायाऽ३१उवाऽ२३** । इति ॥ १८ ॥

भा. **मन्द्रया याति धारये-** (र. क्षु. २०४) ति याशब्दे आकारः कण्ठ्यः । तस्याउभावो भवति । कः(?कस्मिन्)प्राप्ते एतदारभ्यते। अत्र **न वृद्धंर** इति संनिकर्षप्रतिषेधाच्च रा३या३ आउवेति प्राप्ते आउभावः । वचनान्तरौघसंधिर्भवति । रायाउवेति भवति । तस्मादत्राउभावो भवति ॥ १८ ॥

दी. **अकारादिस्वरोऽन्ते यस्य स कण्ठ्यः** कण्ठस्थानीयः । अकारः आकारः विसर्जनीयः । ए ऐ तु कण्ठताल्व्यौ । ओ औ तु कण्ठोष्ठ्यौ । तस्य कण्ठ्यस्याउ

---

1. A^2M^{1-3} om. भवति यत्र; M^{1-3} before तद् adds: भवति

3. R before भवति adds: न

5. M^{1-2} उकण्ठ्यः for कण्ठ्यः

6. K after आ adds: विसर्गहा and om. विसर्गश्च; $A^2M^{1-2}S^1$ om. विसर्गश्च; KA^2S^1 कण्ठ्याः....भवन्ति for कण्ठ्यः....भवति

7. S^2 अस्मिन् A^2M^1-$^2S^1$ तस्मिन् for कस्मिन्; M^{1-2} संनिकर्षनिवृत्यर्थं for न वृद्ध... प्रतिषेधात् A^2S^1 निवृत्यर्थम् for प्रतिषेधात् :

8. $A^2M^{1-2}S^1$ om. आउवा...उवाऽ२३ । इति

11. V^2 after आरभ्यते adds: इति; V^2 om. अत्र; P अनु for अत्र; V^2P प्रतिषेधाः for प्रतिषेधाच्च

12. P वचनान्तरौप्य V^2 वचनान्तरोप्य for वचनान्तरौघ

भवति सर्वसामसु । उदाहरणम्– एऽ२ । **सोम उष्वाणःसो । वृभाइः** (र. क्षु. २०४) इति **सिमासु** प्रथमायां **रायाऽ३१उवाऽ२३** । अत्र **या**-शब्दे अकारः कण्ठ्यः । तस्य आउभावो भवति । एवमादिषु ॥ १८ ॥

विष्णवे सहस्रिणमिति यण्वापत्ययोः ॥ १९ ॥

वि. अर्षासोमायां यण्वापत्ययोः सोमा अर्षन्तु विष्णवे (र. द. ११) **आ पवस्व सहस्रिणम्** (र. सं. ३३) इत्येतौ शब्दौ आउ भवतः । व्यञ्जनलोपश्च ॥१९॥

भा. सोमा अर्षन्तु विष्णवे (र. द. ११) इति **आ पवस्व सहस्रिणम्** (र. सं. ३३) इति च आउभावो व्यञ्जनलोपश्च ॥ १९ ॥

दी. अर्षासोमद्युमत्तमः । एऽ२ (र. द. ११) इति **यण्वे** द्वितीयायां **सोमा अर्षन्तुवाऽ२३ इष्णवाउ** । अत्र **वे**-मध्ये एकारे आउभावः । तृतीयायाम् **आपवस्व सहाऽ२३स्रिणाउ** । अत्र णकारमध्ये अकारे आउभावो व्यञ्जनलोपश्च । **हाउहाउहाउ** । **अर्षासोमद्युमाऽ२३त्तमाऽ३ः** (र. सं. ३३) इति अपत्ये द्वितीयायां **सोमाअर्षन्तुवाऽ२३ इष्णावाउ** । अत्र एकारे आउभावः । तृतीयायाम् **आपवस्व सहाऽ२३स्रिणाउ** अत्र णकारमध्ये अकारे आउभावो व्यञ्जनलोपश्च ॥ १९ ॥

अञ्जोरैवतयोर्व्यम् ॥ २० ॥

वि. अञ्जोवैरूपरैवतर्षभयोस्तालव्यस्याउभावः । अञ्जोवैरुपे मनीषिण इत्याउभावः । **रैवते द्यविद्यवी**त्याउभावः ॥ २० ॥

भा. अञ्जोवैरूपे (र. सं. ३१) **रैवतर्षभे** (र. द. १८) **तालव्यस्याउभावः** ।

---

8. V² after लोपश्च adds: सोर२मार अर्षन्तु वा३३इष्णावा३ऊ । आ पवस्व

16. KS¹-² ऋषभोरैवतयोः for रैवतर्षभयोः

17. KS¹-² ऋषभोरैवते for रैवते

अङ्गोवैरूपे **समुद्रस्यधिविष्टपे मनीषिणः** [इति] रैवतर्षभे **द्याविद्यवीति । ख्या आगहीति** च ॥ २० ॥

दी. **अग्निसोमा । सआऽ३१२उवाऽ२३** (र.सं. ३१) इति **अङ्गोवैरूपे मनाऽ३१२उवाऽ२३इ** । अत्र **नी**-मध्ये ईकारे तालव्ये आउभावः । **सुरूपकृत्नु**-मूतये (र. द. १८) इति **रैवतऋषभे द्याविद्यवाइ**(द्विः)-**द्याविद्यवाऽ३१उ** । अत्र विमध्ये इकारे तालव्ये आउभावः । तृतीयायां **ख्याआगहाइ(द्विः)** । **ख्याआगहाऽ३१उ** । अत्र हिमध्ये इकारे तालव्ये आउभावः ॥ २० ॥

अःकारश्च रैवते ॥ २१ ॥

वि. **रैवतर्षभे** अःकारश्चाउ भवति । **वातोमदाऽ३१उ** (र. द. १८) ॥

भा. **अःकारो** आउ भवति । **तालव्यं चेति** । अःकारो **वातो मदा**[उ] (र. द. १८) इति ॥ २१ ॥

दी. **सुरूपकृत्नुमूतये** (र. द. १८) इति **रैवतऋषभे** द्वितीयायां **वातोमदा-ऽ३१उ** । अत्र अःकारे आउभावः । चकारात्तालव्यस्य च ॥ २१ ॥

सिमासु सर्वमाउ भवति ॥ २२ ॥

वि. **सोमउप्वा-पवस्ववाजयोः सिमासु सर्वमाउ भवति** ॥ २२ ॥

भा. सोम उप्वा-पवस्वयोः सिमासु सर्वस्याउभावः ॥ २२ ॥

दी. एऽ२ । **सोमउप्वाणस्सोतृभाइः** (र. क्षु. २०४) इति **सिमासु** सर्वस्य कण्ठ्यस्य तालव्यस्य चाउभावः । **अधाऽ३१उवाऽ२३** । अत्र इकारस्य तालव्यस्य आउ-

9. $S^{1}KS^{8}$ ऋषभोरैवते for रैवतर्षभे

10. $V^{2}P$ मद इति, B^{4} मदा इति for मदाउ इति

13. R आःकारे for अःकारे

15. M^{1-2} वाजसातयोः for वाजयोः; A^{3} om. सिमासु

भावः । एवमादिषु । एऽ२ । **पवस्ववाजसातयाई** । (र. क्षु. २०५) इति सिमासु एवमेव ॥ २२ ॥

अनृगन्ते ॥ २३ ॥

वि. ऋगन्ते विषये सिमासु सर्वं नाउ भवतीति । **सोमो दुग्धाभिः** । पवमान **विधर्मणि** । **क्षाश्वाउवायाम्** (पू. सू. ६. ५. १९) **अवृद्धादिपदान्तात्** (पु. सू. ७. ९. १) इत्येताभ्यामत्वयकारव्यवधानौ भवतः । **आश्वआऽ३१उवाऽ२३** (र. क्षु. २०४) **माणियाऽ३१उवाऽ२३** (र. क्षु. २०५) मन्द्रयायेति **स्वरान्तः कण्ठ्यः** (पु. सू. ७. ९. १६) इत्यादिनाउभावः ।। २३ ।।

भा. सिमास्वेव एतयोरेव तृचयोः आउभावप्रतिषेधः ॥ २३ ॥

दी. अन् प्रतिषेधे । **सोम उष्वा** (र. क्षु. २०४) इत्यादिसिमासु ऋगन्ते सर्वस्य न आउभावः । **आश्वआऽ३१उवा२३** । इत्यादिषु ऋगन्तेषु ॥ २३ ॥

छान्दसीषु दिशोवसोराणां घोनाम् ॥ २४ ॥

वि.&भा. **छान्दसीषु** सिमासु गातुमनुशंसिषो दिशः पूर्वीणां पुरूवसो यः शविष्ठः शूराणाम् । **योमंहिष्ठोमघोनाम्** । एतेष्वनुभावो व्यञ्जनलोपश्च भवति ॥ २४ ॥

दी. **छान्दसीषु** । एऽ२ । **विदामघवन्विदाः** (अ. गे. ६. २. २९१–३) इति छन्दस्सु सिमासु **दाइशाऽ३१उवाऽ२३** । अत्र **श**-मध्ये अकारे आउभावो व्यञ्जन-लोपश्च । **वसाऽ३१ उवाऽ२३** । अत्र **सो**-मध्ये ओकरे आउभावः । द्वितीयायां **यश्शविष्ठश्शूराऽ२** । **णाऽ३१उवाऽ२३** । अत्र **णा**-मध्ये आकारे आउभावो व्यञ्जनलोपश्च ।

---

3. M[1-2] ऋगन्त for ऋगन्ते; A[2]M[1-2] om. इति; M[1-2]A[2] दुग्धा for दुग्धाभिः

6. A[2] मन्द्रयायेति for माणियाऽ३उवाऽ२३

10. E after इत्यादिषु adds: तोशते । शात आऽ३१उवाऽ२३ । तारआऽ३१उवा । माणियाऽ३१ उवाऽ२३ । इत्यादिषु ।।

13. भा. om. भवति

योम॰हिष्ठोमघोऽ२ । **ना**ऽ३१ **उवा**ऽ२३ । अत्र **ना**-मध्ये आकारे आउभावो व्यञ्जन-लोपश्च ॥ २४ ॥

ऋगन्तेषु च ॥ २५ ॥

वि.&भा. छान्दसीषु **ऋगन्तेषु** च आउभावो व्यञ्जनलोपश्च भवति । **म॰हिष्ठ वज्रिन्नृञ्जस** इति प्रथमायाम् । **स नः स्वर्षदिति द्विषः** इति द्वितीयायाम् । **समर्येषु ब्रवावहा** इति तृतीयायाम् ॥ २५ ॥

दी. **विदामघवन्** (अ. गे. ६. २. २९१–३) इति छान्दसीषु सिमासु **ऋगन्ते जासा**ऽ३२ **उवा**ऽ२३ । अत्र **से**-मध्ये एकारे आउभावः । द्वितीयायां **द्वाइषा**ऽ३१-**उवा**ऽ२३ । अत्र **ष**-मध्ये अकारे आउभावो व्यञ्जनलोपश्च । तृतीयायां **वाहा**ऽ३१ **उवा**ऽ२३ । अत्र हैमध्ये ऐकारे आउभावः ॥ २५ ॥

अक्षारित्यस्य शब्दस्य रेफलोपः स्वरघोषवत्सु प्रत्ययेषु ॥ २६ ॥

वि. **अक्षारि**त्येतस्मिन् शब्दे **रेफ**स्य लोपः **स्वरघोषवत्सु प्रत्ययेषु** । संधौ स्वरप्रत्ययस्योदाहरणम् । नित्यवत्सातीषङ्गसिमासु च । तेषु चाकारमात्रस्यैवात्वम् । न वि-सर्गस्य । कथं न? विसर्गस्य निवृत्तिं करोतीत्यतः न विसर्गस्येत्यवगम्यते । तस्य लोपा-र्थमिदमारभ्यते । घोषस्योदाहरणम् उत्तरे मानवे स्तावे संधिविषयेऽन्यत्राघोषप्रत्ययत्वा-दलोपः ॥ २६ ॥

---

2. M[1] after लोपश्च add: भवति and E adds: जितमाऽ३१उवाऽ२३ । इत्यादिषु न आउभावः
4. A[2] om. छान्दसीषु; भा. after छान्दसीषु एव; adds: M[1-3] after लोपश्च add: ऋगन्तेषु भा. om. भवति;
5. A[2]M[1-3] om. द्विष इति
12. S[1] om. अक्षारित्येतस्मिन्····प्रत्ययेषु
13. A[2]M[1-3] om. च
14. K अथ for कथं न; M[1]A[2]S[1] वृत्तिं M[2] कृत्यं M[1] वृद्धिं for निवृत्तिं
15. My[1]KS[2] अनेन, A[2]इत्यर्थः for इत्यतः; KS[1-3] उपगम्यते for अवगम्यते

भा. अक्षारित्येतस्मिन् शब्दे रेफस्य लोपः। संधौ स्वरप्रत्ययस्य घोषप्रत्ययस्य च। अत्र किं प्राप्तम्? **आःकारोत्वम्** (पु. सू. ६. ५. १) इति प्रकृत्याक्षाश्चाउवायां-प्रत्यये **नित्यवत्सातीषङ्गसिमासु** (पु. सू. ६. ५. १८) इति। अत्र च आकारमात्रस्या-उभावो न विसर्जनीयस्य। कथं गम्यते? येन निवृर्त्तिं करोति ततोऽवगम्यते न विसर्जनीयस्य लोप इति। लोपे तु रौघसंधिर्भवति। तथा सति अक्षाउवेति भवति। तस्मादलोपः। तत्र तस्माद्विसर्जनीयलोपार्थमिह तु पुनरारम्भो युक्तः। नित्यवत्सातीषङ्गसिमासु स्वरप्रत्ययस्य लोपः। व्यञ्जनप्रत्ययस्योदाहरणानि उत्तरे मानवे **सोमो दुग्धाभिरक्षारिति**। प्रस्तावविषये हकारघोषे प्रत्यये रेफलोपः। अन्येषु तु सामसु अघोषप्रत्ययत्वादलोपः॥ २६॥

दी. **सोमउष्वाणःसोतृभिः** (सा. ९९७–८) इत्येतासु नित्यवत्सातीषङ्गसिमासु द्वितीयायाम् **आक्षआऽ२१उवाऽ२३**। अत्राक्षारित्यस्य शब्दस्य विसर्गस्य रेफं कृत्वा रेफलोपः। अकारादिस्वरे प्रत्यये। हकारादिघोषवति प्रत्यये वा। **आकारोऽत्वम्** (पु. सू. ७५.१) इत्यनेन ह्रस्वः। **होवाइ**। **सोमउष्वाणस्सोतृभिः**। **होवाइ** (ऊ. द. ८५) इत्युत्तरे मानवे तृतीयायां **होवाइ**। **सोमोदुग्धाभिरक्षाः**। **होवाइ**। अत्र संधौ **अक्षारित्यस्य** शब्दस्य विसर्गस्य रेफं कृत्वा रेफलोपः। घोषवति हकारे प्रत्यये। अन्येषु तु सामसु अघोषप्रत्ययत्वान्न लोपः॥ २६॥

ज्योक्कः शब्दस्त्वो त्वं हे॥ २७॥

वि. मराये **मारे** **असमन्मघवञ्ज्योक्कः**। [अत्र] कःशब्दस्य ओत्वं भवति हकारादौ स्तोभे प्रत्यये। कः। कः। को। हाउहाउहाउ॥ २७॥

---

1. B[4]A[1] रेफ० for रेफस्य

2. P आःकारो० for आकारो०

4. B[4] तेन for येन; P विवृर्त्तिं, V[2] विवृत्तिः for निवृर्त्तिं

5. PV[2] रौंप० for रौघ०; B[4] आक्षाउ for अक्षाउ; V[2]P om. वेति

14. E अकारे, L[1] गकारे for हकारे

16. M[1-3] ज्योकं KA[2]S[1-2-3] ज्योक, L[1]M[4] ज्योकं for ज्योक्कः; M[1-2] शब्दस्येत्वं for शब्दस्त्वोत्वं A[2]M[1-2] after हे adds: प्रत्यये

भा. **श्रुधीहवायां** (ऊ. क्षु. ८७३) मराये मारे अस्मन्मघवञ्ज्योक इति कः-शब्दस्य ओत्वं हकारे प्रत्यये ॥ २७ ॥

दी. **श्रुधाइ** । **हवां** (ऊ. क्षु. ८७३) इति मराये तृतीयायां **मघवञ्ज्योकः** । **कः** । **को** । हाउ-इति हकारे प्रत्यये पूर्वस्य कशब्दस्य तु ओत्वं भवति ॥ २७ ॥

सकारलोपः ॥ श्रवस्तमः साह्वान्विश्वायां संहिते ॥ २८ ॥

वि. सकारलोपमुदाहरिष्यामः । **साह्वान्विश्वायां** (ऊ. ए. ४१८) संहिते **विश्रवस्तम** इति सकारलोपः ॥ २८ ॥

भा. **अदाभ्यः** (ऊ. ए. ४१८) संहिते अग्निस्तुविश्रम इति सकारलोपः ॥२८॥

दी. **अदाभ्यः** **पुरः** । **आऽ२इता** (ऊ. ए. ४१८) इति संहिते तृतीयायां **साह्वान्विश्वा** । अ । इत्यस्यां श्रवाऽ२३ । अत्र सकारलोपः ॥ २८ ॥

सुशास्तिभिरिलान्दद्वितीयायाम् ॥ २९ ॥

वि.&भा. **इलान्दद्वितीयायाम्** **ऊर्जोनपाज्जातवेदः** **सुशस्तिभिरिति** सकारलोपः ॥ २९ ॥

दी. **अग्नेतवश्र** । **इडा** (र. सं. ७०) इतीलान्दस्य द्वितीयायाम् **ऊर्जोनपाज्जा** । **इडा** । (र. सं. ७०) इत्यस्यां **तिमिमन्दस्व** । अत्र **ति**-मध्ये सकारलोपः ॥ २९ ॥

मानस्तराभजमवर्तें थादौ लोपः ॥ ३० ॥

---

1. PV[2] मघवः for मघवन्
4. RL[1]M[4] ओ for ओत्वं
5. वि separates सकारलोपः from the sutra, and treats it a अधिकारसूत्र
6. A[2] om. साह्वान्विश्वायां संहिते
12. A[3] om. ऊर्जोनपात्; B[4] om. इलान्दद्वितीयायां

वि.&भा. **जमदग्नेरभीवर्ते मानस्तरभीत्यत्र** उद्गीथादौ सकारलोपः । **मानस्तरमिमातयेमानोराहाउ** । **ताऽ२ः** । **अभाऽ२इमातयाऽ२३इ** ॥ ३० ॥

दी. **पिबासुतस्यरसिनोमत्स्वाहाउ** (ऊ. स. ७१५) इति **जमदग्नेरभीवर्ते** तृतीयायां **मानस्तरमिमातयेमानोहाउ** इति प्रस्तावः । **ताऽ२ः** । इति उद्गीथादौ **ता**-मध्ये सकारलोपः ॥ ३० ॥

पराङ्गं वा ॥ ३१ ॥

वि. परस्य पर्वणस्त इत्येतस्य अङ्गं वा भवति । यथाधीमहे । **स्ताऽ२ः** ॥

भा. अथवा **पराङ्गं** भवति । यथाधीमहे स्ता इति ॥ ३१ ॥

दी. अथवा सकारः परस्य तकारस्याङ्गं भवति । **स्ताऽ२ः** । एवम् ॥ ३१ ॥

सुहस्ताः स्तावे ज्ञीयस्य लोपः ॥ ३२ ॥

वि.&भा. **आजागृविर्** (ऊ. स. ७५१) [इति] यज्ञायज्ञीये द्वितीयायां अक्षरसंसर्गप्रस्तावे **सुहस्ता** इति **स्ताः**शब्दे सकारलोपः । यथाधीमहे । **तास्साः** ॥

दी. **आजाऽ५गृ** । **वाऽ३इर्वाऽ३इप्रऋतम्** (ऊ. स. ७५१) इति **यज्ञायज्ञीये** द्वितीयायां **ताःसाः** । अत्र प्रस्तावे **सुहस्ता** इति **ता**-मध्ये सकारलोपः ॥ ३२ ॥

पराङ्गं वा ॥ ३३ ॥

वि. तकारस्याङ्गं वा भवति । स्तास्साः ॥ ३३ ॥

भा. **पराङ्गं वा** भवति सकारः **स्तास्सा** इति ॥ ३३ ॥

---

2. भा. ता इति आरम्भः; A[2] ताद्धि अमातयभ्य for ताऽ२…तयाऽ२३ई
4. M[4] प्रस्तावे for प्रस्तावः
11. K om. आजा….सकारलोपः; भा. trans. आजागृविर् after यज्ञायज्ञीये
12. PV[2]B[4] संसर्गे for संसर्ग; भा. ता३ सा३ for इति स्ताःशब्दे; PV[2]A[1] om. यथाधीमहे । तास्साः
17. PV[2] trans. भवति after इति; B[4] adds: भवति after इति

दी. अथवा सकारः परस्य तकारस्य अ[illegible] भवति । स्ताः । सा़ः । एवम् ॥ ३३ ॥

इन्द्रायेन्दविति क्रौञ्चे वलोपः संधौ ॥ ३४ ॥

वि. **क्रौञ्चे संधौ** विषये **इन्द्रायेन्दविति** वकारलोपः । **इन्द्रायेन्दाऽ१ औहो** ॥ ३४ ॥

भा. इन्द्रायेन्दायां (ऊ. द. १००) **क्रौञ्चे संधौ** वकारलोपः । **इन्द्रायेन्दा३ औ३हो** इति । गतिश्चान्तस्थामापद्यते इति गतेर्वकारो भवति । तस्य वकारस्य मध्य इति लोपः । संधौ गतिः ॥ ३४ ॥

दी. **इन्द्रायेन्दाऽ१औहो** (ऊ. द. १००) इति गायत्रीक्रौञ्चे दाऽ१ । अत्र **गतिश्चान्तस्थामापद्यते** इत्यनेन उगतिर्वकारो भवति । तस्य वकारस्य संधौ लोपः ॥

उगतिर्विरते ॥ ३५ ॥

वि.&भा. विरामे **उगतिर्भवति** । इन्द्रायेन्दवित्यत्र ॥ ३५ ॥

दी. **विरते** विरामे **उगतिः** भवति । इन्द्रायेन्दाऽ३१उ । औहो इत्येवम् ॥

ह्रियकारसंयुक्ते विकृष्टे पूर्वौ यकारः प्लुप्त आकारः संपद्यते रयिंस्सोमश्रवाऽ३१ आऽयाम् ॥ ३६ ॥

---

2. E add: भवति after एवम्
7. P गतिं वान्तस्थाम् V[2] गतिः वान्तस्थाम् for गतिश्चान्तस्थाम्
10. L[1]M[4] इत्यानेनाउगतिः for इत्यनेन उगतिः
11. M[1-2] विरामे for विरते
12. M[1-2] विरते for विरामे; भा. adds: एव after उगतिर् and om. इन्द्रायेन्दवित्यत्र
13. My[2] om. इत्येवम्
14. My[2] लुप्तः for प्लुतः

वि. द्वियकारसंयोगे विकर्षे विषये **पूर्वो यकारः प्लुतः** सन् **आकारो** भवति । **रयिंसोमश्रवाऽ१ आऽ३याम्** । सैन्धुक्षिते **पवस्वदेवआयुषाक्** (ऊ. अ. ६५३) । प्लुतस्य यकारस्यैवेत्यर्थः ॥ ३६ ॥

भा. **पवस्वदेवआयुषगित्यत्र** द्वितीयायां **रयिंस्सोमश्रवाय्यमिति** पूर्वो **यकारः प्लुत आकारः संपद्यते** । तदुदाहृतम् ॥ ३६ ॥

दी. द्वाभ्यां **यकाराभ्यां संयुक्ते** अक्षरे **विकृष्टे** विकर्षे प्राप्ते पृथग्भूते **पूर्वो यकारः प्लुतस्त्रिमात्रः अकारः संपद्यते** संपन्नो भवति । तस्य उदाहृतम् । **पवस्वदो** । **हाइ** (ऊ. अ. ६५३) इत्यैडसिन्धुक्षिते द्वितीयायां **रयिंस्सोमश्रवाऽ१ आऽ३याम्** । अत्र **पूर्वे यकारे** प्लुत आकारः संपद्यते ॥ ३६ ॥

यि क्रौञ्चे निधनत्वात् । पावाऽ२मानाऽ२श्रवाऽ३४५ ।
योऽ२३४याम् ॥ ३७ ॥

वि. **अयंपूषायाम्** (ऊ. द. ४९) **क्रौञ्चे** उत्तमे पूर्ववदाकारे प्राप्ते **यि** भवति । **पवमानश्रवायियमिति** निधनत्वात् । **निधने हीषीस्थम्** (पु. सू. ३. १. १२)इति प्रकृतिरेव भवति । **पावाऽ२३माऽनाऽ२** । **श्रवाऽ३४५** । **यीऽ२४३याम्** ॥ ३७ ॥

भा. अयंपूषा-तृतीयायाम् उत्तमे **क्रौञ्चे** पूर्ववदाकारे प्राप्ते प्रतिषेधः । **निधनत्वात्** । **निधने हीषीस्थं सर्वत्र** (पु. सू. ३. १. १२) इति प्रकृतिभाव एव भवति ॥

दी. **अयंपूषा** । **हों** । **रयिर्भगाद्द्ए** (ऊ. द. ४९) **इत्युत्तमे क्रौञ्चे श्रवाय्य**मित्यत्र पूर्ववदाकारे प्राप्ते यिकारो भवति । कुतः ? **निधनत्वात्** । **निधने हीषीस्थं**

1. A³M¹⁻³ om. द्वि; A³ विकल्पे for विकर्षे
2. A³ om रयिंसोम...प्राप्ते यि भवति (l.12); M¹⁻³ om. पवस्व देव आयुषाक्
5. My³ लुप्तः for प्लुतः
9. My³ लुप्ते for प्लुते
12. A¹ उत्तम for उत्तमे
16. V²P प्रकृताभावः for प्रकृतिभावः
17. M⁴ उत्तरे for उत्तमे
18. My³ इकारः for यिकारः

सर्वत्र (पु. सू. ३. १. १२) इति वचनेन प्रकृतिभाव एव भवति। **यीऽ२३४याम्**। एवम्।। ३७ ॥

याशब्दः कुण्डपाय्ये महेनायां च प्राणपात् कुण्डपायाऽ-२३याः। सत्यश्रवासि वाय्ये ॥ ३८ ॥

वि. एतयोः पूर्ववदाकारे प्राप्ते यकारो भवति। दैवोदासरायोवाजीययोरुदाहरणम्। **प्रणपात्कुण्डपायाऽ२३२याः** (ऊ. द. २२) **सत्यश्रवसिवाऽ३**। **यायाइ** (र.-स. १२३) ॥ ३८ ॥

भा. **अयम्**–(ऊ. द. २२) दैवोदासे **कुण्डपाय्य** इति द्वियकारसंयोगात् पूर्ववत् आकारे प्राप्ते यकार एव भवति। तथा महेनायां (र. स. १२३) रायोवाजीये पूर्ववदाकारे प्राप्ते यकारः ॥ ३८ ॥

दी. **अयन्त इन्द्रसोऽ४मः** (ऊ. द. २२) इति रात्रिदैवोदासे **प्रणपात् कुण्ड पायाऽ२३याः**। अत्र पूर्ववदाकारे **प्राप्ते याशब्दो** भवति। **एमाहे**। **नोअद्यबोघ-** (र. स. १२३) इति **रायोवाजीये** तृतीयायां **सत्यश्रवसिवाऽ३**। **यायाइ**। अत्र पूर्ववदाकारे **प्राप्ते** याशब्दो भवति ॥ ३८ ॥

अवृद्धः स्तोभात्पर इकारः संपद्यते। रायिंस्सोमश्च। वौ ऽ३हो। वाहा। इया ऽ२म् ॥ ३९ ॥

---

3. S[1]-[3]A[2]M[1]-[2] °वाय्यः for पायाऽ२३याः
5. A[2] अकारे for आकारे; A[2] °श्वज्ञीययोः for रायोवाजीययोः; M[1]-[3]S[1] om. रायोवा
6. M[2] om. या....यायाइ
8. P आतूनकूपारे, V[2] रात्रिदैवोदासे for अयम् दैवोदासे
9. B[4] after यकारः। adds: प्रणयात्कुण्डपाया३३या३
15. वि. वृद्धः for अवृद्धः; M[2] om. अवृद्धः....हाइ इयाम्

वि. अवृद्धस्तोभात् परः द्वियकारसंयोगे पूर्वो विकृष्टो यकार इकारो भवति । **रयिंसोम । श्र । वौऽ३हो । वाहाइ । इयाऽ२म्** (ऊ. द. १४८) ॥ ३९ ॥

इति पुल्लसूत्रविवरणे तृतीयस्य षष्ठः खण्डः ॥ ६ ॥

भा. **पवस्वदेव–** (ऊ. द. १५८) द्वितीयायां भासे अवृद्धस्तोभात्परः द्वियकार-विकृष्टः पूर्वो यकार इकारमापद्यते ॥ ३९ ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य षष्ठी कण्डिका समाप्ता ॥ ६ ॥

दी. **पव । स्वाऽ३ दाइ । वाः । ईया** (ऊ. द. १५८) इति भासे द्वितीयायां **वाहाइ । इयाऽ२म् ।** अत्र **याहाइस्तोभात्परोऽवृद्धो द्वियकारे** विकृष्टः पूर्वो यकारः इकारमापद्यते ॥ ३९ ॥

इति फुल्लदीपे सप्तमप्रपाठकस्य षष्ठः खण्डः ॥ ६ ॥

॥ लोपालोपौ समाप्तौ ॥

सप्तमः खण्डः

अतिहारः

अनुस्वारः स्पर्शःस्ववर्गीयेप्रत्यये रेफः स्पर्शोष्माभिः संयुक्त एते शब्दास्त्रयोऽन्तःपादिकाः स्तोभव्यवहिताः

---

4. V^2 द्वियकारविकृष्टपूर्वः; B^4 द्वियकारे विकृष्टे द्वियकारविकृष्टः for द्वियकारविकुष्टः पूर्वो यकारः

10. M^4 फुल्लदीपिकायां for फुल्लदीपे

14. My^{1-3} before अनुस्वारः add: श्रीगणेशाय नमः ॥; M^{1-3} °स्वारस्पर्शः for °स्वारः स्पर्शः; A^2 om. प्रत्यये

15. A^2 संयुक्ताः for संयुक्तः; A^2M^{1-3} पादिकाः for पदिकाः

सर्वत्रातिह्रियन्ते स्तोभान्ते विरते लोपः संधावलोपः ॥ १ ॥

वि. लोपान्तरमतिहारलक्षणं वर्तिष्यते । **अनुस्वारः स्पर्शः समानवर्गीये प्रत्यये ।** पञ्चविंशतिः स्पर्शाः समानवर्गाः प्रत्ययाः । **रेफः स्पर्शोष्मप्रत्ययः ।** ऊष्माणः चत्वारः । **अन्तःपदिका एते** अनुस्वारस्पर्शरेफा भक्तयो येन **स्तोभेन** व्यवहितास्तेन स्तोभेन न संधीयन्ते । किं तर्हि ? तं स्तोभमतीत्य **परेण** स्पर्शेन ऊष्मणा **वा** सहैकीभवन्ति । यदा स्तोभान्ते विरामस्तदैषामनुस्वारादीनां लोपः । संधौ विषये लोपो न भवति ॥ १ ॥

भा. लोपालोपादनन्तरमतिहारलक्षणम् । तस्मादतिहारलक्षणं वर्तिष्यते । **अनुस्वारः स्पर्शः** समानवर्गीये **प्रत्यये ।** पञ्चविंशतिस्पर्शाः समानवर्गाः प्रत्ययाः इत्यर्थः । **रेफः स्पर्शोष्मभिः संयुक्तः** स्पर्शोष्मप्रत्यय इत्यर्थः । ऊष्माणश्चत्वारः । अन्तःपदे एते अनुस्वारस्पर्शरेफाः सन्तः स्तोभेन व्यवहितास्तेन स्तोभारम्भेण सह [न] संधीयन्ते । किं तर्हि ? अतीत्य स्तोभं **परेण** स्पर्शेन ऊष्मणा **वा** सहैकीभवन्ति । यदा च **स्तोभान्ते** विरामो भवति तदैतेषाम् अनुस्वारस्पर्शरेफाणां लोप एव भवति । संधावलोपः । अतिहार एव भवतीत्यर्थः ॥ १ ॥

दी. इदानीं व्यञ्जनानामतिहारलक्षणमुच्यते । **कादयो** मावसानाः स्पर्शाः ।

---

1. भा. combines this sutra with the following one.
2. KS^{2}My^1 अनुस्वारक्रमजस्पर्शरेफस्वरभक्तीनां लक्षणं पूर्वमेवोक्तम् for अनुस्वारन्तः....ऊष्माणश्चत्वारः (l. 4); S^1 समानस्वीये for समानवर्गीये
3. A^2 वर्गीयप्रत्ययाः for °वर्गाः प्रत्ययाः
4. S^1 after चत्वारः adds: शषसहाः; My^{1}S^{1}KA^{2}M$^{1-3}$ om. अन्तःपदिकाः; My^1 °क्रमज° before °स्पर्श°; My^1 रेफानुस्वरभक्तयः for रेफाः भक्तयः
5. KM$^{1-3}$ om. न; A^{2}तान् स्तोभान् for तं स्तोभम्
9. V^{2}B^4 रेफस्य for रेफः
10. B^4 after चत्वारः adds: शादयः; B^4 ते for एते
11. B^4 स्तोभान्तरेण for स्तोभारम्भेण

शषसहा ऊष्माणः । आर्चिके स्पर्शेन संयुक्तः अनुस्वारः ।ऊष्मणा संयुक्तः अनुस्वारः । समानवर्गीबेणाक्षरेण संयुक्तः स्पर्शः । ऊष्मणा संयुक्तः स्पर्शः । स्पर्शेन संयुक्तो रेफः । ऊष्मणा संयुक्तो रेफः । गाने अनुस्वारस्पर्शरेफा **एते त्रयः शब्दा अन्तःपदिकाः** अन्तःपदे वर्तमानाः **स्तोभव्यवहिताः** स्तोभस्य व्यवधानेन पृथग्भूताः सन्तः स्तोभमतिक्रम्य ह्रियन्ते। नीयन्ते। स्तोभान्ते **विरते** विरामे एतेषां **लोपः । स्तोभान्ते संधावलोपः** । अनुस्वारः स्वसंयोगेऽक्षरे एकीभवति । स्पर्शः स्वसंयोगेऽक्षरे एकीभवति । रेफः स्वसंयोगेऽक्षरे एकीभवति ॥ १ ॥

बर्हिषि ततुराणाः पिशङ्गमीशानकृदघशंससरांसि संहमंहेति ॥ २ ॥

वि. उदाहरणान्युच्यन्ते । प्रथमे पर्के **बर्हिषि**-शब्दे । **त्साऽ२इबाऽ२३४ औ-होवा । हीऽ२३४षी** (ग्रा. गे. १. १. १.१) नित्यविरतत्वादतिहृतस्य रेफस्य लोपः । रेफस्त्वसंहिताध्ययनकाले न दृश्यते । अस्माकमपि संहिताध्यनलिङ्गानि सन्ति । **भद्रंसुधेषमूर्ज्जामिति** । [अ]पांगर्भेऽग्निरिति । **अहमन्नादोऽहमन्नाद** इति । तस्मात्संहितमेवाध्ययनं दर्शयति । अन्ये तु ब्रुवते प्रदर्शनमेतदन्यत्र यत्रैवं भवति । तत्रातिहारो भवति । **अपामिवेदुर्मयस्ततुराणाः** (सा. ५४४) छन्दसि । **रयिं पिशङ्गमुत्तरौक्ष्णोरन्ध्रवाजजितोः** (ऊ. द. १०३-४) अनुस्वारस्य । **ईशानकृद्-आनो विश्वा**–(ऊ. ए. ३७६) तृतीयायां श्यैते उद्गीथे **वीरघशंसहा–यस्ते** (ऊ. सं. ३७०) अध्यर्धेडे सोमसाम्नि **अयं सरांसि** (ऊ. अ. ५५५) इति धुरांसाकमश्वेऽनुस्वारस्यातिहारः । **संह** । **द्विंपश्चायामान्धीगवे** (ऊ. ए. ४७६) **अद्रिसंहतमिति** । **मंह** । **त्वंसोमाद्यायां** (ऊ. द. १९३) दावसुनिधने **पवस्वमंहेति**

---

4. S^{4}E स्तोभ० for स्तोभस्य
9. K om. उदाहरणान्युच्यन्ते
10. A^{2}M$^{1-2}$ om. नित्यविरतत्वात् ; S^1 ०विहृतत्वात् for ०विरतत्वात्
11. A^{2}M$^{1-2}$ रेफस्य संहिता, S^1 रेफः संहिता० for रेफस्त्वसंहिता; A^{2}M$^{1-2}$ ०ध्ययने for ०ध्ययनकाले; A^2 प्रदृश्यते for न दृश्यते; KMy^1 दृश्यन्ते for सन्ति; S^2 लिङ्गा न दृश्यन्ते for लिङ्गानि सन्ति
12. My^{1}KS^1 संहिताध्ययनं for संहितमेवाध्ययनम्

नित्यविरतत्वात् तथा त्रिमात्रमन्तरमिति। कथमत्रातिहार उच्यते। एके तावद् ब्रुवते। संहिताध्ययनेनैव द्रष्टव्यम् [इति] ॥ २ ॥

भा. उदाहरणानि। बर्हिषि प्रथमे पर्के। अत्र भक्त्यन्तत्वात् नित्यविरतत्वात् त्रिमात्रमन्तरमिति। कथमत्रातिहार इति। उच्यते। एके तावद् ब्रुवते संहिताध्ययनपक्षेणैतद् द्रष्टव्यम्। अस्माकमपि संहिताध्ययनलिङ्गानि दृश्यन्ते। **भद्रं सुधेषमूर्जमिति**। तथा **अपांगर्भोऽग्निरिडेति**। **अहमन्नादोऽहमन्नाद** इति। एवमादीनि। तस्मात् संहितमेवाध्ययनं दर्शयति। अन्ये तु एवं ब्रुवते प्रदर्शितमेतत्। अन्यत्र यत्रैवं भवति तत्रातिहारो भवति। **अपामिवेदूर्मयस्तर्तुराणाः** (सा. ५४४) **मृज्यमानायां रयिं पिशङ्गम्** इति उत्तरौक्ष्णोरन्ध्रवाजजितोः (ऊ. द. १०३–४) **ईशानकृत्**। **आनोविश्वा-** (ऊ. ए. ३७६) तृतीयायां श्यैते उद्गीथे ईशानकृदिति ककारे ऋकारस्याभूतस्य रेफातिहारः। **अघशꣳस**। **यस्तेमदायाम्** (ऊ. सं. ३७०) अध्यर्धेडे सोमसाम्नि अनुस्वारस्यातिहारः। **अयꣳसरांसि** (ऊ. अ. ५५'१) साकमश्वे अनुस्वारस्यातिहारः। संह। **द्विर्यंपञ्चयाम्** (ऊ. ए. ४७६) आन्धीगवे। **सखायो अद्रिसंहतमिति** अनुस्वारस्यातिहारः। अत्रापि तदेव पर्कव्याख्यानम्। **मꣳह त्वꣳसोमाधायाँ** (ऊ. द. १९३) दावसुनिधने अनुस्वारस्यातिहारः। इहापि तदेव पर्कव्याख्यानम् ॥ २ ॥

दी. उदाहरणानि। रेफस्य ऊष्मणि प्रत्यये उदाहरणम्। **ओ४ग्नाइ** (ग्रा. गे. १. १. १. १)इति प्रथमे पर्के **त्सा१ऽ२इबा३ऽ२३४ औ५र होर वा**। अत्र संधौ रेफातिहारो विरते लोपः। इदानीं रेफस्य स्पर्शे परे उदाहरणम् —**अपा५४१मि५४र वे५र दू४र म५४र यस्तौ**। **होवाहा५इ** (ग्रा. गे.

---

1. M^{1-2} तिरंतत्रस्तरमिति for तथा त्रिमात्रमन्तरमिति

4. P before त्रिमात्रम् adds: तथा

6. P संहिताध्ययनं for संहितामेवाध्ययनम्

7. PV^2 अनेन for अन्ये तु एवम्; B^4 आब्रुवते for ब्रुवते

9. V^2P om. इति

17. L^1My^2 रेफातिहारे for रेफातिहारः

१६. ७. ५४४. १) इत्यपां साम्नि होवाहाइ । तुराणाऽ२३४: । होहाइ । इति प्रस्ताव: सस्तोभपदविभाग्यत्वात् स्तोभाथ विरामत्वात् रेफलोप: ॥

इदानीम् अनुस्वारस्य स्पर्शे परे उदाहरणम्—मृज्यमानस्सुहस्त्या । समुद्रे वोवा (ऊ. द. १०३) इत्युत्तरे औक्ष्णोरन्ध्रे रायिंपिशाऽ३हाऽ३हा । गंबहुलंपुरुस्पृहम् । अत्र स्तोभान्ते अनुस्वारस्यातिहार: ॥

रेफस्य स्पर्शे परे उदाहरणम् । आनोविश्वासुहव्याऽ२३४ औहोहा । (ऊ. ए. ३७६) इति श्यैते तृतीयायामुद्राथे ईशानकाऽ२३४ ओऽ६हा । तुविद्युम्नस्य । अत्र स्तोभान्ते रेफातिहार: संधौ । विरामे लोप: । ईशानकृदित्यत्र ओनौकारयोरित्यादिना तकारलोप: ॥

इदानीमनुस्वारस्य ऊष्मप्रत्यये उदाहरणम् । यस्तेमदोवरेणियाऽ३ए (ऊ. स. ३७०) इत्यध्यर्धेडे सोमसाम्नि घा ाउवा । साहाउवाऽ३ । अत्र संधावतिहार: । विरामे अनुस्वारलोप: ॥

अस्य प्रत्नाऽ३म् (ऊ. अ ५५५) इति धुरांसाकमश्वे द्वितीयायाम् अयꣳसरा-ऽ३होऽ३होऽ३ ꣳहाइꣳसिधाव्रताऽ३इ । अत्र संधावतिहार: । विरामे अनुस्वारलोप: ॥

अनुस्वारस्य ऊष्मप्रत्यये उदाहरणम् । परित्यꣳहर्यताऽꣳ१हाराइम् (ऊ. ए. ४७६) इत्यान्वीगवे द्वितीयपश्चायाम् आद्राऽ२३ इसा । हुम्माऽ२१२म् । हतंप्रियमिन्द्र । अत्र संधौ अनुस्वारस्यातिहार: । विरामे लोप: । तुवꣳसोऽ२३मारीधारयुहाउ (ऊ. द. १९३) इति दावसुनिधने पवस्वाऽ१माऽ२३ । होवाऽ३हा । हयत् । अत्र संधावनुस्वारस्यातिहार: । विरामे लोप: । अत्र दावसुनिधने पवस्वमहेति नित्यविरतत्वात् तथा विमात्रमन्तरमिति कथमतिहार: । उच्यते एके तावद्ब्रुवते संहिताध्ययने द्रष्टव्यमिति ॥ २ ॥

---

1. My[3] साम for साम्नि
8. E औवौकारयो: for ओवौकारयो:
15. E after आन्वीगवे adds: द्वितीयायां
18. RL[1]MyMy[2-3] om. अत्र दावसु····द्रष्टव्यम्

प्युदाहरणानि ज्ञातव्यानि ॥ २ ॥

एवंजातीयानि ॥ ३ ॥

वि.&भा. **एवंजातीयानि** अन्यान्यपि द्रष्टव्यानि ॥ ३ ॥

दी. **एवंजातीयानि** अन्यान्यपि उदाहरणानि ज्ञातव्यानि ॥ ३ ॥

अतिहारप्राप्तं व्यञ्जनं लुप्यते ॥ ४ ॥

वि. वक्ष्यमाणेषूदाहरणेषु ॥ ४ ॥

भा. पूर्वलक्षणेनातिहारप्राप्तस्यापवादो वक्ष्यमाणेषूदाहरणेषु ॥ ४ ॥

दी. पूर्वलक्षणेनातिहारप्राप्तस्य व्यञ्जनस्य लोपः क्रियते वक्ष्यमाणेषूदाहरणेषु ॥ ४ ॥

आनंश देव्ये ॥ ५ ॥

वि. **एद्दुमधोर्वामदेव्ये** **उदानंशशवसेति** अतिहारप्राप्तस्य व्यञ्जनस्य लोपः ॥५॥

भा. **एद्दुमधोः** (ऊ. अ. ५९८) द्वितीयायाम् **उदानंशशेति** अनुस्वारस्यातिहारप्राप्तस्यापवादो वक्ष्यमाणेषूदाहरणेषु ॥ ५ ॥

दी. **एऽ५दु । मधोऽ३म्मर्माऽ३दिन्तराम्** (ऊ. अ. ५९८) इति वांमदेव्ये द्वितीयायां **ना । औऽ३होहाइ । शशाऽ२३वसा ।** अत्र नकारमध्ये अनुस्वारस्य लोपो नातिहारः ॥ ५ ॥

ज्योतींषि वृषन्न दार्शी वारे ॥ ६ ॥

---

4. E om. अन्यान्यपि and ज्ञातव्यानि

9. V[3] आनंशद्देव्ये for अनंशदेव्ये

12. A[1] प्रतिषेधः for अपवादः

16. A[3] om. ज्योतींषि

वि. तन्ते (ऊ. ए. ५०८) वारवन्तीये येन ज्योतींषि। सरूपवृषन्नागहि (ऊ. ए. ५२८) प्रत्युअदर्शि (ऊ. प्रा. ८२७) इत्येतेषूद्गीथे विषये अतिहारलोपः ॥६॥

भा. वारवन्तीये तन्तेमद–(ऊ. ए. ५०८) द्वितीयायां येन ज्योतींषीति अनुस्वारस्यातिहारलोपः। सुमन्मा (ऊ. ए. ५२८) द्वितीयायां सरूपवृषन्निति वृकारस्य आर्भूतस्य रेफस्यातिहारलोपः। प्रत्युअदर्श्यायती–(ऊ. प्रा. ८२७)ति रेफस्यातिहारलोपः। त्रिष्वपि उद्गीथविषयः ॥ ६ ॥

दी. तन्तेमदाऔहोहाइ (ऊ. ए. ५०८) इति वारवन्तीये द्वितीयायां येन ज्योताऔहोहाइ। अत्र ती-मध्येऽनुस्वारस्य लोपः। साऔहोहाइ। माऽ२३४न्मा (ऊ. ए. ५२८) इति वारवन्तीये द्वितीयायां सरूपवाऔहोहाइ। अत्र वृकारे ऋकारस्यार्भूतस्य रेफस्य लोपः। प्रत्युवदा। औहोहाइ (ऊ. प्रा. ८२७) इति वारे। अत्र रेफस्य लोपः ॥ ६ ॥

वर्पसो दर्शते ळान्दे ॥ ७ ॥

वि. इळान्दे (र. सं. ७०) त्वेइषः सन्दधुर्भूरिवर्पसस्सदर्शतस्य रेफस्यातिहारलोपः ॥ ७ ॥

भा. त्वेइषः संदधुर्भूरिवर्पस (र. सं. ७०) इति इळान्दे रेफातिहारलोपः। तथा सदर्शतस्य वपुष इति रेफस्यैव ॥ ७ ॥

दी. अग्रेतवश्र। इडा (र. स. ७०) इतीळान्दे द्वितीयायां दधुर्भूराइव। हाऽ३१उवाऽ२३। अत्र रेफलोपः। सदाऔहोहोहाइ। अत्र रेफलोपः ॥ ७ ॥

1. S² after ज्योतींषि adds: सुमन्मवारे

3. P अनुस्वारलोपः for अनुस्वारस्यातिहारलोपः

4. P. om. सुमन्माद्वितीयायां...रेफस्यातिहारलोपः; V³ om. वृकारस्यार्भूतस्य

6. B⁴ after ०विषयः adds: पर्कोदाहरणवत्

10. L¹M⁴My²-³ om. इति वारे

13. A²M¹-² om. त्वेइषः

अन्धसः स्वारे पर्णे ॥ ८ ॥

वि. **कयानः** (ऊ. ए. ३८२) **स्वारे सौपर्णे** **मꣳहिष्ठोमत्सदन्धस** इति नकारस्यातिहारलोपः ॥ ८ ॥

भा. **स्वारे सौपर्णे कयानाया-** (ऊ. ए. ३८२) द्वितीयायां **मꣳहिष्ठोमत्सदन्धस-** इति अनुस्वारस्यातिहारलोपः ॥ ८ ॥

दी. **कयानश्चित्रआभूऽ३वात्** (ऊ. ए. ३८२) इति **स्वारे सौपर्णे** द्वितीयायां **मꣳहिष्ठोमत्सदा । हुम् । धाऽ२३४साः ।** अत्रानुस्वारलोपः ॥ ८ ॥

प्रशंसन्ति विशीयान्धीगवयोः ॥ ९ ॥

वि. **विशो**–द्वितीयायां **विशीयान्धीगवयोः** (ऊ. अ. ५७५&ऊ. ए. ४२३) **प्रशंसन्ती**त्यनुस्वारस्यातिहारलोपः ॥ ९ ॥

भा. **विशोविशोवो अतिथिम्** (ऊ. अ. ५६५&ऊ. ए. ४२३) इत्यत्र विशोविशीयान्धीगवयोः **प्रशंसन्ति** **प्रशास्तिभि**रित्यनुस्वारातिहारलोपः ॥ ९ ॥

दी. **विशो विशोहुम् वो अतिथाइम्** (ऊ. अ. ५७५) इति **विशोविशीये** द्वितीयायां **प्राऽ२३४शहाइ । उहुवाइ ।** अत्र **प्रशं**-शब्दे अनुस्वारस्यातिहारलोपः । **विशो विशोवोऽ१अताइथाइम्** (ऊ. ए. ४२३) इत्यान्धीगवे द्वितीयायां **प्राशाऽ३उवा ।** अत्रानुस्वारलोपः ॥ ९ ॥

---

2. S^3 कयानायां for कयानः; S^3 स्वार for स्वारे; A^3 सकारस्य, M^{1-3} धकारस्य for नकारस्य

3. A^2M^{1-3} प्रतिषेधः for अतिहारलोपः

9. A^2M^{1-2} om. विशोद्वितीयायां

10. A^2 प्रतिषेधः प्रस्तावे M^{1-2} प्रतिषेधः for अतिहारलोपः

11. V^3 om. विशो…हारलोपः (l. 12)

12. B^4 ०गवयोः adds: स्तुषे शुषायां; B^4A^1 after इति adds: अत्र प्रशंशब्दे; A^1 अनुस्वारलोपः for अनुस्वारातिहारलोपः

हिन्वान्ति विशीये ॥ १० ॥

वि. हिन्वन्ति सूरम् (ऊ. द. १७०) इति विशोविशीये नकारस्यातिहारलोपः प्रस्तावे ॥ १० ॥

भा. विशोविशीये हिन्वन्ति सूरमुस्रय (ऊ. द. १७०) इति प्रस्तावे अनुस्वारस्यातिहारलोपः ॥ १० ॥

दी. हिन्वाहुताऽ३इम्र् (ऊ. द. १७०) इति विशोविशीये। अत्र हिन्वन्ति-शब्दे अनुस्वारलोपः ॥ १० ॥

मन्दानं गीर्भिर्जनित्रे ॥ ११ ॥

वि. तंवोदस्माद्यायाप् (ऊ. अ. ५४२) उत्तरे जनित्रे वसोर्मन्दानमिन्द्रं गीर्भिरित्यत्र नकाररेफयोरतिहारलोपः ॥ ११ ॥

भा. उत्तरे जनित्रे तंवोदस्माद्ययोः (ऊ. अ. ५४२) अद्यायामनुस्वारस्य द्वितीयायां रेफस्य अतिहारलोपः ॥ ११ ॥

दी. तंवोदस्ममृतीषहाऽ३म् (ऊ. अ. ५४२) इत्युत्तरे जनित्रे प्रथमायां वसोर्मा। होइ। होइ। अत्र मन्दा-शब्दे अनुस्वारस्य लोपः। द्वितीयायाम् इन्द्रंगाइ होइ। होइ। अत्र गीर्भि-शब्दे रेफलोपः ॥ ११ ॥

धर्मन् दैर्घे ॥ १२ ॥

---

2. A[2] om. हिन्वन्ति ...प्रस्तावे; M[1-2] om. विशो

9. M[1-2] trans. उत्तरे जनित्रे before तंवो; M[1-2] दस्माद्ययोः S[1] दस्मायां for °दस्माद्यायां

10. A[2]M[1-2] om. इत्यत्र

11. B[4] after आद्यायाम् adds: अकारस्य

वि.&भा. **त्वेसोमान्त्यायां** (ऊ. ए. ४०१) **दैर्घश्रवसे धर्म**शब्दे **रेफस्या**तिहारलोपः ॥ १२ ॥

दी. **त्वेसोमप्रथमाद्वृदोहाव्वृगोहाओहाऽ३ए** (ऊ. ए. ४०१) इति **दैर्घश्रवसे** उत्तमायां **तियाऽ२यकमृतस्याऽ२धां । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ।** अत्र धर्मशब्दे रेफलोपः ॥ १२ ॥

विन्दुः सिष्ठे ॥ १३ ॥

वि.&भा. **शिशुंजज्ञानान्त्यायां वासिष्ठे** (ऊ. अ. ६५९) **गोविन्दुर्द्रप्सेति** नकारस्यातिहारलोपः ॥ १३ ॥

दी. **हाइ । उहुवाइ । शिशाऽ३४ औहोवा** (ऊ. अ. ६५९) **इति वासिष्ठे** तृतीयायां **गोवाऽ३४औहोवा । दुर्द्रा ।** अत्र **विन्दुः**शब्दे अनुस्वारलोपः ॥ १३ ॥

इन्दव उद्वंशीये ॥ १४ ॥

वि.&भा. **उद्वंशीये आ त्वा विशन्त्वित्यन्त्यायाम्** (ऊ. स. ७१९) **अरं धामम्य इन्दव** इति अनुस्वारस्यातिहारलोपः । अत्रापि पर्कव्याख्यानं उपशब्देन व्यपेतत्वात् ॥

दी. **आत्वाविशन्त्विन्दवआ** (ऊ. स. ७१९) **इत्युद्वंशीये** तृतीयायां **म्यआऽ३२उवाऽ३ । उप् ।** अत्र **इन्दव**शब्दे अनुस्वारलोपः ॥ १४ ॥

कर्म वत्सासु ॥ १५ ॥

---

1. भा. ऋतस्य धर्मन्निति for धर्मशब्दे; A^{2} after शब्दे adds: अतिहारस्य
7. भा. om. वासिष्ठे
8. B^{2} नकार अनुस्वारस्य, $V^{2}PA^{1}L^{2}$ अनुस्वारस्य for नकारस्य
12. $A^{2}M^{1-2}$ °विशन्त्वायाम् for विशन्त्वित्यन्त्यायां and trans. उद्वंशीये after विशन्त्वित्यन्त्याम्
13. वि. नकारस्य for अनुस्वास्य; वि. om. अत्रापि...व्यपेतत्वात्

वि.&भा. त्रिकद्रुकाद्यायां **नित्यवत्सासु** (र. क्षु. १६९) **सईममादमहिकर्मेति** रेफस्यातिहारलोपः । अत्रापि **पूर्ववदेव** ॥ १५ ॥

दी. **एत्राइका** (र. क्षु. १६९) इति **नित्यवत्सासु** प्रथमायां **ममादमाऽरहिका**। इडा। **मकर्तवे**। अत्र कर्मशब्दे **रेफलोपः** ॥ १५ ॥

आथर्वणे सर्वम् ॥ १६ ॥

वि. **आथर्वणे सर्व**मतिहारप्राप्तं लुप्यते । **परीतोषि** (र. सं. ३२) **सखायोदी** (र. ए. ७१) **यज्ञायसन्तु** (र. ए. ७१) **मक्षूगोमन्तम्** (र. प्रा. १३५) इत्यादिषु अतिहारलोपः । आवत् । **घजिह्वाऽर३याऽइम्** । संधावलोपः । संहिताध्ययने **आवत् घजिह्वायामिति** प्राप्ते लोपः ॥ १६ ॥

भा. **आथर्वणे** (र. स. ३२) अनुस्वारः रेफः स्पर्शः अतिहारप्राप्तः सर्वं लुप्यते **परीतोषि** (र. सं. ३२) **सखायोदीर्घ–यज्ञायसन्तु** (र. ए. ७१) **मक्षूगोमन्तम्** (र. प्रा. १३५)आदिषु । **परीतोषायि** अत्र अनुस्वारस्य पूर्वाङ्गत्वात् लोपः । संधावलोप इति **आवंचतासुतमिति** प्राप्ते लोपः । अतः **आवच्चतासुत**मित्येवं भवति । **सखायो दाइ** रेफस्य विरामे लोपः । संधावलोपः । अवादूर्घजिह्वायामिति प्राप्ते रेफलोपः । अतः **आवदूर्घजिह्वाया**मिति ।

1. KB^{4} °द्रुकायां for °द्रुकाद्यायां
2. भा. इहापि for अत्रापि; Ks$^{1-3}$My^{1} om. अत्रापि पूर्ववदेव
6. K आद्याथर्वणे for आथर्वणे
7. M$^{1-3}$ गोमन्तित्स्वादिषु for गोमन्तमित्यादिषु
8. A^{2}M$^{1-3}$ विरामे for अतिहार°
10. A^{1} °प्राप्ते for °प्राप्तः
11. P गोमन्तमादिषु, B^{4} गोमादिषुः V^{2} गोमत्तामादिषु, A^{1} गोमन्तादिषु for गोमन्तमादिषु;
12 V^{2} पूर्वान्तत्वात् for पूर्वाङ्गत्वात् ; PV^{2} अयं for आवं
13. PV^{2}B^{4} before प्राप्ते add: एवं प्राप्तः । एवं; V^{2} आवद्धतासुतम् आन्त्यवचनासुतम् for आवच्चतासुतम् ; PV^{2} दीरेफस्य B^{4} °दी°घरेफस्य for दाइरेफस्य

तथा **यज्ञाय सन्त्वित्यत्र** त्वोपकारे पूर्वाङ्गस्तोभान्ते विरामे लोप: । संधावलोप: इति **ज्योतिंस्तुवद्राया** इति प्राप्नोति । एवं प्राप्ते अनुस्वारस्य विरामे लोप: क्रियते । तथा **ज्योतिस्तुवद्राया** इति भवति । उहवाऊहा **औहोवा सखायोदायि । उहुवा ऊहा औहोवा हाउ** । वा **आवत्** । विरामे रेफस्य लोप: । तथा आवदृघजिह्वायामिति भवति । संधावलोप इति । अलोपे सति आवदृर्घजिह्वायामिति । एवं मक्षूगोमाज्योति स्तमीमाहाइ प्राप्ते लोप: । ज्योतिस्तमींमाहा **भवति** । एवं ध्रुवं सांहितमध्ययनं दर्शयति । यथाद्ये पर्के । तदुक्तं पर्के ॥ १६ ॥

दी. उहुवा ओहा । औहोवा । परीतोषाइ । उहुवाओहा (र. सं. ३२) इत्याथर्वणे । अत्र **धिंच**-शब्दे अनुस्वारलोप: । **सखायोदाइ** । अत्र दीर्घशब्दे रेफलोप: । एवमादीनि ॥ १६ ॥

तन्दुकार्तयशे स्वरान्तमेके ॥ १७ ॥

वि. पुरोजित्यां (ऊ. द. १३४) **कार्तयशे तन्दुरोषमिति स्वरान्तमेके** आचार्या मन्यन्ते । यथाधीमहे—**तन्दुऔऽ३होऽ३रोषाऽ६म्** ॥ १७ ॥

भा. कार्तयशे पुरोजित्यन्त्यायां तन्दुरोषमिति यथाधीमहे । **तन्दूऔऽ३हो-ऽ३रोषाऽ६मिति** ॥ १७ ॥

दी. पुरोहाहाउ । जाऽर३४इती (ऊ. द. १३४) इति **कार्तयशे** तृतीयायां **तन्दूऔऽ३होऽ३** । अत्र **तन्दुशब्दं स्वरान्तमुकारान्तं** मन्यन्ते **एके** । **तन्दूऔऽ३हो-ऽ३** । **एवम्** ॥ १७ ॥

---

1. P चोपकारे B[4] द्वौपकारौ for त्वोपकारे; B[4] पूर्वांङ्गौ for पूर्वाङ्ग०
2. V[2] भवति for प्राप्नोति; B[4] नक (T रा) न (नु?) [स्वा]रयोरतिहारे for अनुस्वारस्य विरामे
5. A[1] om अलोपे सति आवदृर्घजिह्वायामिति; PV[2] तु for सति
7. V[2] यथाद्यौ पर्वे for यथाद्ये पर्के
9. E L[1]My[2-3] om. इत्याथर्वणे; M[4] om. अत्र
11. भा. & दी. combine तन्दुकार्तयशे स्वरान्तमेके ॥ and विसर्जनीयान्तं वा into single sutra
18. L om. एवम्

विसर्जनीयान्तं वा ॥ १८ ॥

वि. तन्दुरोषमिति विसर्जनीयन्तं वा भवति । तथा सति **तन्दूरौऽ३होऽ३इ । ओषाऽ६म्** इति यथा छन्दसि ॥ १८ ॥

भा. तन्दुरोषमित्येवम् । तथा सति तन्दूरौऽ३होऽ३ओषाऽ६म् । इति भवति ॥ १८ ॥

दी. अथवा **विसर्जनीयान्तम्** विसर्गान्तमन्ये मन्यन्ते । तन्दूरौऽ३हो (२ १२ २) । एवम् । यथा छन्दसि ॥ १८ ॥

ऋतुविच्च पूर्ववत् ॥ १९ ॥

वि. पवस्वमाद्यायां (ऊ. ए. ३९९) **ऋतुविच्छब्दः पूर्ववत्** अजन्तहलन्तौ भवतः ॥ १९ ॥

---

3. A[2]M[1-2]S[1] om. यथा छन्दसि

6. L[1] om. अथवा ...छन्दसि. (L.7)

7. My[2-4] om. यथा छन्दसि

8. My[1]KL[2] शश्वच्छश्वत् ॥ तथा पवस्वम काल्ये च मऋतुवित्तम इति च पदान्तभावो द्रष्टव्यः ॥ **ऋतुविच्च पूर्ववत् पवस्व**....भवतः (L.10) ; S[4] E शश्वच्छश्वत्; भा. अशश्वच्छश्वत् for ऋतुविच्च पूर्ववत्. This Sūtra is found omited in all Mss except in A[2]M[1-2]S[1] of vivaraṇa version. Of the phulladīpa Mss only two viz. S[4]E contain the relevent commentary in full. In other Mss. whether the Bhāṣya or phulladīpa or even vivaraṇa relating to ऋतुविच्च पूर्ववत् is so writen as to appear that it is the continuation of the commentary on विसर्जनीयान्तं वा, although it has no relevence whatsover to what that sūtra has to say. It is, therefore, obvious that the sūtra ऋतुविच्च पूर्ववत् was strangely enough, lost in majority of Mss in course of transmission due to oversight of scribes. But the remnants of the commentary of this lost sūtra, with variation continued to remain in all Mss, including in the printed edition, without the corresponding sūtra. It is the vivaraṇa Mss which enabled us to resurrect this lost sūtra and restore it in its propper equence. Otherwise the problem relating to that part of commentary which appeared irrelevent, would have remained unsolved.

भा. **पवस्वम**– (ऊ. ए. ३९९) कालेये च यथा **मक्रतुवित्तम** इति च। **माऽ२३। क्रतूऽ३। वाऽ२३इत्** इति पदान्तभावो द्रष्टव्यः ॥ १९ ॥

दी. तथा **पवस्वम** (ऊ. ए. ३९९) कालेये च **मक्रतुवित्तम** इति च पदान्तभावो द्रष्टव्यः ॥ १९ ॥

स्वासु भरे यन्तुरं लोपः ॥ २० ॥

वि. स्वासु सौभरे (ऊ. अ. ६३१) द्वितीयायाम् **अग्निमीडिष्व यन्तुरमिति** नकारस्यातिहारप्राप्तौ लोपः संधावपि। **ष्वयाऽ३हाऽ३इ। तूऽ२राऽ२३४औहोवा** ॥

भा. तं गूर्धया(ऊ. अ. ६३१) द्वितीयायां **स्वासु सौभरे अग्निमीडिष्व यन्तुरमिति** अनुस्वारस्यातिहारप्रप्तस्य लोपः संधावपि। **अग्निमीडिष्वयाऽ३३हा३३३इतू३३-रा३३।** इति ॥ २० ॥

दी. तगूऽ३र्धाऽ३यासुत्वर्णरोवा (ऊ. अ. ६३१) इति **स्वासु सौभरे** द्वितीयायां **ष्वयाऽ३हा३इ।** अत्रानुस्वारलोपः। **तूऽ२३राऽ२३४औहोवा।** अत्रानुस्वारलोपः ॥

पूर्वाङ्गं वा ॥ २१ ॥

वि. पूर्वाङ्गं वा भवति। **अग्निमीडि। ष्वयाऽ३म् हाऽ३इ। तूऽ२राऽ२३४ औहोवा** इति ॥ २१ ॥

भा. आनन्तर्यसंधिर्वा भवति। **अग्निमीडिष्वया३३हा३३ईतू३३रां३३** इति। एवं पूर्वाङ्गभावः ॥ २१ ॥

---

2. PA[1] om. माऽ२३....वाऽ२३इत्। इति.
3. M[1]My[2-3]L[1] om. तथा पवस्व०....द्रष्टव्यः.
7. M[1-2] ०हारलोपप्राप्तौ for हारप्राप्तौ.
9. B[1] नकारयोरतिहारप्राप्तयोः। अनुस्वारप्राप्तलोपः for अनुस्वारस्य....लोपः
14. A[2]M[1-2]इडिग्वायाम् for इडिष्वयाम्
15. A[2]S[2] after इति add: व्यञ्जनलोपः समाप्तः

दी. ष्वयाऽ३म् हाऽ३इ । एवं पूर्वस्य यकारस्याङ्गं भवति । तूऽ२रा२३४म् औहोवा । एवं पूर्वस्य यकारस्याङ्गं भवति ॥ २१ ॥

कश्चित्पदान्तो लोपः प्राप्तोऽतिह्रियते कश्चित् पदान्तः पूर्वाङ्गं प्राप्तोऽतिह्रियते । वचनात् । प्राक् स्तोभस्य स्वरान्तो विरामः स्तोभान्ते विरते लोपः । संधावलोपः ॥ २२ ॥

वि. अन्तःपदिकानामतिहार उक्तः । इदानीं पदान्तीयानामतिहार उच्यते । कस्यचिल्लोपप्राप्तस्य पदान्तीयस्यातिहारो भवति । कस्यचित् पूर्वाङ्गं प्राप्तस्य पदान्तीयस्य अतिहारो भवति । **वचनात्** । स्तोभस्य प्राक् विसर्जनीयस्य पादान्तस्य **स्वरान्तो विरामो** भवति । स्तोभान्ते विरामे लोपः । संधावलोपश्च । [पुरस्तात्] उदाहरणानि ॥ २२ ॥

भा. अन्तःपदिकानामतिहार उक्तः । इदानीं पदान्तीयानामुच्यते । कस्यचित् पदान्तीयस्य लोपप्राप्तस्यातिहारः । अप्राप्तस्य **वचनात्** ब्रुवते । कस्यचित् **पूर्वाङ्गं** प्राप्तस्य अनन्तरेण स्तोभेन आनन्तर्यसंधौ प्राप्ते वचनादतिहारः । **प्राक्स्तोभस्य** विसर्जनीयस्य विसर्जनीयपदान्तीयस्य स्वरान्तो विरामो भवति । स्तोभान्ते च अतिहृतस्य विसर्जनीयस्य रेफीभूतस्य **लोपः** । **संधौ** तु **अलोपः** । अतिहारो भवतीत्यर्थः । निगदव्याख्यातमेतत् सूत्रम् । पुरस्तादुदाहरणानि ॥ २२ ॥

दी. अन्तःपदिकानामतिहार उक्तः । इदानीं पदान्तीयानाम् अतिहार उच्यते । अनुस्वारस्पर्शरेफाणां मध्ये **कश्चित् पदान्तः** पदस्यान्ते वर्तमानः पूर्वस्याङ्गं प्राप्तो **वचनात्**

---

4. My³ स्तोभात् for स्तोभस्य
5. A² after स्वरान्तो adds: हि
6. M¹-² पादिकानां for पदिकानाम् ; M¹-² पदान्तानां for पदान्तीयानाम्
7. S¹A²M¹-² पदान्तस्य for पदान्तीयस्य; A²M¹-²S¹ om. कस्यचित् पूर्वांगं....भवति । (L. 8)
8. KMy¹ om. विसर्जनीयस्य पदान्तस्य.
9. S¹ विरते for विरामे.
15. V² पुरस्त्वोदा०, P पुरश्चोदा०, B⁴पुरस्तादा० for पुरस्तादुदा०.

अतिह्रियते । स्तोभमतिक्रम्य नीयते । **स्तोभस्य प्राक्** अकारादिस्वरान्तो विरामोऽवसानं भवति । स्तोभस्यान्ते **विरते** विरामे अनुस्वारादीनां **लोपः** । स्तोभान्ते **संधावलोपः** । वक्ष्यमाणेषु सामसूदाहरणानि ॥ २२ ॥

निष्ठा अधयादिमायां सदोविशीयोत्सेधयोः ॥ २३ ॥

वि. अधयदिमायां सदोविशीयोत्सेधयोः (ऊ. ए. ५२४–५) **यूथेन निष्ठेति** स्तोभस्य प्राक् स्वरान्तो विरामो भवति । ततो विसर्जनीयस्य विरते स्तोभान्ते लोपः । अस्य पूर्वाङ्गस्य स्तोभेन सहानन्तर्यसंधौ प्राप्तेऽतिहारः ॥ २३ ॥

भा. अधयदिमायां सदोविशीयोत्सेधयोः यूथेन निष्ठेति प्राक् स्तोभस्य स्वरान्तो विरामस्ततो विसर्जनीयस्य सकारीभूतस्य स्तोभान्ते विरते लोपः । संधौ अतिहारः । अस्य पूर्वाङ्ग प्राप्तस्य स्तोभेन सह आनन्तर्यात् संधौ प्रप्तेऽतिहारः । यथा देवान् होइगच्छोहा इति ॥ २३ ॥

दी. अधयदिमे पवमा ओहा ओहाऽ३ए । औहोऔहोऽ३वा (ऊ. ए. ५२४) इति **सदोविशीये यूथेननाइ । ओऽ३हा** । अत्र अतिहृतस्य विसर्जनीयस्य सकारीभूतस्य स्तोभान्ते विरामे सति लोपः । **स्थावा** । एवम् । **संधावलोपः** । **छावा** । एवम् । **प्रत्नपीयूषंपूर्व्यम्यदु । कुथियाऽ२३४ औहोवा** (ऊ. ए. ५२५) इत्युत्सेधे तृतीयायाम् **अधयदिमायां यूथेनानि हाऽ३१उवाऽ२३ । ऊऽ२३४ पा** । अत्र सकारस्य लोपः । **स्थावा** । एवम् । संधावलोपः । **छावा** । एवम् ॥ २३ ॥

कुवित्स्वासु मार्गीयवे ॥ २४ ॥

वि. स्वासु मार्गीयवे (ऊ. अ. ५३८) तृतीयायां **कुवित्सस्येति** तकारस्य

---

8. V²P पूर्वे न तिष्ठति for यूथेन निष्ठेति.

9. PV² om. विरते.

11. V² देवाह्वेपि, देवह्वोपि for देवान्होइ.

ओवौकारयोरित्येकीभावप्राप्तस्य पदान्तस्यातिहारः ॥ २४ ॥

भा. **स्वासु मार्गीयवे** (ऊ. अ. ५३८) **कुवित्सस्य प्र हि व्रजमिति** तकारस्य लोपप्राप्तस्य अतिहारः ओवौकारयोरेकीभाव इत्यनेन ॥ २४ ॥

२ र १ २   २ र १ २
दी. **तद्वौहोवा** (ऊ. अ. ५३८) इति **स्वासु मार्गीयवे** तृतीयायां **कुवौ होवा** । **सास्याऽ२** । अत्र तकारस्य लोपं प्राप्तस्यातिहारः । **ओवौकारयोरेकीभाव** इत्यनेन लोपः ॥ २४ ॥

आचिक्रदत्पवमानाभ्यर्षसीत्यत्र कण्वतरे ॥ २५ ॥

वि. & भा. **पवमानाभ्यर्षसी**-(ऊ. स. ७५२)त्यत्र **कण्वरथन्तरे वृषो अचिक्रद-दिति** तकारस्य **आउव्यवहित**मिति लोपप्राप्तस्य पदान्तस्यातिहारः ॥ २५ ॥

२र १र २र १२१   २
दी. **पवमानाभ्यर्षसाइ** (ऊ. स. ७५२) इति **कण्वरथन्तरे क्रदाऽ३१उवा** । **ऽ२३एऽ३** । अत्र विरामे तकारलोपः । **एऽ३** । **वनआ** । एवम् । संधावतिहारः । **एऽ३द्वनआ** । एवम् ॥ २५ ॥

पुरमजीजनो हि देव्ये ॥ २६ ॥

वि. **अजीजनोहिपवमानायां** (ऊ. सं. ३५०) **वामदेव्ये रंहमाणः पुरन्ध्येति** मकारस्य पदान्तस्य **ओवौकारयोः** (पु. सू. ८. २. १) इति लोपप्राप्तस्यातिहारः ॥२६॥

भा. **पर्यूषु**–(ऊ. सं. ३५०) द्वितीयायां **गोजीरयारंहमाणः पुरन्ध्येति** मकारस्य ओवौकारयोरेकीभावे लोपप्राप्तस्यातिहारः ॥ २६ ॥

३   र ४   २ ४ २ ५
दी. **पाऽ५री** । **ऊषूऽ३प्राऽ३धन्वावा** (ऊ. सं. ३५०) इति **वामदेव्ये**

---

8. M[1-3] om. पवमाना ...रथन्तरे ; भा. trans. पवमानाभ्यर्षसीत्यत्र after कण्वरथन्तरे.
9. भा. दकारस्य for तकारस्य.; भा. om. पदान्तस्य.

द्वितीयायां **पुरौहोऽ३हुम्आऽ२** । अत्र **पुरमिति** मकारस्य **ओवौकारयोरेकीभावे लोप** (CP. पु. सू. ८.२.१) इत्यनेन लोपप्रप्तस्यातिहारः । संधौ । **हुम्माऽ०ध्याऽ२** । एवम् । विरामे लोपः । **हुम्माऽ२** । **ध्याऽ२** । एवम् ॥ २५ ॥

मदुरिता ये ददाति देव्ये ॥ २६ ॥

वि. कस्तमिन्द्रान्त्ययां वामदेव्ये **विश्वातरेमदुरितेतिओवौकारयोरिति** लोपप्राप्तस्य पदान्तस्य रेफस्यातिहारः ॥ २६ ॥

भा. वामदेव्ये **कस्तमिन्द्रान्त्यायां** (ऊ. अ. ५९१) **विश्वा तरेम दुरितेति** विसर्जनीयस्य रेफीभूतस्य **ओवौकारयोरेकीभावे** लोपप्राप्तस्य अतिहारः ॥ २६ ॥

दी. काऽ५स्ताम् । इन्द्रऽ३तूऽ३वावसाउ (ऊ. अ. ५९१) इति **वामदेव्ये** तृतीयायां **येऽ५द** इत्यस्यां **मदौहोऽ३हुम्माऽ२** । अत्र **मदुरिति** विसर्जनीयस्य रेफीभूतस्य **ओवौकारयोरेकीभावे लोप** इति लोपप्राप्तस्य अतिहारः संधौ । **हुम्माऽ२राऽ२३इः** । एवम् । विरामे **हुम्माऽ२** । **आऽ२३इ** । एवम् ॥ २६ ॥

उषर्बुधोऽग्ने विवस्वद्देव्ये ॥ २७ ॥

वि. अग्ने विवस्वद् (ऊ. प्रा. ८३७) **देव्ये** ओवौकारयोर्लोपप्राप्तस्य **उषर्बुध** इति **रेफस्य** अतिहारः ॥ २७ ॥

भा. अत्रापि **उषर्बुध** इति रेफीभूतस्य ओवौकारयोरिति लोपप्राप्तस्य अतिहारः ॥

दी. आऽ५ग्ने । विवाऽ३स्वाऽ३दुषसाः (ऊ. प्रा. ८३७) इति **वामदेव्ये उषौ**

---

1. E हिम् आऽ२. for हुम्माऽ२

2. E हिम्माऽ० ध्याऽ२ for हुम्माऽध्याऽ२.

11, 12. E हिम्मा for हुम्मा.

होऽ३ । हुम्माऽ२ । अत्र उषर्बुध इति रेफस्य ओवौकारयोरेकीभावे लोप इति लोपप्राप्तस्यातिहारः संधौ । हिम्माऽ२र्बुऽ२ । एवम् । विरामे लोपः । हुम्माऽ२ । बूऽ२ । एवम् ॥ २७ ॥

गिर्वणस्त्वया भूषन्ति मानवे ॥ २८ ॥

वि. त्वया भूषन्ति मानवे सुतेष्विन्द्र गिर्वण (ऊ. स. ७०७) इति लोपप्राप्तस्यातिहारः ॥ २८ ॥

भा. त्वामिदाह्यान्त्यायाम् (ऊ. स. ७०७) उत्तरे मानवे सुतेष्विन्द्र गिर्वण इति विसर्जनीयस्य रेफीभूतस्य ओवौकारयोरनन्तरस्वरनीचाद्ययोः (पु. ८. २. १) इति लोपप्राप्तस्यातिहारः ॥ २८ ॥

दी. होवाइ । त्वमिदाह्योनरः । होवाइ । (ऊ. स. ७०७) इत्युत्तरे मानवे तृतीयायाम् । सुताइषूऽ२३वाऽ३इ । द्राऽ२गाऽ२३४ औहोवा । अत्र गिर्वण इति विसर्जनीयस्य रेफीभूतस्य ओवौकारयोरित्यनेत लोपप्राप्तस्यातिहारः संधौ । द्राऽ२गा-ऽ२३४ औहोवा । वाऽ२३४णाः । एवम् । विरामे लोपः । द्राऽ२गाऽ२३४औ-होवा । वाऽ२३४णाः । एवम् ॥ २८ ॥

सत्पतिमिन्द्रं विश्वायां लेये ॥ २९ ॥

---

1. E हिम्मा for हुम्मा.

2&3 My³ om. एवम्

13. The sutras 29&30 are reduced in the bhāsya into a single one and are intrepreted as such. In Phulladipa, however, which often follows the bhāsya version, the intrepretation thereof is done with revelent citation form respective melodies separately.

The sutras: सत्पतिमिन्द्रं विश्वायां लेये ॥ and जम्भे चत्वामिद्धीत्यत्र ॥ referring to त् of सत् in the compound of सत्पतिम् say that त् from सत् is carried over (अतिहार) beyond the fallowing stobha in the melodies of कालेय and वर्कजम्भ formed on the verses; इन्द्रं विश्वा (सा. 826–829) and त्वामिद्धि (सा. 809–810) respectively. Though the rule mentioned here about अतिहार is common to both the sutras and the compound सत्पतिम् is

वि. **इन्द्रंविश्वायां** (ऊ. प्रा. ८०२) **कालेये वाजानां सत्पतिमिति** तकारस्य लोपप्राप्तस्यातिहारः ॥ २९ ॥

दी. **इन्द्रंवाऽ३इश्वा अवीवृधान्** (ऊ. प्रा. ८०२) इति **काययेे वाजानाऽसौ** । **वाऽ२३४ ओऽ३४वा** । अत्र सत्पतिरिति तकारस्य ओवौकारयोरिति लोपप्राप्तस्य अतिहारः संधौ । वाजानाऽसौ । **वाऽ३४३ ओऽ३४वा त्पताऽ५इम्** । एवम् । विरामे तकारलोपः ॥

जम्भे च त्वामिद्धीत्यत्र ॥ ३० ॥

वि. **वार्कजम्भे च त्वमिद्धि** (र. क्षु. १६१) इत्यत्र तृचे **त्वांवृत्रेष्विन्द्रसदिति** तकारस्यानन्तर्यसंधिप्राप्तस्यातिहारः ॥ ३० ॥

दी. हाउत्वामिद्धि **हवामाहाइ** (र. क्षु. १७१) इति बृहन्निधने **वार्कजम्भे त्वां वृत्रेष्विन्द्रसा** । **हाउ** । अत्र **सत्पतिमिति** तकारस्य **पूर्वाङ्ग** **प्राप्तस्यातिहारः** **संधौ** । **त्वांवृत्रेष्विन्द्रसाहाउत्पाऽ३** । एवम् । विरामे तकारलोपः ॥ ३० ॥

भा. **सत्पतिमिन्द्रं विश्वायां लेये । जम्भे च त्वामिद्धीत्यत्र ॥ इन्द्रं विश्वायां वाजानां सत्पतिमिति** कालेये (ऊ. प्रा. ८०२) तकारस्य ओवौकारयोरेकीभावे लोप इति

---

found in both melodies, it is not correct on this ground to reduce these two sutras into a single one. The very style of expression जम्भे च त्वामिद्धीत्यत्र goes against merger this with the previons sutra though both are tied with a common bond of अनुवृत्ति of अतिहार

The bhasya again as available, is wrongly worded: It says that कालेय and वार्कजम्भ were derived from the तृच of इंद्रं विश्वा (सा. 827–829) which is not correct. this mistake It might have happend in the course of transmission due to scribal error. The bāsya says इंद्रं विश्वायां वाजानां सत्पतिमिति कालेयवार्कजम्भयोः तकारस्य ओऔकारयोरेकीभावे लोप इति लोपप्राप्तस्यातिहारः It should refer only to कालेय; we have, thereforc, taken the liberty of corrccting the reading.

11. L[2] विश्वायायां for विश्वायां ; कालेयवार्कजम्भयोः is currected by us as कालेये, see note above.

लोपप्राप्तस्यातिहारः । वार्कजम्भे (र. क्षु. १६१) च त्वां वृत्रेष्विन्द्र सत्पतिमिति तकारस्य पूर्वाङ्गप्राप्तस्यानन्तरसधिप्राप्तस्यातिहारः ॥ २९– ३०॥

मद्यमाउवा व्यवहितं छिद्रमैधाञ्जोरूपेषु ॥ ३१ ॥

वि. **अछच्छिद्रमैधातिथाङ्गोवैरूपेषु पवन्ते** **मद्यमिति** मकारस्याउवाव्यवहितमिति (पु. सू. ७. ६. १) लोपप्राप्तस्यातिहारः ॥ ३१ ॥

भा. **अभिसोमाद्यायां** (सा. ८५६) **पवन्ते मद्यं मदमिति** मद्यशब्दस्यातिहारः । आउवाव्यहितस्य **अच्छिद्रमैधातिथाङ्गोवैरूपेषु** एतेषु च लोपप्राप्तस्यातिहारः । **आउवाव्यवहितमाउ भवति** (पु. सू. ७. ६. १.) इति मकारस्य लोपप्राप्तस्यातिहारः । ओवौकारयो रनन्तरस्वरनीचाद्ययोरिति सर्वं **पदान्त्यं च व्यञ्जनं लुप्यते** इत्यनेन ॥ ३१ ॥

दी. **अभिसोमा** । सआऽ३१उवाऽ२३ (ऊ. द. १५२) इत्यच्छिद्रे **पवन्ते-मा** । **दियाऽ३१२उवाऽ२३** । अत्र आउवाव्यवहितस्य व्यवधानस्य **मद्यमिति** मकारस्य अतिहारः संधौ । **दियाऽ३१२उवाऽ२३** । **म्माऽ२३४दाम्** । एवम् । विरामे मकारलोपः । **आउवाव्यवहितमाउ भवति** । **सर्वं पदान्त्यं च व्यञ्जनं लुप्यते** (पु. सू. ७. ६. १) इत्यनेन व्यञ्जनलोपः । **अभिसोमो हाइ** (ऊ. सं. ३६८) इति **मैधातिथे दायाउवा** । अत्र आउवाव्यवहितस्य मद्यमिति मकारस्यातिहारः संधौ । **दायाउवामादाउवा** । एवम् । विरामे मकारलोपः । **अभिसोमा** । **सआऽ३२उवाऽ२३** (र. सं. ६१) इति **अङ्गोवैरूपे दियाऽ३१उवाऽ२३** । अत्र आउवाव्यवहितस्य **मद्यमिति** मकारस्यातिहारः संधौ । **दियाऽ३१उवाऽ२३म्माऽ२३४दाम्** । एवम् । विरामे मकारलोपः ॥ ३१ ॥

---

3. S[1] om. मद्यमाउवा...अतिहारः (1. 5)
6. PV[2] मदशब्दस्य for मद्यशब्दस्य
7. PV[2] वलोप° for च लोप°
10. MY[2] om. इत्यच्छिद्रे
18. M[4]L[1] om. एवम्.

ऋतमाउवाव्यवहितं पार्श्वसन्ताच्छिद्रमैधाञ्जो-
रूपाग्नेस्त्रिणिधनेषु ॥ ३२ ॥

वि. एतेषु गायत्रपार्श्वसन्तन्यच्छिद्रमैधातिथाञ्जोवैरूपाग्नेस्त्रिणिधनेषु राजादेव-ऋतमिति पदान्तस्य मकारस्याउवाव्यवहितमिति लोपप्राप्तस्यातिहारः ॥ ३२ ॥

इति फुल्लसूत्रविवरणे अतिहारे तृतीयस्य सप्तमः खण्डः ॥ ७ ॥

भा. राजादेवऋतं प्रहिन्वान ऋतम् इति आउभावप्राप्ते अतिहारः गायत्र-पार्श्व-सन्तनि-अच्छिद्र-मैधातिथ-अञ्जोवैरूप-अग्नेस्त्रिणिधनेषु॥ ३२ ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य सप्तमी कण्डिका समाप्ता ॥ ७ ॥

दी. आभी। सोमासआऽ३१उवा२३ (ऊ. द. १४८) इति गायत्रपार्श्वे तृतीयायां दाइवऋताऽ३१उवाऽ२३। अत्र आउवाव्यवहितस्य ऋतमिति मकारस्य अतिहारः संधौ। दाइवऋतऽ३१उवाऽ२३म्बृऽ२३४हात्। एवम्। विरामे मकारलोपः। अभीहाउ। सोमास आऽ३१उवाऽ२३ (ऊ. अ. ५५९) इति सन्तनिनि द्वितीयायां दाइवऋताऽ३१उवाऽ२३। बृऽ२३४हात्। तृतीयायां न्वानऋताऽ३२उवाऽ२३४। बृऽ२-३४हात्। अत्र आउवाव्यवहितस्य ऋतमिति मकारस्यातिहारः संधौ। न्वानऋताऽ३१उवाऽ२३म्बृऽ२३४-हात्। एवम्। विरामे मकारलोपः॥ अभिसोमास आऽ३१उवाऽ२३ (ऊ. द. १५२) इत्यच्छिद्रे द्वितीयायाम् ऋताऽ३१उवाऽ२३। तृतीयायाम् ऋताऽ३१उवाऽ२३।

---

1. A²M¹-²S¹-² सन्तन्यच्छिद्र for सन्ताच्छिद्र

3. M¹-² om. एतेषु; M¹-² trans: गायत्र...त्रिणिधनेषु after अतिहारः (l. 4)

11. M²-³ om. एवम्.

12. E तृतीयायां for द्वितीयायां

13. om. बृहात् तृतीयायां...बृहात्;

14. M⁴ before अत्र adds: विरामे मकारलोपः.

15. L¹ M My²-³ om. एवम्

16. E om. तृतीयायां...उवाऽ२३.

अत्र आउवाव्यवहितस्य ऋतमिति मकारस्यातिहारः संधौ । विरामे मकारलोपः ॥

अभिसोमोहाइ । सआऽ३याबाः (ऊ. सं. ३६८) इति **मैधातिथे** तृतीयायाम् **आर्ताउवा** । अत्र आउवाव्यवहितस्य **ऋतमिति** मकारस्यातिहारः संधौ । **आर्ताउवा बृहाउवा** । विरामे मकारलोपः । एवम् ॥

अभिसोमा । सआऽ३१उवाऽ२३ (र. सं. ३१) इत्यङ्गोवैरूपे द्वितीयायाम **ऋताऽ३१उवाऽ२२** । तृतीयायाम् **ऋताऽ३१उवाऽ२३म्बृऽ२३४हात्** । ऋतमिति मकारस्य लोपप्राप्तस्यातिहारः संधौ । विरामे मकारलोपः ॥

प्रहिन्वानाः । आर्तंबृऽ२३४हात् (ऊ. सं. २५६) इत्यग्नेस्त्रिणिधने **प्रहिन्वान-ऋताऽ१उवा । बृऽ२३४हात्** । अत्र ऋतमिति मकारस्य **आउवाव्यवहितमित्यादिना** लोप-प्राप्तस्यातिहारः संधौ । विरामे मकारलोपः ॥ ३३ ॥

इति फुल्लदीपे सप्तमप्रपाठकस्य सप्तमः खण्डः ॥ ७ ॥

अष्टमः खण्डः

शवसः संजये ॥ १ ॥

वि. संजये (ऊ. द. ९६) **उतो न उत्पुपूर्या उक्थेषु शवसस्पत** इति विसर्जनीयस्य पदान्तभूतस्यातिहारः । **शावसा । हुंऽ३हुं । पाऽ२३४ताइ** ॥ १ ॥

भा. आतेअग्नान्त्यायाम् (ऊ. द. ९६) उक्थेषु शवसस्पत इति विसर्जनीयस्य सकारीभूतस्यातिहारः । अस्य पूर्वाङ्गं प्राप्तस्यातिहारः । अत्र च **हीष्यादिषु** निधनत्वादविरुद्धः संधिः॥ १ ॥

---

4. E om. आर्ताउवा । बृहउवा.

17. B[4] हीष्यादि० A[1] हीष्याद्य० for हीष्यादिषु.

दी. आतेअग्नइधी । माऽ३हाइ (ऊ. द. ९६) इति संजये तृतीयायाम् उक्थेषुशवसा । हुंऽ२हुम् । पाऽ२३४ताइ । अत्र शवसः इति विसर्जनीयस्य पूर्वाङ्ग प्राप्तस्य ततः सकारीभूतस्यातिहारः संधौ । उक्थेषुशवसाहुम्ऽ२हुम्स्पाऽ२३४ताइ । एवम् । विरामे सकारलोपः ॥ १ ॥

सरद्गौतमे ॥ २ ॥

वि.&भा. **प्रसुन्वान**द्वितीयायां (ऊ. ए. ४४७) **गौतमे सरज्जार** इति तकारस्य **ओवौकारयो**रिति लोपप्राप्तस्यातिहारः ॥ २ ॥

दी. **प्रसुन्वानायअन्धसाः** (ऊ. ए. ४४७) इति **गौतमे** द्वितीयायां **सरा** । **औहोऽ२३४वा** । **जारोनयो** । अत्र **सरत्** इति तकारस्य **ओवौकारयो**रित्यनेन लोपप्राप्तस्यातिहारः संधौ । **सराऔहोऽ२३४वाज्जारोन** । एवम् । विरामे तकारलोपः ॥

निष्कृतं रुणसाम्नि वृषो अचिक्रायाम् ॥ ३ ॥

वि. **वृषोअचिक्रायां** (ऊ. द. १०५) **वरुणसाम्नि देवानां सोम पवमान निष्कृत**मिति विसर्जनीयस्य पदान्तस्यातिहारः ॥ ३ ॥

भा. **मृज्यमानान्त्यायाम्** (ऊ. द. १०५) **देवानां सोम पवमान निष्कृत**मिति षकारस्य पूर्वाङ्गं प्राप्तस्यातिहारः संधौ ॥ ३ ॥

दी. **मृज्यमानास्सुहस्त्योवा** । **ओवा** (ऊ. द. १०५) इति वरुणसाम्नि तृतीयायां **ननाऽ२३होइष्कृताऽ३मा** । अत्र निष्कृतमिति षकारस्य पूर्वाङ्गं प्राप्तस्यातिहारः संधौ । **नना ऽ२३हाइ** । **कृतऽ३मा** । [एवम् ।] विरामे षकारलोपः ॥ ३ ॥

वयुमपत्नन्पवसायां काक्षीवते ॥ ४ ॥

---

2. My[2] om. उक्थेषु....संधौ (L. 3)
6. भा. दकारस्य for तकारस्य;
7. KS[1-2]A[2] ओवौकार, M[1-2] ओवौकारस्य for ओवौकारयोरिति; M[1-2] om. लोप.
11. M[1-4] om. वृषो अचिक्रायां.
17. L[1]E om. षकारस्य.

वि. **अपघ्नन्पवसायां** (ऊ. द. १५९) **काक्षीवते नुदस्वदेवयुम्** इति मकारस्य पदान्तस्यातिहार ओवौकारलोपप्राप्तस्य ॥ ४ ॥

भा. **पवस्वदेवान्त्यायाम्** (ऊ. द. १५९) **काक्षीवते** नुदस्वदेवयुमिति मकारस्य अनुस्वारीभूतस्य **ओवौकारयोरेकीभाव** इति लोपप्राप्तस्यातिहारः ॥ ४ ॥

दी. **पवस्वाऽ३देव आयुषाक्** (ऊ. द. १५९) इति **काक्षीवते** तृतीयायाम् **अपाघ्नाऽ३नूपवसेमृधाः** इत्यस्यां **वयौहोइ** । अत्र वयुमिति मकारस्य **ओवौकारयोरेकीभावे लोप** इत्यनेन लोपप्राप्तस्यातिहारः संधौ । **वयौहो औहोऽ२३४वाझाऽ५नोऽ६हाइ** । [एवम् ।] विरामे मकारलोपः ॥ ४ ॥

ध्यममैषिरे ॥ ५ ॥

वि.&भा. **अभिद्युम्नमैषिरे** (ऊ. द. १६१) **विक्रोशं मध्यम**मिति मकारस्य अनुस्वारीभूतस्य ओवौकारयोरिति लोपप्राप्तस्यातिहारः ॥ ५ ॥

दी. **अभिद्युम्नंबृहद्याऽ३शाः** (ऊ. द. १६१) **इत्यैषिरे** **ध्यमोवा** । अत्र **ध्यम**मिति मकारस्य **ओवौकारयोरेकीभाव** इति लोपप्राप्तस्य अतिहारः संधौ । **ध्यमो वाऽ० यूऽ५ वोऽ६हा** । [एवम् ।] विरामे मकारलोपः ॥ ५ ॥

मरुत्पवमानो रथीतमायां क्रूलीयसन्तानिषभेषु ॥ ६ ॥

वि. **पवमानोरथीतमायां** (ऊ. द. ६८३) **रोहितकूलीयसन्तन्यृषभेषु हरिश्चन्द्रो**

---

4. A[1]My[2]om. अनुस्वारीभूतस्य; PV[2] om. इति.

10. वि. om. भिद्युम्नम्

11. वि. A[1] om. अनुस्वारीभूतस्य; वि. ओवौकार° for ओवौकारयोरिति; PV[2]L[2] after अतिहारः add: सर्वं पदान्त्यं च व्यञ्जनं लुप्यते इत्यनेन.

15. A[2]M[1.2] संतनिन् ऋषभेषु for संतनिषभेषु.

16. A[2]S[2] om. पवमानो...ऋषभेषु

मरुद्गण इति तकारस्य लोपप्राप्तस्यातिहारः **ओवौकाराउवाव्यवहितमि**त्येताभ्याम् ।।६।।

भा. पवमानोरथीतमायां (ऊ. स. ६८३) **हरिश्चन्द्रोमरुदि**ति **रोहितकूलीय-सन्तनिपवमानर्षभेषु** तकारस्य लोपप्राप्तस्य अतिहारः । आद्यन्तयोः **ओवौकारयोरेकीभाव** इति लोपः । मध्यमे **आउवाव्यवहितमि**ति लोपः ॥ ६ ॥

दी. पवमानस्यजाइ । घ्नाऽ२ः (ऊ स. ३८३) इति **रोहितकूलीये** द्वितीयायां **पवमानोरथाइ** इत्यस्यां **मरोऽ२३४वा** । अत्र **मरुत्** इति तकारस्य **ओवौकारयोरेकीभावे लोप** इत्यनेन लोपप्राप्तस्यातिहारः संधौ । **मरोऽ२३४वाद्गाऽ५** । विरामे तकारलोपः ॥

पवाहाउ । मानस्यजाऽ३९उनाऽ२३इ (ऊ.स. ६८४) इति **सन्तनिनि** द्वितीयायां **चान्द्रोमरूऽ३आउवाऽ२३** । अत्र **मरुत्** इति तकारस्य **आउव्यावहितमि**-इत्यनेन लोपप्राप्तस्य अतिहारः संधौ । **चान्द्रोमरूऽ३आउवा ऽ२३द्गाऽ२३४णाः** । एवम् । विरामे तकारलोपः ॥

हाहाउपवमाना (ऊ.द.१८०) इति **ऋषभे पवमाने** द्वितीयायां **मरोवा । गाऽ५** । अत्र **मरुदि**ति तकारस्य **ओवौकारयोरेकीभावे लोप** इत्यनेन लोपप्राप्तस्यातिहारः संधौ । **मरोवाद्गाऽ५ । णोऽ६हाइ** । विरामे तकारलोपः ।।६।।

दूराद्धन्तीये प्रथमे ॥ ७ ॥

वि.&भा. स्वासु **वारवन्तीये प्रथमे** (ऊ. क्षु.९०४) **सनोदूराच्चे**ति तकारस्य श्चुत्वेन चकारीभूतस्य **ओवौकारयोरनन्तरस्वरनीचाद्ययो**-(पु. सू ८२१)रिति लोपप्राप्तस्यातिहारः ॥

दी. आश्वा । औहोऽ२३४वा (ऊ. क्षु. २०९) इति स्वासु **वारवन्तीये** प्रथमे **दूरा । औहोऽ२३४वा । चासा** । अत्र **दूरात्** इति तकारस्य **ओवौकारयोरि**त्यनेन

1. KA[2] तकार for तकारस्य.

11. My[2] om. एवम्

17. वि. om. स्वासु; PV[2]B[1] trans. वारवन्तीये after प्रथमे; भा. om. श्चुत्वेन

18. वि. ओवौकार लोप० for ओवौकारयोरनन्तरस्वरनीचाद्ययोरिति लोप.

19. E trans. वारवन्तीये after प्रथमे

लोपप्राप्तस्य अतिहारः संधौ । दूरा औहोऽ२३४वाबसा । अत्र स्तोश्चुनाःश्चुः (पा. ८. ४. ४०) इत्यनेन तकारस्य चकारः ॥ ७ ॥

रसं मार्गीयवे ॥ ८ ॥

वि. मार्गीयवे रसन्ते मित्रो अर्यमा (ऊ. क्षु. ९०९)इति मकारस्यातिहारः ॥

भा. रसंतेमित्रायाम् (ऊ. क्षु. ९०९) एकर्चे मार्गीयवे मकारस्यानुस्वारीभूतस्य ओवौकारयोरेकीभाव इति लोपप्राप्तस्यातिहारः ॥ ८ ॥

दी. रमौहोवा । तेमाऽ२इ (ऊ. क्षु. ९०९) इति एकर्चे मार्गीयवे रसमिति मकारस्य नीचीभूतस्य ओवौकारयोरेकीभाव इत्यनेन लोपप्राप्तस्य अतिहारः संधौ । रसौहीवान्तेमाऽ२इ । अत्र मोऽनुस्वारः इति मस्यानुस्वारः । विरामे मकारस्य लोपः ॥

हयत्वं सोमासि शांमदे ॥ ९ ॥

वि.&भा. त्वंसोमाद्यायां (ऊ. द. १९२) शांमदे पवस्व मंहयदिति तकारस्य ओवौकारयोरेकीभावे लोपः (पु. सू. ७. १०. २७) इति लोपप्राप्तस्यातिहारः ॥ ९ ॥

दी. तुवंसोमासि ऐ (ऊ. द. १९२) इति शाम्मदे । हयोऽ२३४वा । राऽ५ । अत्र हयत् इति तकारस्य ओवौकारयोरित्यनेन लोपप्राप्तस्यातिहारः संधौ । हयोऽ२३४वाद्राऽ५ । अत्र झलां जशोऽन्ते (पा. ८. ३. २३) इत्यनेन तकारस्य दकारः । विरामे तकारलोपः ॥ ९ ॥

अंद्रि सवार्धितायां वितश्रृङ्ग्योः ॥ १० ॥

---

9. E M^4 before अत्र add: विरामे मकारलोपः.

11. KA^2S^{1-2} त्वं सोमासि for त्वं सोमाद्यायां; M^{1-2} om. त्वं सोमाद्यायां शांमदे; $PV^2M^4L^1A^2$ मंहयद्रयिरिति for मंहयदिति; B^4 दकारस्य for तकारस्य; A^2 after तकारस्य adds: पदान्तस्य

12. P om. लोप इति; KA^2 अतिहारः ओवौकार (A^2 om. ओवौकार) लोपप्राप्तस्य; S^1M^{1-2} अतिहारः । लोपप्राप्तस्य पदान्तस्यैव for ओ वौकारयोः...अतिहारः.

17. दी. & भा. द्रि for अद्रि.

वि. सर्वर्द्धितायां गौरीवित-गौशृङ्गयोः स्वर्विदो अभिगा अद्रिमिति मकारस्य ओवौकारलोपप्राप्तस्यातिहारः ॥ १० ॥

भा. आजागृविरन्त्यायाम् (१३५७-९) अद्रिमिष्णन्निति गौरीवितगौशृङ्गयोः अद्रिमिष्णन्निति मकारस्य ओवौकारयोरेकीभाव इति लोपप्राप्तस्य अतिहारः ॥ १० ॥

दी. आजागृवाऽ३इः । विप्रकृताम् (३. द. २१४) इति गौरीविते तृतीयायां सव । धिताऽ६ । इत्यस्याम् अद्रोवा । आऽ५इ । अत्र अद्रिमिति मकारस्य ओवौकारयोरित्यनेन लोपप्राप्तस्यातिहारः संधौ । अद्रोवामाऽ५इ । विरामे मकारलोपः ।

आजागृविर्विप्रः । ऋताऽ३म् (ऊ. क्षु. ९१९) इति गौशृङ्गे तृतीयायां सत्रधि तात्रधं इत्यस्यां दोअभिगाअद्रोवाऽ३ओऽ२३४वा । आऽ५इ । अत्र अद्रिमिति मकारस्य ओवौकारयोरित्यनेन लोपप्राप्तस्यातिहारः संधौ । दोअभिगाअद्रोवाऽ३ ओऽ२३४वा । माऽ५इ । विरामे मकारलोपः ॥ १० ॥

उभयं स्वासु मैधातिथे ॥ ११ ॥

वि. स्वासु मैधातिथे (ऊ. द. २१५) विद्वेषणं संवननमुभयमिति मकारस्य लोपप्राप्तस्यातिहारः ॥ ११ ॥

भा. स्वासु मैधातिथे अन्त्यायाम् उभयंकरं मंहिष्ठमुभयाविनमिति मकारस्य आउवाव्यवहितस्य लोपप्राप्तस्यातिहारः ॥ ११ ॥

दी. माचिदन्यदोहाइ (ऊ. द. २१५) इति स्वासु मैधातिथे अन्त्यायां गांनचोहाइ इत्यस्यां भायाउवा । काराउवा इति मकारस्याउवाव्यवहितमित्यनेन

---

1. M[1-2] om. सवर्द्धितायां....शृङ्गयोः.

2. वि. व्यवधानम् for न व्यवधानलोपः
8. A[2] om. चोद्गीथे
9. A[2]M[1-2]S[2] after अलोपः ॥ add स्वश्वो न किष्वद्रथायां प्रियासितयोः ॥ इममिन्द्रमध्यमायां वसिष्ठस्य प्रियासितयोर्नकिस्वश्व आनश इत्यस्य व्यवधानम् ॥
10. B[4]A[1] after एव adds: उद्गीथग्रहणं प्रस्तावोपाययोः प्रतिषेधार्थम्
14. A[2] भूत इकार०, M[1]-[2] भूता ओकार० for भूतोकार०
15. L[1]M[4] before गतिः add: म

वायख्यद्रोऽ३१२६ । पवमानाभाऽ३यार्षाऽ३साइ ॥ १५ ॥

वि. दीर्घपूर्वो वृद्धपूर्वश्च इपदान्त आइभूतोऽकाराकारयोः प्रत्यययोः संधौ यकारमापद्यते । विरते गतिर्भवति ॥ १४ ॥

उदाहरणम् । अयंपूषार्यो गौरीविते (ऊ. द- ४८) वायख्यद्रोऽ३१२३ । पवमान । भाऽ३यार्षाऽ३साइ (ऊ. द. ७५२) । अत्र हि गतिश्रान्तस्थमापद्यते इति यकारापत्तिः । रमध्य इति लोपः । पुनरेतेन वचनेन भोगयकारो भवतीति एवं बाभ्रकभाष्यकारेण व्याख्यातम् । असद्गुरवस्तु ब्रुवते अनेन ग्रन्थकारेण एकाराद:काराच्च भोगः (पु. सू. ७. १०. २८) इति औक्थिक्येकाराद्विनैवेकाराद्भोग उक्तः । तस्मात् इकारात् भोगो भवतीति । अत्र यथाभिप्रेतं ग्राह्यम् । दीर्घवृद्ध इत्यस्यापवादः ॥ १५ ॥

भा. दीर्घपूर्वो वृद्धपूर्वश्च इपदान्त आइभूतः अकाराकारयोः प्रत्यययोः संधौ यकारमापद्यते । विरते गतिर्भवति ॥ १४ ॥

तदुदाहृतम् । अत्र हि गतिश्रान्तस्थामापद्यते इति यकारापत्तिः रमध्य इति लोपः । पुनरनेन वचनेन भोगयकारो भवतीति एवं बाहूकभाष्यकारेण व्याख्यानं कृतम् । असद्गुरवस्तु ब्रुवते । अनेन ग्रन्थकारेण स्वयमेव भोगविषय उक्तः । एकाराद:काराच्च

6. S² अमध्य, M¹A²M² मध्यतः for रमध्यः; M¹-² before पुनः add: न; A²M¹-² बाभ्रकाचार्येण for बाभ्रकभाष्यकारेण

8. A² इकारस्य for इकारात् S¹ ओत्सुतस्येकाराद्, S²My¹ और्हित्येकाराद् (corrected in pencil as औत्सुक्येकारादM²) M² औज्झिक्येकारात् for औक्थिक्येकारात्; A² अभिप्रेतः स्यात् गतिश्रान्तस्येति सामान्यमेव तत् for तस्मादिका...ग्राह्यम्; S¹ adds: च after तस्मात्।

9. S¹-² तत्र for अत्रः M¹-²S¹ यथा मे प्रभोग (S¹ भोग for प्रभोग) उक्तः । अभिप्रेतस्यात् गतिश्रान्तस्येति सामान्यमेतत् (S¹ यथाभिप्रेतं ग्राह्यम् । सत्यमेतत् for सामान्यमेतत्) for यथाभिप्रेतं ग्राह्यम् ॥; M¹-²S¹A² om. अस्य

10. PV² वृद्धः पूर्वश्च for वृद्धपूर्वश्च; B⁴A¹ वा for च;PV² om. प्रत्यययोः

12. A¹ अपि for हि;

13. PV² एषां for एवं, B⁴ आहूक for बाहूक

14. PV² om. तु; PV² एकारादकाराच्च for एकाराद:काराच्च

भोग (पु. सू. ७ १० २८)इति औक्थिकानामपि नैव इकारात् भोग उक्तः। तस्मादिकारात् भोगो भवतीति। अत्र यथाभिप्रेतं ग्राह्यम्॥ १५॥

दी. **इपदान्तः** पदान्ते वर्तमानः इकारः। कीदृश इकारः। **दीर्घवृद्धोपहितः**। दीर्घो जातः। ततो वृद्धो जातः। वृद्धलक्षणं तु **दीर्घं[तु]मात्रासंयोगाद्वृद्धमित्यभिधीयते** (मा. ल. १४)। पुनः कीदृश इकारः। **आइभूतः**। आइभावं प्राप्तः। तदनन्तरं **संधौ आइ** इति **गतिर्यकारमापद्यते**। प्राप्नोति। **अकाराकारयोः प्रत्यययोः** सतोः। **विरते** विरामे **आइ** इति गतिर्भवति। न यकारमापद्यते॥ १५॥

तदुदाहृतम्। **विअख्यत्**। अत्र विमध्ये इकारः पदान्तीयः। दीर्घो जातः। ततो वृद्धो जातः। ततः आइभूतः। ततः संधौ आइ इति गतिर्यकारं प्राप्नोति। आकारे प्रत्यये सति। एवं **वायख्यद्रोऽ३** इति रूपं सिद्धम्। एवमेव भाऽ३**यार्षाऽ३साइ**

२ २र २

इति रूपं सिद्धम्। **अयंपूषारयिर्भगाऽ३ए** (ऊ. स. ७९७) इति **मधुश्चुन्निधने**।

१ २ २र १र२र १ २२

वायख्यद्रोऽ३॥ **पावमानाभियर्षसाइ** (ऊ. स. ७५२) इति कण्वरथन्तरे **पवमाना**।

२ १ २ २

भाऽ३यर्षाऽ३ साइ॥ १५॥

एवंजातीयानि॥ १६॥

दी. सामसु एवंजातीयानि उदाहरणानि ज्ञातव्यानि॥ १६॥

नार्षासि पुनानायां यथा गौङ्गवाभीवर्तयोः॥ १७॥

वि.&भा. **पुनानायां गौङ्गवाभीवर्तयोः** अपो वसनो अर्षसीति यकारप्रतिषेधः।

५ र २ ४र५४र ५ १ ४

दी. **पुनानाऽ३ः सोमधारया**। आपोऽ२ (ऊ. द. १२५) इति **गौङ्गवे षा-**

५ २र १ र ५४ २ ४ ५र४ ५

साइ। **आरत्नधाः**। अत्र विरामे न गतेर्यकारः। **पुनाऽ३नाऽ३स्सोमधारयोवा** (ऊ. सं.

1. PV² आच्छिकानाम् for औक्थिकानाम्
5. L¹ तदनन्तरः for तदनन्तरं
9. L¹ आकारे for अकारे
15. ह om. ज्ञातव्यानि
17. M¹-² om. गौङ्गवाभीवर्तयोः; A² om. अपोवसानो; भा. पूर्ववत् यकारप्राप्तस्य for यकार०
19. E संधौ for विरामे

३१५) इत्यभीवर्ते नोआर्षाऽ१साऽ२इ । आरत्नधाऽ३१२३४: । अत्र संधौ न गतेर्यकारः ॥ १६ ॥

भवीयसी प्रमंहिष्ठीये ॥ १८ ॥

वि.&भा. प्रमंहिष्ठीयान्त्यायां कुविन्नो अस्य सुमतिर्भवीयसीति यकारप्रतिषेधः ॥ १८ ॥

दी. प्रमंहाऽ३इष्ठायगायता (ऊ. द. ६५) इति प्रमंहिष्ठीये तृतीयायां याऽ२३४साइ । अच्छाऔऽ३हो । अत्र संधौ न गतेर्यकारः ॥ १८ ॥

अर्चन्त्युद्वंशपुत्रे ॥ १९ ॥

वि.&भा. उद्वंशपुत्रे मध्यमायाम् अर्चन्त्यर्कमिति यकारप्रतिषेधः ॥ १९ ॥

दी. प्रवाः । आइन्द्रायवृत्र (ऊ. द. १२०) इत्युद्वंशपुत्रे द्वितीयायां ता अर्कमरुताः सुवाऽ२३र्काः । ताअ । अत्र गतिलोपः । संधौ न गतेर्यकारः ॥ १९ ॥

विश्वान्यर्य आ पर्णैटतबोधीयर्षभेषु ॥ २० ॥

वि. एना विश्वान्यर्य आ ऐडसौपर्णैटतबोधीयपवमानर्षभेषु यकारप्रतिषेधः ॥

भा. उच्चान्त्यायामैडसौपर्णैटतबोधीयपवमानर्षभेषु विश्वान्यर्य इति यकारलोपः ॥ २० ॥

दी. उच्चातेजोवा । तामन्धाऽ२३४साः (ऊ. ए. ५१२) इति ऐडसौपर्णे तृतीयायां नाअर्य्याऽ२३४आ । नाअ । अत्र गतिलोपः । संधौ न गतेर्यकारः । उच्च । एउच्चा (ऊ. स. ७६६) इत्यैटते तृतीयायां नाऽ२आऽ२३४ औहोवा । नाआ ।

1. E गतेर्यकारलोपः for न गतेर्यकारः

3. M¹-² भवीयसीति प्रमंहिष्ठायां for भवीयसी प्रमंहिष्ठीये

4. M¹-² हिष्ठीयान्त्यायां for °हिष्ठान्त्यायां; भा om. कुविन्नो अस्य सुमतिः

9. भा. om. मध्यमायां

11. E om. अत्र गतिलोपः; L¹ om. न S¹E गतिः for गतेः

अत्र गतिलोपः। संधौ न गतेर्यकारः। उच्चातेजोवा। तामन्धसाः (ऊ. ए. ४२८) इति जराबोधीये तृतीयायां नाअर्यआ। अत्र गतिलोपः। संधौ न गतेर्यकारः। हाहाउच्चातेजा (ऊ. ए. ४५५) इति ऋषभे पवमाने तृतीयायां नाआऽ२र्योऽ२३४आ। नाआ। अत्र गतिलोपः। संधौ न गतेर्यकारः॥ २०॥

इन्द्रा यच्छन्ति-स्रुचश्चरन्ति नैपे ॥ २१ ॥

वि. नैपातिथे इन्द्रायच्छन्त्यागहि (ऊ. द. १५५) स्रुचश्चरन्त्यध्वरे (ऊ. क्षु ९३३) इति च यकारप्रतिषेधः॥ २१॥

भा. यदिन्द्रप्रागन्त्यायाम् इन्द्रायच्छन्तीति यकारलोपः। अग्नआयाहि-मध्यमायां स्रुचश्चरन्तीति इपदान्तस्य दीर्घवृद्धोपहितस्य अकार-आकारप्रत्ययस्य च संधौ यकार-प्राप्तस्य च यकारप्रतिषेधः। एवं सर्वोदाहरणेषु द्रष्टव्यम्॥ २१॥

दी. यदिन्द्रप्रागपागुदाऽ३गे (ऊ. द. १५५) इति नैपातिथे तृतीयायां ताऽ२आऽ२३४औहोवा। ताआ। अत्र गतिलोपः। संधौ न गतेर्यकारः। अग्नआ-याह्यग्निभाऽ३इरे (ऊ. क्षु. ९३३) इति नैपातिथे द्वितीयायां ताऽ२आऽ२३४औहोवा। ताआ। अत्र गतिलोपः। संधौ न गतेर्यकारः॥ २१॥

दधि यज्ञीयक्रौञ्चयोः ॥ २२ ॥

वि.&भा. सोमाःपवन्त-मध्यमायां (सा. ११०२) यज्ञायज्ञीयक्रौञ्चयोः सोमासो दध्याशिर इति यकारप्रतिषेधः॥ २२॥

दी. सोमाऽ५ःप। वाऽ३न्ताऽ३इन्दावाः (ऊ. क्षु. ९०३) इति यज्ञायज्ञीये द्वितीयायां धाऽ३आशऽ३इराः। अत्र गतिलोपः। संधौ न गतेर्यकारः। सोमाः

1. M⁴ om. संधौ
5. M¹⁻³ om. नैपे; S² om. इन्द्रा...नैपे ॥...॰प्रतिषेधः ॥ (L. 7)
6. M¹⁻³ यकारप्रतिषेधः। अग्न आयां मध्यमायां for नैपातिथे....गहि
9. PV² अकारे अकार॰ for अकार-आकार॰
11. M⁴ om. यदिन्द्र....यकारः (L. 12)

पवौहो । ताइन्दवाः (ऊ. क्षु. ६१४) इति क्रौश्चाद्ये द्वितीयायां धाऽ३आशाऽ५इरा ऽ६५६ः । धाआ । अत्र गतिलोपः । संधौ न गतेर्यकारः ॥ २२ ॥

स्यश्विनोर्बोधीये ॥ २३ ॥

वि.&भा. प्रतिष्यान्त्यायाम् बोधीये उतसखास्यश्विनारिति यकारप्रतिषेधः ॥

दी. प्रतिष्यासोवा (ऊ. सं. ७२१) इति जराबोधीये तृतीयायां साअश्विनोः । अत्र गतिलोपः । संधौ न गतेर्यकारः ॥ २३ ॥

अधाह्यग्ने क्रमश्चे ॥ २४ ॥

वि.&भा. अग्नेतमद्य-(ऊ. प्रा. ८२६) मध्यमायां साकमश्वे अधाह्यग्न इति यकारप्रतिषेधः ॥ २४ ॥

दी. अग्नेताऽ३मद्याश्वाऽ६न्ना (ऊ. प्रा. ८२६) इति साकमश्वे द्वितीयायाम् अधाहाऽ३अग्नेक्रतोऽ६र्भा । हाश्न । अत्र गतिलोपः । संधौ न गतेर्यकारः ॥२४॥

स्यन्तमासहोदैर्घर्षभयोः ॥ २५ ॥

वि.&भा. श्रुधीहवायां सहोदैर्घतमसबैराजर्षभयोः कृष्वा दुवांसीति यकार-प्रतिषेधः ॥ २५ ॥

दी. हाउ श्रुधाइ । हावं विपिपा (ऊ. क्षु. ८७१) इति सहोदैर्घतमसे कृष्वादुवाऽसाइ । अन्तमाऽ३ । अत्र संधौ न गतेर्यकारः । श्रुधीहवाम् । विपि ।

4. वि. प्रतिष्यासूनर्यन्त्यायां for प्रतिष्यान्त्यायां; भा. om. बोधीये; वि. °स्यश्वीति for स्यश्विनोरिति

8. KS$^{1-2}$ om. साकमश्वे; M$^{1-2}$ trans. अग्नेतमद्यमध्यमायां after साकमश्वे

9. वि. प्रतिषेधो यकारस्य for यकारप्रतिषेधः

11. M^{4} भरा for र्भा

पवमानस्याद्राइः (र. क्षु. १६८) इति वैराजर्षभे साऽ३अन्त। अत्र गतिलोपः। संधौ न गतेर्यकारः॥ २५॥

वराणि ज्ञीयश्यावाश्वयोः॥ २६॥

वि.&भा. सोमःपवते–तृतीयायां (सा. ९४५) यज्ञायज्ञीयत्रैष्टुभश्यावाश्वयोरन्तः पश्यन्वृजनेमावराणीति यकारप्रतिषेधः॥ २६॥

दी. सोमाऽ५ः प।। वाऽ३ताऽ३इ (ऊ. क्षु. ८९९) इति यज्ञायज्ञीये तृतीयायां राणाऽ२३ आ। अत्र गतिलोपः। संधौ न गतेर्यकारः। सोमःपवा। ते जनि (ऊ. क्षु. ९०५) इति त्रैष्टुभे श्यावाश्वे तृतीयायां वृजनेमावराणाऽ२इ। आतिष्ठताइ। अत्र गतिलोपः। संधौ न गतेर्यकारः॥ २६॥

एकारे च यकारं यामोद्गतोर्गतिमांश्च पदान्तः संधौ
यलोपो विरते। रमताइयेऽ२३। स्यापराइएऽ२३
त्रमताइयेऽ२३॥ २७॥

वि. एकारे च प्रत्यये पदान्त इकारो गतिमान् सन् यकारमापद्यते संधौ। विरते यकारस्य लोपः। ऐडयामोद्धार्गवयोरसाविसोम-(ऊ. अ. ६७६) शिशुंजज्ञान-(ऊ. क्षु. ९१३) तृचयोः स्वयमेवोदाहृतम्। अत्र रमताइएऽ२३ इति स्थिते गतिश्रान्तस्थमापद्यते इति यकारपत्तिः। रमध्य इति लोपः। रमताएऽ२३ इति प्राप्ते

4. KM[1]-[2]S[1]-[2] जागत for त्रैष्टुभ; A[2] om. त्रैष्टुभ

5. M[1]-[2] om. यकार०

13. M[1]-[2] यकारे for एकारे

14. M[2] यकारप्रति for यकारस्य; M[1]-[2] om. असाविसोम-शिशुंजज्ञान

15. M[1]-[2] रमता इयेक्षु (M[1] रमतयेंषु) मतायिये (M[2] मतायें) सापराइये (M[2] रायें) एकारदः (M[2] द) काराच्च भोगः पूर्व (M[2] वं) लक्षणेन रमता इये इति प्राप्ते विशेषः। गतिमान् पदान्तो भवति। रमता

अनेन वचनेन गतिमान् सन् यकारो भवति । रमाताइए़ऽ२३ । एष विशेषः । उक्तेष्वप्युदाहरणेषु एवमेव द्रष्टव्यम् ॥ २७ ॥

भा. **दीर्घवृद्धोपहितः** (पु. सू. १०. १४) इत्यनेन लक्षणप्राप्तस्य विशेष उच्यते । ऐडयाम-उद्वद्भार्गवयोः **असावि सोम** (ऊ. अ. ६७६) **शिशुंजज्ञानं**-(ऊ. क्षु. ९१३) तृचयोः **पुनानोवारमत्ये** इति पूर्वलक्षणेन **रमता३यिये३३** एवं प्राप्ते अत्र विशेषः । गतिमान् पदान्तो भवति । **रमताइये३३** एष विशेषः । परेष्वप्युदाहरणेषु एवमेव द्रष्टव्यम् ॥ २७ ॥

दी. **असात्राइसोऽ२३** । **मोअरुषाऽ२३ः** (ऊ. अ. ६७६) इत्यैडयामे **रमता इयेऽ२३** । अत्र **रमतिए** एवं स्थिते । अत्र इपदान्तो दीर्घवृद्धोपहितः आइभूतः । तत एकारे च प्रत्यये गतिर्यकारमापद्यते । ततः पदान्तो गतिमान् भवति । एवं कृते **रमता इयेऽ२३** इति रूपं सिद्ध्यति । **असाविसोम** (ऊ. अ. ६७६) इत्येतासु तृतीयायां **स्य-पराइयेऽ२३** इति पूर्ववद्रूपं सिद्धम् । **शिशुंजाज्ञाऽ२३** (ऊ. क्षु. ९१३) इत्युद्वद्भार्गवे **त्रमताइयेऽ२३** इति पूर्ववद्रूपं सिद्धम् ॥ २७ ॥

एकारादःकारच्च भोगः ॥ २८ ॥

वि. एकारनिमित्तादःकारनिमित्ताच्च भोगयकारो भवति । भुक्तं पूर्वस्थानं भजते इति **भोगः** । उदाहरणम् **एह्यू**-साकमश्व (आ. गे. १. १. ७. १.; ऊ. द. १५ **एभिर्वर्द्धासइन्दुभिरिति** सेकारे **समध्यमयवायामिति** यकारः **वर्धास इन्दुभिरिति** स्थिते

इये एष विशेषः; A², मिति ययोः रमता इये । एकारदःकाराच्च भोगः कचिदि तिकारात् काराच्च भोगः पूर्वलक्षणेन रमता इये इति प्राप्ते विशेषः । गतिमान् पदान्ते विरामे लोपः रमताइये एव विशेषः; S¹ तृचयोः । रमताइयेऽ२३ । स्यापराइयेऽ२३ । त्रमताइयेऽ२३ । एकारादःकाराच्च भोगः क्वचिदि-कारात् । भोगः पूर्वलक्षणेन रमतायेऽ२३ इति प्राप्ते विशेषः । गतिमान् पदान्ते विरामे लोपः । रमता इयेऽ२३ । एष विशेषः for तृचयोः...एष विशेषः (P 684, 1. 1)

2. A² परेषु for उक्तेषु

15. M¹KM² पूर्वं for पूर्वं

16. KS¹⁻²A² भुज्यते for भजते

17. S¹A² समध्यमयवायवावं, My समध्यम०, for समध्यमयवायाम्; S² om. सेकारे....इन्दुभिरिति

रमध्य इति लोपः। ततः वर्धास इन्दुभिरिति स्थिते भोगयकारो भवति। अग्नि-वृत्रश्रौतर्षे शुक्र आहुत इति कःकारे अस्थाद्यमिति विसर्जनीयस्य यकारः। शुक्र-याहुत इति स्थिते रमध्य इति लोपः। ततः शुक्र आहुत इति स्थिते भोगयकारो भवति ॥ २८ ॥

भा. यकारो भवति। भुक्तं पूर्वस्थानं भजत इति भोगः। उदाहरणम्—एह्यू-साकमश्वे (ऊ. द. १५) एभिर्वर्धास इन्दुभिरिति सकारे समध्यमयवायावमिति यकारः। सयाइन्दुभिरिति स्थिते रमध्य इति यकारलोपः। वर्धास इन्दुभिरिति स्थिते भोगयकारः। एकाराद्भोगः अःकाराच्च सिद्धिः। शुक्र आहुतः (सा. ४) इत्यत्र अस्थाद्यमिति विसर्जनीयस्य यकारापत्तिः। रमध्य इति लोपः। ततः शुक्राया इत्यत्र यकारो भवतीति भोगः ॥ २८ ॥

दी. एकारादःकाराच्च भोगयकारो भवति। भुक्तपूर्वं स्थानं भजत इति भोगः।
५ररर २ ४ र ५ ॽ
उदाहरणम्—एह्यूषूऽ३ब्रवाणाऽ६इताइ (ऊ. द. १५) इति साकमश्वे सयाऽ२३हाऽ३४३इ। अत्र आर्चिके वर्धास इन्दुभिरिति स्थिते सकारे समध्यमयवायम् इत्यनेन आयू इति कृते रमध्यमिति यकारलोपः। आर्चिके वर्धास इन्दुभिरिति स्थिते अत्र गाने
२
यकाराद् भोगयकारो भवति। तदनन्तरं सयाऽ२३हाऽ३४३इ इतिरूपं सिद्धम्। अःकार-
३ १ र २
स्योदाहरणम्—अग्निर्वृत्रा (ग्रा. गे. १. १. ४. १) इति श्रौतर्षे क्रायाहुतः। अत्रार्चिके शुक्रःआहुतः इति स्थिते अस्थाद्यम्। अस्थात् परो विसर्जनीयो यकारमापद्यते। ततो

---

1. M^{1-2} अमध्यगतिलोपं वर्धास इन्दुभिरिति स्थिते भोग इकारः एकाराद्भोगः। अःकाराच्च समिद्धः शुक्र आहुत इति स्थिते अत्रावस्थानमिति विसर्जनीयस्य यकारपत्तिः। अमध्य इति लोपः! त्वत्व शुक्र इत्यत्र यकारो भवतीति भोगः। for रमध्य इति....भवति (L. 4)॥; A^3 अपि विरते अमध्यः for इति स्थिते रमध्यः; A^2S^1 om. ततः वर्धास...रमध्य इति लोपः (L.3); S^1 अमध्यः for रमध्यः

3. S^1A^2 इत्यत्र यकारो भवति इति भोगः for आहुत....भवति

6. A^1 om. सकारे ....इन्दुभिरिति; B^4V^2 संध्यम for समध्यम; PL^2 मध्यमे यः ययावम् for समध्यमयवायावम्; P यकारपयस L^1 यकार यियस for यकारः। सया

9. PB^4V^2 अमध्य for रमध्यः

10. B^4 after भोगः adds: साकमश्वे तावत्। एभा३३३इर्वर्धा३सया३३३हा३३३ई। क्रायाहतः क्रायाहता२३१११ः।

11. E पूर्वस्थानं for ०पूर्वं स्थानं

13. E अत्ररे संध्यम यवायवम् for सकारे समध्यम यवायावम्; L^1 मध्यय for समध्यम

रमध्यम् इति यकारलोपः । ततः आर्चिके **शुक्र आहुत** इति स्थिते गाने अःकारात् भोगयकारो भवति । तदनन्तरं **क्रयाहुतः** इति रूपं सिद्धम् ॥ २८ ॥

क्वचिदिकारात् ॥ २९ ॥

वि **क्वचिद्** इकारनिमित्तात् भोगयकारो भवति । **राये अग्ने**-द्वितिये (ग्रा. गे. ३. १० ९३. २)॥ २९ ॥

ओवौकारयोरेकीभावे लोपः ॥ ३० ॥

वि. ओवा च औकारश्च ओवौकारौ । तयोः पूर्वस्यैकीभावे लोपः । उदाहरणम्—**सनोमहोवो** (ऊ. अ. ५३७) । औकारोदाहरणम्—**कुवौहोवा** (ऊ. अ. ५३८) इति ॥ ३० ॥

इति पुष्पसूत्रविवरणे संधावन्तस्थव्यवधाने तृतीयस्य दशमः खण्डः ॥ १० ॥

भा. ओवा च औकारश्च ओवौकारौ । तयोरोवौकारयोरेकीभावे लोपः । उदाहरणम् ओवायाः **सनोमहोवा** (ऊ. अ ५३७) इति । औकारोदाहरणम्—**कुवौहोऽ३वा**-(ऊ. अ. ५३८) इति ॥ ३० ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य दशमी खण्डिका समाप्ता ॥ १० ॥

दी. ओवा च औकारश्च ओवौकारौ । तयोः **ओवौकारयोरेकीभावे**

---

4. A^2 इकारनिमित्तस्य for इकारनिमित्तात् A^2 भोगो for भोग०; A^2 om. राये अग्नेद्वितीये
7. M^{1-2} ओवौकारयोश्च for ओवा च औकारश्च; A^2M^{1-2} ओवौकारः for ओवौकारौ; before पूर्वस्य A^2S^1 add: पूर्वः
8. A^2M^{1-2} ओकारो ०for औकारो,० S^1M^{1-2} तवौ A^2 तावौ for कुवौ

सति स्वरव्यञ्जनलोपः । उदाहरणम् ओवायाः—**जराबोधोवा** (ऊ. अ. ५३७) इति जराबोधीये द्वितीयायां **सनोमहोवा** । अत्र ओवायाः संयोगे आकारनकारलोपः । औकारस्योदाहरणम्-**तद्वौहोवा** (ऊ. अ. ५३८) इति मार्गीयवे तृतीयायां **कुवौहोवा** । अत्रौकारस्य एकीभावे तकारेकारयोर्लोपः । **क्वचिदिकारादोवौकारयोरेकीभावे न इकारलोपः** । उदाहरणम् **आऽ५ग्निम्** (ऊ. द. २२२) इति वामदेव्ये तृतीयायां **यन्त्यौहो३** । **शाऽ५इशुम्** (ऊ. ए. ३८१) इति वामदेव्ये **एत्यौहोऽ३** । अत्र तिमध्ये इकारस्य न लोपः ॥ ३० ॥

इति फुल्लदीपे सप्तमप्रपाठकस्य दशमः खण्डः ॥ १० ॥

॥ संधौ यकारवकारव्यवधानं समाप्तम् ॥

एकादशः खण्डः

आभावः

वृद्धमन्तःपदे तालव्यमा भवति हादौ स्तोभे प्रत्यये ॥ १ ॥

वि. तत्रातिहारान्ता व्याख्याताः । इदानीं क्रमप्राप्त आभाव उपदिश्यते । कस्मिंश्चित् प्राप्ते इदमारभ्यते । तालव्यमाइ यद्वृद्धम् (पु. सू. ३. १. १)इति वृद्धं तालव्यमन्तःपदिकं हकारादौ स्तोभे प्रत्यये ओ भवति ॥ १ ॥

भा. आभावाः प्रक्रान्ताः । तत्र अतिहारान्ता व्याख्याताः । इदानीं क्रमप्राप्तः

1. R om. स्वर०
3 .ककारस्य for औकारस्य
4. E तकारलोपः इकारश्च for तकारेकारयोर्लोपः; S[1]R om. तकारेकारयोर्लोपः; RL[1]E इकारस्यालोपः for न इकारलोपः
6. RL[1]EMy[2] after लोपः add: तकारलोपः इकारस्य
7. My[2-3] सप्तमाध्यायस्य for सप्तमप्रपाठकस्य
15. PB[4] भावाः for आभावाः

आभावः । स उच्यते । कस्मिन् प्राप्ते इदमारभ्यते । **तालव्यमायि यद्वृद्धम्** (पु. सू. ३. १. १) इति वृद्धस्य तालव्यस्य आयिभावः प्राप्तः । तत्रान्तःपदिकस्य तालव्यस्य हकारस्तोभ-प्रत्ययस्य अयं विशेषः । आभावो भवति । न गतिरित्यर्थः ॥ १ ॥

दी. इदानीमाभाव उच्यते । तत्र **तालव्यमाइ यद्वृद्धम्** (पु. सू. ३. १. १) इत्यनेन वृद्धस्य तालव्यस्य आइभावे प्राप्ते अत्रान्तःपदिकस्य तालव्यस्य हादौ स्तोभे आभावमाह । **अन्तःपदे** पदमध्ये **वृद्धं तालव्यम्** इकारम् ईकारम् एकारम् ऐकारम् । आ भवति । **हादौ स्तोभे प्रत्यये** । हकार आदिर्यस्य स हादिः । तस्मिन् हादौ ॥ १ ॥

प्रतिभागं । नदाऽ३हाऽ३इ पप्रीऽ२म्वयममृतम् । जाता ऽ२३वा । हुम्माइ । महाहस्तीदक्षाऽ२३होइ ॥ २ ॥

वि. उदाहरणं श्रायन्तसौभरे ॥ २ ॥

भा. तदुदाहृतं सौभरयज्ञायज्ञीयराज्याकूपारेषु ॥

दी. उदाहरणम् । **श्रायाऽ३न्ताऽ३इन्नसूरीयोवा** (ऊ ए. ३८८) इति सौभरे **प्रतिभागम्** । **नदाऽ३हाऽ३इ** । अत्र दि-मध्ये इकारे आभावः । यज्ञाऽ५य । ज्ञाऽ३ वोऽ३ग्नायाइ (ऊ.द. १४) इति यज्ञायज्ञीये **पप्रीऽ२म् वयममृतम्** । **जाताऽ२३वा** । अत्र वे-मध्ये एकारे आभावः । आतूनइ । द्रक्षुमाऽ३न्ताम् (ऊ. द. २४) इति राज्याकूपारे **महा हस्तीदक्षाऽ२३होइ** । अत्र क्षिमध्ये इकारे आभावः ॥ २ ॥

एवंजातीयानि ॥ ३ ॥

दी. सर्वसामसु **एवंजातीयानि** उदाहरणानि ज्ञातव्यानि ॥ ३ ॥

---

1. PB[4] before उच्यते add: इदानीम्
2. B[4] यद्वृद्धस्य for वृद्धस्य; B[4] आयिभावप्राप्तस्य for आयिभावः प्राप्तः
13. My[2] om. प्रतिभागं
18. My[2] after ०जातीयानि add: सर्वाणि

न हिन्वि-तवद्यौरिन्द्रायां सौभरे ॥ ४ ॥

वि. आइप्राप्तस्य पूर्वसूत्रेणाभावप्राप्तस्यापवादः आइभाव इत्युक्तः । **तवद्यौरिन्द्रायां सौभरे** (ऊ. ए. ५१९) **त्वामापः पर्वतासश्च हिन्विर** इति आभावप्रतिषेधः ॥

भा. पूर्वलक्षणप्राप्तस्यापवादः । वृद्धस्यान्तःपदिकस्य हादिस्तोभप्रत्ययस्य तालव्यस्य आभवप्राप्तस्य प्रतिषेधः । उत्सर्ग एव प्रतिप्रसूयते । गतिरेव भवतीत्यर्थः । **तवद्यौरिन्द्रायां सौभरे त्वामापः पर्वतासश्चहिन्वीति** आभावप्रतिषेधः ॥ ४ ॥

दी. पूर्वलक्षणेन प्राप्तस्याभावस्य निषेधमाह- **तवाऽ३त्याऽ२दिन्द्रियंबृहोवा** (ऊ. ए. ५१९) इति **सौभरे** द्वितीयायां **तवद्यौरिन्द्रायां** **चहाऽ२इहाऽ३इ** । अत्र हिमध्ये नाभावः ॥ ४ ॥

आचिक्र मृज्यमानायां रन्ध्रोत्तरवाजाजिन्मन्तेषु ॥ ५ ॥

वि.&भा. मृज्यमानद्वितीयायाम् **औक्ष्णोरन्ध्रोत्तरवाजजिन्मन्तेषु वृषो अचीति** आभावप्रतिषेधः ॥ ५ ॥

दी. **मृज्यमानस्सुहस्त्या** (ऊ. द. १०३) **इत्यौक्ष्णोरन्ध्रोत्तरे** द्वितीयायां **वार्षोअचाऽ३इ** । **हाऽ३हाइ** । अत्र **चि**-मध्ये नाभावः । **मृज्यमानस्सुहा** (ऊ. द. १०४) इति **वाजजिति** द्वितीयायाम् **अचाऽ२इ होइ** । अत्र चिमध्ये नाभावः । **मृज्यमानस्सुहस्तिया** (ऊ. द. १०५) इति **समन्ते** द्वितीयायां **वृषोआऽ२३चाऽ३इ** । **होवाऽ३हाइ** । अत्र **चि**-मध्ये नाभावः ॥ ५ ॥

---

2. A[2] आशुभार्गवः for आइभावः; M[1-3] इत्यर्थः for इत्युक्तः
5. V[2] निषेधः for प्रतिषेधः; PV[2] प्रतिश्रूयते, A[1] प्रतिसूयते for प्रतिप्रसूयते
10. M[1-2]M[4] वाजि for वाज; R after ०जिति adds: औक्ष्णरन्ध्रे
11. KS[1-2]A[2] मृज्यमानायां for मृज्यमानद्वितीयायाम् ; M[1-3] मृज्यमानवाजिजिन्मन्तौक्ष्णोरन्ध्रोत्तरेषु for मृज्यमानद्वितीयायां----न्मन्तेषु
12. वि. om. आभाव०
15. M[4] वाजि० for वाज०

इव दुहानायां पृश्निमन्तयोः ॥ ६ ॥

वि.&भा. **तवाहंसोमान्त्यायां** (ऊ. ए. ५१५) **पृश्निसमन्तयोः** **शकुनाइवेति** अनाभावः ॥ ६ ॥

दी. **दुहानोऽ२३बभ्रऊधनिहाउ** (ऊ. सं. ३३३) इति **पृश्निनि** **शकुनाऽ१आऽ२३इ** । **होवाऽ३हाइ** । अत्र **इव-इति** इकारे नाभावः । **तवाहँसोमरारणा** (ऊ. ए. ५१५) इति **समन्ते** तृतीयायां **श** । **कुनाऽ२३आऽ३इ** । **होवाऽ३हाइ** । अत्र **इव-इति** इकारे नाभावः ॥ ६ ॥

गायन्तित्वायां च त्वाष्ट्रीसाम्नि ॥ ७ ॥

वि.&भा. **गायन्तित्वायां** (ऊ. क्षु. ८९०) **च** **त्वाष्ट्रीसाम्नि** **उद्वंशमिवेति** अनाभावः ॥ ७ ॥

दी. **गाय** । **तित्वाऽ३** । **हाऽ३हा** (ऊ. क्षु. ८९०) इति **त्वाष्ट्रीसाम्नि** **उद्व** । **शमाऽ३इ** । **हाऽ३हाइ** । अत्र **इव-इति** इकारे नाभावः ॥ ७ ॥

कनि तिस्रोवाचायां सैन्धुक्षितौशनयोः ॥ ८ ॥

वि. **सैन्धुक्षितौशनयोस्तिस्रोवाचायां** **कनि-शब्द** आइ भवति ॥ ८ ॥

भा. **तिस्रोवाचायां** **सैन्धुक्षितगायत्रीसामौशनयोः** **हरिरेति** **कनीति** अनाभावः ॥ ८ ॥

---

2. A² सोमायां for सोमान्त्यायां; वि. trans. पृश्निसमन्तयोः after शकुना इवेति
5. M⁴ om. तवाहं...ना भावः (L. 7)
8. M⁴ om. गायन्ति...साम्नि
9. M¹⁻² om. गायन्तित्वायां च त्वाष्ट्रीसाम्नी; R⁴L³ त्वायायां PV² त्वायायां for त्वायां; after त्वायां L² adds: दियनुतने A¹ ध्यनुतुन्ने, P द्विषन्तुर्तमे V² द्विषऊतमि
10. वि. प्रतिषेधः for अनाभावः
11. M⁴ om. गाय...नाभावः (L. 12)
15. A² om. सैन्धुक्षित....०शनयोः; KS¹⁻² आइ भवति, A² आभवति for अनाभावः

दी. तिस्रोवाचो । हाई (ऊ. अ. ५९२) इत्यैडसैन्धुक्षिते आद्यायां काना-ऽ३इहाइ । अत्र नि-मध्ये नाभावः । तिस्रोवाचाः । उदीराऽ२३ताइ (ऊ. स. ७६९) इति गायत्रीसामौशने आद्यायां कानाऽ२३इहाऽ३४३इ । अत्र नि-मध्ये नाभावः ॥ ८ ॥

संहिते त्वा भवति ॥ ९ ॥

वि. भा. संहिते तु कानि-शब्दः आ भवति ॥ ९ ॥

दी. तिस्रोवाचउत् (ऊ. सं. ३२९) इति संहिते प्रथमायां कनाऽ२३ । हाउवाऽ३ । अत्र आभावप्रतिषेधो नास्ति ॥ ९ ॥

वारे सर्वत्रान्तःपदं ना भवति ॥ १० ॥

वि. & भा. उत्तरे वारवन्तीये तालव्यस्यान्तःपदिकस्य सर्वत्रानाभावः । यथा एह्यूष्वाद्यन्तयोः अग्ना भुवन्ने इति च ॥ १० ॥

दी. एहियूषा औहोहाइ (ऊ. ए. ५०७) इत्युत्तरे वारवन्तीये अन्तःपदिकस्य तालव्यस्य न आभावः । अग्नाआऽ२३४इहाइ । अत्र इ-मध्ये नाभावः । तृतीयायां भुवन्नाऽ२३४इहाइ । अत्र ने-मध्ये नाभावः । एवं सर्वत्र । सर्वेषु वारवन्तीयेषु अन्तःपदिकस्य तालव्यस्य नाभावः ॥ १० ॥

स्वास्वा भवति निमर्त्यात् ॥ ११ ॥

---

5. A[2] om. संहिते त्वा भवति ॥ संहिते····आभवति; M[1-3] तिस्रोवाचाद्यायां कनिशब्दो नाउभवति for तु कनिशब्द आभवति

7. E आद्यायां for प्रथमायां

8. M[4] आभावो भवति, R. निमध्येनाभावः for आभावप्रतिषेधो नास्ति

10. वि. om. सर्वत्र

11. वि. उदाहरणम् for अग्ना भुवन्ने इति च

वि.&भा. स्वासु वारवन्तीयोत्तरे निमर्त्यादिति आभवति ॥ ११ ॥

दी. अश्वंनत्वा औहोहाइ (ऊ. ए. ४९१) इति स्वासु वारवन्तीये तृतीयायां निमार्त्ताऽ२३४हाइ । अत्र र्ति-मध्ये आभावः ॥ ११ ॥

वने विष्णव इत्येतौ शब्दावर्षासोमायां शाकले ॥ १२ ॥

वि.&भा. अर्षासोमाद्ययोः शाकले (ऊ. द. ८३) सीदन्योनौ वने सोमा अर्षन्तु विष्णव इत्येतावनाभावौ ॥ १२ ॥

दी. अर्षासोमाऽ२द्युमत्तमाः (ऊ. द. ८३) इति शाकले प्रथमायां योनौ वनाऽ२३इ । हुम् । अत्र ने-मध्ये नाभावः । द्वितीयायाम् आर्षन्तुवाऽ२३इ । हुम् । अत्र वि-मध्ये नाभावः ॥ १२ ॥

वरिवः सन इन्द्रायां कौत्से ॥ १३ ॥

वि. सन इन्द्रयां कौत्से (ऊ. क्षु. ८५३) वरिबो विदित्यनाभावः ॥ १३ ॥

भा. उच्चाद्वितीयायामैडकौत्से वरिवो वित्परिस्रव इत्यनाभावः ॥ १३ ॥

दी. सनाहीन्द्राऽ२३ । ययज्यवईया (ऊ. क्षु. ८५३) इत्यैडकौत्से वाराऽ३इहाइ । अत्र रि-मध्ये नाभावः ॥ १३ ॥

पव्यध्वर्यो साके ॥ १४ ॥

वि. अध्वर्यायां साकमश्वे (ऊ. द. १४५) सोमंपवीत्यनाभावः ॥ १४ ॥

---

1. PV[2] अनाभावः L[1] ईभावः for आभवति

5. A[2] सोमाद्यायां for सोमद्ययोः; भा. after वने add तालव्यस्यान्तःपदिकस्य

6. A[2]PV[4]B[4]L[1]A[1] om. इत्येतौ PV[2]B[4]L[2]A[1] अनाभावः for अनाभावौ

11. A[2] om. सन इन्द्रायां कौत्से; KS[1-2] om. कौत्से

भा. अध्वर्यो - प्रथमायां धुरासाकमश्वे सोमंपवि इत्यनाभावः ।। १२ ।।

दी. अध्वर्योआऽ३ । हौऽ३होऽ३१ (ऊ. द. १४५) इति धुरांसाकमश्वे सोमंपवाऽ३इ । हौऽ३होऽ३१ । अत्र वि-मध्ये नाभावः ।। १४ ।।

सवीरायां वैश्वामित्रे ॥ १५ ॥

वि.&भा. प्रसुन्वानान्त्यायां वैश्वामित्रे हरिःपवित्रे इत्यनाभावः ।। १५ ।।

दी. प्रसुन्वानायअन्धसः (ऊ. स. ७५७) इति वैश्वामित्रे तृतीयायां हारिः-पवाऽ२३इहाऽ३इ । अत्र वि-मध्ये नाभावः ।। १५ ।।

डिनाद्वितीयायाम् ॥ १६ ॥

वि. प्रतआश्विनी - द्वितीयायां शैखण्डिने यदी पवित्रे इत्यनाभावः ॥ १६ ॥

भा. पवि-शब्द एव । यदी पवीति प्रतआश्वि-द्वितीयायां शैखण्डिने अ-नाभावः पविशब्दस्य ॥ १६ ॥

दी. प्रताऽ३होइ । आश्वीऽ३होऽ२३४ (ऊ. क्षु. ९०६) इति शैखण्डिने द्वितीयायां पवाऽ३इहोऽ२३४इ । अत्र वि-मध्ये नाभावः ॥ १६ ॥

त्वां रिहन्तीत्यत्र च त्वाष्ट्रीसाम्नि ॥ १७ ॥

वि. पवस्ववाज-द्वितीयायां हरिंपवीत्यनाभावस्त्वाष्ट्रीसाम्नि ॥ १७ ॥

भा. पविशब्द एव । पवस्ववा-द्वितीयायां द्व्यनुतुन्ने त्वाष्ट्रीसाम्नि हरिंपवीति अनाभावः ॥ १७ ॥

---

1. $B^4L^2A^1$ ऐडं for धुरां

5. $PB^4V^2A^1L^2$ after मित्रे add: पविशब्द एव

16. A^1 पवित्रशब्द एव । पवस्ववाजायां for पविशब्द एव । पवस्ववाद्वितीयायां; B^4 द्वियनुतुन्ने; PV^3 उत्तरे द्विषनूतन्ते for द्व्यनुतुन्ने

दी. पव। स्ववाऽ३। हाऽ३हा (ऊ. सं. ३०८) इति त्वष्ट्रीसाम्नि द्वितीयायां त्वाꣳरिहन्तीत्यस्यां हरिमुपवाऽ३इ। हाऽ३हाइ। अत्र वि-मध्ये नाभावः ॥

रभि सुषावसोमायां रौरवे ॥ १८ ॥

वि.&भा. परीतोषि-द्वितीयायां रौरवे (ऊ. सं. ३७३) अदब्धः सुरभीत्यनाभावः ॥ १८ ॥

दी. परीतोषिश्वाऽ३ताम्ऽ२३४ताम् (ऊ. सं. ३७३) इति रौरवे द्वितीयायां सुषावसोमायाम् अदब्धस्सुरभाऽ२३इहाइ। अत्र भि-मध्ये नाभावः ॥ १८ ॥

रहस्ये च संकृतिनि ॥ १९ ॥

वि. रहस्ये च संकृतिनि अदब्धःसुरभिन्तर इति प्रतिषेधः ॥ १९ ॥

भा. रहस्यविषये च संकृतिनि अदब्धः सुरभीत्यनाभावः ॥ १९ ॥

दी. रहस्ये चारण्यके गाने संकृतिनो गीत्योत्पन्ने एपारी। तोषिश्वताऽ२३होऽ२३इ (र. द. २४)। इति संकृतिनि तृतीयायां ब्धस्सुरभाऽ२३इहोऽ२३। अत्र भि-मध्ये न आभावः ॥ १९ ॥

गौशृङ्गे स्वर्विदः ॥ २० ॥

वि.&भा. आजागृविरित्यन्त्यायां गौशृङ्गे (ऊ. क्षु. ९१९) स्वर्विदो अभिगा इत्यनाभावः ॥ २० ॥

दी. आजागृविर्विप्रः। ऋताऽ३म् (ऊ. क्षु. ९१९) इति गौशृङ्गे तृतीयायां पदज्ञाःसूऽ२वर्वोऽ२इ। हाऽ२ऊउवाऽ२इ। अत्र र्वि-मध्ये नाभावः ॥ १८ ॥

---

4 भा. मध्यमायां for द्वितीयायां; वि. trans रौरवे after नाभावः

14. भा. गृवितृतीयाया for गृविरित्यन्त्यायां; KA[2]S[1-3] trans गौशृङ्गे after अनाभावः।

15. वि. om. इति

सुम्नेषु मानस्तरभीत्यत्र जमवर्तेषेधयोः ॥ २१ ॥

वि.&भा. पिबासुतान्त्यायां **जमदग्नेरभीवर्तनिषेधयोः आ नः सुम्नेष्वित्यना-** भावः ॥ २१ ॥

दी- **पिबासुतस्यरसिनोमत्स्वाहाउ** (ऊ. स. ७१५) इति **जमदग्नेरभीवर्ते** तृतीयायाम् **आनास्सुम्नाऽ२३** । हा । अत्र म्ने-मध्ये नाभावः । **पिबासुतस्याऽ३-रसिनाः** (ऊ. ए. ५११) इति **निषेधे** तृतीयायाम् **आनाऽ३ःसुम्नाइ** । अत्र म्ने-मध्ये न आभावः ॥ २१ ॥

माशिवासः प्रहिन्वान इति च पूर्वे जनित्रे ॥ २२ ॥

वि. इन्द्रक्रतुमध्यमायां **माशिवासः, अभिसोमान्त्यायां प्रहिन्वान इति च** न आभावः **पूर्वे जनित्रे** ॥ २२ ॥

भा. पूर्वे जनित्रे (ऊ. सं. ३६५) इन्द्रक्र-मध्यमायां **माशिवास** इत्यनाभावः । तथा **अभिसोमान्त्यायां** (ऊ अ. ५४१) **प्रहिन्वान** इत्यनाभावः ॥ २२ ॥

दी. **इन्द्रकाऽ३तुंन आभरा** (ऊ. सं. ३६५) इति जनित्राद्ये द्वितीयायां **मा-शाऽ३इहोइ** । अत्र शी-मध्ये नाभावः । **अभिसोऽ३मास आयवाः** । **हुवेहोऽ२इ** (ऊ. अ. ५४१) इति जनित्राद्ये तृतीयायां **प्रहाऽ३इ होई** । अत्र हि-मध्ये नाभावः ॥ २२ ॥

गीर्भिरुत्तरे ॥ २३ ॥

वि.&भा. **उत्तरे** जनित्रे (ऊ. अ. ५४२) **तंवोदस्म**-मध्यमायाम् **इन्द्रंगीर्भि-** रित्यनाभावः ॥ २१ ॥

---

8. M¹-² पूर्वै for पूर्वे
9. M¹-² om. च
10. M¹-²A² om. पूर्वे जनित्रे
16. M¹-² om. गीर्भिरुत्तरे

२४र ३ ४५र ३२
दी. तंवोदस्ममृती । षहाऽ३म् (ऊ. अ. ५४२) इत्युत्तरे जनित्रे द्वितीयायां
४ ५ १
इन्द्रंगाइ । होइ । होइ । अत्र गी-मध्ये न आभावः ॥ २३ ॥

श्रीणा हविषे प्रावाज्यक्षायाम् ॥ २४ ॥

वि.&भा. प्रवाज्यक्षाद्वितीयायां सौहविषे (ऊ. द. १३५) गोभिः श्रीणान इति आनाभावः ॥ २४ ॥

१२र १ २ १ २र १
दी. प्रवाजियक्षाः (ऊ. द. १३५) इति सौहविषे द्वितीयायां गोभाइश्रा-
४
ऽ२३४इहाइ । अत्र श्री-मध्ये न आभावः ॥ २४ ॥

भ्रवे जि पवमानस्य जिघ्नतायाम् ॥ २५ ॥

वि. बाभ्रवे पवमानस्याद्यायां जीरा अजिर इत्यनाभावः ॥ २५ ॥

भा. गतनिधने बाभ्रवे (ऊ. द. १७८) पवमानस्यजिघ्नतायां जीराअजीत्यनाभावः ॥ २५ ॥

२ र १ २
दी. पवमाना । स्यजिघ्नऽ२३ताः (ऊ. द. १७८) इति गतिनिधने बाभ्रवे
१ २ २
आजाऽ३इहाइ । अत्र जि-मध्ये न आभावः ॥ २५ ॥

चव्यधयादिमायामुत्सेधे ॥ २६ ॥

वि. अधयदिमायामुत्सेधे (ऊ. ए. ५२५) इमाचवीत्यनाभावः ॥ २६ ॥

---

3. R $L^{1}EM^{4}$ R सवाज्यक्षायाम् for प्रवाज्यक्षायाम्
4. $KA^{2}S^{1-2}$ सवाज्यक्षा for प्रवाज्यक्षा; A^{2} श्रीगन्तः for श्रीणानः
5. $KA^{2}S^{2}$ नाभावः for अनाभावः
10. P नत for गत; V^{2} om. गतनिधने बाभ्रवे; P after जिघ्नातायां adds: पवमानस्यजिघ्नान्त्यायां
12. $L^{1}E$ श्वति for गत
15. KS^{1} om. अधयदिमायामुत्सेधे

भा. प्रत्नंपीयू-तृतीयायामुत्सेधे (ऊ. ए. ५२५) इमाचवीत्यनाभावः ॥ २६ ॥

दी. प्रत्नंपीयूपंपूर्व्यंयदु (ऊ. ए. ५२५) इत्युत्सेधे तृतीयायाम् अथयदि-मायाम् इमाचवाऽ२इ । अत्र वि-मध्ये न आभावः ॥ २६ ॥

हिन्वाभिसोमायां तनिभीशत्रयोः ॥ २७ ॥

वि. प्रहिन्वान इत्यनाभावः अभिसोमान्त्यायां सन्तन्याभीशवयोः ॥ २५ ॥

भा. अभिसोमान्त्यायाम् आभीशवसंतनिनोः प्रहिन्वान इत्यनाभावः ॥ २५ ॥

दी. अभीहाउ । सोमास आऽ३१ (ऊ. अ. ५५९) इति सन्तनिनि तृतीयायां प्रहाइहाउ । अत्र हि-मध्ये न आभावः । अभिसोमास आयवए । ए (ऊ. अ. ६३५) इत्याभीशवोत्तरे तृतीयायां प्राऽ२३४हाइ । अत्र हि-मध्ये न आभावाः ॥ २७ ॥

दीर्घनिषेधे पुरोजित्याम् ॥ २८॥

वि. & भा. पुरोजिती-प्रथमायां निषेधे (ऊ. ए. ४६०) सखायो दीर्घजीत्य-नाभावः ॥ २८ ॥

दी पुरोजितीवोऽ३अन्धसाः (ऊ. ए. ४६०) इति निषेधे प्रथमायां सखाऽ४-योदाइ । अत्र दी-मध्ये न आभावः ॥ २८ ॥

जम्भस्वरयोरनाभावस्तालव्यस्यान्तःपादिकस्य ॥ २९ ॥

---

1. B[4]A[1]L[2] पीयूद्वितीयायां V[2] ०पीयूषान्त्यायां for ०पीयूतृतीयायां
4. M[1-2] सोमान्त्यायां for सोमायां
5. A[2] om. प्रहिन्वान...०शवयोः S[1]M[1-2] आमीशवसन्तनिनोः for सन्तन्याभीशवयोः; M[1-2] trans. प्रहिन्वान इत्यनाभावः after सन्तनिनोः
6. V[2] संतन्यामीशवोत्तरयोः अभिसोमान्त्ययोः प्रहिन्वा for आभी०...प्रहिन्वान
12. KS[1-2]A[2]M[1-2] पुरोजित्यां for पुरोजितीप्रथमायां

वि. वर्कजम्भस्वरयोर्बृहन्निधनप्रथमयोरन्तःपदिकस्य तालव्यस्यानाभावः । वार्कजम्भे त्वामिद्ध्युत्तरयोः स्वरे प्रत्यस्मै—प्रथमयोः ॥ २९ ॥

भा. बृहन्निधने वार्कजम्भे प्रथमे च स्वरे अनाभावः तालव्यस्यान्तःपदिकस्य । यथा बृहन्निधने वार्कजम्भे (र. क्ष. १६१) त्वामिध्युत्तरयोः । स त्वं नश्चित्रगामश्वं रथ्यमिन्द्रेति च । तथा त्वंह्येहि चोत्तमायाम् । आपुरंदरं च क्रमावीति अनाभावः । स्वरे च प्रथमे (र. स.४५) प्रत्यस्मै—आद्ययोः विश्वानि वि इन्द्रंसुतेमिरिति च ॥ २९ ॥

दी. हाउत्वामिद्धिहवामाहाइ (र. क्षु. १६१) इति बृहन्निधने वार्कजम्भे द्वितीयायां सत्वंनश्चाइ । हाउ । अत्र चिमध्ये इकारस्य तालव्यस्यान्तःपदिकस्य न आभावः । तृतीयायां रथियमाइ । हाउ अत्र पूर्वोक्तप्रकारेण मि-मध्ये न आभावः । एप्रतियस्माइ । पिपीषताइ । हाउ (र. सं. ४५) इति प्रथमे स्वरे प्रथमायां विश्वानिवाइ । हाउ । अत्र पूर्वोक्तप्रकारेण विमध्ये न आभावः । एवमन्येष्वपि वार्कजम्भेषु प्रथमस्वरेषु च ॥ २९ ॥

दीर्घशब्दस्त्वा भवति पुरोजित्यां जम्भे ॥ ३० ॥

वि. पुरोजित्यां वार्कजम्भे (र. अ. ११४) सखायो दीर्घजीत्याभावः ॥ ३० ॥

भा. पुरोजित्यां जम्भे (र. अ. ११४) अपवादः ॥ ३० ॥

दी. हाउपुरोजितीवोअन्धसाः (र.अ.११४) इति वार्कजम्भे प्रथमायां सखायोदा । अत्र दी-मध्ये तु आभावः ॥ ३० ॥

स्वरे चा भवति सहावश्इन्द्रत्येष शब्द आनस्ते गन्तुमत्सर इत्यत्र ॥ ३१ ॥

---

1. A[2] om. वार्कजम्भे....प्रथमयोः
11. M[4] प्रथम for प्रथमे
14. S[3] अनाभावः for आभावः
15. PV[3] ०जित्यायां for जित्यां

वि. मत्स्यपायि-द्वितीयायां स्वरे (र. सं. ५१) सहावाऽइन्द्रेत्येष शब्दश्चा भवति ॥ ३१ ॥

भा. पूर्वपदापवादः । मत्स्यपायि-द्वितीयायां सहावाऽइन्द्रेत्याभावः ॥ ३२ ॥

दी. एहाउमत्तिसियापा । यितेमहाः (र. सं. ४१) इति द्वितीयस्वरे द्वितीयायां एहावानस्तेगा इत्यस्यां सहावाँआ । अत्र इ-मध्ये आभावः॥ ३१ ॥

अवृद्धमप्या भवति ॥ ३२ ॥

वि. वृद्धस्य तालव्यस्य अन्तःपदिकस्य आभाव उक्तः । इदनीमवृद्धस्याभावो हास्तोभप्रत्ययस्योच्यते ॥ ३२ ॥

भा. वृद्धस्यान्तःपदीकस्य तालव्यस्य हादिस्तोभप्रत्ययस्य आभाव उक्तः । अथेदानीमवृद्धस्याभावः हादिस्तोभप्रत्ययस्योच्यते । अपिशब्दादन्तःपदिकस्याभाव उच्यते वक्ष्यमाणेषूदाहरणेवु ॥ ३२ ॥

दी. वृद्धस्यान्तःपदिकस्य तालव्यस्य हादौ स्तोभे प्रत्यये आभावः उक्तः । इदानीमवृद्धस्यापि तालव्यस्याभावः । हादौ स्तोभे प्रत्यये । वक्ष्यमाणेषूदाहरणेषु ॥ ३२ ॥

जिती-योदी क्रौञ्चे ॥ ३३ ॥

वि. मध्यनिधने क्रौञ्चे पुरोजिती-सखायोदी इत्येते अवृद्धे अप्या भवतः ॥ ३३ ॥

भा. मध्यनिधने ऐडक्रौञ्चे पुरोजित्यां पुरोजितीसखायोदीति चा भवति ॥ ३३ ॥

---

1. A[2] om. मत्स्यपायिद्वितीयायां

10. B[4] after अवृद्धस्य adds: अपि

12. M[4] after प्रत्यये adds: परे

16. B[4] मध्ये for मध्य; B[4] आभावः for आ भवति

दी. [४३र ४५र] पुरोजिता । [२] होइ । (ऊ. सं. २३१) इत्यैडकौञ्चे [४ ५र] जिता इत्यत्र ति-मध्ये ईकारस्यावृद्धस्याभावः । [३४र५रर] सखायोदा । अत्र दी-मध्ये ईकारस्यावृद्धस्याभावः ॥ ३१ ॥

षिपरीतायां माधुच्छन्दसे ॥ ३४ ॥

वि. परीतोषिश्चायां माधुच्छन्दसे (ऊ. सं. २४५) षिशब्दोऽवृद्ध आ भवति ॥

भा. परीतायां पाधुच्छन्दसे (ऊ. सं. २४५) षिंशब्दः अवृद्धोऽप्या भवति ॥ ३२ ॥

दी. [३४र५रर] परितोषा । [२] होइ (ऊ. सं. २४५) इति माधुच्छन्दसे तोषा । अत्र षि-मध्ये ईकारस्यावृद्धस्याभावः ॥ ३४ ॥

वरिवः सन इन्द्रायां मार्गीयवे ॥ ३५ ॥

वि. & भा. उच्चा-द्वितीयायां मार्गीयवे वरिवोविदित्याभावः ॥ ३५ ॥

दी. [२ र १ १] उच्चौहोवा । [१] तेजाऽर (ऊ. स. ७९३) इति मार्गीयवे द्वितीयायां सन-इन्द्रायां वरा । हा । अत्र रि-मध्ये आभावः ॥ ३५ ॥

जारस्वारे पर्णे ॥ ३६ ॥

वि. & भा. कयानश्चित्रान्त्ययां स्वारे सौपर्णे अविताजरीत्याभावः ॥ ३६ ॥

दी. [२ र र] कयानश्चित्रआभूऽ३वात् (ऊ, ए. ३८२) इति स्वारसौपर्णे तृतीयायां [३ ४] अवि-[५र र]ताजरा । अत्र रि-मध्ये आभावः ॥ ३६ ॥

---

4. M[1-2] परीतोष्यां for परीतोषिश्चायां; KSA[2]My[1] trans. माधुच्छन्दसे after भवति; KS[1]M[1-2] आभावः for आभवति

10. भा. मध्यमायां for द्वितीयायां; M[1-2] सनइन्द्रायां for उच्चाद्वितीयायां; भा. वरिवः for वरिवोवित्

14. M[1-2] om. सौपर्णे अविता

मादिन्तमादिष्ठनोगि हाविष्कृते ॥ ३७ ॥

वि. हाविष्कृते त्वंसुतोमदिन्तम । स्वादिष्ठया । परिस्वानोगि । इत्येते शब्दा आभवन्ति ॥३७ ॥

भा. हाविष्कृते त्वꣳसुतोमदि । स्वादिष्ठयामदि । परिस्वानोगि । एतेष्वाभावः ॥ ३७ ॥

दी. त्वꣳसोमासिधा । हाउरायूः (ऊ. द. १९५) इति हाविष्कृते द्वितीयाय त्वꣳसुतोमदाहाउन्तामाः । अत्र दि-मध्ये आभावः । स्वादिष्ठयामदाहाउष्ठाय (ऊ. ए. ४४१) इति हाविष्कृते मदा । अत्र दि-मध्ये आभावः । परिसुवानोगाहाउरायिष्ठाः (ऊ. अ. ५८५) इति हाविष्कृते नोगा । अत्र गि-मध्ये आभावः । ३७ ॥

यित्नवेऽश्विनोर्व्रतोत्तरे ॥ ३८ ॥

वि. अश्विनोर्व्रतोत्तरे पुरोजित्यां (र. प्रा. १४०) सुताय मादयित्नव इत्याभावः ॥ ३६ ॥

इति फुल्लसूत्रविवरणे आभावे तृतीयस्य एकादशः खण्डः ॥ ११ ॥

भा. उत्तरे अश्विनोर्व्रते (र. प्रा. १४०) यित्नवे इत्याभावः ॥ ३६ ॥

इति पुष्पसूत्रभाष्ये तृतीयस्य एकादशी कण्डिका समाप्ता ॥ ११ ॥

दी. पुरोजितीवोअन्धसाहोहाइ (र. प्रा. १४०) इत्यश्विनोर्व्रतोत्तरे सुतायमादयित्नवाहोहाउ । त्नवा । इत्यत्र वे-मध्ये आभावः ॥ ३६ ॥

---

2. A² om. हाविष्कृते

10. M⁴L¹ इत्नवे for यित्नवे

11. A³ om. अश्विनोर्व्रतोत्तरं

इति फुल्लदीपे सप्तमप्रपाठकस्य एकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः

पदान्तश्चा भवति ॥ १ ॥

वि. पूर्वमन्तःपदिकस्याभव उक्तः। इदानीं पदान्तस्याभावः उच्यते वक्ष्यमाणेषूदाहरणेषु ॥ १ ॥

भा. अन्तःपदिकानामाभाव उक्तः। अथेदानीं पदान्तीयस्याभाव उच्यते ॥

दी. अन्तःपदिकानामाभाव उक्तः। इदानीं पदान्तस्याभाव उच्यते। **पदस्यान्ते** वर्तमानस्तालव्यश्चा **भवति**। वक्ष्यमाणेषूदाहरणेषु ॥ १ ॥

मातेऽग्ने तमद्यायां कमश्वे ॥ २ ॥

वि. अग्नेतमद्यायां (ऊ. प्रा. ८२६) साकमश्वे ऋध्यमात इति पदान्तस्याभावः ॥ २ ॥

भा. स्वारसाकमश्वे अग्नेतमद्यायाम् (ऊ. प्रा. ८२६) ऋध्यमात इत्याभावः ॥

५र् २ ४ र ५ ५ र

दी. अग्नेताऽ३मद्याश्वाऽ६न्ना (ऊ. प्रा. ८२६) इति साकमश्वे प्रथमायां माताऽ२३हाऽ३४३इ। अत्र ते-मध्ये एकारे पदान्ते आभावः ॥ २ ॥

ध्यै नौ वारोत्तरे ॥ ३ ॥

---

3. R before पदान्तश्च adds: इदानीं

10. A[2] om. अग्ने....साकमश्वे; S[1-2] om. साकमश्वे

12. B[4] after इत्याभावः adds: स्पृशा२३३मुध्यामाता२३३हा२३३३ई। पदान्तीयस्य एकारस्य आभावः।

वि. स्वासु **वारोत्तरे** वन्दध्या इत्याभावः ॥ ३ ॥

भा. उत्तरे वारवन्तीये स्वासु वन्दध्या इति आभावः ॥ ३ ॥

दी. **अश्वन्नत्वाऔहोहाइ** (ऊ. ए. ४९१) इति **योनौ उत्तरे वारवन्तीये** **वन्दाऽध्या२३४हाइ** । अत्र ध्यै-मध्ये आभावः ॥ ३ ॥

ज्ञीये स्यन्दते कृण्वते चर्षणीरधीत् ॥ ४ ॥

वि. **यज्ञायज्ञीये पुरोजित्यां** (ऊ. सं. ३१८) **परिप्रस्यन्दते अयंपूषान्त्ययोः** (ऊ. अ.५८६) **सोमसः कृण्वते यः पश्च चर्षणीरभि** इति । **अभिप्रियाण्यन्त्यायामधित्रिपृष्ठम्** (ऊ. अ. ६२८) **परित्याद्यायां** (ऊ. अ. ६६१) **योदेवान् विश्वाम्** । इत्येते शब्दा आभवन्ति ॥ ४ ॥

भा. **यज्ञायज्ञीये पुरोजि**-द्वितीयायां (ऊ. सं. ३१८) **परिप्रस्यन्दत** इत्याभावः । तथा **अयंपूषो**त्तरयोः (ऊ. अ. ५८६) **सोमासः कृण्वते यः पश्च चर्षणीरिति** च । **अभिप्रियाणि** (ऊ. अ. ६२८) तृतीयायाम् **अभी ऋतस्य दोहना अनूषताधी**त्याभावः । **परित्यᳫंहर्यत**–(ऊ. अ. ६६१) प्रथमायां **यो देवान् विश्वाम्** इत्याभावः ॥ ४ ॥

दी. **पुरोऽ५जि** । **ताऽ३इन्द्रोऽ३अन्धासाः** (ऊ. सं. ३१८) इति **यज्ञायज्ञीये** द्वितीयायां **स्यन्दाऽ२३ता** । अत्र ते-मध्ये आभावः । **आयाऽ५इपू** । **षाऽ३राऽ३यिभागाः** (ऊ. अ. ५८६) इति **यज्ञायज्ञीये** द्वितीयायां **कृण्वाऽ२३ता** । अत्र ते-मध्ये आभावः । तृतीयायां **यः पाऽ२श्च** । **चर्षाऽ२३णा** । अत्र णीमध्ये आभावः । **अभाऽ५इप्रि** । **याऽ३णाऽ३इपवताइ** (ऊ. अ. ६२८) इति यज्ञायज्ञीये तृतीयायां **तआऽ२३धा** । **हुम्माइ** । अत्र धी-मध्ये आभावः । **पराऽ५इत्यम्** । **हाऽ३र्याऽ३तᳫंहाराइम्** (ऊ. अ. ६६१) इति यज्ञायज्ञीये प्रथमायां **विश्वाऽ२३इम् आ** । अत्र इ-मध्ये आभावः ॥ ४ ॥

---

2. B[4] after आभाव; adds: वंदा३ध्या२३४३हा३ई । पदान्तीयस्य ऐकारस्य आभावः ।
7. My[1]KPS[1-2] om. इति; M[1-2] om. अभि
13. B[4] after आभावः । adds: इच्छरकारस्य

पार्षि हाविष्कृते वरिवोधायाम् ॥ ५ ॥

वि.&भा. स्वादिष्ठोत्तमायां हाविष्कृते (ऊ. ए. ४४१) पर्षीत्याभावः ॥ ५ ॥

दी. स्वादिष्ठया मदाहाउष्ठया (ऊ. ए. ४४१) इति हाविष्कृते तृतीयायां वरिवोधायां पर्षाऽ२होऽ१इ । अत्र षिमध्ये आभावः ॥ ५ ॥

तुव्यर्भीनः कौत्से ॥ ६ ॥

वि. अभीनोवाद्यायां (ऊ. द. १६४) तुविद्युम्नमित्याभावः कौत्से ॥ ६ ॥

भा. अभीनोवा-प्रथमायां ऐडकौत्से (ऊ. द. १६४) तुविद्युम्नमित्याभावः ॥ ६ ॥

दी. अभीहीनोऽ२३ । वाजसतममीया (ऊ. द. १६४) इत्यैडकौत्से प्रथमायां तूवाऽ३हाइ । अत्र वि-मध्ये आभावः ॥ ६ ॥

वृधेऽस्मान् पिबासुतायां पृष्ठजमवर्तयोः ॥ ७ ॥

वि. पिबासुतायां (सा. १५२१-२) पृष्ठजमदग्नेरभीवर्तयोः आपिर्नोबोधिसधमाद्येवृध इत्याभावः ॥ ७ ॥

दी. पिबाऽ३सुतस्यरसिनाः (ऊ. अ. ६४४) इति पृष्ठे आपिर्नोबोधिसधामद्ये वृधाऽ२३होइया । वृधा । अत्र धे-मध्ये आभावः । पिबासुतस्यरसिनोमत्स्वाहाउ (ऊ. स. ७१५) इति जमदग्नेरभीवर्ते दियेवृधाऽ३ । अत्र धे-मध्ये आभावः ॥ ७ ॥

पवन्तेऽभिसोमायां मैधातिथे ॥ ८ ॥

वि. अभिसोमायां (ऊ. सं. ३६८) मैधातिथे पवन्ते मद्यमित्याभावः ॥ ८ ॥

---

2. KA[2]S[1-2] My[1] पर्षिराध for पर्षीति

5. M[4]EL[1] तुव्यभि for तुव्यभी

15. E after ०वर्ते adds: प्रथमायां

17. M[1-2] om. अभिसोमायां मैधातिथे

भा. मैधातिथे (ऊ. सं. ३६८) अग्निसोमाद्यायां पवन्ते मद्यमित्याभावः ॥ ८ ॥

२ २ १ २ ३ २

दी. अग्निसोमोहाइ । सआऽ३याव्ाः (ऊ. सं. ३६८) इति मैधातिथे पवन्ताऽ२होऽ१इ । अत्र ते-मध्ये आभावः ॥ ८ ॥

निष्कृतं रुणसाम्नि वृषोअचिक्रायाम् ॥ ९ ॥

बि. मृज्यमानान्त्यायां (ऊ. द. १०५) देवानां सोम पवमान निष्कृतमित्याभावो वरुणसाम्नि ॥ ९ ॥

भा. मृज्यमानतृतीयायां वरुणसाम्नि (ऊ. द. १०५) निष्कृतमित्याभावः ॥ ९ ॥

२ २ १ २

दी. मृज्यमानस्सुहस्त्योवा (ऊ. द- १०५) इति वरुणसाम्नि तृतीयायां

१ १

वृषोअचिक्रायां ननाऽ२३हाइ । अत्र नि-मध्ये आभावः ॥ ९ ॥

परीतायां च परिस्रव ॥ १० ॥

वि. परीतोष्यां (ऊ. ए. ४८२) नूनं पुनानो अविभिः परीत्याभावो वरुणसाम्नि ॥ १० ॥

भा. वरुणसाम्न्येव परीतोषि-तृतीयायां नूनं पुनानो अविभिः परिस्रवेत्याभावः ॥

२ २ २ २ १ २ १ २

दी. परीतोषिश्चतासुतोवा (ऊ.ए.४८२) इति वरुणसाम्नि, द्वितीयायां पराऽ२३हाइ । अत्र रि-मध्ये आभावः ॥ १० ॥

अधि सोम उष्त्रा वाम्रे ॥ ११ ॥

---

6. M^{1-2} after ०साम्नि add: वृषोऽचिक्रायाम्

7. B^{4} after आभावः adds: इकारस्य

11. M^{1-2} ०तोषीमाध्यमायां च for ०तोष्यां; M^{1-2} परिस्रवेत्या० for परीत्या०

13. B^{4} after आभावः adds: इकारस्य

वि. भा. सोमउष्वाद्यायां वाम्रे (ऊ. द. ८७) अधिष्णुभिरित्याभावः ॥११॥

३र ४ र ५र २ २
दी. सोमउष्वाणस्सो । हाऽ३हाऽ३इ (ऊ. द. ८७) इति वाम्रे प्रथमायां अधाहोऽ२इ । अत्र धि-मध्ये आभावः ॥ ११ ॥

सुष्वाणायां चान्धीगवे ॥ १२ ॥

वि. सुष्वाणायां चान्धीगवे चितानागोरधीत्याभावः ॥ १२ ॥

भा. आन्धीगवे (ऊ. अ. ६०९) सुष्वणोसोऽश्वेत्यस्य चाभावः । चशब्दादधिशब्दश्च । अधि त्वचीति ॥ १२ ॥

२र र २
दी. सोमाःपवन्तआऽ१इन्दावाः (ऊ. अ. ६०९) इत्यान्धीगवे तृतीयायां सुष्वाणायां गोराऽ२३धा । अत्र धि-मध्ये आभावः ॥ १२ ॥

अभिप्र ज्ञीये चोक्तः ॥ १३ ॥

वि. अभिप्रियाणि ज्ञीये (ऊ. अ. ६२८) तृतीयायामधित्रिपृष्ठ इत्याभावः । पूर्वसूत्रेणोक्तस्य विधेरनुवादोऽयम् ॥ १३ ॥

भा. अभिप्रि-तृतीयायां च यज्ञायज्ञीये (ऊ. अ. ६२८) अधित्रिपृष्ठेत्याभावः ॥

४ ३ ४ २ ४ ५
दी. अभाऽ५इप्रि । याऽ३णाऽ२इपवताइ (ऊ. अ. ६२८) इति तृतीयायां यज्ञायज्ञीये तआऽ२३धा । अत्र धि-मध्ये आभाव उक्तः ॥ १३ ॥

कृपे स्वासु नैपे ॥ १४ ॥

---

1. वि. उष्वायां, P उष्वान्त्यायां for उष्वाद्यायां; B^4 after आभावः adds: अधा३हो३३३इत्येकारस्य

7. B^1 after त्वचीति adds: इकारस्य

11. M^{1-2} trans. ज्ञीये after तृतीयायां

12. $KS^{1-2}My^1$ after अयम् add: सूत्रः; A^2 सूत्रम् ; M^{1-2} अनपादानमिदं सूत्रम् for अनुवादोऽयम्

13. B^4 after आभावः adds: इकारस्य

वि· & भा· खासु नैपातिथे (ऊ. द. १५५) द्वितीयायां यद्वा रुमे रुशमे श्यावके कृप इत्याभावः ॥ १४ ॥

दी. यदिन्द्रप्रागपागुदाऽ३गे (ऊ. द. १५५) इति नैपातिथे द्वितीयायां वकाइ-कृपाऽ२३ । अत्र पे-मध्ये आभावः ॥ १४ ॥

विद इन्द्रसुतायामुद्वंशीये ॥ १५ ॥

वि. & भा. इन्द्रसुतायामुद्वंशीये (ऊ. स. ७२०) विदे वृधस्येत्याभावः ॥ १५ ॥

दी. इन्द्रसुतेषुसोमेष्वा (ऊ. स. ७२०) इत्युद्वंशीये विदाऽ१होऽ१इ । अत्र दे-मध्ये आभावः ॥ १५ ॥

मधुनिधने त्वाचि सुष्वाणायाम् ॥ १६ ॥

वि. सुष्वणासोऽन्त्यायां मधुश्चुन्निधने (ऊ. द. ११५) गोरधि त्वची-त्याभावः ॥ १६ ॥

भा. सोमाःपवन्तायां मधुश्चुन्निधने ऊ. द. ११५) चितानागोरधि त्वचीत्या-भावः ॥ १६ ॥

दी. सोमाःपवन्तइन्दवाऽ३ए (ऊ. द. ११५) इति मधुश्चुन्निधने तृतीयायां सुष्वाणायां चितानागोऽ३राधित्वचाऽ३ । अत्र चि-मध्ये आभावः ॥ १६ ॥

यित्नवे पुरोजित्याम् ॥ १७ ॥

1· KA^2S^{1-2} trans· खासु after द्वितीयायां; M^{1-3} मध्यमायां for दितीयायां; M^{1-3} om· यद्वा-रु मेरु शमे श्यावके

9. M^{1-2} मधुश्चुन्निधने for मधुनिधने; M^4 ववचित् for त्वचि

वि. **पुरोजित्याद्यायाम्** (ऊ.सं. ३१७) मधुश्चुन्निधने **यित्नव** इत्याभावः ॥१७॥

भा. मधुश्चिन्निधन (ऊ. सं. ३१७) एव **पुरोजित्याद्यायां** सुताय **मादयित्नव** इत्याभावः ॥ १७ ॥

२ र र र २ र र
दी. **पुरोजितीवोअन्धसाऽ२ए** (ऊ. सं. ३१७) इति मधुश्चुन्निधने **सुतायमाऽ३-दायित्नवाऽ३** । अत्र **वे**-मध्ये आभावः ॥ १७ ॥

प्रते शैखण्डिने १८ ॥

वि. **प्रतआश्विनीप्रथमायां शैखण्डिने** (ऊ. क्षु. ९०६) **प्रतशब्दस्याभावः** ॥

भा. **शैखण्डिने** (ऊ. क्षु. ९०६) **प्रत आश्विनीति प्रतेशब्दस्याभावः** ॥ १८ ॥

दी. **प्रताऽ३होइ** (ऊ. क्षु. ९०६) इति **शैखण्डिने प्रताऽ३** । अत्र **ते**-मध्ये आभावः ॥ १८ ॥

पातवे नौ संहिते ॥ १९ ॥

वि. स्वासु **संहिते** (ऊ. द. ८) **इन्द्राय पातव** इत्याभावः ॥ १९ ॥

भा. **स्वादिष्ठाद्यायां इन्द्राय पातव** इत्याभावः ॥ १९ ॥

१र २र
दी. **स्वादिष्ठयाम** (ऊ. द. ८) इति **योनौ संहिते** तवाऽ२३ । अत्र **वे**-मध्ये आभावः ॥ १९ ॥

शस्तये तन्त्वामदायां संहिते ॥ २० ॥

---

1. M[1-2]S[1-2] trans. मधुश्चुन्निधने after पुरोजित्यां
2. R[4] after आभावः adds: एकारस्य
8. V[2] om. अश्विनीति प्रतेशब्दस्य and adds: इति before आभावः
16. A[2] om. संहिते

वि. तन्त्वामदायां संहिते तव प्रशस्तये मह इत्याभावः ॥ २० ॥

भा. अचिक्रदद्वृषा हरिरित्यन्त्यायां संहित (ऊ. प्रा. ८४१) एव तव प्रशस्तये इत्याभावः ॥ २० ॥

दी. अचिक्रदद्वृ । षाऽ२हराइः (ऊ. प्रा. ८४१) इति संहिते तृतीयायां तन्त्वामदायां स्तयाऽ२३ । अत्र ये-मध्ये आभावः ॥ २० ॥

गविष्ट्येभिद्यु च्यावने ॥ २१ ॥

वि. & भा. अभिद्युम्न-तृतियायां च्यावने (ऊ. द. ९१) जिन्वन् गविष्टय इत्याभावः ॥ २१ ॥

दी. अभाऽ२३४इ । द्युम्नम् (ऊ. द. ९१) इति च्यावने तृतीयायां ष्टायाऽ२३हाऽ३४३इ । अत्र ये-मध्ये आभावः ॥ २१ ॥

दिवे त्वाष्ट्रीसाम्नोः सहस्रधारायाम् ॥ २२ ॥

वि. सहस्रधारायां त्वष्ट्रीसाम्नोः सखेन्द्रस्य दिवेदिव इत्याभावः ॥ २२ ॥

भा. स्वारयोस्त्वाष्ट्रीसाम्नोः सुतासोमान्त्यायां सखेन्द्रस्य दिवेदिव इत्याभावः ॥

दी. सुता सोमाऽ३हा । द्युमत्तामाऽ२ः (ऊ. अ. ५९३) इति स्वारत्वाष्ट्रीसाम्नि तृतीयायां दिवाऽ३होऽ२३४वा । अत्र वेमध्ये आभावः । सुता । सोमाऽ३ । हाऽ३हा (ऊ. अ. ५९४) इति त्वाष्ट्रीसाम्नि तृतीयायां दिवाऽ३होऽ२३४ । वा ।

---

1. M[1-3] om. तन्त्वामदायां संहिते
2. V[2] अचिक्रदन्त्यायां for अचिक्रदद्वृषाहरिरित्यस्यां; V[2] trans. अचिक्रदन्त्यायां after संहिते and om. एव; B[4] om. तव
7. PV[2] trans. अभिद्युम्नतृतीयायां after च्यावने
12. A[2]M[1-3] सुतासोमान्त्यायां for सहस्रधारायां
1. V[2]A[1] स्वार for स्वारयोः; B[4] after आभावः adds:- दिवा३३हो३३३३ । वा३ । द्वितीयेऽप्येवम् एकारस्य
16. R before त्वाष्ट्री ins. स्वार

अत्र वे-मध्ये आभावः ॥ २२ ॥

मादे नौ रेवतीषु ॥ २३ ॥

वि. स्वासु **रेवतीषु** (र. स. ६३) **रेवतीर्नःसधमाद** इत्याभावः ॥ २३ ॥

भा. **रेवतीर्नः** (र. सं. ६३) इत्याद्यायां **रेवतीर्नः सधमाद** इत्याभावः ॥

दी. **हाउरेवा** । **तीर्नाः** (र. सं. ६३) इति **योनौ रेवतीषु** प्रथमायां **सधमादा**ऽ२ । अत्र दे-मध्ये आभावः ॥ २३ ॥

अतिध्यमायां महानाम्नीषु ॥ २४ ॥

वि.&भा. **महानाम्नीषु** छान्दसीषु **मध्यमायां** सनःस्वर्षदतीत्याभावः ॥ २४ ॥

दी. एऽ२ । **दिवामघवन्विदाः** (अ. ग्रा. ६. २. २९) इति **महानाम्नीषु** मध्यमायां **सनःस्वर्षदता**ऽ२३ । अत्र ति-मध्ये आभावः ॥ २४ ॥

अभि श्यैते तदिदासतृतीयायां ॥ २५ ॥

वि.&भा. **तदिदास**–(ऊ. ए. ५२६) **तृतीयायां** अदस्सुमधुमधुनाभीत्याभावः ॥ २४ ॥

इति अजातशत्रुभट्टोपाध्यायविरचिते फुल्लसूत्रविवरणे आभावे तृतीयस्य प्रपाठकस्य द्वादशः खण्डः ॥ १२ ॥

तृतीयः प्रपाठकः समाप्तः ॥ ३ ॥

---

3. A[2] om. स्वासु रेवतीषु

4. B[4] after आभावः adds :-हाइऋरे३वा३ । तीर्नां३ः । इहा३ सधमा२दा३३

8. B[4]P trans. महानाम्नीषु after छान्दसीषु; V[2] महानाम्नीविदामध्यमायां for महानम्नीषु···मध्यमायां

12. PB[4] तदिदासान्त्यायां for तदिदासतृतीयायां

13. B[1] after आभावः adds:-मधुमधू३ना३छूभा३हुं३मा६ई । अत्र इकारस्य आभावः

इति उपाध्याय-अजातशत्रुकृते पुष्पसूत्रभाष्ये तृतीयस्य प्रपाठकस्य द्वादशी कण्डिका ॥

तृतीयः प्रपाठकः समाप्तः ॥ ३ ॥

---

३ ४३२४ ५ ३२२ ३२ ४ ५
दी. तदिदासभुव । नेषूऽ३४ औहोवा (ऊ. ए. ५२६) इति श्यैते तृतीयायां
१ २ २
मधुमधूना३भा । अत्र भि-मध्ये नाभावः ॥ २४ ॥

इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नन्हाभाइ-द्वितीयनाम्ना कृते फुल्लदीपे सप्तमप्रपाठस्य द्वादशः खण्डः ॥ १२ ॥

सप्तमः प्रपाठकः समाप्तः ॥ ७ ॥

---

3. M[4] after तृतीयायां adds:-स्तोत्रियायां स्वादो स्वादीयायां

5. M[4] रामकृष्णनामधेयेन for रामकृष्णेन; M[4] after नाम्ना adds: विद्वद्वरेण

7. M[4] after समाप्तः adds: श्रीरस्तु. The Ms. M[4] ends here; My[3] after the colophon: adds: श्रीगङ्गाविश्वेश्वराभ्यां नमः ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥